नामनामिनोर्लोके भेदस्य अप्रसिद्धत्वात् प्रस्तुतस्य ओङ्कारस्य ब्रह्मविवर्त्तत्वात् । विवर्त्तानाञ्च विवर्त्ताधिष्ठानेन भेदशून्यत्वात् अत ओङ्कारं ब्रह्मनामधेयं ब्रह्मदृष्ट्याह ओमिति ।

End. अथ वा संविशति आत्मनात्मानमितीदं फलवाक्यमस्तु ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यानन्दात्मपूज्यपादशिष्यशङ्करभगवत्-कृतिमाण्डुक्योपनिषद्दीपिका समाप्ता ।

विषयः । माण्डुक्योपनिषदो व्याख्यानम् ।

No. 2560. उपदेशामृतम् । Substance, country-made paper, 13 × 4½ inches. Folium, 1. Lines, 12. Extent, 43 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Verse. Incorrect.

Upadeśámṛita. Arguments for and against asceticism, addressed to Jíva Gos'vámí, by Rúpa Gos'vámí.

Beginning. वाचो वेगो मनसः क्रोधावेग उदरोपस्थवेगश्च ।
एतान् वेगान् यो विसहेत सर्व्वमपीमां पृथिवीं स शुष्यात् ॥
जन्याचारः प्रथाश्रश्च जल्पनोऽनियमग्रहः ।
+ + सङ्गश्च लौल्यञ्च षड्भिर्भक्तिर्विनश्यति ॥

End. कृष्णस्योच्चैः प्रणयवसतिः प्रेयसीभ्योऽपि राधा-
कुण्डं चास्या मुनिभिरभितस्तादृगेव व्यधायि ।
तत्प्रेष्ठै + + + सुलभैः किं पुनर्भक्तिभाजां
तत्प्रेम्णे + सकृदपि सरः स्नातुराविष्करोति ॥

Colophon. इति श्रीमद्रूपगोस्वामिना विरचितमुपदेशामृतं समाप्तं ॥

विषयः । जीवगोस्वामिनमुद्दिश्य वैराग्यस्य प्रतिकूलानुकूलचित्तदृत्यादिकथनं ।

No. 2561. स्मृतिरत्नाकरः स्मृतिसङ्गृहः । Substance, country-made paper, $12\frac{1}{2} \times 5$ inches. Folia, 65. Lines, 15 on a page. Extent, 3,660 ślokas. Character, Nágara. Date, Sm. 1893. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Prose and verse. Correct.

Smṛiti-ratnákara. The colophon assigns this name to the work, but it is avowedly an abridgement of a work of that name, by one Veṅkaṭanátha *alias* Vaidika Sárvabhauma, son of Raṅganátha and grandson of Sarasvatívallabha. The subject is a digest of the Smṛitis, on duty. There are two other works current of this name of which one has already been noticed under No. 2180. (Vol. VI, p. 240.)

Beginning. ॐ मनु-याज्ञवल्क्य-पराशर-व्यास-दक्ष-गौतम-सम्वर्त्तकापस्तम्ब-कात्यायन-बौधायन शातातप-शाण्डिल्य-हारीताचेय-वासिष्ठाश्वमेधिकाद्याः स्मृतयः । विज्ञानेश्वर-स्मृत्यर्थसार-स्मृतिचन्द्रिका-स्मृतिरत्न-स्मृतिमाधवीयाखण्डार्क-स्मृतिसारसमुच्चयेतिहाससमुच्चयेभ्यः सङ्कृत्योऽयं स्मृतिरत्नाकरः । आग्नेयाश्रद्धत्ते अथातः स्नानगणाननन्तरान्व्याख्यास्यामः ।

End. हारीतः ।
वेदोदितं स्वकं कर्म्म नित्यं कुर्य्यादतन्द्रितः ।
तद्धि कुर्व्वन् यथाशक्ति प्राप्नोति परमां गतिं ॥
कृत्याकृत्यविवेकदं श्रुतिशतज्ञेयार्थगर्भं सता-
माचारक्रमबोधकं भ्रमतमोविध्वंसचन्द्रोदयम् ।
त्रैवर्गार्थहितप्रकाशकमितं युष्मद्भवे मत्कृतं
सन्तो निर्म्मदमत्सराः कलयत स्मृत्यादिरत्नाकरम् ॥

किञ्चिन्मयोक्तं स्मृतिषूक्तमुक्तं भीतो + + दैदिकसार्व्वभौमः।
ग्रन्थैर्युतं षष्टिशतैश्च शिष्टाचाराकरं श्रीलयत प्रबन्धं॥
सरखतीवल्लभसौरिपोचः श्रीरङ्गनाथस्य सुतः सुशीलः।
श्रीवेङ्कटेशो हरितार्क दृत्यं प्राचाङ्किकं वैदिकसार्व्वभौमः॥

Colophon. इति हारीतकुलतिलकसरखतीवल्लभपौचस्य श्रीरङ्गनाथार्य्यपुचस्य वैदिकसार्व्वभौमापरनामधेयस्य श्रीवेङ्कटनाथस्य कृतिषु स्मृतिरत्नाकरो नाम स्मृतिसङ्ग्रहः समाप्तः। स एव आथाभिः संचिप्य लिखितः। नलविकलः। संवत् १८९३। भाद्र।

विषयः। (वेङ्कटनाथकृतस्मृतिरत्नाकरस्य सङ्ग्रहोऽयम्।) तच्च अष्टादशसूचनामानि। कली गोवध-समुद्रयान-विधवाविवाहादिवर्জ্জननिरूपणं। श्रुत्यादीनां बलवत्त्वादिनिरूपणं। मन्वादिनिरूपणं। मन्वादिविरुद्धधर्म्मस्य त्याज्यत्वकथनं। पूर्व्वजैरनुष्ठितो धर्म्मः कार्य्य इति निरूपणं। तेषां धर्म्मव्यतिक्रमसाहसादौ तेजोविशेषाद्दोषाभावकथनं। स्मार्त्तधर्म्मं विना वैदिककर्म्मशुद्धिर्न भवतीतिकथनं। पुराणेषु सात्त्विकादिभेदकथनं। स्वशाखोक्तकर्म्मकर्त्तव्यतादिव्यवस्थापनं। मुख्याभावे प्रतिनिधिग्रहणव्यवस्था। स्वगृह्योक्तमन्त्राज्ञाने प्रणवव्याहृतिविधानं। कली निषिद्धधर्म्मनिरूपणं। ब्राह्मणब्रुवब्रह्मबन्धुप्रभृतीनां लक्षणं। शाखाखण्ड-दशलादीनां लक्षणं। विड्वालपशुप्रभृतिदशविधब्राह्मणलक्षणं। कटिसूत्रं विना कर्म्माद्यनुष्ठाने दोषकथनं। पञ्चविधनग्नलक्षणं। त्रिविधदेवलकलक्षणं। कुकट-वैतुकादीनां लक्षणं। वैदिकपूजायां न देवलकत्वमितिकथनं। शौचविधानं। दिव्य-वायव्य-आग्नेयादिषड्विधस्नाननिरूपणादिकं। उत्सवादिषु स्पर्शदोषाभावकथनं। तर्पनविधानादिकं। कापिलस्नानविधिः। वल्कलोपवीतादिधारणविधिः। ऊर्द्धपुण्ड्रादिविधानं। त्रिपुण्ड्रधारणनिषेधः। तुलसीमालाधारणावश्यकता। सन्ध्योपासनविधिः। मुद्रादिकथनं। गायत्रीध्यानादिनिरूपणं। प्रोक्षणविधिकीर्त्तनं। होमविधिः। पुनराधानविधिः। ब्रह्मयज्ञविधानं। समिधाद्याहरणविधिः। कुशोत्पाटनविधिः। पौष्यवर्गनिरूपणं। स्थावरशाखीनभेदेन द्विविधवृक्षनिरूपणं। गार्हस्थ्यधर्म्मनिरूपणं। दानप्रतिग्रहादिविधानं। द्रव्यशुद्धिनिरूपणं। उत्पातशान्तिविधानं। वापीकूपतड़ागादौ जलादिपानविधानं। माध्याह्निककृत्यनिरूपणं। करतीर्थकथनं। माध्याह्निकसन्ध्याविधिः। पूजाविधिः। शालग्रामशिलामाहात्म्यकीर्त्तनं। मार्गशीर्षार्चनविधिः। नित्यपूजाविधानं। नैवेद्योपयोगिद्रव्यनिरूपणं। भक्ष्याभक्ष्यद्रव्यनिरूपणं। श्राद्धे विहिताविहितद्रव्यकथनं। व्रतविषये तन्निरूपणादिकं। वैश्वदेवादिविधिः। साग्निनिरग्निब्राह्मणकृत्यनिरूपणं। भिक्षादानादिविधिः। भोजनविधिः। उच्छिष्टभोजनादिनियमाः। चन्द्रसूर्य्यग्रहणादौ भोजनकालनियमः। स्नातकव्रतविधिः। सायंसन्ध्याविधिः। नैशकृत्यनिरूपणञ्च।

No. 2562. स्मृत्यर्थसारः । Substance, country-made paper, 12 × 5 inches. Folia, 70. Lines, 7 on a page. Extent, 1,678 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Radhikáprasáda Sen. Appearance, old. Prose and verse. Correct.

Smṛityartha-sára. A digest of the Smṛitis on duty. By Śrídhara Áchárya, son of Vishṇu Bhaṭṭa Upádhyáya. The work in its entirety includes all the three branches of the Smṛiti, but the codex is limited to duty.

Beginning. कामधेनो प्रदीपा + कल्पद्रुचन्दनादिषु ।
शम्भुद्रविणकेदारलोलुटाद्येषु भाषितं ॥
मन्वाद्यनेकस्मृतिषु व्याख्यातप्रतिपादितं ।
स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये ॥

End. इदं स्मृत्यर्थसारन्तु मूलस्मरणहेतुना ।
नावमान्यं + तामूलं पश्यन्त्येव बहुश्रुताः ॥
इदं स्मृत्यर्थसाराख्यं नागविष्णार्य्यसूनुना ।
यज्ञना श्रीधराचार्य्येण स्मृत्यर्थविदा ततं ॥

Colophon. इति विश्वामित्रमहामाहेश्वरनागभट्टविष्णुभट्टोपाध्यायसूनुना यज्ञना श्रीधराचार्य्येण श्रुतिस्मृत्यर्थविदा कृते आचाराध्यायः समाप्तः ॥

विषयः । सामान्यपरिभाषाकथनं । गर्भाधानादिनिरूपणं । षष्ठादिसंस्कारकथनं । उपवीतविधिः । अजिनादिविधिः । उपकरणकालः । अध्यापनारम्भकथनं । नमस्कारविधिः । अनध्यायगणना । उत्सर्जनविधिः । विवाहप्रकरणम् । तत्र वागदत्तायाः पुनर्दानविधिकीर्त्तनं । संसर्गात् पूर्व्वं मृतभर्त्तृकायाः पुनर्दानविवाहविधानं । अन्यमतेन आगर्भधारणात् मृतभर्त्तृकायाः पुनर्व्विवाहविधानं । अम्भवधिरादिभ्यो दत्तायाः कन्यायाः पुनर्दानादिविधानं । गोत्रप्रवरादिनिरूपणं । आह्निकनिरूपणं । मूत्रपुरीषयोः शौचविधिः । आचमनविधिः । स्नानविधानं । तर्पणविधिः । अभ्यङ्गविधिः । सन्ध्यावन्दनविधिः । होमविधिः । होमद्रव्यनिरूपणं । दर्भग्रहणविधिः । स्रुचादिविधिः । प्रतिनिधिविचारः । पञ्चहोमविधिः । देवतार्च्चनविधिः । मध्याह्नस्नानविधिः । पञ्चमहायज्ञविधिः । श्राद्धविधिः । तत्कालनिरूपणं । हविष्यद्रव्यनिरूपणं । काम्यश्राद्धकथनं । दृद्धिश्राद्धकथनञ्च । सपिण्डनादिविधिः । खण्डतिथिनिर्णयः । व्याप्तिनिर्णयः । युगादिमन्वादिनिर्णयः । नक्षत्रनिर्णयः । संक्रान्तिनिरूपणं । पर्व्वकालनिर्णयः । एकादशीनिर्णयः । निषिद्धान्तरनिर्णयः । मलमासकार्य्याकार्य्यनिर्णयः । भक्ष्याभक्ष्यनिरूपणं । भोजनविधिः । शयनविधिः । द्रव्यशुद्धिकथनं । तत्र पात्रशुद्धिः । कन्दमूलफलशाकादिशुद्धिः । वस्त्रादिशुद्धिः । धान्यशुद्धिः । तृणकाष्ठादिशुद्धिः । पुस्तकशुद्धिः । भूमिशुद्धिः । प्रतिमाशुद्धिः । उदकशुद्धिः । कूपादिलक्षणं । अन्नशुद्धिः । शरीरशुद्धिनिरूपणञ्च ।

No. 2563. उपाकर्म्मपद्धतिः। Substance, country-made paper, 10½ × 4½ inches. Folia, 26. Lines, 8 on a page. Extent, 549 ślokas, Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose. Correct.

Upákarma-paddhati. Rituals for the sacrifice of animals at particular ceremonies. Anonymous. The rules given are founded on the Kátyáyana-sákhá of the White Yajur Veda.

Beginning. तीर्थराजं नमस्कृत्य ऋषीन् सप्तविधानपि।

अध्यायोत्सर्गोपाकर्म्मपद्धतिर्लिख्यते मया ॥

पौषस्य मध्यमाष्टकायां रोहिण्यामध्यायोत्सर्गः इत्यादि।

End. ततस्त्रिराचमनमध्यायः, खेमनखानामनिकृन्तनं च प्रागुत्सर्गात् ततः परं मन्त्रब्राह्मणयोरध्ययनमिति पारस्करान्++योऽव + + रमापतिः।

Colophon. इति कात्यायनानामुपाकर्म्मपद्धतिः समाप्तिमगमत्।

विषयः। माध्यन्दिनानां नवोपनीतानां वेदग्रहणाधिकारार्थमितरेषामुत्सृष्टानां वेदानां पुनर्ग्रहणार्थं यातयामादिपरिहारार्थञ्च कात्यायनविहितस्य उपाकर्म्मणः प्रयोगकीर्त्तनं।

No. 2564. गङ्गासहस्रनाम। Substance, country-made paper, 13 × 6½ inches. Folia, 37. Lines, 4 on a page. Extent, 340 ślokas. Character, Nágara. Date, ? Place of deposit. Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Verse. Correct.

Gaṅgá sahasra-náma. A hymn embodying a thousand epithets in praise of the River Ganges. It is attributed to Śiva, as the wielder of the trident (pináki), who disclosed it to Vishṇu.

Beginning. अगस्त्य उवाच।

विना स्नानेन गङ्गायां नृणां जन्म निरर्थकं।

उपायान्तरमस्त्यन्यद्येन स्नानफलं भवेत् ॥

अशक्तानाञ्च पङ्गूनामालस्योपहतात्मनां।

दूरदेशान्तरस्थानां गङ्गास्नानं कथं भवेत्।

दानं वाथ व्रतं वाथ मन्त्रस्तोत्रं जपोऽथवा। इत्यादि।

End. एतत् स्तोत्रवरं दिव्यं पुरा प्रोक्तं पिनाकिना।

विष्णवे निजभक्ताय मुक्तिबीजाक्षराण्हं ॥

Colophon. इति गङ्गासहस्रनाम सम्पूर्णं ।

विषयः । गङ्गायाः स्तवनं ।

No. 2565. गङ्गासहस्रनामटीका । Substance, country-made paper, 13 × 6½ inches. Folia, 37. Lines, 10 on a page. Extent, 1,017 ślokas. Character, Nágara. Date, ? Place of deposit Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose. Correct.

Gaṅgá-sahasra-náma-ṭíká. A commentary on the work noticed under the next preceding No. By Govindaráma.

Beginning. नमो भगवते तस्मै ब्रह्मविष्णुशिवात्मने ।
परब्रह्मस्वरूपिण्यै गङ्गायै च नमो नमः ॥
एकोनत्रिंशदध्याये गङ्गानामसहस्रकं ।
वर्ण्यते भूरिमाहात्म्यं सर्व्वाघौघविदारणं ।
पूर्व्वोक्तापरिमितगुणगणाया गङ्गायाः स्नानमन्तरेण व्यर्थं जन्म व्यर्थं स्यात् । इत्यादि ।

End. मोक्षकारणीभूतब्रह्मास्यदं वा । मुक्तिबीजञ्च तदक्षरस्य ब्रह्मण आस्यदस्येति वा ।

Colophon. इति गोविन्दरामकृता गङ्गासहस्रनामटीका सम्पूर्णा ।

विषयः । गङ्गासहस्रनामस्तोत्रस्य व्याख्यानं ।

No. 2566. तीर्थकमलाकरः, वा सर्व्वतीर्थविधिः । Substance, country-made paper, 11 × 5 inches. Folia, 55. Lines, 5 on a page. Extent, 860 ślokas Character, Nágara. Date ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose and verse. Incorrect.

Tírtha-kamalákara ALIAS **Sarvatírtha-vidhi.** A digest of the rules regarding pilgrimage and the duties and the religious rites to be performed at sacred places. By Kamalákara Bhaṭṭa.

Beginning. श्रीरामलक्ष्मणपितरं नत्वोमाख्यञ्च मातरं ।
कमलाकरसंज्ञेन तीर्थयात्रा विविच्यते ॥
तत्र गमनदिनात् पूर्व्वदिने हविष्यभोजनब्रह्मचर्य्यादिपूर्व्वकं । इत्यादि ।

End. वरणायाः सरस्वत्याः सङ्गमे लोकविश्रुते ।
मुच्यते ब्रह्महत्याया + + + जिमखे तथा ॥
अत्र दारिद्र्यहरधनदमन्त्रिदानं दानकमलाकरे ज्ञेयं ।

Colophon. इति कमलाकरभट्टकृततीर्थकमलाकरः समाप्तः।

विषयः। तीर्थयात्रापूर्व्वदिनकृत्यनिरूपणं। तस्य श्राद्धविधिकथनं। वपनव्यवस्था। तीर्थप्रतिग्रहादिनिषेधः। गयायामेव श्राद्धदिने प्रस्थानं तीर्थान्तरे तु श्राद्धोत्तरदिन एवेतिकथनं। तीर्थगतनियमकथनं। तीर्थप्राप्तिदिनकृत्यनिरूपणं। तत्र मुण्डनोत्तरं स्नानादिविधानं। जीवत्पितृकेनापि तीर्थे मुण्डनं कार्य्यमितिकथनं। स्नानादौ मन्त्रकथनं। तर्पणविधिः। सर्व्वेषु तीर्थेषु सामान्यतः कृत्यनिरूपणपूर्व्वकं काशीतीर्थे कर्त्तव्यनिर्देशः। पञ्चक्रोशयात्राविधिः। काशीस्थलिङ्गानां नामादिकथनं। गयायात्राविधिकौर्त्तनं। अकालेऽपि तत्र यात्रायां विधानकथनं। अत्र प्रयोगकथनं। गयाश्राद्धे विशेषधर्म्मकथनं। निषिद्धेऽपि दिने गयायां तिलतर्पणविधानं। पिण्डदानविधिकथनादिकं। प्रेतपर्व्वकृत्यादिनिरूपणं। कुरुक्षेत्रयात्राविधिः। तत्र प्रयोगादिकथनञ्च।

No. 2567. स्कान्दब्रह्मोत्तरखण्डम्। Substance, country-made yellow paper, 13 × 4 inches. Folia, 100. Lines, 7 on a page. Extent, 2,685 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen; another copy at Jhañjhápura, Post Mádháipura, Zilá Darbhángá, Paṇdit Ganesadatta Miśra. Date, Sk. 1720. Appearance, new. Verse.

Skanda-puráṇa. One of the 18 great Puráṇas. The codex contains only the second part of the Brahma Khaṇḍa of that work. The part comprises 20 chapters devoted to the praise of the worship of Śiva, and descriptions of celebrated liṅgams in different parts of India. Many legends are given in connexion with the history of these liṅgams.

ॐ नमः शिवाय।

Beginning. ज्योतिर्म्मात्रस्वरूपाय निर्म्मलज्ञानरूपिणे।
नमः शिवाय नित्याय नमस्ते गुणवर्त्तये॥

श्रीऋषय ऊचुः।

आख्यातं भवता सूत विष्णोर्म्माहात्म्यमुत्तमं।
समस्तावहरं पुण्यं समासेन श्रुतञ्च नः॥
इदानीं श्रोतुमिच्छामि माहात्म्यं त्रिपुरद्विषः।
तद्ज्ञानाच्च माहात्म्यमशेषावहरं परं।
तन्मन्त्राणां तद्व्रतानां तत्पूजायाश्च सत्तम॥
तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय।

श्रीसूत उवाच ।

एतावदेव मर्त्यानां परं श्रेयः सनातनं ।
यदीश्वरकथायां वो जाता भक्तिरहैतुकी ॥
अतस्तद्भक्तिलोलस्य माहात्म्यमनुवर्ण्यते । इत्यादि ।

End. विविधगुणविभेदैर्नित्यमस्पृष्टरूपं
जगति च बहिरन्तर्भासमानं महिम्ना ।
सुरगिरिविहरन्तं वाङ्मनोदृष्टिदूरं
परमशिवमनन्तानन्दसान्द्रं प्रपद्ये ॥

Colophon. इति श्रीस्कन्दपुराणे ब्रह्मोत्तरखण्डे पुराणश्रवणफलानुवर्णनं नाम द्वाविंशोऽध्यायः । समाप्तश्चेदं ब्रह्मोत्तरखण्डं ॥

विषयः । १ अध्याये,—सूतेन सह ऋषीणां संवादेन शिवमाहात्म्यकीर्तनं । शिवपञ्चाक्षरमन्त्रकथनं । रिरंसया स्वकामिनीं कलावतीं प्रार्थयमानस्य दनोर्दनामकस्य यादवस्य उपाख्यानकथनमुखेन शैवमन्त्रमाहात्म्यकथनं । २ अध्याये,—माघचतुर्दश्यां शिवलिङ्गार्चनमाहात्म्यकथनप्रसङ्गेन दृष्ट्वाकुकुलजस्य मित्रसहस्य राज्ञ उपाख्यानकथनं । तत्रैकदा मृगयारतं भ्रातृघातकतया तं केनाप्युपायेन जेतुमसमर्थस्य कस्यचित् राक्षसस्य मनुष्यरूपेण तद्दासतामवलम्ब्य नरमांसदानेन वसिष्ठं कोपयित्वा तच्छापेन राज्ञः राक्षसयोनिलं विधाय स्वस्थानगमनकथनं । राज्ञः कल्माषपादत्वप्राप्तिकथनं । तत्कृतमुनिकिशोरभक्षणादिवृत्तान्तकीर्तनञ्च ।

३, ४अ,—गोकर्णमाहात्म्यकीर्तनं गोकर्णात् स्वस्थानमागच्छतः शौनकस्य महर्षेः पथि कुष्ठरोगिणीं काञ्चन चण्डालीं पश्यतस्तद्वृत्तान्तकथनं । शिवभूजामाहात्म्यकथनं । विमर्षणाभिधानस्य नृपतेरुपाख्यानं । तस्य निजकामिन्याः पुरतः पूर्व्वजन्मनि सारमेयोऽहमासम्' इति तद्विवरणकीर्तनं । राज्ञ्याः पूर्व्वजन्मनि कपोतीत्वमधिगतायाः वृत्तान्तकथनञ्च ।

५, ६ अध्याये,—उज्जयिनीस्थमहाकालाभिधानशिवलिङ्गस्य माहात्म्यवर्णनं । उज्जयिनीनाथस्य चन्द्रसेनस्य नृपतेः शिवपारिषदान्मणिभद्रात् चिन्तामणिमधिगतस्य राज्ये मणिलुब्धानां प्रतिकूलभूपालानां युद्धार्थमागमनादिवृत्तान्तकथनं । शिवभक्तस्य पञ्चवर्षीयगोपालबालस्य विवरणं । प्रदोषकाले गिरिशार्चनमाहात्म्यकथनं । अत्र विदर्भाधिपतेः सत्यरथस्य उपाख्यानकीर्तनं । एकदा समरसंरम्भे कीर्तिशेषमुपगते सत्यरथे मङ्क्यां विद्युतायास्तत्पत्न्याः पुत्रमेकं प्रसूय जलपानार्थं कृतावतारायाः सरसि ग्राहोदरे प्रवेशादिवर्णनं ।

७, ८ अध्याये,—शाण्डिल्योक्तशिवपूजाविधिकथनं । शिवाय तुलसीपत्रदानावश्यकता । शिवशौचकीर्तनं । द्विजनन्दनराजनन्दनयोः निधानकलसप्राप्तिकथनं । गन्धर्व्वकुमार्य्या सह धर्म्मगुप्ताभिधानस्य राजकुमारस्य विवाहादिकथनं । उपोष्य सोमवारे शिवपूजने फलश्रुतिकथनं । चित्रवर्म्मदुहितुः नलपौत्रेण चन्द्राङ्गदेन विवाहादिवर्णनं । सोमवारव्रतमाहात्म्यव-

र्णनं। एकदा वयस्यैः सह नौकारोहणेन यमुनायां विहरतः चन्द्राङ्गदस्य पयसि निमज्जनात् नागराजेन सह साक्षात्कारादिकथनं।

९—११ अ,—विदर्भेषु ख्यातवास्तव्ययोः सामविद्वेदविदभिधानयोः ब्राह्मणकुमारयोः दम्पतीवेश्मास्थाय धनलाभार्थं निषधराजपत्न्याः समीपमुपस्थितयोरेकतरस्य स्त्रीलम्पाप्तिकथनादिकं। सीमन्तिन्याः प्रभावकीर्त्तनं। पिङ्गलाभिधानायां वेश्यायामनुरक्तस्य नन्दननामकस्य द्विजतनयस्य दुस्तान्तकथनं। भद्रायुराख्यानकीर्त्तनं। पिङ्गलायास्चन्द्राङ्गदस्य कन्यारूपेण जन्मग्रहणकथनादिकं।

११—१६ अ,—शिवचिन्तनप्रकारकथनं। शिवकवचकीर्त्तनं। भद्रायुषे ऋषभस्य शङ्खादिदानकथनं। मागधैः सार्द्धं भद्रायुषो युद्धादिवर्णनं। कीर्त्तिमालिन्या सह तस्य विवाहादिवर्णनं। भद्रायुषो जन्मवृत्तान्तकथनं। तस्य माहात्म्यवर्णनञ्च। वामदेवस्य मुनेः क्रौञ्चारण्यप्रवेशवृत्तान्तकथनं। तेन सह ब्रह्मराक्षसस्य संवादे भस्ममाहात्म्यकथनञ्च। सनत्कुमारस्य पुरतः शिवस्य त्रिपुण्ड्रधारणविधिकीर्त्तनं तत्र तिसृषु रेखासु प्रत्येक नवदेवताकथनञ्च।

१७—१९ अ,—अद्धाया अभ्यर्हितत्वकथनं। एकदा मृगयारतेन सिंहकेतुना सह वनमध्ये जीर्णदेवालयदर्शनेन तदभ्यन्तरं प्रविश्य गृहीतशिवलिङ्गस्य शवरराजस्य संवादेन शिवपूजाविधिकीर्त्तनं। उमामाहेश्वरव्रतविधानं। अत्र देवरथदुहितुः शारदायाः सर्पदंशनेन भर्तुर्मरणे अत्रमुनिना सह संवादकथनादिकं। पार्व्वत्यास्तस्यै वरदानवृत्तान्तकीर्त्तनं।

२० अ,—रुद्राक्षमाहात्म्यकथनं। अङ्गविशेषे रुद्राक्षधारणमाहात्म्यकीर्त्तनं। एकवक्त्रादिरुद्राक्षभेदकथनं। अत्र काश्मीरस्थयोः सुधर्म्मतारकाभिधानयोः राजामात्यकुमारयोरुपाख्यानकीर्त्तनं। शिवव्रतिनो वैश्यस्य उपाख्यानं। रुद्राध्यायमाहात्म्यकथनं। अत्र काश्मीरवृषपतेरुपाख्यानं। शिवमाहात्म्यप्रधानपुराणश्रवणमाहात्म्यकीर्त्तनं। पुराणज्ञप्रशंसाकथनं। पुराणनिन्दाकरणदोषकथनं। पुराणदानमाहात्म्यकथनं। वेश्यापतेः विदुराभिधानस्य ब्राह्मणस्य उपाख्यानकीर्त्तनं। तुम्बुरुपिशाचयोः संवादकथनं। ब्रह्मोत्तरखण्डमाहात्म्यकथनञ्च।

No. 2568. देवेन्द्रस्तोत्रम् : Substance, country-made paper, 10 × 4½ inches. Folia, 9. Lines, 14 on a page. Extent, 370 ślokas. Character, Mágadhi. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, old. Prose and verse. Correct.

Devendra-stotra. A hymn in praise of Devendra, a Jain divinity, in the Mágadhi language. Anonymous.

Beginning. अमरणरवन्दि ए वन्दि उसनाइ एतिणवरिन्दे।
वीरवर अपि भमंतो तेतुक्क गुरु पणमि उण ॥ इत्यादि।

End. या दृसि आणं विमाणवासिणं। देवनिकायाणं च णुदद् सद्द स समयो। अपरिसेदो ॥ ४ ॥

देविं द तनुसम्म घोसचमणु।

विषयः। जैनानां देवेन्द्रस्तवनं।

No. 2569. द्वीपविचारः वा यन्त्रमाला। Substance, country-made paper, 10 × 4 inches. Folia, 10. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, old. Prose. Correct.

Dvípa-vichára ALIAS **Yantra-málá.** A description of the Jambudvípa according to Jain geography. By Nandíśvara.

Beginning. जम्बूद्वीपकूटविचारयन्त्रमाह। भद्रसाल अष्टकूट + + मरे। इत्यादि।

End. जम्बूद्वीपे पर्व्वत २४ वापी १६ राजधानी १६ सिद्धायतनानि २०।

Colophon. इति नन्दीश्वरवरद्वीपविचारः सम्पूर्णः।

विषयः। जैनानां जम्बूद्वीपसङ्गमेरुविचारयन्त्रसंस्थानं। भद्रसालवनयन्त्रसंस्थानं। चन्दनादिवनविचारयन्त्रसंस्थानं। जम्बूद्वीपनवक्षेत्रविचारयन्त्रसंस्थानं। तत्र अष्टषष्टिपर्व्वतविचारयन्त्रसंस्थानं। मध्यकमलविचारयन्त्रसंस्थानं। जीवीविचारयन्त्रसंस्थानं। कुण्डविचारयन्त्रसंस्थानं। एवं नदी-हृद-क्षेत्रादि-जगती-लक्षयोजनप्रमाणचतुर्द्वारविचारयन्त्रसंस्थानादिकथनं। धातकीखण्डे ज्ञेयं। पुष्करद्वीपविचारयन्त्रादिकथनं। एवं शैल-अञ्जनदीश्वरवरद्वीपादिविचारयन्त्रादिसंस्थानं। (अत्र पत्राणामङ्काभावोऽस्ति।)

No. 2570. छन्दःकौस्तुभः। Substance, country-made paper, 12½ × 6¼ inches. Folia, 37. Lines, 3 on a page. Extent, 270 ślokas. Character, Nágara. Date, SM. 1895. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Verse. Correct.

Chhandah-kaustubha. An elaborate treatise on versification. By Rádhá Dámodara, a Bráhman of the Chaitanya sect, and supposed to have been an Uriá by birth. The different metres are all illustrated by stanzas in praise of Krishna.

Beginning. छन्दोभिर्विततार्द्धैः कवयो यस्यानुकीर्त्तयन्ति गुणान्।
स जयति गोकुलवनिताजितान्तरः श्यामसुन्दरो भगवान्॥
नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः
निरवद्यनिर्व्वृतिमान् गजपतिरनुकम्पया यस्य॥

लीलां विष्णोर्गातुकामोऽतिचित्रां
छन्दांस्याख्यद्योऽभिरूक्षयानि ।
श्रीमान् विद्यावारिधिर्विश्ववन्द्यः
पायात् सोऽस्मान् पिङ्गलो नागराजः ॥
छन्दोलक्षणहीनं सभासु काव्यं पठन्ति ये मनुजाः ।
दुर्व्वल्गोऽपि खेन खग्गिरश्छेदं न ते विदुः ॥
वर्णमात्राविभेदेन छन्दो द्विविधमीरितं ।
लक्ष्यलक्षणरूपं तत् प्रायः सङ्गृह्णते मया ॥

End. द्विजकुलतिलकः श्रीमान् राधादामोदरो हरेः प्रेष्ठः ।
सवर्णैः सूत्रैर्ग्रथितं छन्दःकौस्तुभमिमं व्यतनोत् ॥
वेदर्नुपक्षसंख्याताश्छन्दसां व्यक्तयोऽत्र याः ।
लिखिताः सन्ति ताः सन्तः कलयन्तु कृपाकुलाः ॥

Colophon. इति छन्दःकौस्तुभे मात्राप्रस्तारो नवमी प्रभा । छन्दःकौस्तुभः समाप्तोऽयं ॥

विषयः । मकारादिगणनिरूपणं । तेषां शुभाशुभलक्षणं । मनगणयोः सखिलकथनं । भयगणयोः भृत्यलकथनं । एवमन्यच ज्ञेयं । अत्र देवतावाचकादिपदानामपवादकथनं । समार्द्धसमविषमाणां लक्षणं । एकाक्षरायामुक्तायां श्रीवृत्तं । द्व्यक्षरायामत्युक्तायां ह्रीवृत्तं । त्र्यक्षरायां मध्यायां नारीवृत्तं मृगीवृत्तञ्च । चतुरक्षरायां प्रतिष्ठायां कन्यावृत्तं सतीवृत्तञ्च । पञ्चाक्षरायां सुप्रतिष्ठायां पङ्क्तिवृत्तं । प्रियावृत्तञ्च । षड्क्षरायां गायत्र्यां तनुमध्यावृत्तं । शशिवदनावृत्तं । सोमराजीवृत्तं वसुमतीवृत्तञ्च । एवमुष्णिहादिषु,—७अक्षरायां मधुमतीवृत्तं । कुमारललितावृत्तं । मदलेखावृत्तं । चूड़ामणिवृत्तं । हंसमालावृत्तं । ८ अक्षरायां चित्रपदावृत्तं विद्युन्मालावृत्तं । मानवकवृत्तं । हंसरुतवृत्तं । समानिकावृत्तं । प्रमाणिकावृत्तं । वितानवृत्तं । नाराचवृत्तं । सिंहलेखावृत्तं । पद्ममालावृत्तं । सुचन्द्रावृत्तं । सुविलासावृत्तं ।—९ अक्षरायां हलमुखीवृत्तं । भुजगशिशुभृतावृत्तं । मानमध्यवृत्तं । सङ्कटावृत्तं । १० अक्षरायां,—रुक्मवतीवृत्तं । रूपवतीवृत्तं । चम्पकमालावृत्तं । मत्तावृत्तं । शुद्धविराड्वृत्तं । पणववृत्तं । मयूरशारिणीवृत्तं । त्वरितगतिवृत्तं । मनोरमावृत्तं । ११ अक्षरायां,—इन्द्रवज्रावृत्तं । उपेन्द्रवज्रावृत्तं । उपजातिवृत्तं । उपस्थितावृत्तं । सुमुखीवृत्तं । शालिनीवृत्तं । दोधकवृत्तं । वातोर्म्मिवृत्तं । भ्रमरविलसितावृत्तं । रथोद्धतावृत्तं । स्वागतावृत्तं । द्रुतावृत्तं । भद्रिकावृत्तं । श्येनीवृत्तं । उपस्थितवृत्तं । श्रीवृत्तं । शिखण्डितवृत्तं । अनुकूलावृत्तं । मौक्तिकमालावृत्तं । मोटनकवृत्तं । सान्द्रपदवृत्तं । मनोरुहावृत्तं । रुक्मावतीवृत्तं । महाविराट्वृत्तं । रुचिरावृत्तं । १२ अक्षरायां चन्द्रवर्त्मवृत्तं । वंशस्थविलवृत्तं । इन्द्रवंशावृत्तं । उद्वत्यादिवृत्तं । तोटकवृत्तं । द्रुतविलम्बितवृत्तं । पुटवृत्तं । मौक्तिकदामवृत्तं । खगविलीवृत्तं । वैश्वदेवीवृत्तं । प्रमिताक्षरावृत्तं । मन्दाकिनीवृत्तं । कुसुम-

विचिचावृत्तं । नामरसवृत्तं । मालतीवृत्तं । भुजङ्गप्रयातवृत्तं । प्रियंवदावृत्तं । मणिमालावृत्तं । पुष्पविचिचावृत्तं । विभावरीवृत्तं वा पद्मचामरं । ललितावृत्तं । उज्ज्वलावृत्तं । जलधरमालावृत्तं । नवमालिनीवृत्तं । ललनावृत्तं । ललितवृत्तं । द्रुतपदवृत्तं । प्रभावृत्तञ्च । १२ अक्षरायां,—प्रहर्षिणीवृत्तं । क्षमावृत्तं । रुचिरावृत्तं । चण्डीवृत्तं । मत्तमयूरवृत्तं । गौरीवृत्तं । कुटिलगतिवृत्तं । उपस्थितवृत्तं । मञ्जुभाषिणीवृत्तं । सुमङ्गलावृत्तं । सम्भ्रमवर्षिणीवृत्तं । चन्द्रिकावृत्तं । नन्दिनीवृत्तं । भृङ्गेन्द्रमुखवृत्तं । चञ्चरीकावलीवृत्तं । १३ अक्षरायां,—असम्बाधावृत्तं । अपराजितावृत्तं । वसन्ततिलकावृत्तं । प्रहरणकलिकावृत्तं । वासन्तीवृत्तं । लीलावृत्तं । इन्द्रवदनावृत्तं । नान्दीमुखीवृत्तं । सुधावृत्तं । कुटिलवृत्तं । हंसश्रेनीवृत्तं । कुमारीवृत्तं ।

१४ अक्षरायां,—अश्विकलावृत्तं । खगवृत्तं । गुणमणिनिकरवृत्तं । मालिनीवृत्तं । प्रभद्रकवृत्तं । एलावृत्तं । लीलाखेलवृत्तं । विपिनतिलकवृत्तं । चन्द्रलेखावृत्तं । तूणकवृत्तं । चित्रावृत्तं । मदङ्गवृत्तं । चन्द्रकान्तावृत्तं । वृषभवृत्तं । कामक्रीड़ावृत्तं ।

१५ अक्षरायां,—चित्रसंज्ञवृत्तं । पद्मचामरवृत्तं । गजविलसितवृत्तं । चकितावृत्तं । मदनललितावृत्तं । मणिकल्पलतावृत्तं । प्रचरल्लितवृत्तं । वाणिनीवृत्तं । अचलधृतिवृत्तं । यतिवृत्तं । गरुड़रुतवृत्तं । १७ अक्षरायां,—शिखरिणीवृत्तं । वंशपत्रपतितवृत्तं । नर्दटकवृत्तं । वनकोकिलवृत्तं । मन्दाक्रान्तावृत्तं । भाराक्रान्तावृत्तं । हरिणीवृत्तं । हारीणीवृत्तं । समदविलासिनीवृत्तं । द्रुतावृत्तं ।

१८ अक्षरायां,— कुसुमितलतावेल्लितावृत्तं । नाराचवृत्तं । नन्दनवृत्तं । लतावृत्तं । नारकावृत्तं । शार्दूललल्लितावृत्तं । चित्रलेखावृत्तं । हरक्रन्दनवृत्तं । हरिणप्लुतवृत्तं । खगतिवृत्तं । महामालिकावृत्तं ।

१९ अक्षरायां,—मेघविस्फूर्ज्जितावृत्तं । छायावृत्तं । शार्दूलविक्रीड़ितवृत्तं । सुरसावृत्तं । फुल्लदामवृत्तं । वल्लकीवृत्तं । पद्मचामरवृत्तं ।

२० अक्षरायां,— सुवदनावृत्तं । गीतिकावृत्तं । वृत्तवृत्तं । शोभावृत्तं । २१ अक्षरायां,—खगधरावृत्तं । सरसीवृत्तं । २२ अक्षरायां,—हंसीवृत्तं । भद्रकवृत्तं । मदिरावृत्तं । महाखगधरावृत्तं । लालित्यवृत्तं । २३ अक्षरायां,—अद्रितनयावृत्तं । अश्वललितवृत्तं । मत्ताक्रीड़वृत्तं । २४ अक्षरायां,—तन्वीवृत्तं । २५ अक्षरायां,—क्रौञ्चपदावृत्तं । २६ अक्षरायां,—भुजङ्गविजृम्भितवृत्तं । अपवाहवृत्तं ।

दण्डकलक्षणादिकं । अर्द्धसमवृत्तकथनं । विषमवृत्तकथनं । उद्गताभेदनिरूपणं । पदचतुरुर्द्धच्छन्दोनिरूपणं । उपस्थितप्रचुपितच्छन्दोनिरूपणं । वक्त्रभेदनिरूपणं । माचावृत्तनिरूपणं । तच आर्य्यालक्षणादिकं वैतालीयच्छन्दोभेदनिरूपणं । सङ्कीर्णमाचावृत्तकथनं । पज्झटिकादिनिरूपणं । वर्णप्रस्तारकथनं । वर्णोद्दिष्टकथनं । वर्णनष्टनिरूपणं । वर्णमेरुनिरूपणं । (अत्र सर्व्वत्र संख्यानकथनं परत्र च ।) वर्णपताकानिरूपणं । वर्णमर्कटीनिरूपणं । माचाप्रस्तारकथनं । माचोद्दिष्टकथनं । माचानष्टकथनं । माचामेरुकथनं । माचापताकाकथनं । माचामर्कटीकथनं ।

No. 2571. वृद्धशातातपसंहिता। Substance, country-made paper, 11 × 4½ inches. Folia, 12. Lines, 5 on a page. Extent, 107 ślokas. Character, Nágara. Date, ? Place of deposit, Lálagolá, Zilá Murshidábád, Kálíbrahma Bhaṭṭáchárya; another copy at Post Dhámadaha, Zilá Purṇiyá, Paṇḍit Vachharana Ṭhákura. Appearance, fresh. Prose and verse. Correct.

Vṛiddha-śátátapa-sañhitá. An original code of Hindu law. By Sátátapa. It is called *Vṛiddha* or old in contradistinction to another and a later recension. The latter, however, is the best known and generally correct.

Beginning. वृद्धशातातपप्रोक्तं स्मृतितन्त्रविनिश्चयं।
संक्षेपेण प्रवक्ष्यामि यावदर्थोपलब्धये॥
मूत्रपुरीषसमुत्सर्गे यो भुञ्जीत पिबेत वा। इत्यादि।

End. वृद्धशातातपो ह्येतदुक्तवान्ऋषिसत्तमः।
अध्येतव्यं प्रयत्नेन ब्राह्मणैः अथ इतरैः॥

Colophon. इति वृद्धशातातपप्रोक्तं धर्म्मशास्त्रं समाप्तं।

विषयः। मूत्रपुरीषसमुत्सर्गे भोजन-पान-चण्डालादिस्पर्शेप्रायश्चित्तकीर्त्तनं। उदक्यास्थूतिकास्पर्शादिप्रायश्चित्तकथनं। श्व-कुक्कुट-रवाहादिस्पर्शेप्रायश्चित्तकथनं। धर्म्मशास्त्रमनधीत्य प्रायश्चित्तव्यवस्थादाने दोषकथनं। प्रमादेन वज्रादकादिभिर्मरणे अशौचोदकादिक्रियाविधानं। क्षतौ शौचादिविधानं। उच्छिष्टादौ शौचविधानं। संहतपाषाणां शौचविधानं। संस्थितायां भार्य्यायां सपिण्डीकरणान्तं कर्म्म पैतृकगोत्रेण कर्त्तव्यमूर्द्धन्तु पतिगोत्रभागित्वमितिकथनं। ह्रस्वदन्तलवणव्यञ्जनभोजनादौ दोषकथनं। मृन्मयभाजने आदीयद्रव्यदाने दोषकथनं। दन्तधावनादिविधानकीर्त्तनं। प्रतिग्रहविधिकथनं। अन्यायलब्धद्रव्येण और्द्धदेहिकादिकरणे दोषकीर्त्तनं। धर्म्माधर्म्म निदाननिरूपणं। मोक्षोपायकथनञ्च।

No. 2572. बीजकोषः। Substance, country-made paper, 10½ × 4½ inches. Folia, 8. Lines, 5 on a page. Extent, 101 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Verse. Correct.

Víja-kosha. The value of the letters of the Sanskrit alphabet as elements of mystic mantras. Another work of this name has already been described. Cf. Vol. I, p. 273.

Beginning. ऋषय ऊचुः।

ब्रह्मर्षे ब्रह्मपुत्रस्त्वमस्मेषागमपारगः।

प्रसन्नोऽसि महाभाग्यादस्माकं कृपया प्रभो।

नानाशास्त्राणि अस्माभिः श्रुतानि त्वन्मुखाम्बुजात्।

वर्णानां श्रोतुमिच्छामो मन्त्रकोषन्तु वैष्णवं।

दक्षिणामूर्त्तिरुवाच।

शृणुध्वमृषयः सर्व्वे मन्त्रोऽयं यथाविधि॥ इत्यादि।

End. चकारस्य मया प्रोक्तं कुलचूड़ामणौ प्रिये।

वर्णानां देवदेवेशि कोषः प्रोक्तो मया शिवे।

नानामन्त्रयुतं देवि सर्व्वागमविनिश्चितं॥

Colophon. इति बीजकोषः समाप्तः।

विषयः। अकारादिचकारान्तं मन्त्रेषु बीजलक्षणं।

No. 2573. वैष्णवाकृतचन्द्रिका। Substance, country-made yellow paper, 16 × 5½ inches. Folia, 155. Lines, 10 on a page. Extent, 6,290 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose. Correct.

Vaishṇavákṛita-chandriká. A commentary on the Vishṇu-puráṇa. By Ratnagarbha, son of Hiranyagarbha, and grandson of Mádhava.

Beginning. य आस्ते हृदयग्रन्थिगूढचिन्तामणिद्युतिः।

चेतयन्नखिलं विश्वं तस्मै श्रीविष्णवे नमः॥

हिरण्यगर्भतनयो माधवस्यात्मजात्मजः।

श्रीरत्नगर्भस्तनुते वैष्णवाकृतचन्द्रिकां॥

पुराणसंहितासारं पौलस्त्याद्वैष्णवं वरात्।

पराशरमुनिश्चक्रे पुराणं पञ्चलक्षणं।

षट्सहस्रं षडंशं तट्टीकया कृतया स्वयं।

श्रीसूर्य्यकरमिश्रेण यतनः सङ्कुलं कृतं॥

अस्मिन् विषयचिन्तं यत्तु वस्तु तन्नमनात्मकं।

मुनिर्मन्त्रोपनिषदाहृत्य बध्नाति मङ्गलं॥

जितन्ते—इति।

End. यत्तावत्तत्स्वरूपापरः ईश्वरः आत्मा पुरुषः तन्नाम भगवज्जन्मजरादिलक्षणां सिद्धिं + दिशतित्याशीर्व्वादः॥ ६१॥

Colophon. इति श्रीविष्णुपुराणे षष्ठेऽंशे अष्टमोऽध्यायः।)

विषयः। विष्णुपुराणस्य व्याख्यानं।

No. 2574. रत्नकोषः। Substance, country-made paper, $8\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 3. Lines, 10 on a page. Extent, 45 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Verse. Incorrect.

Ratna-kosha. A vocabulary of synonyms for the different parts of the body. By Kálidása.

Beginning. रत्नकोषाभिधं शास्त्रं पिङ्गलाग्रे तु भाषितं
यः पठेति नरो नित्यं मेधा भवति पुष्कला।
अर्धं गगनमाकाशं शिखरं कपालमुच्यते॥ इत्यादि।

End. कालिदासस्य जल्पोऽयं मानयाघटवासवः।
पिङ्गला सापि तं शब्दं बाला प्रौढा च मुग्धया॥

Colophon. इति कविकालिदासकृतो रत्नकोषः सम्पूर्णः।

विषयः। मस्तकादिवस्त्रान्तानां केषाञ्चित् शब्दानां पर्य्यायकथनमात्रं।

No. 2575. तत्त्वप्रकाशः। Substance, country-made paper, $10 \times 3\frac{1}{2}$ inches. Folia, 60. Lines, 12 on a page. Extent, 2,810 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, old. Prose. Correct.

Tattva-prakáśa. A commentary on the S'abda-khaṇḍa section of Gaṅges'a's Tattva-chintámaṇi. The codex is incomplete, and the author's name is not apparent. This is quite distinct from the work noticed under No. 167 of this work (Vol. I, p. 89) and that noticed on p. 163 of Mr. Hall's 'Contributions.'

Beginning अथ तत्त्वप्रकाशो लिख्यते।
जटाजूटलसद्गाङ्गजलभूषितमस्तकं।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा॥

उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् शिष्यावधानाय प्रतिजानीते अथेति। अत्र ज्ञायमानपदस्य शब्दप्रमाणतया पाद उपमानोपजीवकत्वाभावात् इत्यादि।

End. तथा च कथं कर्तृत्वादेर्बोधः षष्ठ्येति चेन्न। कर्तृत्वत्वकर्मत्वत्वाद्यतिरिक्तस्य —इतः परं खण्डितं।

विषयः। गङ्गेशकृततत्त्वचिन्तामणेरन्तर्गतशब्दखण्डस्य व्याख्यानं।

No. 2576. सप्तशतीव्याख्यानम्। Substance, country-made paper, 11 × 5 inches. Folia, 50. Lines, 8 on a page. Extent, 16,734 ślokas. Character, Bengali. Date, Sk. 1756. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, fresh. Prose. Correct.

Saptaśati-vyákhyána. A commentary on the Chaṇḍi section of the Márkaṇḍeya Puráṇa. By Nágojí Bhaṭṭa, son of S'iva Bhaṭṭa.

Beginning. श्रीश्रीगणेशाय नमः।

श्रीमार्कण्डेयेनोक्तं वसिष्ठं किं वा भागुविं प्रति उक्तं श्लोचं जैमिनिं प्रति पक्षिरूपैर्मुनिपुचैरुक्तं मार्कण्डेयपुराणे कथितं श्लोचं तद्व्यथामति व्याचक्षाहे। तचादौ व्याख्यास्यामः। ऋषिः श्लोचे मार्कण्डेयसंवादेति।

End. अनेनाष्टम्यां वा चतुर्दश्यामित्यादिकीलकोक्तप्रकारेण ज्ञानं सूचितमिति सर्व्वेष्टसिद्धिः। १८।

Colophon. इति शिवभट्टसुतसतीगर्भज-नागोजीभट्टकृते सप्तशतीव्याख्याने चयोदशोऽध्यायः। समाप्तचेदं देवीमाहात्म्यं। शकाब्दाः १७ ५९।

विषयः। चण्डीमाहात्म्यव्याख्यानं।

No 2577. कालनिर्णयसंक्षेपः। Substance, country-made paper, 7⅓ × 3¼ inches. Folia, 35. Lines, 10 on a page. Extent, 722 ślokas. Character, Nágara. Date, ? Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance.

Kálanirṇaya-saṅkshepa. A summary of the rules for the ascertainment of proper times for the performance of ceremonies. By Hemádri.

Beginning. ॐ श्रीनर्म्मदायै नमः।

मासश्चतुर्द्धा चिंशता दिनैः सावनः सूर्य्यस्य संक्रमादासंक्रान्ति सौरः। पचद्वयेन चान्द्रः। अश्विन्यादिरेवत्यन्तनक्षचपरिवर्त्तनेन नाक्षचः।

End. मुख्यं कालमुपाश्रित्य गौणमप्यसु साधनं।
न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणं॥

Colophon. इति श्रीहेमाद्रिकृतकालनिर्णयसंक्षेपः॥

विषयः। सावनसौरादिभेदेन चतुर्व्विधमासनिरूपणं। दिवसस्यापि सावनादिभेदेन चातुर्व्विध्यकथनं। चान्द्रादिचिविधसंवत्सरनिरूपणं। चान्द्रमासस्य द्वैविध्यकथनं। मलमास

निर्णयः। प्रतिपदादिसर्व्वतिथिनिरूपणं। खण्डतिथ्यादिव्यवस्था। व्रतविशेषे विशेषकथनं। एकभक्तकालनिरूपणं। नक्तकालनिर्णयः। उपवासतिथिनिर्णयः। नक्तचोपवासनिर्णयः। जन्माष्टमीनिरूपणं। एकादशीनिर्णयः। उन्मीलनीव्यञ्जुल्यादिमहाद्वादशीनिरूपणं। श्रवणाद्वादशीव्यवस्थाकथनं। शिवरात्रिव्रतनिर्णयः। पर्व्वनिर्णयः। ग्रहणनिर्णयः। उपाकर्म्मकालनिरूपणं। उत्सर्ज्जनकालनिर्णयः। संक्रान्तिकालनिरूपणं। अमावस्याश्राद्धकालनिर्णयः। अष्टकानिरूपणं। दर्शश्राद्धकालः। क्षयपक्षश्राद्धकालः। अपरपक्षश्राद्धकालनिर्णयः। अयनादिश्राद्धकालनिरूपणं। प्रेतश्राद्धेषु नवश्राद्धकालनिरूपणं। षोड़शश्राद्धकालः। सपिण्डीकरणकालः। मघाश्राद्धनिर्णयः। विद्धपतितश्राद्धकालः। पूर्व्वाह्णादिकालविभागः। श्राद्धे निषिद्धकालः। पिण्डदाननिषिद्धकालः। प्रेतक्रियासु निषिद्धकालः। वैश्वदेवादिकालभेदः। नित्यश्राद्धकालकथनं। तिथिविशेषे देवताविशेषपूजाकथनं। नक्षत्रादियुक्ततिथिनिर्णयः। युगाद्यायुगान्ननिरूपणं। कलौ वर्জ্জनीयानि। मन्वादयः। कालादिकथनं। व्यतीपातनिर्णयः। सामान्यतः पुण्यकालनिरूपणं। तिथिविशेषे वर्জ্জनीयानि। कालविशेषे वर्জ্জ্যानि। स्नापकालः। दन्तधावननिषेधकालः। सन्ध्याकालः। सन्ध्यायां वर्জ্জनीयानि। आमलकस्नानकालः। अभ्यङ्गकालः। तिलतर्पणकालः। पुंसवनादिकालः। अनध्यायनिरूपणं। ब्रह्मचर्य्यविधिः। स्वयंवरकालः। चतुर्थाश्रमकालः। अग्निहोत्रस्वीकारकालः। अग्निहोत्रानुष्ठानकालनिरूपणञ्च।

No. 2578. प्रतिज्ञासूत्रभाष्यम्। Substance, country-ma de paper, 10 × 4 inches. Folia, 20. Lines, 7 on a page. Extent, 315 ślokas. Character, Nágara. Date, Sm. 1890. Place of deposit, Bahrámpur, Bábu Rádhikáprasáda Sen. Appearance, new. Prose. Correct.

Pratijṇá-sútra-bháshya. A commentary on the supplement to the Pratijṇá Sútra chapter of Kátyáyana's Kalpa-sútra of the White Yajur Veda. By Ananta Yájṇika. This is distinct from the work noticed under No. 1799, Vol. V, p. 116.

Beginning. अम्बायोनिं जगद्योनिरयोनिर्यो निजं जनं।
योनिवासात् जायते तं वन्देऽहं हंसरूपिणं।
योनियोगवशं धत्ते यो निजायोनिजं जगत्।
सोऽहं सोममहं वन्दे जङ्गमाजङ्गमात्मकं।

तत्र भगवानाचार्य्यः प्रत्यूहसङ्घातविघाताय चिकीर्षितास्य वा मङ्गलार्थस्य आनन्तर्य्यार्थस्य च अथ शब्दस्य एकान्नगतफलद्वयन्यायेन एकशेषेण तन्त्रेणाहत्या वा ते वदन् शिष्यबुद्धिसमाधये प्रतिजानीते अथ प्रतिज्ञेति।

End. द्विरभ्यासः परिसमाप्त्यर्थः। अन्ये विस्तरणः स्वरसंस्काराः पञ्चदशशाखासाधारण्येन प्रातिशाख्ये उपनिबद्धा इति ॥

Colophon. इति श्रीअनन्तयाज्ञिकविरचिते प्रतिज्ञापरिशिष्टभाष्ये तृतीया काण्डिका। इति प्रतिज्ञासूत्रभाष्यं सम्पूर्णं संवत् १८९० । माघस्य ।

विषयः। कात्यायनकृतशुक्लयजुर्व्वेदीयप्रतिज्ञापरिशिष्टसूत्रस्य व्याख्यानं। प्रतिज्ञापरिशिष्टे तु स्वरप्रक्रियानिरूपणमस्ति।

No. 2579. एकादशीमाहात्म्यम्। Substance, country-made yellow paper, 11 × 4½ inches. Folia, 47. Lines, 10 on a page. Extent, 1,322 ślokas. Character, Bengali. Date, Sk. 1761. Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Incorrect.

Ekádaśí-máhátmya. Rules for the performance of a fast on the 11th day of the moon and a number of legends illustrating the merits of the fast. An extract from one of the Puránas, name not ascertained.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
तत्रैव गङ्गा यमुना च वेणी गोदावरी सिन्धुसरस्वती च।
सर्व्वाणि तीर्थाणि वसन्ति तत्र यत्राच्युतोदारकथाप्रसङ्गः ॥

सूत उवाच।

कदाचिदर्জ্জुनः श्रीमान् विष्णुभक्तिपरायणः।
भक्तिजिज्ञासयाप्रच्छत् वासुदेवं महामतिं।

End. एकादशीव्रतमिदं कथितं मया यत्
कामप्रदं सकलकल्मषनाशनञ्च।
विष्णोः प्रियं सुविधिपूर्व्वकमेतिहासं
कृत्वैव यन्नरवरो लभते विमुक्तिं ॥

Colophon. इति एकादशीमाहात्म्यं समाप्तं। शकाब्दाः १७६१। पौषस्य।

विषयः। श्रीकृष्णेन सह अर्জ্জुनस्य संवादेन एकादशीव्रतमाहात्म्यकीर्त्तनं। तत्र उपवासेषु अशक्तस्य नक्तभोजनविधानं। नक्तलक्षणं। राज्ञो अनुकल्पादिनिषेधकीर्त्तनं। एकादशीदिनकृत्यनिरूपणं। एकादश्या उत्पत्त्यादिदृष्टान्तकीर्त्तनं। तत्र मुरदानवविप्रकृतानां देवानां श्रीकृष्णस्तोत्रादिकीर्त्तनं। मुरदानवेन सह विष्णोः समरसंरम्भवर्णनं। तद्भयेन गिरिगुहायां शयानस्य विष्णोः शरीरात् उद्भूतया कयाचित् कन्यकया मुरनामानादिविवरणकथनं। तस्या एव एकादशीरूपेण विष्णुप्रियात्वप्राप्तिकथनं। अत्र विद्यायां व्यवस्थानिरूपणं। मार्गशी-

धमासे पिशाचमोचन्यभिधानाया एकादश्या माहात्म्यकथनं। अच शाकलदेशस्थस्य द्विजस्य पिशाचेन सह संवादादिकथनञ्च। श्रीकृष्णयुधिष्ठिरयोः संवादेन मोक्षैकादशीमाहात्म्यकथनं। अच वैखानसेतिनामकस्य राज्ञ उपाख्यानकीर्त्तनं। सफलैकादशीमाहात्म्यकथनं। अच चम्पावतीभूपालस्य माहिष्मतस्य राजर्षेः पुत्राणामुपाख्यानकीर्त्तनं। पुत्रदैकादशीमाहात्म्यकीर्त्तनं। अच भद्रावतीपुरीनाथस्य सुकेतुमतो राज्ञ उपाख्यानं। षट्तिलैकादशीमाहात्म्यकीर्त्तनं। अच कापिलरूपधारिणा भगवता सार्द्धं ब्राह्मणाः संवादकथनं। जयैकादशीमाहात्म्यकथनं। अच इन्द्रशापेन माल्यवतीमाल्यवतोः पिशाचत्वप्राप्तिविवरणकथनं। विजयैकादशीमाहात्म्यकीर्त्तनं। अच दाल्भ्येन मुनिना सह श्रीरामस्य संवादकथनं। आमर्द्दक्येकादशीमाहात्म्यकीर्त्तनं। अच व्याधस्य उपाख्यानकथनं। पापमोचन्येकादशीमाहात्म्यकथनं। अच मञ्जुघोषाया सङ्गीतश्रवणेन विमुग्धस्य ब्राह्मणस्य उपाख्यानकीर्त्तनं। कामदैकादशीमाहात्म्यकथनं। अच ललिताललितयोरुपाख्यानकीर्त्तनं। वरूथिन्येकादशीमाहात्म्यकथनं। मोहन्येकादशीमाहात्म्यकथनं। अच धनपालाभिधानस्य वैश्यस्य उपाख्यानकथनं। अपरैकादशीमाहात्म्यकथनं। निर्ज्जलैकादशीमाहात्म्यकथनं। अच भीमेन सह भीष्मस्य संवादकथनं। योगिन्येकादशीमाहात्म्यकीर्त्तनं। अच हेममालिन उपाख्यानकीर्त्तनं। पद्मैकादशीमाहात्म्यकथनं। अच मान्धातुरुपाख्यानकथनं। कामिकैकादशीमाहात्म्यकथनं। अच श्रीकृष्णेन सह नारदस्य संवादकथनं। पुत्रदैकादशीमाहात्म्यकथनं। अच महीजितनामकस्य नृपतेरुपाख्यानकथनं। अजैकादशीमाहात्म्यकथनं। अच हरिश्चन्द्रस्य नृपतेरुपाख्यानकीर्त्तनं। वामनैकादशीमाहात्म्यकथनं। अच वैरोचनेरुपाख्यानकथनं। इन्दिरैकादशीमाहात्म्यकीर्त्तनं। अच माहिष्मतीपतेरिन्द्रसेनस्य उपाख्यानकथनं। पापाङ्कुशैकादशीमाहात्म्यकथनं। रमैकादशीमाहात्म्यकथनं। अच मुचुकुन्दुहितुश्चन्द्रभागाया उपाख्यानकीर्त्तनं। प्रबोधिन्येकादशीमहात्म्यकीर्त्तनं। अच चन्द्रकान्तेरुपाख्यानकीर्त्तनञ्च। इति।

No. 2580. नर्त्तननिर्णयः। Substance, country-made paper, 10 × 6 inches. Folia, 127. Lines, 32 on a page. Extent, 2,460 ślokas. Character, Bengali. Date, Sk. 1797. Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Verse. Generally correct.

Narta-nirṇaya. An elaborate treatise on dancing and its accompaniments. By Puṇḍarika Viṭṭhala.

Beginning. ईशं जातिलयोपेतं वर्णभेदैरुपाश्रितं।
रासक्रीड़ामयं नत्वा वक्ष्ये नर्त्तननिर्णयं॥
तस्योपकारकाश्चैते तालधर्त्तृमृदङ्गिनौ।

गायको नर्त्तकः पश्चात्सा + कं नाटकादिकं ॥
इति पञ्चक्रमात् तच नावत् तालधरं ब्रुवे ।
लक्ष्यलक्षणसन्यन्नो गुणवान् प्रतिभापटुः ।
End. लक्ष्मलक्षणसन्दिग्धं परस्पराङ्गसङ्गतं ।
नन्नर्त्तनं विट्ठलेन निःसन्दिग्धमकारि हि ॥
अकवरन्दपरुच्यर्थं भूलोके सरलसङ्गीतं ।
ज्ञातमिदं वज्ञतरभेदं सुहृदां हृदये सुखं भूयात् ॥
श्रीमत्पण्डरिविट्ठलेन रचितं लोकोत्तरं सुन्दरं
दृष्ट्वा नर्त्तननिर्णयं भुवि कलौ तत्तत्प्रयोगाधिकं ।
श्रीमत्तालमृदङ्गगानचतुरश्रीवंशन्दत्या + र्णां
सर्व्वेषामपि दर्शयन्तु गुरवो भूत्वा सदा पण्डिताः ॥

Colophon. इति श्रीकार्णाट + तीय पण्डरिकविट्ठलविरचिते नर्त्तन (क) निर्णये नर्त्तनप्रकरणं चतुर्थं समाप्तं ॥ शुभमस्तु शकाब्दाः १७९७ ।

विषयः । १ म प्रकरणे,—तालज्ञलक्षणं । तालधर्मृ गुणदोषविवेचनं । पाटस्य कूटशुद्ध-खण्डादिभेदकथनं । मृदङ्गडमरुप्रभृतिषु वाद्येषु प्रधानाक्षरनिरूपणं । सम-विषम-चक्रवाल-ग्रह-भुक्तादिरूपपाटालङ्कारकथनं । समविषमादीनां लक्षणं । उद्ग्राह मेलाप-ध्रुवान्तरादिरूपप्रब-न्धावयवकथनं । एषां लक्षणञ्च । कवितानिरूपणं संवारादिदशविधसञ्चकनिरूपणं । संद्रुत-सम-पादादि सप्तविधस्थानकनिरूपणं । तालखतिः । गजरादीनां लक्षणं । व्यापकश्रुतिभूषणनि-रूपणं । पाटचालिकथनं । पञ्चधातुकादितालकथनं । ध्रुवक रूपकादितालालक्षणं । यत्यादि-प्रबन्धनिरूपणं । प्रहेलिका-कुवाड़-कौचटादिलक्षणं । मार्ग-देशीभेदात् द्विविधस्त्यनिरूपणं । चच्चत्पुटादिभेदेन पञ्चविधमार्गतालकथनं । देशीतालभेदनिरूपणं । तालप्रकारनष्टोद्दिष्टादि-कथनं । परिवृत्तिलयादिनिरूपणं ।

२ ये,—वादिक-मुखरीभेदेन द्विविधमृदङ्गलक्षणकथनं । भाईङ्गिकगुणदोषविवेचनं । रक्तचन्दन-शिरीष-खदिरादिकाष्ठेन मृदङ्गशरीरनिर्म्माणकथनं । मृदङ्गनिर्म्माणप्रकारकीर्त्तनं । मृदङ्गवादने हस्तमुद्रादिनिरूपणं । चालिलक्षणं । तद्भेदनिरूपणं । व्याघ्रि-नेम-लेमचालि-व्याघ्रि-बन्ध-मोहर-मल्लाहर-व्याहिं-मुक्तकादिमृदङ्गिकाख्यानकनिरूपणं ।

३ ये,—गायनलक्षणं । एकेल्ल-यमख-वृन्दगायनभेदेन तत्त्रैविध्यनिरूपणं । गायकगुणदोष-निरूपणं । ध्वन्युत्पत्तिप्रकारकथनं । नाद-स्थान-श्रुति-स्वर-ग्राम-मूर्च्छना-तानानां लक्षणं । स्वर-प्रस्तारकथनं । नष्टवर्णादिनिरूपणं । आरोहावरोहप्रकारकथनं । सरिगमादिस्वरावयवनिरू-पणं । गमकस्वरूपनिरूपणं । रागच्छायानिरूपणं । आलापस्वरूपकथनं । स्थापनालक्षणं । राग-लक्षणं । शुद्ध-सालङ्क-सङ्कीर्णभेदेन त्रिविधरागकथनं । भैरवादिरागानां लक्षणं । तेषां परि-

चारादिकथनं। एला-करण-टेङ्की-वर्त्तनी-जोखड़-लम्भ रास-गुडखुड़-वर्णस्वर-गदा-कैवाड़-एक-चारिणी-कन्द--चयलीला--गजलीला--द्विपदी--चक्रवाल-क्रौञ्चपद्-ध्वनिकढ़णी-आर्य्या-गाथा-द्विपद्म--कलहंस-तोटक--धट-वृत्त-मात्रका-रागकदम्बक-पञ्चतालेश्वर-तालार्णव-श्रीरङ्ग--पद्मभङ्गी पद्मानन--उमा-तिलक-त्रिपदी-चतुष्पदी-षट्पदी-विजय-चतुर्म्मुख-सिंहलील-दण्डक-जमाट-कुन्दुक-हरविलास-सुदर्शन-खराङ्क-हर्षवर्द्धन-चर्च्चरी-चर्य्या-वाऊड़ी-वीरश्री-धवल-मङ्गल-लोली ढोलरीप्रभृतीनां गीतानां लक्षणकीर्त्तनं। रसविशेषे तालविशेषनियमनं। षड्विधमण्डगीतनि-रूपणं। चतुर्थाप्रतिमण्डलक्षणं। षड्विधनिःसारुललक्षणं। षड्विधतालकथनं। चतुर्व्विधरास-कथनं। त्रिविधैकतालीकथनं। चन्द्रप्रकाश-सूर्य्यप्रकाश-नवरत्न-वीरशृङ्गार-रुद्रप्रकाश-दशाव-तार-शरभलील-चतुरङ्ग-ऋतुप्रकाश-शृङ्गारहारगीतभेदनिरूपणं। गानगुणाः। रागोपकार-कथनं।

४ र्थे प्रकरणे,—नर्त्तकलक्षणं। नर्त्तनलक्षणं। नाट्य-वृत्य-वृत्तानां लक्षणं। विषम-विकट-लघुभेदात् त्रिविधवृत्तनिरूपणं। ताण्डवलास्ययोः लक्षणं। अभिनयलक्षणतद्भेदकथनं। संयोग-जवर्णनिरूपणं। स्वरूपसेदादिसात्त्विकभावानामभिनयप्रकारकथनं। निर्व्वेद-ग्लानि-शङ्कादि द्वात्रिंशद्विधभावानां प्रत्येकमभिनयप्रकारकीर्त्तनं। रत्यादिस्थायिभावानामभिनयप्रकारकथनं। रसाभिनयप्रकारकथनं त्रिचाभिनये ऋतु-चन्द्र-सूर्य्यदर्शन-विद्युत्तापादीनामभिनयप्रणालीक-थनं। स्वभावाभिनयप्रकारः। षट्त्रिंशद्विधहस्ताभिनयप्रकारः। भ्रूविक्षेपाभिनयप्रकारः। मुखरा-गाद्यभिनयप्रकारः। अष्टत्रिंशद्संयुतहस्ताभिनयप्रकारः। एवं संयुतवृत्तहस्ताद्यभिनयः। कट्या-भिनयः। चरणाभिनयः। स्थानकानि। वृत्तभेदनिरूपणं। लीन-समनख-छिन्न-भङ्गावतरण रेचित-प्रलम्बितादीनां लक्षणं। वृत्तमण्डपलक्षणं। नर्त्तकगाचरेखादीनां लक्षणं। लास्याङ्गनिरू-पणं। सभालक्षणं। सभापतिलक्षणं। सभासन्निवेशप्रकारकथनं। वंशवेणुप्रभृतीनां लक्षणं। रङ्गभूमिलक्षणं। तत्र प्रवेशे दृतिकर्त्तव्यतादिकथनं। गतिविशेषनिरूपणञ्च। भेरि-त्रिचप्रभृ तीनां लक्षणं। पद्मबन्ध-नागबन्ध-वृक्षबन्धादिकथनं। शब्दवृत्तनिरूपणं। खराभिनयप्रकार-खर-मण्ड-विन्दु-गीत-मात्राविन्दु-गीतमुद्रादिविन्दुप्रभृतीनां लक्षणं। काणधर-मुक्तधरवृत्तलक्षणं। रासनिबन्धवृत्यादिनिरूपणञ्च।

No. 2581. कुमारपालप्रबन्धः। Substance, foolscap paper. Folia, 136. Lines, 11 on a page. Extent, 4,640 ślokas. Character, Bengali. Date, ? Place of deposit, Bahrámpur, Bábu Rámadása Sen. Appearance, new. Prose and verse. Incorrect.

* **Kumárapála-prabandha.** History of Kumárapála, a Jain prince of Kanouj. By Jinamaṇḍana Upádhyáya, a disciple of Somasundara

Súrí. The work opens with an account of a petty chief of the name of Śríbhúya. He was the lord of a town named Kalyána-kaṭaka in the province of Kanouj. He killed his uncle Sámanta Siñha and became king. His married Kanamaka Deví, daughter of Jayakásí, a prince of the Chálukya race. His interview with Madanavarmá, of Maharaka Utturna. History of Hemachandra. His first name was Somachandra; he was brought up as an orphan in the house of the minister of Aṅgadeva. In the house of a banker at Nágapur, he converted a heap of charcoal into gold by his mere touch, and thereby obtained the appellative of Hemachandra. He travelled in Kashmír, Gauḍa and other places, and disseminated the Jaina religion wherever he went. He was born on the day of the full moon in the month of Kártika, 1145 Samvat. In 1154, he was initiated in the Jaina religion; he attained the rank of a Súrí in 1166, and died in 1229 = A. D. 1162. Turning from this digression to the main subject of the work, the author next describes the birth of Kumárapála, son of Bhúvanapála, chief of the town of Dadhísthalipuri. Hemachandra was appointed tutor to the young prince. Proceeding one day on pilgrimage with Jaya Siñha, to preserve himself from the enemies of Jaya Siñha, Kumárapála travels *incognito*. Jaya Siñha entertains his companions with flesh-meat. Hemachandra and Kumárapála are disgusted at this and retire to the house of a potter. There the prince obtains some gold in a rat-hole. Thence by the advice of Hemachandra, the prince retires and secretes himself in the house of the minister of Udayana. He worships Mahálakshmí, retires to Kolándra, and obtains the protection of the king of that place. Subsequently he assumes sovereignty in his own country, builds a palace, and gives currency to an era of his own. His circumstances and his victory over his neighbours are then described at length. Hemachandra instructs him in the science of music, and subsequently initiates him in the Jain religion. Kumárapála becomes an ardent Jain, and dedicates many Jain temples. His nephew, Ajayapála, mixes poison in his food, and kills him in Samvat 1230 = A. D. 1163. The concluding portion of the work is devoted to the principles of the Jain religion, fasts, pilgrimages, the merits of erecting and repairing temples, &c. The work abounds in quotations from Pálí and Mágadhi works.

Beginning ॐ नमः श्रीमहावीरजिनेन्द्राय परात्मने ।
परब्रह्मस्वरूपाय जगदानन्ददायिने ॥
स + सर्व्वे प्रकुर्व्वन्तु करुणाः सुखसम्पदः ।

स्वनामस्मापनाद्रव्यभावैः पावितविष्टपाः ।
जी + + श्रीगुरुः सूर्य्यः सदाभ्युदयभास्करः ॥
यस्य वाचः प्रभासस्य + + भाषणस्पालसाः ।
सुमनःसुमनोभङ्गसङ्गीतगुणवैभवाः ॥
सरस्वती जगन्माता पुनी + + सरस्वतीं ॥ इत्यादि ।

End. प्रबन्धो योजितः श्रीमत्कुमारनृपतेरयं ।
गद्यपद्यैर्नवैः कैश्चित् कैश्चित्प्राक्तननिर्म्मितैः ॥
श्रीसोमसुन्दरगुरोः शिष्येण यथाश्रुतानुसारेण ।
श्रीजिनमण्डनगणिना द्व्यङ्कमनु (१४९२) प्रमितवत्सरे रचितः ॥

Colophon. इति श्रीसोमसुन्दरसूरीश्वरशिष्यश्रीजिनमण्डनोपाध्यायैः—श्रीकुमारपालप्रबन्धो दृष्टश्रुतानुसारेण योजितः । इति श्रीकुमारपालप्रबन्धः समाप्तः ।

विषयः । कान्यकुब्जदेशीयकल्याणकटकाभिधानपुराधिपस्य श्रीभूधनामकनृपतेरुपाख्यानं। तत्पत्न्या वनमध्ये अधिगततया वनराजेतिसंज्ञामधिगतवतो राजकुमारस्य सामन्तसिंहभगिन्या लीलादेव्या सह विवाहादिकथनं । श्रीभूयक्षतपार्श्वनाथप्रतिमाप्रतिष्ठादिकीर्त्तनं । एकदा आपन्नसत्त्वायां लीलादेव्यां अकाण्डमरणे सचिवैरुदरं विदार्य्य कर्पितस्य मूलराजनामकस्य तदनु स्वमातुलं सामन्तसिंहं निपात्य राज्याभिषेकादिवर्णनं । वनराज-योगराज-क्षेमराजप्रभृतीनां चौलुक्यवंशीयानां कर्णादित्य-चन्द्रादित्य-सोमादित्यादीनाञ्च राजत्वकालादिनिरूपणं । दुर्ल्लभराजकुमारस्य श्रीभीमस्य मालवाधीशेन मुञ्जेन सह संवादादिकथनं । तत्र भैम-राजत्वकालादिनिरूपणं । जयकेशिराजसुतायां रणमल्लदेव्यां विवरणं । श्रीकर्णदेवस्य पुरतः श्रीधनेश्वरभद्रेश्वरप्रभृतिसूरीणां जैनधर्म्मकथनं। जयसिंहदेवस्य वृत्तान्तकीर्त्तनं । तेन सह योगिन्योः संवादादिकथनं । युद्धार्थं कृतप्रयाणस्य तस्य महेश्वरकपत्तननाथेन मदनवर्म्मणा सार्द्धं संवादादिकथनं । श्रीदत्तसूरिभिः सह वटपद्रपुराधिपतेः यशोभद्रस्य संवादकथनं । स्वमात्रा श्रीगुरुभ्यः समर्पितस्य अम्बदेवस्य उदयनमन्त्रपसचिवपदे प्रतिपालितस्य जैनप्रव्रज्याग्रहणेन तदनु सोमचन्द्रमुनीति संज्ञान्तराधिगमादिवृत्तान्तकीर्त्तनं । अथैकदा नागपुरस्थधनदनामकश्रेष्ठिनो गृहे करस्पर्शमात्रेण अङ्गाररााशिं सुवर्णजातं विधाय पुनस्तस्य हेमचन्द्रनामप्राप्तिविवरणं । हेमचन्द्रस्य काश्मीरगौड़देशादिपर्य्यटनविवरणं । सिद्धराजापराभिधानस्य जयसिंहस्य पुरतो हेमचन्द्रस्य शब्दाख्यानकीर्त्तनं । तत्कृतजैनधर्म्मप्रचारविवरणं । तत्कृतजैनेन्द्रव्याकरण-कोषादिविवरणं । दधिस्थलीपुरीनाथत्रिभुवनपालकुमारस्य कुमारपालस्य जन्मादिवृत्तान्तकीर्त्तनं । जयसिंहस्य परिषदि हेमचन्द्रप्रमुखात् कुमारेण नीतिश्रवणादिकथनं । हेमचन्द्रादिभिः सह जयसिंहस्य तीर्थदर्शनवर्णनं । जयसिंहादात्मरक्षार्थं कुमारपालस्य प्रच्छन्नभावेन भ्रमणकथनं । अथैकदानिमन्त्रितैः भरटकैः सह मिलितं मत्स्यादिशुभलक्षणैः कुमारपालं प्रत्यभिज्ञाय नूनमेनं भोज-

आनन्तरं घातयिष्यामीति कृतसंकल्पे जयसिंहे क्रूरदृष्ट्यादिना तदभिप्रायस्य दुष्टत्वमनुमाय वमनव्याजेन ततो निर्गतस्य तस्य शनैः कुक्षकारगृहप्रवेशादिवृत्तान्तकीर्त्तनं। अन्येद्यु मूषिकं रौप्यमुद्रां विलादाकर्षन्तं विलोक्य कुमारस्य मुद्राग्रहणादिविवरणकथनं। हेमचन्द्रोपदेशात् कुमारपालस्य उदयनराजमन्त्रिमन्दिरे आत्मगोपनादिकथनं। श्मशाने तत्कृतमन्त्रालक्ष्मीसाधनादिकथनं। कुमारस्य कोलसपत्तनाधीशाश्रयप्राप्तिकथनं। तच्च कुमारपालेश्वरनामकप्रासादनिर्म्माणकथनं। तन्नामाङ्कितनाणकप्रवर्त्तनञ्च। कुमारस्य पुरतः केनचित् स्थविरेण उज्जयिनीनाथस्य संवत्प्रवर्त्तकस्य विक्रमादित्यस्य आख्यानकीर्त्तनं। नाग्रेन्द्रपत्तनविवरणं। कुमारपालस्य अपूर्व्वराज्याभिषेककौतुकवर्णनं। तच्च हेमचन्द्रादिसूरीणां समागमादिकथनं। कुमारपालस्य दिग्विजयवर्णनं। गीतमाधुर्य्येण सकलकृष्णस्य मृगस्य अटवीतो राजधानीप्रत्यानयनविवरणकीर्त्तनं। हेमचन्द्रकृतसङ्गीतशास्त्रमर्म्मोद्भेदनादिकथनं। कुमारप्रत्यर्थिपार्थिवानां पराजयादिवर्णनं। कुमारपालं प्रति हेमचन्द्रेण जैनधर्म्मोपदेशदानं। कुमारकृतजैनमन्दिरनिर्म्माणादिविवरणं। विस्तरेण जैनधर्म्मनिरूपणं। तच्च उपवासादिविधिः। तीर्थयात्रादिविधिः। प्रतिमार्च्चनादिविधिः। शत्रुञ्जयगिरि-श्रीपुण्डरीकासनादिमाहात्म्यकथनं। जैनमन्दिरसंस्करणादिमाहात्म्यकीर्त्तनं। जयसिंहस्य पूर्व्वजन्मवृत्तान्तकथनं। नरवीरस्य जैनधर्म्मग्रहणादिविवरणं। हेमचन्द्रस्य प्रभावेण अमावस्यायामपि पूर्णचन्द्रोदय इति वृत्तान्तकथनं। हेमचन्द्रस्य ११४५ संवत्सरे कार्त्तिकपूर्णिमायां जन्म ११५४ संवत्सरे जैनदीक्षा, ११६६ संवत्सरे सूरिपदप्राप्तिः, ११२९ संवत्सरे परलोकगमनकथनञ्च। अथैकदा खदौहित्रं प्रतीपमञ्जं राजपदे निवेशयितुकामं कुमारपालं तद्भ्रातव्यः अजयपालः विषप्रयोगेण संजहारेति वृत्तान्तकथनं १२३० संवत्सरे तत्परलोकगमनमिति निरूपणञ्च। (अत्र पालीभाषाया अपि श्लोका बहवः सन्ति।)

No. 2582. भविष्योत्तरपुराणम्। Substance, country-made yellow paper, 12 × 5 inches. Folia, 340. Lines, 13 on a page. Extent, 9,116 ślokas. Character, Nágara. Date, Sm. 1620. Place of deposit, Calcutta, Rájá Rájendranárayana Deva, Bahádur. Appearance, old. Verse. Incorrect.

Bhavishottara-puráṇa. A notice of this work has already been printed under No. 1742, Vol. V, p. 33, but the codex now under notice appears to be to a great extent distinct. Its contents are shown below in Sañskṛit.

Beginning. ॐ नमः शिवाय। ॐ नमो वासुदेवाय सर्गाद्यै सुकेतवे।
सगदाय सचक्राय सशङ्खाय नमो नमः।
नमः शिवाय सोमाय सगणाय सस्रुवे॥

नमस्त्रिशूलशूलाय सकपालाय वेन्दवे ।
शिवं ध्यात्वा हरिं स्तुत्वा प्रणम्य परमेष्ठिनं ॥
चित्रभानुश्च नत्वा वै ततो ग्रन्थमुदीरयेत् ।
कृताभिषेकं राजानं धर्मपुत्रं युधिष्ठिरं ॥
द्रष्टुमभ्यागता हृष्टा व्यासाद्याः परमर्षयः ।
मार्कण्डेयसमाण्डव्यशाण्डिल्यशाङ्कटायनाः ॥
गौतमो गालवो गार्ग्यः शातातपपराशरौ ।
जामदग्न्यो भरद्वाजो भृगुर्भागुरिरेव च ।
उतङ्कः शङ्खलिखितौ शौनकः शृंगपायनः (शिंशपायनः) ॥
पुलस्त्यः पुलहो दाक्षो वृहदश्वः सलोमसः ।
नारदः पर्व्वतो जह्नुरर्थावसुपरावतौ ॥
तानृषीनागतान् दृष्ट्वा वेदवेदाङ्गपारगान् ।
भक्तिमान् भ्रातृभिः सार्द्धं कृष्णधौम्यपुरःसरः ॥
युधिष्ठिरः संप्रहृष्टः समुत्थायाभिवाद्य च ।
अर्घ्यमाचमनं पाद्यमासनानि स्वयं ददौ ॥

End. शय्यां वराणि चान्नानि सुवर्णं रजतादि च ।
गोमहिष्यौ अजाश्वश्च ग्रामदानं गृहानि च ॥
आसनानि च ताम्बूलं यथावच्च युधिष्ठिरः ॥

Colophon. इति भविष्योत्तरे दानधर्मे सर्व्वशास्त्रोद्भवे सर्व्वदानानि समाप्तः (सर्व्वदाननियमः समाप्तः) । शुभं भवतु ।

विषयः । १ अध्याये व्यासादिऋषीनामागमनकथनं । २ अध्याये ब्रह्माण्डोत्पत्तिकथनं । ३अध्याये वैष्णवमायाकीर्त्तनं । ४ थोध्याये संसारदोषकथनं । ५मे अध्याये पापोत्पादककर्म्मनिरूपणं । ६ष्ठे अध्याये शुभाशुभकर्म्मफलनिर्देशः । ७मे अध्याये शुक्लव्रतकथनं । ८मे अध्याये तिलकव्रतकथनं । ९मे १०मे अध्याये करवीरव्रतकथनं । ११शे अध्याये भद्रोपचारप्रतिपद्व्रतकथनं । १२शे अध्याये अशून्यशयनद्वितीयाव्रतं । १३शे अध्याये गोपद्मिराचव्रतं । १४शे अध्याये हरिकालीव्रतं (हरितालीव्रतं) । १५शे अध्याये ललितातृतीयाव्रतं । १६शे अध्याये अविघ्नगौरीतृतीयाव्रतं । १७शे अध्याये उमामहेश्वरव्रतं । १८शे अध्याये रम्भातृतीयाव्रतं । १९शे अध्याये सौभाग्यशुक्लतृतीयाव्रतं । २०शे अध्याये रसकल्याणीतृतीयाव्रतं । २१शे अध्याये रसकल्याणीतृतीयाव्रतान्तरं । २२शे अध्याये आनन्दकतृतीयाव्रतं । २३शे अध्याये चैत्रभाद्रपदमाघमासेषु तृतीयाव्रतं । २४शे अध्याये अनन्ततृतीयाव्रतं । २५शे अध्याये अक्षयतृतीयाव्रतं । २६शे अध्याये अङ्गारकचतुर्थीव्रतं । २७शे अध्याये विनायकस्नानचतुर्थीव्रतं । २८शे अध्याये विघ्नविनायकचतुर्थीव्रतं ।

२९मे अध्याये नागशान्तिव्रतं । ३०मे अध्याये सारस्वतव्रतं । ३१मे अध्याये पञ्चमीव्रतं । ३२मे अध्याये श्रीपञ्चमीव्रतं । ३३मे अध्याये विशोकषष्ठीव्रतं । ३४मे अध्याये षष्ठीव्रतं । ३५मे अध्याये मन्दारषष्ठीव्रतं । ३६मे अध्याये ललितषष्ठीव्रतं । ३७मे अध्याये कार्त्तिकेयषष्ठीव्रतं । ३८मे अध्याये शाण्डिल्यसप्तमीव्रतं । ३९मे अध्याये विजयसप्तमीव्रतं । ४०मे अध्याये आदित्यमण्डलव्रतविधिः । ४१मे अध्याये अभीष्टसप्तमीव्रतं । ४२मे अध्याये कुक्कुटीव्रतं । ४३मे अध्याये उभयसप्तमीव्रतं । ४४मे अध्याये कल्याणसप्तमीव्रतं । ४५मे अध्याये अर्कोरासप्तमीव्रतं । ४६मे अध्याये कमलसप्तमीव्रतं । ४७मे अध्याये शुभसप्तमीव्रतं । ४८मे अध्याये आदित्यस्वपनसप्तमीव्रतं । ४९मे अध्याये सौमाष्टमीव्रतं । ५० मे अध्याये बुधाष्टमीव्रतं । ५१मे अध्याये जन्माष्टमीव्रतं । ५२मे अध्याये कृष्णाष्टमीव्रतं । ५३मे अध्याये अनघाष्टमीव्रतं । ५४मे अध्याये सौमाष्टमीव्रतान्तरं । ५५ मे अध्याये ध्वजनवमीव्रतं । ५६ मे अध्याये उल्कानवमीव्रतं । ५७मे अध्याये दशावतारव्रतं । ५८मे अध्याये आशादशमीव्रतं । ५९मे अध्याये अपराजितादशमीव्रतं । ६०मे अध्याये रोहिणीचन्द्रव्रतं । ६१मे अध्याये अविघ्नयोगदादशीव्रतं । ६२मे अध्याये गोवत्सद्वादशीव्रतं । ६३ मे अध्याये नीराजनद्वादशीव्रतं । ६४ मे अध्याये भीमपञ्चकव्रतं । ६५मे अध्याये भीमद्वादशीव्रतं । ६६ मे अध्याये श्रवणाद्वादशीव्रतं । ६७ मे अध्याये संप्राप्तिद्वादशीव्रतं । ६८ मे अध्याये गोविन्दद्वादशीव्रतं । ६९ मे अध्याये मनोरथद्वादशीव्रतं । ७० मे अध्याये तिलद्वादशीव्रतं । ७१मे अध्याये सुव्रतद्वादशीव्रतं । ७२मे अध्याये धरणीव्रतं । ७३मे अध्याये विशोकद्वादशीव्रतं । ७४मे अध्याये विभूतिद्वादशीव्रतं । ७५मे अध्याये अनङ्गद्वादशीव्रतं । ७६मे अध्याये यमादशनचयोदशीव्रतं । ७७मे अध्याये अनङ्गचयोदशीव्रतं । ७८मे अध्याये पालीव्रतं । ७९मे अध्याये रम्भाव्रतं । ८०मे अध्याये आनन्दचतुर्दशीव्रतं । ८१मे अध्याये अनन्तचतुर्दशीव्रतं । ८२मे अध्याये सर्व्वफलत्यागचतुर्दशीव्रतं । ८३मे अध्याये जयपूर्णिमाव्रतं । ८४मे अध्याये वैशाखीकार्त्तिकीमाघीव्रतं । ८५मे अध्याये सावित्रीव्रतं । ८६मे अध्याये कृत्तिकाव्रतं । ८७मे अध्याये पूर्णमनोरथव्रतं । ८८ मे अध्याये अशोकपूर्णिमाव्रतं । ८९मे अध्याये अनन्तफलदव्रतं । ९०मे अध्याये साभ्राणीव्रतं । ९१म अध्याये नक्षत्रपुरुषव्रतं । ९२मे अध्याये सम्पूर्णव्रतं । ९३मे अध्याये कामदानव्रतं । ९४मे अध्याये नक्षत्रव्रतं । ९५मे अध्याये संक्रान्तिव्रतं । ९६मे अध्याये भद्राव्रतं । ९७मे अध्याये अगस्त्यार्घ्यव्रतं । ९८मे अध्याये भार्गवार्घ्यविधिः । ९९मे अध्याये पञ्चाशीतिव्रतानि । १००मे अध्याये माघस्नानविधिः । १०१मे अध्याये नित्यस्नानविधिः । १०२ये अध्याये रुद्रस्नानविधिः । १०३ये अध्याये अन्नदानविधिः । १०४र्थे अध्याये तड़ागवापीकूपोत्सर्गविधिः । १०५मे अध्याये दीपदानविधिः । १०६ष्ठे अध्याये वृषोत्सर्गविधिः । १०७मे अध्याये फाल्गुनमेलोत्सवः । १०८मे अध्याये दमनकारोहणरथयात्रोत्सवविधिः । १०९मे अध्याये मदनमहोत्सवविधिः । ११०मे अध्याये भूतमातृकोत्सर्गविधिः । १११ ये अध्याये महानवमीउत्सवः । ११२ ये अध्याये लक्षहोमविधिः । ११३ ये अध्याये कोटिहोमविधिः । ११४ ये अध्याये होमविधिः । ११५ ये अध्याये धेनुदानविधिः ।

११६ शे अध्याये तिलधेनुदानविधिः। ११७ शे अध्याये क्षीरधेनुदानविधिः। ११८ शे अध्याये दधिधेनुदानविधिः। ११९ शे अध्याये मधुधेनुदानविधिः। १२० शे अध्याये लवणधेनुदानविधिः। १२१ शे अध्याये फलधेनुदानविधिः। १२२ शे अध्याये नवनीतधेनुदानविधिः। १२३ शे अध्याये रसधेनुदानविधिः। १२४ शे अध्याये सुवर्णधेनुदानविधिः। १२५ शे अध्याये रत्नधेनुदानविधिः। १२६ शे अध्याये कृष्णगोदानविधिः। १२७ शे अध्याये गोसहस्रदानविधिः। १२८ शे अध्याये वृषदानविधिः। १२९ शे अध्याये महिषीदानविधिः। १३० शे अध्याये अश्वदानविधिः। १३१ शे अध्याये कर्त्तव्यनिर्णयः। १३२ शे अध्याये प्रेतत्वपरीहारकदानविधिः। १३३ शे अध्याये श्राद्धतत्त्वनिर्णयः। १३४ अध्याये श्राद्धविधिः। १३५ शे अध्याये ब्राह्मविवाहादिलक्षणं। १३६ शे अध्याये भूमिदानमाहात्म्यं। १३७ शे अध्याये पृथिवीदानविधिः। १३८ शे अध्याये तिलपङ्क्तिदानविधिः। १३९ शे अध्याये गृहदानविधिः। १४० शे अध्याये अन्नदानमाहात्म्यं। १४१ शे अध्याये शालीदानविधिः। १४२ शे अध्याये दासीदानविधिः। १४३ शे अध्याये प्रपाकरणविधिः। १४४ शे अध्याये अग्निकाष्ठिकादानविधिः। १४५ शे अध्याये विद्यादानविधिः। १४६ शे अध्याये तुलापुरुषदानविधिः। १४७ शे अध्याये हिरण्यगर्भदानविधिः। १४८ शे अध्याये ब्रह्माण्डदानविधिः। १४९ मे अध्याये कल्पपादपदानविधिः। १५० मे अध्याये कल्पलतादानविधिः। १५१ मे अध्याये गजरथाश्वदानविधिः। १५२ मे अध्याये कालपुरुषदानविधिः। १५३ मे अध्याये महाभूतघटदानविधिः। १५४ मे अध्याये शय्यादानविधिः। १५५ मे अध्याये आत्मप्रतिकृतिदानविधिः। १५६ मे अध्याये हिरण्याश्वरथप्रदानविधिः। १५७ मे अध्याये कृष्णाजिनदानविधिः। १५८ मे अध्याये हेमहस्तिरथदानविधिः। १५९ मे अध्याये विश्वचक्रदानविधिः। १६० मे अध्याये भुवनदानप्रतिष्ठाविधिः। १६१ मे अध्याये नक्षत्रविशेषे द्रव्यविशेषदानविधिः। १६२ मे अध्याये तिथिविशेषे द्रव्यविशेषदानविधिः। १६३ मे अध्याये धान्यशैलदानविधिः। १६४ मे अध्याये लवणाचलदानविधिः। १६५ मे अध्याये गुडपर्व्वतदानविधिः। १६६ मे अध्याये हेमाचलदानविधिः। १६७ मे अध्याये तिलशैलदानविधिः। १६८ मे अध्याये कार्पासपर्व्वतदानविधिः। १६९मे अध्याये घृतशैलदानविधिः। १७० मे अध्याये रजताचलदानविधिः। १७१ मे अध्याये शर्करांचलदानविधिः। १७२ मे अध्याये सदाचारलक्षणकथनं। १७३ मे अध्याये व्रतादीनां नामकीर्त्तनं। १७४ मे अध्याये मत्स्यपुराणोक्ततिलपात्रदानविधिः। १७५ मे अध्याये ऋषिपञ्चमीव्रतं। १७६ मे, १७७ मे अध्याये ऋषिपञ्चमीव्रतविधिकथनं।

No. 2583. सङ्कीर्तनारायणः। Substance, country-made yellow paper. 16½ × 5½ inches. Folia, 69. Lines, 10 on a page. Extent, 2,500 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Saṅgíta-náráyaṇa. A treatise on music, singing and dancing. By Náráyaṇa-deva. This is distinct from the work of this name noticed under No. 318, Vol. I, p. 180.

Beginning. नीलाद्रिकन्दरानन्दिमन्दारालयवन्दितं ।

वन्दे तदारुमन्दारसेन्दिवं (सुन्दरं) परमं महः ॥ १ ॥

प्रदत्ततालङ्करतालिकाभिराभीरिकाणां कलवेणुगीतं ।

स्वत्यन्नमत्यन्नमुदाट्टहासं (मुदारट्टहासं) रागं भजन्तं हरिमन्तरीड़े ॥ २ ॥

प्रालेयशैलतनयाकुचकोटिमुच्चैर्निःसुस्य धराभुखमुखे (षण्मुखमुखे) रतिपीतमुक्तां ।

हर्षाकुलस्य नियतं शुभमादिशन्तु लम्बोदरस्य दरपुष्करधूननानि ॥ ३ ॥

End. यदधीतं कठिवल्लात्पुरषोत्तममिच्छता मया सुधिया तच प्रकटीकृतामस्मिन् (?) सुधियः परितोषयितुं शतमः । यावच्छिवस्यार्द्धशरीरवर्त्ती जगद्गुरोः पर्व्वतराजपुत्री तावत् क्षितीन्द्रस्य नारायणस्य श्रीमान्मुदेयं समुदेतु लोके।

Colophon. इति श्रीमन्निखिलान्वयोत्तुङ्गखर्व्वगर्वशावज्रसाखिलगुणसद्यपद्मनाभभूमिपतितनूजन्मनो महाराजस्य साहित्यसङ्गीतार्णवकर्णधारकमणेर्गजपतिवीरश्रीनारायणदेवस्य कृतौ सङ्गीतनारायणे शुद्धप्रबन्धोदाहरणं नाम चतुर्थपरिच्छेदः ।

विषयः । १म परिच्छेदे सङ्गीतलक्षणं । २य, ३य पं च्छेदेवाद्यनिर्णयः । ४र्थ परिच्छेदे शुद्धप्रबन्धानामुदाहरणं ।

No. 2584. कोषः | Substance, Káśmíri paper, 11½ × 7 inches. Folia, 51. Lines, 21 on a page. Extent, 1,025 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Kosha. A vocabulary of words having more than one meaning, arranged alphabetically according to their initial letters. Anonymous.

Beginning. ॐ श्रीगणेशाय नमः ॐ सिद्धलक्ष्म्यै नमः ।

ॐ पातु वोधिधरो दूरविकीर्णकरशीकरः ॥

दुःखवीजच्छिदे वर्षन् करका इव विघ्नजित् ।

विषमपदविषधरालीं निहत्य संग्रथ्य शेवधिविशेषान् सकलजनसुलभविभवान् कञ्चन निर्म्मत्सरः करोते । भागुरिकात्यशालायुधदुर्गामरसिंहशाश्वतादिकृतान् कोषान् निरीक्ष्य निपुणं धन्वन्तरिनिर्म्मितं निर्घण्टञ्च । लिङ्गानुशासनानि च विचार्य्य लक्षणं महाकवीनां च करोतेऽनेकार्थानां शब्दानां सङ्क्षेपतः कोषं । यथासम्भवकाम्यादिक्रमादक्षरसंख्यया करामलकवत् साक्षादेष भाषिष्यते सतां । यत्रैक एव रूढोऽर्थो यौगिकस्तत्र तूच्यते ।

अनेकस्मिंस्तु रूढेऽर्थे यौगिकः प्रोच्यते न वा।
पदभङ्गादनेकार्थैः प्रकटीक्रियते न च ॥
विशेषेण प्रत्ययाद्यैः सिद्धं लिङ्गं न चोच्यते।
प्रायशो रूपभेदेन साहचर्य्याच्च कुत्रचित् ॥
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्।
चिह्निङ्गां चिह्नितिपदं मिथने च द्वयोरिति ॥
निषिद्धलिङ्गं शेषार्थं क्त्वान्ताद्यादि न पूर्व्वभाक्।
कोचार्कात्मवातेषु कं शिरोऽम्बुसुखेषु च ॥

End अन्तिमं खण्डितं।

विषयः। क्त्वान्तादिक्रमेण एकार्थशब्दानामर्थकथनं।

No. 2585. कथाकौतुकम्। Substance, Káśmírí paper, 11¼ × 7 inches. Folia, 55. Lines, 12 on a page. Extent, 1,284 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Very incorrect.

Kathákautuka. The story of Yusaf and Zuleikhá, rendered into Sañskṛit verse from the well-known poem of Jámí. By Śrívara.

Beginning ॐश्रीगणेशाय नमः। ॐश्रीरामाय नमः। ॐसानन्दं हृदयं विलोक्य विषदं यच्चुच्छ्वासश्लोपमं मन्यन्ते भुवनाधिपत्यमखिलं योगेन योगीश्वरः। ध्यात्वाप्येकनिमेषमाचमपि यत्सौख्यं सदा प्राप्यते वन्दे सिद्धसुरेन्द्रवन्दितमहश्लेजः परं शाश्वतं। ॐ प्रणम्य विघ्नौघहरं गणेशं चिधास्वरूपामपि भारतीं तां। विरच्यते यावनशास्त्रबद्धकथा मया निर्ज्झरभाषयेयं। क्रमेण येन मेतार्थो (?) मत्ताज्यमेन वर्णितः। तेनैव हि मया सोऽयं श्लोकेनाद्य निरूप्यते। प्रबोधयाशाकलिकां प्रसादमधुरप्रभो। तदुत्पन्ने प्रोतु (?) फलं दातुमर्हसि मे शुभं।

शोभितं कुरु तेनैव मानसोऽद्य (?) वचोऽद्य मे।
तत्सौगन्धेन शुद्धेन शरीरं परिपूरय ॥

End. कृतं किं वा शुभंप्राक्चेत् कथं शिवपरा गतिः।
विमलश्चेत् कथं नाथ शोकमोहाधिकं त्विदं ॥
मनुष्यभावमाश्रित्य त्वाद्य निस्सारकं प्रभुं।
मोहं वसामि चेद्देव वद कस्य विडम्बना ॥
याचे त्वामेव वरदं वरमेकं महेश्वर।
भूयान्मम भवद्भक्तिर्लोकद्वयहितावहा ॥

पिता बन्धः सुहृत् स्वामी शरण्यः सर्व्वदेहिनां ॥
अनन्यशरणं नाथ रक्ष मां परमेश्वर ।

Colophon. इति श्रीयवनभाषापारङ्गमपण्डितश्रीवरविरचिते कथाकौतुके पञ्चकौतुकं ।

विषयः । नैमन्दपतिसुतायाः जीलेखायाः उपाख्यानं ।

No. 2586. प्रवराध्यायः । Substance, Káśmírí paper, $7\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 105. Lines, 9—10 on a page. Extent, 1,890 ślokas. Character, Káśmírí, Sáradá. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Pravarádhyáya. Genealogy of the leading Bráhman septs. Anonymous. This work is distinct from the works of this name noticed under No. 583 of Vol. II, p. 38, No. 1795 of Vol. V, p. 113, and No. 2248 of Vol. VII, p. 5.

Beginning. ॐ नमो विघ्नहन्त्रे श्रीगुरुभ्यो नमः श्रीवाग्देव्यै नमः नमो ब्रह्मणे नमो भगवते परमशिवाय नमो भृगवे आगमनिगमनिधानाय ॐ चर्य्योङ्कालकालाय नमः । कालाज्जायते केशवः केशवाद्ब्रह्मा २ ब्रह्मणा ब्रूयते जगद्विषय इति शेषः ब्रूयते इत्यभिध्यायतेः ब्रह्मणो रुद्रो ललाटादास अभिध्यायतस्य प्रथमसङ्कल्परूपो ललाटाद्रुद्रो जातः ५ यचोद्भवः यदनन्तरं सर्व्वोद्भवः इत्यजः ६ स्वायम्भुवमनुः शतरूपा च ७ ब्रह्मण जरोर्जातः तस्मान्नवप्रजापतयः तावत्त्वरिता न हि १० भवति चाच ततोभिध्यायतस्य जज्ञिरे मानसीः (स) प्रजाः ।

तच्छरीरसमुत्पन्नैः कार्य्यैस्तैः कारणैः सह ।
यदास्य ताः प्रजाः सर्व्वा न व्यवमन्न ? धीमतः ॥
अथान्यान्मानसान् पुत्रान् सदृशानात्मनोऽसृजत् ।
भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा ॥
मरीचिं दक्षमत्रिञ्च वसिष्ठञ्चैव मानसान् ।

नव ब्रह्मण इत्येते वेदेन स्वयमीरितः ११ सप्तर्षय एतन्मध्य एवेति १२ दिव्यतना द्योतमाना इति भावः । नहीति जलव्याप्तेर्निषेधः त्वरिता इति सनाथं समानमन्यत् १३ ।

End. अन्तिमं खण्डितं ।

विषयः । प्रवरविवरणं ।

No. 2587. ईश्वरप्रत्यभिज्ञाहृदयम्। Substance, Káśmírí paper, 10¼ × 7¼ inches. Folia, 11. Lines, 22—23—24 on a page. Extent, 330 ślokas. Character, Káśmírí, Sáradá. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Iśvarapratyabhijṇá-hṛidaya. A dissertation on the Vedántic theory of the identity of the Godhead with the universe. By Rájanaka Kshemarája, disciple of Abhinava Gupta.

Beginning. ॐ नमो गुरवे सरस्वतीरूपाय। ॐ नमः शिवाय।

ॐ नमः शिवाय सततं पञ्चकृत्यविधायिने।
चिदानन्दघनस्वात्मपरमर्थावभासिने॥
शाङ्करीपनिषत्सारप्रत्यभिज्ञामहोदधेः।
उद्धरामि परं सारं संसारविषशान्तिदं॥

इह सुकुमारमतयोऽल्पतीव्रशास्त्रपरिश्रमाः शक्तिपातवचोन्मिषितपरमेश्वराभिलाषिणः कतिचिद्भक्तिभाजस्तेषामीश्वरप्रत्यभिज्ञोपदेशतत्त्वं मनागुन्मील्यते तच स्वात्मदेवताया एव कारणत्वं सुखोपायप्राप्यत्वं च महाफलत्वं चाभिधत्तामाह ॐ चितिः स्वतन्त्रा विश्वसिद्धिहेतुः॥

End. येषां + न्नः शाङ्करः शक्तिपातो येनाभ्यासात्तीर्णदुस्तितीर्घवः। शक्ता ज्ञातुं नेश्वरप्रत्यभिज्ञामुन्नस्तेषामेष तत्त्वोपदेशः।

Colophon. समाप्तमिदमीश्वरप्रत्यभिज्ञाहृदयं। कृतिर्महामाहेश्वराचार्यश्रीमदभिनवगुप्ताचार्यपादपद्मोपजीविनः श्रीमद्राजनकक्षेमराजस्येति शुभं।

विषयः। एका चिच्छक्तिरेव ईश्वरः स एव सर्व्वं जगत् इति प्रतिपादनं।

No. 2588. क्षीरतरङ्गिणी। Substance, Káśmírí paper, 9¾ × 6¾ inches. Folia, 163. Lines, 12 on a page. Extent, 2,900 ślokas Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Kshírataraṅgiṇí. Meanings of the verbal roots of the ten classes and the effect of prefixes thereon. By Kshíra S'vámí.

Beginning. ॐ नमः सरस्वत्यै ॐ नमः शिवाय ॐ नमो विघ्नेशेभ्यः।

ॐ तरङ्गभुग्नं क्वणन्मधुपकिङ्किणीजालिनं
करं प्रचलपुष्करारुणशिखां समुल्लासयन्।
विभुर्जयति विघ्नजिद्भुवनभृत्तमारोपयन्।

दुरन्तदुरितत्तयादिजयवैजयन्तीमिव ॥ १ ॥
धातुवैषम्यसमनाद्दाङ्मयाप्यायिनी सतां ।
क्षीरस्वामिप्रसूतेयं दृष्टिः क्षीरतरङ्गिनी ॥ २ ॥
सूत्रव्याख्याकार्य्यजातं गणानां सेट्त्वानिट्त्वोपग्रहादिफलञ्च ।
अष्टाध्याय्यां ये विशेषप्रयोगा धातोर्धात्वर्थनिर्देशे विशेषात् ॥ ३ ॥
य एव पारायणिकैर्दृष्टोऽत्र विवरीतृभिः ।
मूर्द्धतो नैव याताः स्मः कृत्वा गजनिमीलिकां ॥ ४ ॥
न विचारिताः प्रयोगाः पारायणिकैर्हि तत्र सत्यं ।
सत्यार्थे धातुकेऽपि च धीढा नोदाहृता प्रकृतिः ॥ ५ ॥
भग्नाः पारायणिकास्तन्द्राद्या अपि च यत्र विभ्रान्ताः ।
तान् धातून् विवरीतुं गहनमहो अध्यवसिता स्मः ॥ ६ ॥
जाता विश्वहृजः क्रमेण मुनिभिः संस्कारमापादिताः
शब्दाः संवसनादसाधुभिरपभ्रष्टाः स्म भो भ्रातरः ।
वारेद्व्याद्यकृता मदेकशरणा माचायतेऽस्मान्मया (?)
न्याय्ये वर्त्मनि वर्त्मनाय भवतां षड्वृत्तयः कल्पिताः ॥ ७ ॥
अथ नित्यानां स्वरार्थसाधनकल्पनया व्याख्यानमिति ।
प्रकृतयो निर्दिश्यन्ते भूस्नायासुदात्तः ।

End. पुच्छभाण्डचीवराद्गिङिति पुच्छादिभ्योधात्वर्थे उदसनादौ णिङ्प्रत्ययः सिद्धः पाणिनिनैवोक्तत्वात् पुच्छमुद्यति उत्पुच्छयते परिपुच्छयते भाण्डानि समाचिनोति संभाण्डयते चीवरमर्ज्जयति परिदधाति वा संचीवरयते भिक्षुः एवं मुण्डादिभ्यः सत्यापपाशादिभ्योऽपि णिच् सिद्धः नपुंसकेन निर्देशो भङ्ग्यर्थः । एवन्नामपर्य्यङ्कः ।

Colophon. भङ्क्षीरस्वाम्युत्प्रेक्षितधातुवृत्तौ क्षीरतरङ्गिण्यां चुरादिगणः सम्पूर्णः ।

विषयः । दशगणपठितानां धातूनामर्थनिर्देशपूर्व्वकं तिङ्विभक्तियोगेन रूपप्रदर्शनं उपसर्गपूर्व्वकाणां तेषामर्थविशेषप्रदर्शनञ्च ।

No. 2589. न्यायकन्दली । Substance, Káśmírí paper, 11¾ × 7 inches. Folia, 200. Lines, 27 on a page. Extent, 6,600 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Nyáya-kandalí. A commentary on the Padártha-dharmasaṅgraha—a Vais'eshika treatise on the meaning and purport of the categories. By S'ridhara Bhaṭṭa.

Beginning. ॐ नमः सरस्वत्यै ॐ नमः शिवाय ।

ॐ अनादिनिधनं देवं जगत्कारणमीश्वरं ॥

प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहं ।

ध्यानैकतानमनसो विगतप्रचाराः

पश्यन्ति यं कमपि निर्मलमद्वितीयं ।

ज्ञानात्मने विघटिताखिलबन्धनाय

तस्मै नमो भगवते पुरुषोत्तमाय ॥

ग्रन्थारम्भेऽभिमतां देवतां शास्त्रस्य

प्रणेतारं गुरुं श्लोकस्य पूर्व्वार्द्धेन नमस्यति

प्रणम्य हेतुमीश्वरं मुनिं कणादमन्ततः

पदार्थधर्म्मसंग्रहः प्रवक्ष्यते महोदय इति ।

End. उपसंहरति तस्मादिति ।

परस्परोपसंश्लेषो भिन्नानां पञ्चतो भवेत् ।

समवायः स विज्ञेयः स्वातन्त्र्यप्रतिबोधकः ॥

इति भट्टश्रीश्रीधरकृतायां न्यायकन्दलीटीकायां समवायपदार्थः समाप्तः।

सुवर्णमयसंस्थानं रम्या सर्व्वोत्तरस्थितिः ।

सुमेरोः शृङ्गवीथीव टीकेयं न्यायकन्दली ॥ १ ॥

अक्षीणा निजपक्षेषु क्षपयन्ती गुणौजसी।

परप्रसिद्धसिद्धान्तं दलति न्यायकन्दली ॥ २ ॥

आसीद्दक्षिणपाढ़ायां द्विजानां भूरिकर्म्मणां ।

भूरिसृष्टिरितिग्रामो भूरिसृष्टिजनाश्रयः ॥ ३ ॥

अब्धोराशेरिवैतस्माद्बभूव चितिचन्द्रमाः ।

जगदानन्दनाद्बन्द्यो बृहस्पतिरिव द्विजः ॥ ४ ॥

तस्माद्विशुद्धगुणरत्नमहासमुद्रो विद्यालतासमवलम्बनभूरुहोऽभूत् ।

स्वच्छाशयो विविधकीर्त्तिनदीप्रवाहप्रस्यन्दनोन्नतबलो बलदेवनामा ॥ ५ ॥

तस्माभूद्भूरियशसो विशुद्धकुलसम्भवा ।

अशोकेत्यचिंतगुणा गुणिनो गृहमेधिनी ॥ ६ ॥

सच्छायः स्थूलफलदो बहुशाखो द्विजाश्रयः ।

तस्याः श्रीधर इत्युच्चैरर्थिकल्पद्रुमादभूत् ॥ ७ ॥

असौ विद्याविदग्धानामसूत ग्रहणोचितां ।

षट्पदार्थेहितामेतां रुचिरां न्यायकन्दलीं ॥ ८ ॥

Colophon. अधिके दशोत्तरे नवशतवर्षे श्रीन्यायकन्दली रचिता।
श्रीपाण्डुदासयाचितभट्टश्रीश्रीधरेणेयं ॥ ९ ॥
समाप्तेयं पदार्थप्रवेशन्यायकन्दलीटीका।

विषयः। पदार्थधर्म्मसंग्रहनामकस्य अथवा पदार्थप्रवेशनामकस्य न्यायग्रन्थस्य व्याख्यानं।

No. 2590. चातुराश्रम्यधर्म्मः। Substance, Káśmírí paper, $11\frac{3}{4} \times 7$ inches. Folia, 2. Lines, 27 on a page. Extent, 35 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse Incorrect.

Cháturáśramya-dharma. *Duties of the four classes of Hindus including Vedic pupils, householders, ascetics and hermits.* By S'ríkaṇṭháyana.

Beginning. नमो ब्रह्मणे। अथातश्चातुराश्रम्यधर्म्मं व्याख्यास्यामः तद्यथा ब्रह्मचारी गृहस्थः वानप्रस्थः परिव्राजक इति चत्वार आश्रमाः।

End. यतीनां प्रशमो धर्म्मो नियमो वनवासिनां।
दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणां।

Colophon. इति श्रीकण्ठायनप्रणीतश्चातुराश्रम्यधर्म्मः समाप्त इति शिवम्।

विषयः। ब्रह्मचर्य्यादिचतुराश्रमधर्म्मव्याख्यानं।

No. 2591. सर्व्वसंप्रदायाभेदसिद्धान्तः। Substance, country-made paper, 12 × 5 inches. Folia, 9. Lines, 11 on a page. Extent, 235 ślokas. Character, Nágara. Date, Sm. 1807. Place of deposit, Sántipur, Rámanátha Tarkaratna; another copy at Calcutta, Dr. Rájendralála Mitra. Appearance, old. Prose. Generally correct.

Sarvasampradáyábheda-siddhánta. Reconciliation of the different schools of Vaishṇava philosophy. Anonymous. An abstract of this work has been published in the Journal of the Asiatic Society of Bengal, Vol. LIII, pp. 103 f.

Beginning. ॐ नमो भगवते वासुदेवाय। श्रीगणेशाय नमः। ॐ सरस्वत्यै नमः। अथ सर्व्वेषामप्याचार्य्याणामाचार्य्यं मां विजानीयादिति श्रीभागवताद्भगवद्वतारत्वेन प्रमितत्वात् तत्तद्वचनानि प्रमाणभूतानि तच्च यद्वल्लभाचार्य्यादिभिर्द्वैतं खण्डितमद्वैतं स्थापितं तत्तथैवाङ्गीक्रियते चेत् तर्हि केवलद्वैतप्रतिपादकमाध्वचनानामप्रामाण्यं स्यात्। यदि माध्व-

वचनप्रामाण्याद्द्वैतमेवाङ्गीक्रियते तर्हि वल्लभाचार्य्यादिवचनानां द्वैतखण्डकानामप्रामाण्यं स्यात्। एवञ्च विप्रतिषेधाच्चासमञ्जसमिति न्यायेन सर्व्ववैष्णवमतानामप्रामाण्यं स्यात्। तस्मात्तत्तद्-ग्रन्थानां पौर्व्वापर्य्याश्चारस्यं (पौर्व्वापर्य्यस्वरसं) विचार्य्य परस्परमचिन्त्यशक्त्या द्वैताद्वैताङ्गी-कारेण सर्व्वाचार्य्यमतानामविरोध एवास्तीति प्रतिपादनार्थं स्वतः अचिन्त्यशक्त्या द्वैताद्वैता-विरोधप्रतिपादकसर्व्वाविरुद्धश्रीनिम्बादित्यमतानुवर्त्तिश्रीमहाप्रभुमतेनायं ग्रन्थ आरभ्यते।

End. महाप्रभुश्रीरामानुजमतस्थः कस्यनोपदिष्ट- माध्वसन्न्यासिनोऽप्युपदिष्टो वल्लभाचार्य्यस्य स्रोचं तैरपि महाप्रभूणां परमादरः कृतः।

Colophon. इति सर्व्वसम्प्रदायाभेदसिद्धान्तः समाप्तः।

विषयः। द्वैताद्वैतमतद्वैधे द्वैताद्वैताविरोधप्रतिपादकश्रीनिम्बादित्यमतानुवर्त्तिश्रीम-हाप्रभुमतानुसारेण द्वैताद्वैतमतयोरविरोधप्रतिपादनं। निम्बादित्यमतन्तु सगुणनिर्गुणब्रह्म-प्रतिपादकं। निर्गुणं ब्रह्म सच्चिदानन्दरूपं तस्य निर्गुणब्रह्मणो भक्तानुग्रहाय गृहीतविग्रहत्वात् तदेव ब्रह्म सगुणं। अतः द्वैताद्वैतमतयोरविरोधः।

No. 2592. नवतत्त्वसूत्रम्, बालावबोधसहितम्। Substance, country-made paper, 14 × 5 inches. Folia, 104. Lines, 10 on a page. Extent, 4,120 *ślokas*. Character, Nágara. Date, Sm. 1850. Place of deposit, *Ajimganj*, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Generally correct. Text in Mágadhí, commentary partly Sañskṛit and partly in Western Hindi.

Navatattva-sútra. On the leading philosophical topics of the Jains. By Siromaṇi. The work is in the Mágadhi language.

Beginning. टीकायाः।

ज्ञानं पञ्चविधं प्रोक्तं श्रुतज्ञानं विशेषतः।
येन श्रवणमात्रेण प्राप्यते परमं पदम्॥

जिणेङ्करी वसुनो स्वरूपजाणिये ते ज्ञानकहियै ते ज्ञान श्रीभगवन्तजी पांचै प्रकार कह्यौ। इत्यादि।

मूलस्य,—

जीवाजीवापुण्णं पारासव संवरोय निज्जरणा।
बंधो मुक्खोय तहा नवतत्ताइं विनायव्वा॥
एकविह दुविह तिविहा चउविहा पंचषड्विहा जीवा।
चेयन तसइयरेहिं वेयगइ करणका एहिं॥ इत्यादि।

End. मूलस्य ।

भंते दाणे किं फले अकिरिया फले सेणं भंते ।

अकिरिया फले सिद्धिपज्जव वासाणफले पण्णे गोयमा ॥

व्याख्याया:,—एवं ग्रन्थ आदिमध्यअन्तविविधमङ्गली कहै । आदिमङ्गलतो पञ्चज्ञानशब्द है । मध्यतो ज्ञानादिअष्टऋद्धि है । अन्तमङ्गलतो श्रीसिद्धभगवन्तो जगत्रयशिरोमणि है इति तत्त्वं । संवत् १७६६ । संवत् १८५० आश्विनमास ।

विषयः । जीव-अजीव-पुण्य-पाप-आश्रव संवर-निर्ज्जर-बन्ध-मोक्षरूपनवविधतत्त्वनिरूपणम् ।

No. 2593. महादेवार्थस्तवः । Substance, country-made paper, 14 × 5 inches. Folia, 3. Lines, 7 on a page. Extent, 49 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Correct.

Mahádevártha-stava. A hymn in praise of Mahádeva as the supreme divinity. In this work an attempt is made to eliminate the human attributes of Mahádeva and refine the conception of his identity. By Hemáchárya.

Beginning. प्रशान्तदर्शनं यस्य सर्व्वभूताभयप्रदं ।

माङ्गल्यञ्च प्रशस्तञ्च शिवस्तेन विभाव्यते ।

महत्त्वादीश्वरत्वाच्च यो नमेश्वरतां गतः ।

रागद्वेषविनिर्म्मुक्तं तं देवञ्च महेश्वरं ॥ इत्यादि ।

End. भववीजाङ्कुरजनना रागाद्याः क्षयमुपागता यस्य ।

ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै ॥

Colophon. इति श्रीहेमाचार्य्यविरचितो महादेवार्थस्तवः ।

विषयः । शिवमहादेवादिनामधेयानां निर्व्वचनकथनमुखेन तेषामर्हत्परत्वनिरूपणं । स्तित्यादीनां शिवमूर्त्तिप्रतिपादकशब्दानां पारिभाषिकत्वकथनपूर्व्वकमर्हत्परत्वनिरूपणं । अर्हन्नामनिर्व्वचनादिकथनञ्च ।

No. 2594. विधिप्रकरणम्, विधिकौमुद्याख्यविवरणसहितम् । Substance, country-made paper, 11 × 6 inches. Folia, 332. Lines, 8 on a page. Extent, 8,109 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose and verse. Text in Mágadhí verse, commentary in Sañskṛita Mágadhí.

Vidh-i-prakaraṇa, with a commentary called *Vidhi-kaumudí.* The text in Mágadhi, and the commentary in Sanskṛit. A complete code of Jain duties including Judicature, Law of Inheritance, and other matters, ordinarily, treated in Hindu Smṛitis. By Ratnasundara Súri, disciple of Somasundara Súri, Munisundara Súri, Jayachandra Súri, and Bhuvanasundara Súri. For a correct understanding of the laws and domestic rules of the Jains this work is of great value. The chapter on inheritance, if translated, would prove of great use in our civil courts.

Beginning. विवरणस्य ।

अर्हत्सिद्धगणीन्द्रवाचकमुनि+ष्ठाः प्रतिष्ठास्पदं
यश्च श्रीपरमेष्ठिनः प्रददतां प्रेाचैर्गरिष्ठात्मनां ।
दैधान् पञ्च सुपर्व्वणां गिरिरिणां प्रेाद्दाममाहात्म्यत-
श्चेतश्चिन्तितदानतश्च क्षतिनां ये स्मारयन्त्यन्वहम् ॥
श्रीवीरं सगणधरं प्रणिपत्य श्रुतगिरश्च सुगुरूंश्च ।
विदधेऽमि सोपज्ञश्राद्धविधिप्रकरणं किञ्चित् ॥
युगवरतया गणाधिपपूज्यश्रीसोमसुन्दरगुरूणां ।
वचनाद्धिगततत्त्वः सत्त्वहितार्थं प्रवर्त्तेऽहं ।

तस्य चेयमाद्यगाथा,—मूलस्य,—सिरिवीरजिणं पणमिअ सुआउसाहेमि किमवि सड्ढविहिं ।

रायगिहे जगगुरुणा जह भणिअं अभयपुढ्ढेणं । इत्यादि ।

End. मूलस्य ।

एअं गिहिधम्मविहिं पइदिअहं निव्वहंति जे गिहिणो ।
इह भवि परभवि निव्वुइ सुहं लहंते लहंति धुवं ॥

विवरणस्य यथा,—

या निर्व्वृतिर्भोक्षसत्सुखञ्च लघु शीघ्रं ध्रुवमवश्यं ते लभन्ते प्राप्नुवन्ति—इति सप्तदशगाथार्थः ।

Colophon. इति श्रीतपागच्छाधिपश्रीसोमसुन्दरसूरिश्रीमुनिसुन्दरसूरिश्रीजयचन्द्रसूरिश्रीभुवनसुन्दरसूरिशिष्यश्रीरत्नशेखरसूरिविरचिते विधिप्रकरणविवरणे षष्ठप्रकाशः ।

विषयः । ये धर्म्मविधिं सम्यक् पालयन्ति ते गृहिणः श्राद्धा इति प्रोच्यन्ते । अत्र हि गृहिणां नित्यनैमित्तिकक्रियाकलापविधीनां सम्यगुपदेशात् श्राद्धविधिप्रकरणमिति नाम्ना ग्रन्थो व्यपदिश्यते । तत्र प्रथमं । गृहिणां दिनकृत्यकथनं । गृहिलक्षणादिकथनं । तत्र लज्जादया-

ष्टकविंशतिगुणकथनं। तचायं भावः। यः खलु, अकार्य्यवर्ज्जितः सत्यानुकम्पकः, अतुच्छहृदयः, सृष्टपञ्चेन्द्रियः, स्वभावतोऽपापकर्त्ता सुखसेव्यश्च। दानविनयशीलवत्तया लोकप्रियः, अक्लिष्टचित्तः, पापायशोभ्यां भीतः, अवञ्चकः, प्रार्थनाभङ्गभीरुः, रागद्वेषरहिततया सौम्यदृष्टिः, दूरादेव दोषत्यागी, गुणपक्षपाती, सत्कथानुरक्तः, सुशीलानुरक्तेन परिवारेण युक्तः, परिणामदर्शी, अपक्षपातितेन गुणदोषविशेषज्ञः, वृत्तस्थज्ञानवयोवृद्धसेवकः, कृतज्ञः, निरीहः सन् परार्थकारी, धर्म्मकृत्येषु सुश्रिक्षितश्चेति। सोऽसौ श्राद्धस्य योग्यत्वेन निर्दिष्टः। अथ शुकराजकथाप्रसङ्गेन जिनेन्द्रस्तवकथनं। अथ नाम-स्थापना-द्रव्य-भावभेदात् श्राद्धस्य चतुर्विधत्वनिरूपणं। तत्र प्रथमः, राजोपाधिधारिदरिद्र इव केवलं नामधारी। द्वितीयः लेपमयादिः। तृतीयः, अनुरागशून्यत्वेन क्रियाकृत्। चतुर्थः, प्रीतिपूर्व्वकारितया क्रियानिष्ठः। अथ भावश्राद्धोऽपि त्रिविधः, दर्शनश्राद्धः, व्रतश्राद्धः, उत्तरगुणश्राद्धश्चेति। तत्र, केवलसम्यक्त्वधारी प्रथमः, सम्यक्त्वमूलानुव्रतधारी द्वितीयः, त्रिविधगुणव्रत-चतुर्व्विधशिक्षाव्रतधारणपूर्व्वकं सम्यक्त्वानुव्रतधारी तृतीयः। अथ श्रावकस्यापि भावश्राद्धधर्म्मोपदेशकथनं। तत्र शृण्वन्ति मुञ्चन्ति दानशीलतपोभावनादिना शुभयोगेन अष्टप्रकारं कर्म्मेति श्रावकशब्दनिर्व्वाचनकथनं। अथ श्राद्धस्य दिनकृत्यनिरूपणं। तत्र प्रथमं प्रातःकृत्यनिरूपणं। शय्योत्थानविधिकथनं। तत्र नाभ्यां पृथिव्यादिपञ्चतत्त्वस्थितिनिरूपणं। मन्त्रजपविधिकथनं। मानस-उपांशु-भाष्यभेदेन त्रिविधजपभेदनिरूपणं। (भाष्यन्तु अन्यत्राख्यं। ध्यानकथनं। योगमाहात्म्यकथनं। स्वप्नकृतप्राणिवधादिपापक्षयाय प्रार्थनादिकथनं। स्वप्नस्य शुभाशुभकथनं। प्रसङ्गात् श्राद्धानां भक्ष्यद्रव्यादिनिरूपणं। अभक्ष्यनिरूपणञ्च। जलादिपानविधिकथनं। तण्डुलादिपाकविधिकथनं। ऋतुभेदे विशेषकथनं। अथ दन्तकाष्ठग्रहणादिविधिकथनं। वारादिविशेषे दन्तकाष्ठादिनिषेधकथनं। स्नानविधिकथनं। देवपूजाविधिकथनं। पुष्पविवेचनं। वस्त्रपरिधानादिविधिकथनं। तिलकविधिकथनं। धूपदीपादिविधिकथनं। अर्हत्पूजायां दिगादिनियमकथनं। तत्र शङ्ख-शृङ्ग-पणव-वेणु-वीणादिवादनविधिकथनं। देवपूजान्ते मौनमेव कार्य्यमितिकथनं। मूलबिम्बपूजापूर्व्वकं अन्यान्यबिम्बपूजाविधिकथनं। अथ एका अर्हत्प्रतिमा अत्याख्या, एकत्र आसने चतुर्विंशतिसंख्याः प्रतिमाः चेत्याख्याः एवं सप्ततिशतप्रतिमा महाख्या इति कथनं। अङ्गपूजाविधिकथनं। नैवेद्यनिरूपणं। आरात्रिकविधिकथनं। नमस्कारविधिः। जैनमूर्त्तिपूजायां पश्चिमाभिमुखत्वस्यावश्यकत्वकथनं। जिनेन्द्रपूजाया एकविंशतिविधत्वकथनं। निषिद्धपुष्पादिनिरूपणं। देवपूजामाहात्म्यकथनप्रसङ्गेन धर्म्मदत्ताभिधानस्य नृपतेरुपाख्यानकथनं। गुरूपसत्तिविधिकीर्त्तनं। देवद्रव्यग्रहणे दोषकथनादिकं। अथ आहारादिविधिकथनं। अथ वणिग्-वैद्यादीनां क्रमेण जीविकाकथनं। जीविकाश्च सप्तविधा एव। वाणिज्यं, विद्या, कृषिः, पाशुपाल्यं। शिल्पं। सेवा। भिक्षा चेति। क्रमेण आसामवान्तरभेदादिकथनं। सर्व्वथा वाणिज्यस्यैव मुख्यत्वकथनं। वचनादानविधिकथनं। शयनादिविधिकथनं। अथ नीतिकथनं। त्रिवर्गसाधनविधिकथनं। माङ्गल्यामाङ्गल्यजननकर्म्म-

निरूपणं। जिनसन्धां जिनपूजाकर्त्तव्यतादिनिरूपणं। अथ स्वाध्यायविधिकथनं। अथ पर्व्वकृत्य-निरूपणं। तत्र अष्टमीचतुर्द्दश्यादिपर्व्वनिरूपणं। पर्व्वदिनेषु कृत्याकृत्यनिरूपणं। आराधना-विधिकीर्त्तनञ्च। चातुर्मासकृत्यविधानं। वर्षकृत्यनिरूपणं। तत्र सङ्घार्चनतीर्थयात्रादि-विधिकथनं। अथ जन्मकृत्यनिरूपणं। तत्र श्रावकस्य अवस्थानयोग्यस्थानादिनिरूपणं। अथ विवाहे वरकन्ययोः गुणादिनिरूपणं। तत्र अग्निदेवादिसाक्षिकं पाणिग्रहणं विवाह इति लक्षणकथनपूर्व्वकं तस्य ब्राह्मादष्टविधभेदनिरूपणं। अथ चैत्यनिर्म्माणविधिकथनं। तत्र प्रति-मास्थापनादिविधिकथनं। तन्माहात्म्यादिकथनं। सम्यग्दर्शनादीनामाजन्मसेवनिरूपणं।

No. 2595. कप्पसुत्तं, (कल्पसूत्रम्।) Substance, country-made paper, 12 × 5½ inches. Folia, 192. Lines, 4—5 on a page. Extent, 1,777 ślokas. Character, Jain, Nágara. Date, ? Place of deposit, Ajimganja, Ráya Dhanapat Siñha, Bahádur. Appearance, fresh. Prose. Correct. Mágadhí.

Kappa-sutta (Sanskrit, **Kalpa-sútra**). Directions for the observance of the quadrimensial Jain fast during partly the rainy and partly the autumn season; it is commonly called *Vassá* or the rainy season fast. The duties to be observed are treated under ten heads, each of which is called a Kalpa. The duties are: 1st, *Áchelakya* or abstinence from raiment? some hold white clothes not to come under the prohibition; 2nd, *Auddeśika*, living in the society of pious hermits; 3rd, *Sayyátara*, abstinence from bedding; 4th, *Rájapiṇḍa*, abstinence from rich dishes or the society of the kings and great men; 5th, *Kṛitikarma*, society of pious men; 6th, *Vratáni*, frequent special, but optional, fasts; 7th, *Purusha-jyeshṭha*, conduct like seniors; 8th, *Pratikrama*, morning and evening exercise; 9th, *Másakalpa*, avoidance of attachment likely to result from constant association with any object; 10th, *Paryúshaṇá*, uniform occupation of the same abode during the currency of the fast. According to some, these Kalpas are reduced to six. The work treats of each of these Kalpas at length, and illustrates its themes by reciting many legends, drawing them frequently from the lives of the last three great Jinas. The work is in Mágadhi.

Beginning. तेणं कालेणं तेणं समयेणं भगवं महावीरे पंच हत्थोत्तरो हत्थो। तं जहा हत्थुत्तराहिं चुअ च इत्ता गब्भं वक्कं ते। इत्यादि।

End. एवं भासेइ एवं पण्णवेइ एवं प ⊢ वेइ पज्जोसणा कप्पा नाम अज्झयणं

स अचं सहेउयं सकारणं समुत्तं सअदुं सउभयं सवागरणं भुज्जो भुज्जो उवदंसे इति बेमि।

Colophon. इति पञ्चोसणाकप्पोदसासु अक्खं धम्म अठमं अवभणं समत्तं ॥ इति कप्प सुत्तं समत्तं ॥

विषयः। कल्पः साध्वाचारः (कल्पोऽयं चतुर्मासकमासौनैः यतिभिः मङ्गलनिमित्तं वाच्यते उपदिश्यते।) स च दशविधः। क्रमेण यथा,—प्रथमतः आचेलक्यं। (नास्ति चेलं वस्त्रं यस्यासौ अचेलकः तस्य भावः आचेलक्यं। केषाञ्चित् श्वेतवस्त्रधारिणेऽपि अचेलकत्वमौपचारिकमिति।) द्वितीयः औद्देशिकं। (उद्दिश्य साधून् अङ्गीकृत्य क्रियते यत् तदौद्देशिकमशनादिकं।) तृतीयः शय्यातरः। (शय्यया वसत्या तरतीति शय्यातरः, वसत्यादिदानेन यतयः पूज्या इति भावः।) चतुर्थः, राजपिण्डः। (राजा तावदुदितकुलप्रसूतः सेनापतिपुरोहितादिपञ्चलक्षणलक्षितः। तस्य पिण्डः। अधिकारिविशेषेण तस्य निन्द्यत्वप्रतिपादनमिति।) पञ्चमः कृतिकर्म्म। (तच्च द्विधा अभ्युत्थानं वन्दनञ्च। सर्व्वैरपि साधवो वन्दनीया इति भावः।) षष्ठः व्रतानि। सप्तमः पुरुषज्येष्ठः, (ज्येष्ठताव्यवहारः।) अष्टमः प्रतिक्रमणं। (उभयसन्ध्यं परिक्रमः कर्त्तव्य इति।) नवमः मासकल्पः। (एकत्र अधिकदिनावस्थाने शय्यातरादिवस्तुषु अभिष्वङ्गो भवति ततः शय्यनादिभूमिपरावर्त्तनमवश्यं विधेयमिति भावः।) दशमः पर्य्युषणाकल्पः। (परि सामस्त्येन एकत्र अवस्थितिश्चेत्यमाचे वसतिः पर्य्युषणा। कल्पोऽयं द्विविधः सालम्बनो निरालम्बनश्च। निरालम्बोऽपि द्विधा जघन्य उत्कृष्टश्चेति।) एते दश विकल्पा ऋषभवर्द्धमानादितीर्थे नियता एव। अन्यच तु षट्कल्पा निर्दिष्टाः। कल्पानामिह नियतविभागकरणे कारणं तावत् तत्तत्कालभाविनो मनुजा एव। अत्र यथाक्रमेण दृष्टान्तकथनं। तत्र कौङ्कणसाधुचरित्रकीर्त्तनं। श्रेष्ठिपुत्रविवरणकथनं। अथ जिनानां चरित्रकीर्त्तनं। तत्र विशेषेण महावीरस्य चरित्रकथनं। पार्श्वनाथचरित्रकथनं। नेमिनाथचरित्रकथनं। ऋषभदेवचरित्रकथनं। अथ जम्बूस्वामिमूलभद्रप्रभृतीनां स्थविराणां चरित्रकथनं। पर्य्युषणाकल्पानुष्ठानविधिकथनं। कल्पमाहात्म्यकीर्त्तनञ्च।

No. 2596. कम्मविवागं, (कर्म्मविपाकम्।) Substance, country-made paper, 12 × 6 inches. Folia, 40. Lines, 8 on a page. Extent, 560 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganja, Ráya Dhanapat Siñha, Bahádur. Appearance, new. Verse. Incorrect. Mágadhí.

Kammabibága. This is a counterpart of the Hindu *Karmavipáka*, and treats of the retributions in after life of works done in this life. Anonymous.

Beginning. सिरिवीरजिणं वंदिअ कम्मविवागं समासओ वुत्थं।
कीरइ जिएण हेउहिं जेण तो भण्णए कम्मं॥
परइ विइरस पएसा तं चउहा मोअ गस्मदिट्ठंता।
मूलपगइ उत्तर पगइ अडवन्न स य॥ इत्यादि।

End. गाहगां स परीए चंदमहत्तर मयानुसारीए।
+ गाइ निअ मियाणं एगुणा चोइ नवइओ॥

Colophon. इति समाप्तो।

विषयः। क्रियते यत् तत्कर्म्म तथाच जीवेन मिथ्यादिभिः हेतुभिः क्षीरनीरन्यायेन कर्म वर्गणाद्रव्यं येन कारणेन आत्मसंबद्धं क्रियते तस्मात् कर्म्म भण्यते। तच्च शुभाशुभकर्म्मणां परीपाककथनमुखेन जीवानां ज्ञानावरणदर्शनावरणादिकर्म्मस्वरूपादिनिरूपणं। तथा च ज्ञायते परिच्छिद्यते वस्तु अनेनेति ज्ञानं तच्च सामान्यविशेषात्मके वस्तुनि विशेषात्मको बोधः। तथा दृश्यते अनेनेति दर्शनं। तच्च सामान्यविशेषात्मके वस्तुनि सामान्यग्रहणात्मको बोध इति। आवियते आच्छाद्यते अनेनेति आवरणं। निरुक्तयोर्ज्ञानदर्शनयोरावरणञ्च अनस्मिंस्तत्प्रकारकत्वरूपमयाथार्थ्यमिति समुदितार्थः। एवं बन्धादिनिरूपणञ्च।

No. 2597. कल्पकिरणावली। Substance, country-made paper, 13 × 5½ inches. Folia, 250, Lines, 7 on a page. Extent, 4,575 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganja, Ráya Dhanapat Siñha, Bahádur. Appearance, old. Prose. Correct.

Kalpa-kiraṇávalí. A Sanskrit commentary on the *Kappa-sutta* noticed under, No. 2595.

Beginning. प्रणम्य प्रणताशेषवीरं वीरजिनेश्वरम्।
स्ववाचनकृते कुर्वे कल्पव्याख्यानपद्धतिम्॥

इह हि तावच्चतुर्मासकमासीना मुनयो मङ्गलनिमित्तं पर्य्युषणाकल्पाभिधमध्ययनं पञ्चदिनानि वाचयन्ति तच्च कल्पः साध्याचारः। स च दशधा तद्यथा. आचेलक्कु उद्देसिय, सिज्जायर, रायपिण्ड, किइकम्मवय, जिट्ठ, पडिक्कमण, मासं पज्जोसवणाकल्प। इत्यादि।

End. नेदं स्वमनीषिकया ब्रवीमि किन्तु तीर्थकरगणधरोपदेशेनेति। अनेन च गुरुपारतन्त्र्यमभिहितमिति।

इति श्रीमत्तपागणगगनाङ्गणभोमणिश्रीमहीरविजयसूरिशिष्योपाध्यायश्रीधर्म्मसागरगणिविरचितं व्याख्यानं।

व्याख्योपयोगिनिःशेषवाच्य + + + वस्तिनां ।
स्फूर्त्तिकर्त्रो सदाख्येषा श्रीकल्पकिरणावली ॥
विक्रमादृष्टयुक् षट्कशशाङ्काङ्कित १६२८ वत्सरे ।
दीपोत्सवदिने दृष्ट्वा राजधन्यपुरे पुरे ॥
अनुष्टुपोऽष्टचत्वारिंशच्छतानि च चतुर्दश ।
षोड़शोपरिवर्णाश्च ग्रन्थमानमिहेदितम् ॥

Colophon. इति श्रीकल्पकिरणावली समाप्ता ।

इतः परं व्याख्यातुः प्रशस्तिर्वर्त्तते सा च लुप्तप्रायेति ।

विषयः । कल्पसूत्रस्य व्याख्यानम् ।

No. 2598. प्रश्नव्याकरणम् । Substance, country-made paper, 14 × 5 inches. Folia, 96. Lines, 5—6 on a page. Extent, 1,169 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganja, Ráya Dhanapat Siñha, Bahádur. Appearance, fresh. Gáthá, prose. Incorrect.

Praśna-vyákaraṇa. Questions and answers about sins and their retributions—a work closely similar to the *Kamma-libága*, No. 2596. By Sudharmá Svámí, in Mágadhi.

Beginning. जम्बू इणमो अन्नय संवर विणिच्छियं पवयणस्स
निस्सुदं वोच्छामि निच्छयत्थं सुभासियत्थं महेसीहिं ।
पंचविहोपसमो जिणेहिं दुह अन्नयो अणादिवे
हिंसा मोसमदत्तं अवंभ परिग्गहं चेव ॥ इत्यादि ।

End. अज्झयणं एक्कं सरगादसमु चेव दिवसेसु ॥
उद्दिसिज्जंति एकं तरसु आयं विलेसु निरुद्देसु ।
आउत्तभत्तपाणेणं अंगजहा आयारस्स ॥

Colophon. इति श्रीप्रश्नव्याकरणं दशमाङ्गं समाप्तं ।

विषयः । तत्र आभिमुख्येन स्रवति कर्म्म येभ्यस्ते आस्रवाः तथा संव्रियते निरुध्यते आत्मनड़ागे कर्म्मजलं प्रविशत्येभिरिति संवराः । तथा च आस्रवाः पञ्च संवराश्च पञ्च तेषां प्रश्नाः प्रश्नविद्याः व्याक्रियन्ते व्युत्पाद्यन्ते अस्मिन्निति ग्रन्थाभिधेयो ज्ञातव्यः । तत्र पापप्रकृतिनिरूपणं । हिंसाया निर्द्दुःखत्वकथनपूर्व्वकं पाप-चण्ड-रुद्र-साहसिक-अनार्य्य-निर्घृण-नृशंस-महाभय-प्रतिभयादीनां आस्रवद्वारत्वकथनं । अथ प्राणवधपर्य्यायकथनं । जलचर-भूचर-खेचरादिप्राणिनिरूपणपूर्व्वकं भोजन-वसन-भूषण-गृहादिनिर्म्माणेषु किमपि प्रयोजनमपेक्ष्य वालिशाः जलकाय-

पृथिवीकायप्रभृतीन् जीवान् हिंसन्तीति निरूपणं। विविधकारणेन प्राणिहिंसकाः म्लेच्छा एव, ते च शक-यवन-शवर-बर्बर-गौड़-सिंहल-पारस-क्रौञ्च-अन्ध्र-द्रविड़-पुलिन्द-मलय-चूलिक-पञ्चव-मालव-चीन-खस-महाराष्ट्र-आरव-ङ्कण-रोमक-मरुकप्रभृतय इति निरूपणं। अपि च ते प्राणवधरूपपापस्य विपाकमजानन्तो नरकतिर्य्यग्योनिं वर्द्धयन्तीतिनिरूपणं। अथ प्राणिहिंसकानां नरकयन्त्रणाकथनप्रसङ्गेन विस्तरतया भीषणनरकवर्णनं। किञ्च ते प्राणिनः नरकादुद्गताः तिर्य्यग्योणिषु जायन्ते-इति निरूपणञ्च। अथ हिंसाजनितपापविशेषेण कुब्जत्व-वामनत्वादिप्राप्तिकथनं। (इतिआश्रवस्य प्राणिवधरूपः प्रथमद्वारः)। अथ तस्य मृषावादरूप द्वितीयद्वारकथनं। तच्च मृषा-असत्य-कपट-अपार्थादिरूपतत्पर्य्यायकथनपूर्व्वकं मृषावादस्य नितरां हेयत्वप्रतिपादनं। अथ चार्व्वाक-बौद्धादीनां मतस्य मिथ्यात्वकथनपूर्व्वकं देहात्मवादादिखण्डनं। अथ वैदिकपौराणिकादिमतस्य च मिथ्यात्वकथनं। अथ तृतीयद्वारं। तच्च अदत्तादानरूपचौर्य्यनिरूपणं। तत्पर्य्यायादिकथनं। युद्धादिकरणनिन्दाकथनं। तच्च २ पापविशेषनिरूपणञ्च। चौर्य्यापवादादिनिरूपणं। अपङ्गवादिभेदकथनञ्च। अथ कामरूपचतुर्थद्वारनिरूपणं। तत्पर्य्यायादिनिरूपणं। पापभेदनिरूपणं। कामसाधननिरूपणं। अत्र श्रीकृष्णस्य दृष्टान्तकीर्त्तनं। रामचन्द्रस्य विवरणकथनञ्च। अहिंसासत्यादिमाहात्म्यकीर्त्तनं। मद्यद्वारनिरूपणं। तत्र कषायादिनिरूपणं। आर्त्तरौद्रादिध्याननिरूपणं। साध्वाचारनिरूपणञ्च।

No. 2599. लघुक्षेत्रसमासप्रकरणम्। Substance, country-made paper, 11 × 6 inches. Folia, 32. Lines, 7 on a page. Extent, 488 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganja, Ráya Dhanapat Siñha, Bahádur. Appearance, new. Verse, Gáthá. Incorrect.

Laghukshetra-samása-prakaraṇa. A Jain Geography. Anonymous. In Mágadhi.

Beginning. वीरं जयसेहरमयपद्दियं पणमि उण सगुरुं च।
मंभ्भत्ति ससरणद्द खित्त विपाराणु मुंचामि॥
तिरिच गरजु खित्ते असंख दीवेा दहीत्तते सव्वे।
उदार पलिय पणवीस कोड़िकोड़ीसमय उल्ला॥ इत्यादि।

End. सूरिहिं जंरयण सेहरणाम एहिं
अप्पथेमेव रद्दयं नरक्खितवक्खं।
संसोहियं पयरणं सुयणेहिं लोए
पावे उतं कुसलरं गमयं पसिद्धं॥

Colophon. इति लघुक्षेत्रसमासप्रकरणं सम्पूर्णं।

विषयः। तिर्य्यक्चेचस्थद्वीपोदधीनां परिमाणादिकथनं। क्षुल्लानुकल्पनया तेषामसंख्येयत्वकथनं। अथ जम्बूद्वीपधातकीखण्ड-पुष्करादिद्वीपानां नामकथनं। लवणाद्युदधीनां नामकथनं। द्वीपोदधीनां क्रमेण विस्तारादिमानकथनं। तच वेदिकावनरमणीयतावर्णनं। तच देवीनां देवानाच्च उत्पत्तिकथनं। अथ जम्बूद्वीपस्थहिमालयादिकुलगिरिकथनं। वर्षनिरूपणं। तच तच पर्व्वतानां नामकथनं। भारतवर्षादीनां विष्कम्भादिप्रमाणकथनं। तच करणसूचानयनादिप्रकारकथनच्च। नदीनिरूपणं। जम्बूद्वीपस्थनदीनां द्वादशगुणसंख्यकत्वकथनं। अथ जिनभवनानां प्रमाणकथनं। चैत्यमानादिकथनं। मागधादीनां तीर्थानां कथनं। चक्रस्वरूपकथनं। प्रथमान्तिमजिनोत्पत्तिकथनं। पूर्णकालचक्रकथनं। मेरुस्वरूपकथनं। पण्डकवने जिनभवनप्रमाणादिकथनं। सिंहासनादिप्रमाणकथनं। नन्दनवनभद्रशालवनादिकथनं। अधोलोकवासिनीनां दिक्कुमारीणां स्थानादिकथनं। विजयादिकथनं। जिनादीनां सम्भवकथनं। चन्द्रचारकथनं। तयोः परस्परान्तरकथनं। प्रतिमण्डलादिकथनं। ग्रहादीनां संख्यापरिज्ञानाय करणसूचकथनं। जम्बूद्वीपादीनां परिधानयनादिविधिकथनं। पातालनिरूपणं। अन्तरद्वीपादिनिरूपणं। मेरुद्वयस्वरूपादिकथनं।

No. 2600. गौतमीयमहाकाव्यम्। Substance, country-made paper. 15 × 6 inches. Folia, 34. Lines, 5 on a page. Extent, 478 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganja, Ráya Dhanapat Siñha, Bahádur. Appearance, new. Verse. Incorrect.

Gautamíya-mahákávya. A Sanskrit poem in 10 cantos on the life of Mahávira, the last Jina. By Rúpachandra Gaṇi, disciple of Dayásiñha Gaṇi.

Beginning. श्रीराविरासीदिव दिव्यदीप्तिर्यस्यात्मनि ज्ञानमयी समग्रा।
तीर्थप्रवृत्त्यै स च वीरनाथः प्रख्यातुमैच्छन्नगरीमपापाम्॥
तावद्विदित्वागममस्य धाचीपतेरिव व्यन्तरदेवसंघः।
इव क्रियावान् वनपालवर्गः ससर्ज्ज रम्यं महसेनषण्डं॥
स्वराज्यदेशानिव राजवर्य्या विभज्य दत्तान्ततवोऽध्ववासुः।
स्वसारसम्भारमथाभिरामं विकाशयामासुरिनार्चनाय॥ इत्यादि।

End. भव्याम्भोरुहबोधने दिनकरस्त्रिंशत्समा भूतले
मोहाज्ञानतमोभरं विघटयन् यो धर्म्मराज्यं व्यधात्।
यस्याक्षाय निनाय जन्तुनिकरं स्वर्गापवर्गालयं
स श्रीवीरजिनेश्वरो भवतु नः संघस्य च श्रेयसे॥

Colophon. इति वाचनाचार्यश्रीदयासिंहगणिशिष्यकविरूपचन्द्रगणिविरचिते गौतमीये महाकाव्ये एकादशः सर्गः। समाप्तोऽयं ग्रन्थः।

विषयः। १ प्रथमे सर्गे,—वीरजिनस्य अपापाभिधानपुरगमनवर्णनप्रसङ्गेन तत्रत्येषु षड्ऋतुप्रादुर्भाववर्णनं। २ये सर्गे,—पवनकुमारनिर्झराणां भगवति वीरजिने भक्त्यातिशय्यवर्णनं। अशोकचैत्यशालादिनिर्म्माणवर्णनं। भगवत्समवसरणवर्णनञ्च। ३ये सर्गे,—भगवतो देवगणैः सार्द्धं समवसरणे निशायां विलासवर्णनं। ४र्थे सर्गे —अथ प्रभाते चैत्यद्रुमसन्निकर्षमधिष्ठितस्य भगवतः सौन्दर्य्यवर्णनम्। अथ प्रसङ्गेन गुर्व्वरग्रामवसतेरिन्द्रभूत्यभिधानस्य गौतमगोत्रस्य ब्राह्मणस्य वृत्तान्तकथनं। तस्य सौन्दर्य्यपाण्डित्यादिवर्णनं। तत्कृतज्योतिष्टोमयज्ञानुष्ठानवर्णनं। ५मे सर्गे,—अथ तस्मिन्नेव समये विमानयानेन समवसरणमुद्दिश्य चलिता देवा "समेव यज्ञानुष्ठानेन नितरां प्रीतिमापन्ना देवा प्रत्यक्षमिहैवागच्छन्तीति" ज्ञातहर्षेण गौतमेन तेषामनागमनेन च निकामं निरुत्साहतया दूतमुखेन समवसरणे भगवान् विहरतीति विदितवृत्तान्तेन तेन पञ्चशतसंख्यकैः शिष्यैः सह तत्र गमनवृत्तान्तवर्णनं। ६ष्ठे सर्गे —तत्र प्रविष्टस्य तस्य भगवदैश्वर्य्यदर्शनेन विचित्रतावर्णनं। ७मे सर्गे,—अथ सर्व्वज्ञेन भगवता महावीरेण स्वयमेव गौतमहृदथस्थं जीवात्मविषये संशयमुत्प्रेक्ष्य प्रथमतः चार्व्वाकबौद्धादिमतकथनपूर्व्वकं नायमात्मा प्रत्यक्षानुमानागमादिसंवेद्य इति निरूप्य च विज्ञानात्मा चिन्मयोऽयं जीवात्मा प्रत्यक्षत एव उपलभ्यते अपि च नासौ विभुः किन्तु किञ्चिन्मूर्त्तिमान् देहपरिमितः अनेकश्चेति निरूपितं। अत्र नैयायिकवैदान्तिकादिमतखण्डनञ्च। अथैतत् निशम्य गौतमोऽपि सह शिष्यगणैः भगवतः प्रव्रज्यां जग्राहेति कथनं।

८मे सर्गे,—अथैतद्वृत्तान्तमुपलभ्य अग्निभूतिर्नाम इन्द्रभूतेः सहोदरः भगवन्तं वीरजिनमुपससाद। भगवानपि तन्मनोगतं भावं समाकलय्य अदृष्टवादसंस्थापनपूर्व्वकं तस्य मूर्त्तत्वमपि कथयामास। अत्रान्तरे नात्मा वायुभूतिर्ज्ञाता गौतमस्य जिनान्तिकमुपतस्थौ। भगवानपि देहात्मवादपक्षपातिनं तमुपदिदेश देहातिरिक्तात्मवादोपपादनेन। अथ तावपि भगवत्कृपया प्रव्रज्यामापतुरितिकथनञ्च। ९मे सर्गे,—अथ जगदिदं स्वप्नोपममिति मन्यमानस्य व्यक्ताभिधानस्य कस्यचिन्महापण्डितस्य पुरतो भगवतो जिनस्य भूतास्तित्वप्रतिपादनपुरःसरं तस्मै जैनदीक्षादानमिति विवरणम्। अथ सधर्म्माभिधेयस्य कस्यचिदाचार्य्यस्य पण्डितमण्डितनामकस्य च कस्यचित् स्वामिनः कारणकार्य्यविषये कर्म्मबन्धविषये च संशयं निरस्य भगवतः दीक्षादानविवरणकथनं। अथ शक्रादिदेवानामस्तित्वविषये सन्दिग्धचित्तस्य सुधर्म्माभिधानस्य कस्यचिदाचार्य्यस्य वीरजिनप्रभावेन विगतसन्देहतया सशिष्यस्य तस्य ततो दीक्षाग्रहणादिवृत्तान्तकीर्त्तनं।

१०मे सर्गे,—नरकादिविषये सन्दिहानस्य अकम्पिताचार्य्यस्य जिनप्रभावात् निरस्तविप्रतिपत्तिकतया जैनदीक्षाग्रहणकथनं। अथ पुण्यपापयोरस्तित्वे विप्रतिपन्नस्य अचलभ्रातृनामकस्य कस्यचित् विदुषः संशयापनोदनेन तस्मै भगवान् जैनदीक्षां प्रददाविति कथनञ्च। ११शे

सर्ग,—परलोकविषये संशयारूढचित्तस्य मेतार्य्यनामधेयस्य कस्यचित् विद्वद्वरस्य भगवज्जिनप्रसादेन तच्च निःसंशयतया प्रव्रज्याग्रहणादिकथनं। अथ निर्व्वाणविषये सन्दिहानस्य प्रभासाभिधानस्य आचार्य्यस्य जिनकृपया संशयापनोदनद्वारा तद्दीक्षाग्रहणविवरणकथनं। तच्च हि निर्व्वाणदशायां जीवः सच्चिदानन्दरूपतया परात्मभावेन सिद्धक्षेत्रे तिष्ठति। परात्मभावापन्ना जीवाश्च बहवः। जीवातिरिक्तः कोऽपि परात्मा नास्तीति विज्ञेयम्।

No. 2601. गौतमीयप्रकाशः। Substance, country-made paper, 15 × 6 inches. Folia, 200. Lines, 10 on a page. Extent, 4,602 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Corrupt Sanskrit.

Gautamíya-prakáśa. A commentary on the work described under the next preceding No. By Kshemakalyáṇa Gaṇi, disciple of Amṛitadharma Gaṇi.

Beginning. अनन्तविज्ञानमयं विशुद्धं निरुद्धरागादिपरं प्रचारम्।
जिनोत्तमं वीरमचिन्त्यशक्तिं निधाय भक्त्या हृदयाब्जकोषे॥
निराश्रवोद्दामगुणैकधाम समुल्लसद्विघ्नविघातदक्षं।
गणेश्वराणां गणमुक्तियुक्त्या विधाय सद्यः स्तुतिगोचरञ्च॥
प्रणम्य रम्यं गुरुपादपद्मं सरस्वतीञ्चापि निवेश्य चित्ते।
श्रीगौतमीयोत्तमकाव्यबन्धे वितन्यतेऽसौ प्रवरप्रकाशः। विभिः मदुकं॥

अथ तत्र भवन्तः श्रीमन्तः कवयः पाठकरूपचन्द्रगणयः सत्काव्यस्यानेकश्रेयःसाधनतां पश्यन्तो निर्दुष्टसकलजनमनश्चमत्कारकारि चारु गौतमीयाख्यं महाकाव्यं चिकीर्षवश्चिकीर्षितार्थस्याविघ्नपरिसमाप्त्यर्थमाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्युक्तत्वाद्ग्रन्थादावाशीराद्यन्यतमं मङ्गलमवश्यं कर्त्तव्यमितिमन्वानाः श्रीवीरप्रभोरपापां पुरीं प्रति या प्रस्थानेच्छा तद्रूपं वस्तु निर्दिशन्तः प्रबन्धमुपनिबध्नन्ति। तदादिमं काव्यमाह श्रीरावीरिति। स वीरनाथो वीरप्रभुश्रीर्येषु चतुर्व्विधसंघस्य प्रदत्ते—इत्यादि।

End. शार्दूलविक्रीडितच्छन्दोऽलङ्कृतं। तल्लक्षणं प्रागुक्तमेवेति। एतत्पद्यचतुष्टयमपि स्वदार्थमिति न व्याख्यातम्।

Colophon. इति वाचनाचार्य्यश्रीमदमृतधर्म्मगणिविनेयवाचनाचार्य्यचमाकल्याणगणिनिर्म्मितायां गौतमीयमहाकाव्यस्य व्याख्यायां गौतमीयप्रकाशाख्यायामेकादशः सर्गः। समाप्तेयं व्याख्या।

विषयः। रूपचन्द्रगणिकृतगौतमीयमहाकाव्यस्य व्याख्यानम्।

No. 2602. प्रश्नोत्तरोपासकाचारः। Substance, country-made paper, 14 × 6 inches. Folia, 142. Lines, 8 on a page. Extent, 3,384 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Generally correct. Sanskrit and Gáthá.

Praśnotatropásakáchára. A dialogue on the duties of Jain Upásakas, interspersed with many tales and anecdotes. By Sakalakírtti Bhaṭṭáraka.

Beginning. जिनेभं वृषभं वन्दे वृषभं वृषनायकं।
वृषाय भुवनाधीशं वृषतीर्थप्रवर्त्तकं॥
मोहनिद्रातिरेकेण जगत्सुप्तं वयोंऽशुभिः।
बोधितं शिरसा येन वीराय च नमोऽस्तु ते॥
द्वाविंशतिजिनान् शेषान् भव्यलोकसुखप्रदान्।
वन्दे प्रारब्धसिद्ध्यर्थं धर्म्मसाचाय्यनायकान्॥
अष्टकर्म्म विनिर्मुक्तान् गुणाष्टकविभूषितान्। इत्यादि।

End. पूर्व्याष्टाष्टद्वयाङ्काब्दं संख्यया मुनिनोदितं।
नन्दतत्त्वावनौ ग्रन्थो यावत्कालान्तमेव हि॥

Colophon. इति श्रीभट्टारकश्रीसकलकीर्त्तिविरचिते प्रश्नोत्तरोपासकाचारे चतुर्विंशतितमः परिच्छेदः। श्रीरस्तु। संवत् १८६८। //

विषयः। धर्म्मलक्षणादिकथनं। जैनागमप्रदर्शनिरूपणं। जीवाजीवास्रव-बन्ध-सम्वर-निर्ज्जर-मोक्षरूपसप्ततत्त्वनिरूपणं। अथ अर्हज्जिनादिशब्दनिर्व्वचनकथनं। जिनानां क्षुत्पिपासाद्वेषरागमोहविस्मयनिद्राद्यष्टादशदोषहीनत्वकथनं। जिनानामनन्तगुणत्वमनन्तमहिमत्वज्ञेतिकथनं। अहिंसालक्षणधर्म्मनिरूपणं। जीवादिहिंसने प्रत्यवायकथनं। प्रत्यहं स्नानाद्यनुष्ठाने पापातिशयकथनं। पितॄनुद्दिश्य तर्पणश्राद्धाद्यनुष्ठाने प्रत्यवायकथनं। पित्रादीनुद्दिश्य दानादेरपि निरर्थकत्वकथनं। मिथ्यात्वस्वरूपकथनपूर्व्वकं तद्दोषनिरूपणं। तपस्याकरणस्य प्रशंसाकीर्त्तनं। अष्टाङ्गनिरूपणं। अथ अमितिप्रभनामकस्य देवस्य दृष्टान्तकीर्त्तनं। अञ्जनाख्यचौरस्य विवरणकथनं। अनन्तमत्या उपाख्यानकथनं। वङ्गदेशीयस्य उद्दापनाभिधानस्य नृपतेरुपाख्यानं। तन्महिष्या रेवत्या दृष्टान्तकथनं। सौराष्ट्रदेशाधिपस्य यशोधरस्य कथाकीर्त्तनं। उपगूहनगुणस्थितीकरणनिरूपणमुखेन जिनदत्तवारिषेणस्य उपाख्यानकथनं। वात्सल्यगुणप्रशंसाप्रसङ्गेन विष्णुकुमारस्य कथाकीर्त्तनं। हस्तिनापुरवास्तव्यस्य वज्रकुमारस्य दृष्टान्तकथनं। गुणाष्टकमाहात्म्यकथनञ्च। अथ सम्यक्त्वमलदोषपञ्चविंशतिदोषनिरूपणं। सम्यक्त्वनिरूपणं। सम्यग्दर्शन-

माहात्म्यकीर्त्तनं । अष्टमूलगुणनिरूपणं । द्यूतामिषादिसप्तव्यसननिरूपणं । हिंसाविरतिव्रतनिरूपणं । तच्च मातङ्गधनश्रीकथाकीर्त्तनं । सत्यव्रतानुष्ठानमाहात्म्यकीर्त्तनं । अत्र धनदेवसत्यघोषयोः कथाकथनं । दयाव्रतानुष्ठानमाहात्म्यकीर्त्तनं । अत्र वारिषेणकथाकीर्त्तनं । ब्रह्मचर्य्यानुव्रतमाहात्म्यकथनं । नीलयारत्तकोपाख्यानकीर्त्तनं । परिग्रहप्रमाणरूपसन्तोषानुरूपव्रतकीर्त्तनं । अत्र नवनीतोपाख्यानकीर्त्तनं । अथ गुणव्रतकथनं । तच्च दिग्व्रतादिविविधव्रतमाहात्म्यकथनञ्च । अथ शिक्षाव्रतकथनं । तच्च सामायिकादिव्रतमाहात्म्यकीर्त्तनं । प्रोषधव्रतमाहात्म्यादिकथनं । अथ चतुर्व्विधदानव्रतमाहात्म्यादिकथनं । तच्च दानयोग्यदेशकालपात्रादिनिरूपणञ्च । शूकरभेककथादिकीर्त्तनञ्च । अथ सन्न्यासादिमाहात्म्यकथनं । रात्रिभोजननिन्दाकथनं । निधुवनादिनिन्दादिकथनं । विशेषेण ब्रह्मचर्य्यव्रतविधिकथनञ्च । अथ पापानुमतिवर्ज्जनादिविधिकथनं ।

No. 2603. प्रज्ञापनाटीका । Substance, country-made paper, 12 × 5 inches. Folia, 440. Lines, 13 on a page. Extent, 11,440 ślokas. Character, Nágara. Date, Sm. 1866. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose, Sanskrit and Mágadhi. Correct.

Prajṇápaná-ṭíká. A commentary on the Jain Sútra text entitled Paṇṇávaná. By Malaya Girí.

Beginning. जयति नमदमरमुकुटप्रतिबिम्बच्छद्मविहितबहुरूपः ।
उद्धर्त्तुमिव समस्तं विश्वं भवपङ्कतो वीरः ।
जिनवचनाम्भोधिं वन्दे यद्बिन्दुमात्रमादाय ।
अभवन्नूनं सत्त्वा जन्मजराव्याधिपरिहीनाः ॥
प्रणमत गुरुपदपङ्कजमधरीकृतकामधेनुकल्पलतम् ।
यदुपास्तिवशान्निरुपममभ्युदयते ब्रह्म तत्त्वभाजः ॥
जड़मतिरपि गुरुचरणोपास्तिसमुद्भूतविपुलमतिविभवः ।
समयानुसारितोऽहं विदधे प्रज्ञापनाविवृतिम् ॥

अथ पण्णावणेति प्रज्ञापनेति कः शब्दार्थ उच्यते । प्रकर्षेण निःशेषकुतीर्थकरासाध्येन यथावस्थितस्वरूपनिरूपणलक्षणेन ज्ञाप्यन्ते शिष्यबुद्धावारोप्यन्ते जीवाजीवादयः पदार्था अनयेति प्रज्ञापना । इत्यादि ।

End. अतएव सुखिनः सन्तिष्ठन्ति ।
नमत नयभङ्गकलितं प्रमाणबहुलं विशुद्धसद्बोधं ।

जिनवचनमन्यतीर्थिककुमतनिरासैकदुर्ललितं ॥
जयति हरिभद्रसूरिष्टीकाकृद्विषमविष्टभावार्थः ।
यद्वचनवशाद्हमपि जातो लेशेन विष्टतिकारः ॥
कृत्वा प्रज्ञापनाटीकां पुण्यं यदवाप मलयगिरिरनघं ।
तेन समस्तोऽपि जनो लभतां जिनवचनसम्बोधं ॥

Colophon. इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां षट्त्रिंशत्तमं पदं समर्थितं । समर्थिता प्रज्ञापनाटीका । संवत् १८९९ ।

विषयः । प्राक्तनभाषामयस्य पण्णावणेतिसमाख्यस्य जैनसूत्रग्रन्थस्य व्याख्यानम् ।

No. 2604. हनुमदष्टकम् । Substance, country-made paper, 13 × 4¼ inches. Folia, 2. Lines, 8 on a page. Extent, 24 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Paṇḍit Syámalála Duve. Appearance, old. Verse. Incorrect.

Hanumadashṭaka. A mystic mantra in praise of Hanumán. By Rámachandra.

Beginning सं सं सं
श्रं श्रं श्रं सिद्धिनाथं प्रणमति चरणं वायुपुत्रञ्च रुद्रं
दं दं दं
तं तं तं दिव्यरूपं मृदुमृदुहसितं गर्ज्जितं मेघशब्दं ।
तं तं तं त्रैलोक्यनाथं तपति दिनकरं तन्त्रिनेत्रस्वरूपं
कं कं कं कन्दर्पजितं कलिमलहरणं शाकिनीकालरूपं ॥ इत्यादि ।

End. सङ्ग्रामे शत्रुमध्ये जलनिधितरणे व्याघ्रसिंहे च सर्पे
राजद्वारे च मार्गे गिरिगुहविवरे निर्झरे कन्दरे वा ।
भूतप्रेतेषु सर्व्वे ग्रहगणविषये शाकिनीयोगिनीनां
विस्फोटस्य ज्वराणां दलति हनूमतो + + रुद्रं नितान्तं ॥
पठनाच्छ्रवणाज्जापात् सिद्धं भवति वाञ्छितं ।
सर्व्वकामाः फलन्त्येव लभ्यते नाच संशयः ॥

Colophon. इति श्रीरामचन्द्रेण विरचितं हनूमदष्टकं समाप्तं ।

विषयः । हनूमतो माहात्म्यकीर्त्तनं ।

No. 2605. शिवमहिमस्तोत्रम् । Substance, country-made paper, 12 × 5 inches. Folia, 8. Lines, 6 on a page. Extent, 234 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Pundit S'yámalála Duve. Appearance, new. Verse. Incorrect.

S'ivamahima-stotra. A hymn in praise of S'iva, alleged to have been imparted by Vishnu to S'esha.

Beginning. मदेशानन्ताद्यचिगुणरहितामेयविमल-
स्वराकारापारामितगुणगणाकारनिहते ।
निराधाराधारामरवरनिराकारपरम
प्रभापूराकारावरपर नमो वेद्य शिव ते ॥
नमो वेदावेद्याखिलजगदुपादाननियम
स्वतन्त्रासामन्यानवधृतिनिजाकारविरते ।
निवर्त्तन्ते वाचः शिवपरमप्राप्यमनसा
यतोऽशक्ताः स्तोतुं सकलदपि गुणातीत शिव ते ॥ इत्यादि ।

End. त्वयापि शाङ्करं लिङ्गं पूजनीयं प्रयत्नतः ।
विहायैवान्यदेवानां पूजनं शेष सर्व्वदा ॥

Colophon. इति श्रीविष्णुविरचितं शिवमहिमस्तोत्रं समाप्तं ।

विषयः । शेषेण सह विष्णोः संवादेन विष्णुकृतशिवमाहात्म्यकीर्त्तनं ।

No. 2606. प्रशस्तिप्रकाशिका । Substance, country-made paper, 15 × 4 inches. Folia, 24. Lines, 12 on a page. Extent, 705 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Pandit S'yámalála Duve. Appearance, new. Prose and verse. Incorrect.

Praśasti-prakáśiká. A letter-writer in Sanskrit, giving the forms and addresses appropriate for relations, officials, and the different castes. By Sambhu Deva.

Beginning. नत्वा गणपतिं देवं सर्व्वविघ्नविनाशनं ।
गुरुञ्च करुणानाथं ब्रह्मानन्दाभिधानकं ॥
प्रशस्तिकाशिका दिव्या शम्भुदेवेन लिख्यते ।
सर्व्वेषामुपकाराय लेखनाय च धीमतां ॥

चतुर्णामपि वर्णानां क्रमतः कार्य्यकारिणां ।
लिख्यते सर्व्वविद्यार्थिप्रबोधाय प्रशस्तिका ॥
यस्य लेखनमात्रेण विद्या कीर्त्तिर्यशोऽपि च ।
प्रतिष्ठा लभ्यते शीघ्रमनायासेन धीमतां ॥

तत्रादौ ब्राह्मणानां । स्वस्तिश्रीमत्यकलविद्याविनोदरसिकविराजमानसन्मण्डलीसमाज-मण्डलविचित्तदिग्विजयवादीन्द्रदृन्दमर्दनविद्वज्जनकमलकुलप्रकाशनमार्त्तण्डमूर्त्तिषु । इत्यादि ।

End. युक्तं स्वाश्रितलोकानां पालनं महतां सदा ।
मेघं विना सुखं को वा सिञ्चेच्चातकपक्षिणाम् ॥

श्रीमत्यां । स्वस्तिश्रीमदनन्यतीसमानपातिव्रत्यालङ्करणालङ्कृतभोगायतनप्रपालितनिखिल-स्वाश्रितजनकदम्बासु अमुकमहाराज्ञीषु ॥

Colophon. इति प्रशस्तिप्रकाशिका समाप्ता ।

विषयः । ब्राह्मणादीनां प्रशस्तिरचनाप्रकारादिकथनं ।

No. 2607. हयग्रीवसहस्रनाम-स्तोत्रम् । Substance, country-made paper, 16 × 5 inches. Folia, 8. Lines, 12 on a page. Extent, 165 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Paṇḍit Syámalála Duve. Appearance, new. Verse. Generally correct.

Hayagríva-sahasranáma-stotra. A hymn in praise of Hayagríva, an incarnation of Vishṇu. An extract from a Tantra. Śiva recites it for the edification of Párvatí.

Beginning. कैलासशिखरासीनं देवदेवं महेश्वरं ।
ध्यानोपरतमासीनं जटाजूट विभूषितं ॥
अपृच्छत् पार्व्वती देवी विनयावनता स्थिता ।
किं त्वया जप्यते देव सूर्य्यतेऽभ्यर्च्यते च किं ॥
तदहं श्रोतुमिच्छामि त्वत्प्रसादान्महेश्वर ।
त्वमादिः सर्व्वदेवानां योगिनाञ्चातिवल्लभः ॥
त्वमेव जगतां कर्त्ता संहर्त्ता रक्षकस्तथा ।
त्वत्तः सर्व्वं श्रुतं नाम वेदागमरहस्यकं ॥
स्तोत्राणि च पवित्राणि नाम साहस्रकाणि च ।
श्रुतानि देवदेवेश मन्त्रयन्त्राणि भूरिशः ॥

हयग्रीवस्य देवस्य पुण्यं नाम सहस्रकं ।
कथयस्व महादेव यद्यहं तव वल्लभा ॥ इत्यादि ।

End. तन्मूर्त्तिपुरतो देवि यः पठेद्भक्तितत्परः ।
कुबेर इव वित्ताढ्यः स भवेत्सम्पदां पदं ॥
वज्रनाच किमुक्तेन पठनादस्य भामिनि ।
इह लोके सुखं भुक्ता परमाप्नोति तत्पदं ॥

Colophon. इति श्रीहयग्रीवसहस्रनामस्तोत्रं सम्पूर्णम् ।

विषयः । गुणकथनव्याजेन हयग्रीवस्य विष्णोरवतारविशेषस्य सहस्रनामकीर्त्तनं ।

No. 2608. लोकप्रकाशः । Substance, country-made paper, 12 × 5 inches. Folia, 800. Lines, 8 on a page. Extent, 19,188 ślokas. Character, Nágara. Date, Sm. 1900. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect.

Loka-prakáśa. An elaborate dissertation on Jain Geography. By Vinaya-pála.

Beginning. ॐ नमः परमानन्दनिधानाय महस्विने ।
शङ्खेश्वरपुरोत्तंसपार्श्वनाथाय तारिणे ॥
पिपर्त्ति सर्व्वदा सर्व्वकामितानि स्मृतेऽपि यः ।
स कल्पद्रुमजित्पार्श्वो भूयात् प्राणिप्रियङ्करः ॥
पार्श्वक्रमनखाः पान्तु दीप्रदीपाङ्कुरश्रियः ।
सुदृष्टप्रत्यूहशलभाः सर्व्वभावावभासिनः ॥
जयन्ति यज्जिताशेषवस्तुवोऽन्तस्तमोद्रुहः ।
गिरः सुधाकिरस्तीर्थकृतामद्भुतदीपिकाः ॥
कृपाकटाक्षनिःक्षेपनिपुणीकृतसेवकाः ।
भक्तायत्तसविचौ सा जयति श्रुतदेवता ॥
जीयाज्जगद्गुरुर्विश्वजीवा तु वचनामृतः ।
श्रीहीरविजयः सूरिर्मदीयस्य गुरोर्गुरुः ॥
श्रीकीर्त्तिविजयान् सूते श्रीकीर्त्तिविजयाभिधः ।
श्रुतकल्पेऽनुभूतोऽयं मन्त्रः स्वादिष्टसिद्धिदः ॥
अस्ति लोकस्वरूपं यद्विप्रकीर्णं श्रुताम्बुधौ ।

परोपकारिभिः पूर्व्वपण्डितैः पिण्ड्यते स्म तत् ॥

— — — — — — — — — ।

लोकप्रकाशनामानं ग्रन्थमेनं विचक्षणाः ।
आद्रियध्वं जिनप्रोक्तविश्वरूपनिरूपकं ॥
प्राप्यानुशासनमिदं समुपक्रमेऽहं
मैदं युगीनविचरद्गुरुगौतमस्य ।
श्रीमत्तपागणपतेर्विजयादिदेव-
सूरीशितुर्विजयसिंहमुनीशितुश्च ॥ इत्यादि ।

End. उत्तराध्ययनवृत्तिकारकैः सुष्ठुभावविजयाख्यवाचकैः ।
सर्व्वशास्त्रनिपुणैर्यदागमग्रन्थ एष समशोधितोद्यमैः ॥
जिनविजयाभिधगणयो ग्रन्थेऽस्मिन + + यतोद्यमं सुतरां ।
लिखितप्रथमादर्शैः शोधनलिखनादिपटुमतयः ॥
वसुखाम्बेन्दुप्रमिते वर्षे हर्षेण जीर्णदुर्गपुरे । १७८०
राधोज्ज्वलपञ्चम्यां ग्रन्थः पूर्णोऽयमजनिष्ट ॥

— — — — — — — — ।

प्रत्यक्षरं गणनया ग्रन्थेऽत्र स्युरनुष्टुभां ।
सहस्राणि सप्तदशशतानि चैकविंशतिः ॥

Colophon. इति श्रीलोकप्रकाशः समाप्तः ॥ संवत् १९०। फाल्गुनवदी।

विषयः। सूक्ष्म-व्यवहारिकभेदेन परमाणोः द्वैविध्यनिरूपणं। अनन्तैः सूक्ष्मपरमाणुभिः व्यवहारिकः परमाणुरेको जायते। तैश्च अष्टाभिः सूक्ष्मश्लक्ष्णैकैका कल्प्यते। ताभिश्च अष्टाभिः ऊर्ध्वरेणुरेको जायते। तैरप्यष्टभिः त्रसरेणुरेको भवति। अष्टाभिश्च त्रसरेणुभिरेको रथरेणुरुत्पद्यते। तैरपि अष्टाभिः देवकुरूत्तरकुर्वोर्मनुष्यमेकं जायते। तैरष्टगुणैः स्थूलं सम्पद्यते। एवं क्रमेण लिक्षा-यूका-यवमध्यादीनां परिमाणादिकथनं। एकदशशतादिगुणनस्थाननिरूपणं। भागहारादिविधिकथनं। पादवितस्तिहस्तधनुरादिपरिमाणनिरूपणं। संख्यातासंख्यातपरीत्तादिपरिमाणकथनं। एवं जम्बूद्वीपादिसमायामविष्कम्भपरिवेशादिनिरूपणं। अथ द्रव्य-क्षेत्र-काल-भावभेदेन पञ्चास्तिकायभेदनिरूपणं। तत्र क्रमेण जीवाजीवादिरूपद्रव्यक्षेत्रादिलोकनिर्णयः। अथ धर्मास्तिकायः अधर्मास्तिकायः आकाशः, जीवः, पुद्गलः, काल इति षट् द्रव्याणि। तत्र काल मन्तरेण अपरे पञ्च अस्तिकायशब्देन आख्यायन्ते। जीवादीनां लक्षणादिकथनं। साधर्म्यादिकथनञ्च। सिद्धानां जीवानां स्वरूपादिकथनं। संसारिजीवानां स्वरूपादिकथनं। तत्र स्थानपर्य्याप्ति-लेश्या-संहनन-दृष्टि-ज्ञान-दर्शनप्रभृतिसप्तचिंशद्विधद्वारकथनं। अथ त्रसस्थावरभे-

देन जीवानां द्वैविध्यकथनं। तेषु क्रमेण एकद्वित्रिचतुःपञ्चेन्द्रियजीवनिरूपणं। एषामवान्तर-भेदनिरूपणञ्च। अथ क्षिति-जल-वायु-तेजो-मरुद्वनस्पतिरूपपञ्चविधस्थावरजीवनिरूपणं। वस्तुतो-जीवानामसंख्येयत्वकथनं। निगोदगोलकस्थापनादिस्वरूपकथनं। सूक्ष्माणां जीवानां भेदक-थनं। तेषां स्थानादिकथनञ्च। अथ सूक्ष्मनिगोदजीवानां त्रिधा कायस्थितिर्भवति यथा—अनाद्यनन्ता अनादिसान्ता साद्यनन्ता चेति। एवमन्यच्च कायस्थितिनिरूपणं। अथ पृथ्व्यादिसूक्ष्म जीवानां वपुः त्रिविधं तैजसं कार्मणं औदारिकञ्चेति। अथ सूक्ष्मैकाक्षादिशरीरेषु समुद्घाता-दिनिरूपणं। एवं गतिवर्णाहारादिनिरूपणं। पूर्व्वोक्तस्थानपर्य्याप्त्यादिद्वारनिरूपणञ्च। मणि माणिक्यस्वर्णादिधातूनां पृथिवीकायत्वकथनं। एवं हिमकरकाशुष्कादीनां जलकायत्वकथनं। वज्रनिर्घातसूर्य्यकान्तादीनां तेजःकायत्वकथनं। प्राच्योदीच्यादिदिगादीनां वायुकायत्वकथनं। वनस्पत्यादीनां सात्मकत्वनिरूपणपूर्व्वकं स्थावराणां सात्मकत्वकथनं। यवगोधूमधान्या-दीनां माषतिलमसूरकादीनाञ्च विपच्यवर्षादिव्याप्तिक्रमेण अङ्कुरयोनित्वमितिकथनं। साधा-रणवनस्पतिभेदादिकथनं। तेषामाहारकालादिनिरूपणमुखेन ऋतुविशेषे वनस्पतयः आहा-राधिक्यं कुर्व्वन्तीतिकथनं। एवं लतादीनां स्वरूपादिकथनं। (उद्भिज्जविद्याकथनं।) वनस्प-त्यादीनां स्थानादिनिरूपणं। तृणादिस्थानादिनिरूपणं। अथ कृम्यादिरूपद्वीन्द्रियजीवनि रूपणं। लिक्षायूकादिरूपत्रीन्द्रियजीवनिरूपणं। दंशिकादिरूपचतुरिन्द्रियजीवनिरूपणं। मनुष्यतिर्य्यगादिरूपपञ्चेन्द्रियकथनं। क्रमेण तेषां भवस्थितिसंख्या-समुद्घात-गतागति-संहनन-कषाय-आहार-दृष्टि-ज्ञानादिकथनं। तिर्य्यगादिषु प्रत्येकमवान्तरभेदकथनपूर्व्वकं लक्षणादिक-थनं। (प्राणिविद्याकथनं।) अथ मनुष्या द्विविधाः संमूर्च्छिता गर्भजाश्चेतिकथनं। तत्र तेषां भेद स्थान-पर्य्याप्ति कायस्थित्यादिनिरूपणं। अथ आर्य्यम्लेच्छभेदेन नराणां द्वैविध्यकथनं। आर्य्या अपि द्विविधाः, ऋद्धिप्राप्ता अनृद्धिप्राप्ताश्च। आर्य्याणां वसतिस्थानादिकथनं। हरिवर्षा-दिकथनं। वैमानिकव्यन्तरलोकादिनिरूपणं। तत्र अनन्तराप्तिसिद्धिसंज्ञितादिद्वारनियमन-कथनं। अथ भवन-व्यन्तरज्योतिष-वैमानिकभेदेन सुराणां चतुर्व्विधत्वकथनं। तत्र भवनानां असुरनागसुपर्णादिरूपदशविधभेदकथनं। एवं क्रमेण अन्येषां भेदकीर्त्तनं। रूपगुणस्थानादि-निरूपणञ्च। देवानामधिकारनिरूपणं। नारकजीवस्वरूपादिकथनं। अथ जीवस्वरूपकथनं। तस्य कथञ्चिन्मूर्त्तत्वकथनं। मिथ्यात्व-अविरति-कषायादिपञ्चविधा एव बन्धमूलमितिनिरूपणं। अथ ज्ञानावरणीय-दर्शनावरनीय-वेदनीय-मोहनीयादिरूपाष्टविधकर्म्मनिरूपणं। एतेषामवा-न्तरभेदनिरूपणं। तत्र मतिश्रुतादिपञ्चविधज्ञानावरणकथनं। सुख-प्रबोधादिनवविधदर्श-नावरणकथनं। एवं वेदनीयादिभेदकथनं। गति-जाति-वपुरादयष्टाविंशतिप्रकृतिनिरूपणं। तत्र तत्र अवान्तरभेदनिरूपणञ्च। अथ पुद्गलस्वरूपनिरूपणं। तेषामवान्तरभेदादिकथनं। अत्र द्रव्य-क्षेत्र-काल-भाव-गुणादिनिरूपणञ्च। परमाण्वादीनां संयोगप्रकारादिकथनं। तत्र वर्ण-रस-गन्धादिभेदकारणनिरूपणञ्च। अथ क्षेत्रलोकनिरूपणं। तत्र अधोलोक-तिर्य्यक्लोक-मेरुचूलि-

कादिस्थापनादिस्वरूपकथनं । भूलोकस्थापनादिकथनं । तच्च पृथिव्याश्चत्वार आश्रयाः घनोदधिः, घनवातः, तनुवातः, मरुत्पथश्चेति । अपि च सा घनोदधि-घनवात-तनुवातरूपैः चतुर्भिः वलयैः परितो वेष्टिता तिष्ठति । सर्व्वेषां लोकानां क्रमशः परिमाणादिकथनं । व्यन्तरलोकादिसंस्थानादिनिरूपणं । जम्बूद्वीपस्यवर्षादिनिरूपणं । सुरनरतिर्य्यगादिवसतिभेदकथनञ्च । अथ नरकसंस्थानादिकथनं । नारकजीवानां नरकदुःखस्य च वर्णनं । तिर्य्यक्लोकसंस्थानादिकथनं । विशेषेण जम्बूद्वीपवर्णनं । अथ भारतवर्षवर्णनं । तच्च तस्य अधिज्यधनुराकारत्वकथनं । तच्च गिरिनदीप्रभृतीनां विशेषेण वर्णनं । तेषां विष्कम्भादिकथनञ्च । महाविदेहादिदेशवर्णनं । मेरुप्रदेशवर्णनं । विशेषेण कनकशैलवर्णनं । अथ सर्व्वेषां कालमानानामादित्यमूलकतया विशेषत आदित्यतारादिनिरूपणं । तच्च सूर्य्यमण्डलक्षेत्रादिमानकथनं । व्यासादिनिरूपणं । अथ वत्सरस्य षट्षष्ट्युत्तरत्रिशतदिनात्मकत्वनिरूपणं । सूर्य्यौ च द्वौ क्रमेण दक्षिणायनमुत्तरायणञ्च सम्पादयतः इति निर्णयः । दिनरात्रिह्रासवृद्धिकारणकथनं । अथ जम्बूद्वीपे यदा मेरोर्दक्षिणोत्तरयोर्दिनमुत्कृष्टं तदा पूर्व्वापरयोः दिशोः रात्रिरेव जघन्या । एवं यदा पूर्व्वापरयोः दिशोः सर्व्वोत्कृष्टं दिनं तदा दक्षिणोत्तरयोः रात्रिरेव जघन्येतिनिरूपणं । एवमुदयास्तमयविशेषनिरूपणं । अथ मतभेदकथनञ्च । अन्धकारस्य ज्योतिषश्च संस्थानादिकथनं । अथ गणनाप्रक्रियाकथनं । सूर्य्यमण्डलस्य दूरत्वादिनिरूपणं । अथ चन्द्रचारनिरूपणं । तच्च मण्डलविष्कम्भादिपरिमाणकथनं । चन्द्रस्य पञ्चदशमण्डलानि तेषां पञ्च जम्बूद्वीपे प्रकाशन्ते अपराणि अन्यस्मिन्निति निरूपणं । अथ चन्द्रावपि द्वावेतिनिरूपणं । गत्यादिदिरूपणं । सर्व्वत्र गणितोपपत्तिकथनञ्च । अथ ध्रुवराहुः पर्व्वराहुश्चेति राहोर्द्वैविध्यकथनपूर्व्वकं तयोः स्थानादिनिरूपणं । अथ प्रत्यहं राहुमण्डलस्य आवरणतारतम्येन प्रतिपदादितिथेरुत्पत्तिकथनं । चन्द्रमण्डलस्य राहुमण्डलापेक्षया दृश्यत्वेऽपि ग्रहणादौ राहोः सम्पूर्णचन्द्रमण्डलस्य आच्छादकत्वे कारणादिकथनं । अथ मतभेदादिकथनञ्च । चान्द्रमानादिनिरूपणं । अथ नक्षत्राणां मण्डलक्षेत्रादिनिरूपणं । अथ अभिजित्-श्रवणा-धनिष्ठादिक्रमेण अष्टाविंशतिनक्षत्रकथनं । तच्च अभिजित्परित्यागेन सप्तविंशतिनक्षत्राणां व्यवहारिकत्वकथनं । अथ अभिजिन्नक्षत्रस्य गोशीर्षाकारत्वं श्रवणायाः कासाराकारत्वं, धनिष्ठायाः पक्षिपञ्जराकारत्वमित्यादिक्रमेण नक्षत्राणामवयवसंस्थानकथनं । अथ विकालक-अङ्गारक-लोहिताङ्क-प्राधुणिक-कण-कणक-अश्वसेनकर्व्बूरक-दुर्द्धरक-शनैश्चरप्रभृतीनां वक्रनां ग्रहाणां संज्ञाकथनं । अथ जम्बूद्वीपस्य परिक्षेपकादिकथनं । अथ धातकीखण्डवर्णनं । उत्तरकुरुप्रदेशवर्णनं । सुमेरुवर्णनं । पुष्करद्वीपवर्णनं । अत्र त्रिषु भुवनेषु सर्व्वेषां जिनप्रासादानां संख्या (९८५७००२८२) कथनं । एवं सर्व्वासां जिनप्रतिमानां संख्या (१५४१५८२१०८०) कथनञ्च । द्वीपेषु सूर्य्यचन्द्रयोश्चारादिनिरूपणं । तिर्य्यक्लोके ज्योतिश्चक्रसंस्थानादिकथनं । ग्रहमण्डलदूरत्वादिनिरूपणं । नक्षत्रमण्डलस्य ऊर्द्धाधःस्थानादिनिरूपणं । रविचन्द्रयोः पल्यादिकथनं । चन्द्रविमानादौ देवादीनां स्थित्यादिकथ-

नं । ऊर्द्धलोकस्वरूपादिवर्णनं । अथ शक्रलोकवर्णनं । तच्च शक्रस्य पूर्व्वजन्मवृत्तान्तकथनं । अर्हिं सात्रतमाहात्म्यकीर्त्तनञ्च । सुरासुरयोः युद्धवर्णनं । सुधर्म्माभिधानस्वर्गवर्णनं । ईशानाभिधस्वर्गवर्णनं । सनत्कुमारस्वर्गवर्णनं । माहेन्द्रस्वर्गवर्णनं । अथ दिग्लोकस्वरूपादिवर्णनं । कालाग्निकायस्वरूपभेदादिकथनं । तच्च प्रयोगज-वैस्रविक-मिश्रकभेदात् त्रिविधपरिणामस्वरूपनिरूपणं । स्थितिस्वरूपभेदकथनं । क्षणलवमुहूर्त्तादीनां स्वरूपादिकथनं । षाढ़कद्रोणादिपरिमाणनिरूपणं । अथ नक्षत्रचेचभागानां सूर्य्यभोगार्हत्वनिरूपणं । चान्द्रसौरादिवत्सरनिरूपणं । (अत्र सर्व्वत्र गणितोपपत्तिकथनमित्यत्रेयम् ।) तिथिकरणादिनिरूपणं । ऋतुनिरूपणं । अथ अभिनन्दित-प्रतिष्ठित-विजय-प्रीतिवर्द्धन-श्रेयः-शिव-शिशिर-हिमवत्-वसन्त-कुसुमसम्भव-निदाघ-वनविरोहकाभिधानाः अलौकिकाः मासा इति द्वादशमासनामकथनं । अथ प्रतिपदादितिथीनाम् उत्तमा-सुनक्षत्रा-एलापत्यादिपञ्चदशनामकथनं । एवं नन्दाभद्रादिनामकथनञ्च । शुभाशुभतिथ्यादिनिरूपणं । स्त्रीपुरुषयोः शुभाशुभलक्षणकथनं । सामुद्रिकविद्याकथनञ्च । स्त्रीणां लीलाविलासविच्छित्तिविब्बोकादिलक्षणादिकथनं । स्त्रीपुरुषयोः जात्यादिभेदकथनञ्च । अथ अर्हत्-सिद्ध-प्रवचन-गुरु-स्थविर-बहुश्रुतप्रभृतीनां लक्षणादिकथनं । शान्तिनाथचरितकथनं । वासुपूज्यचरितकथनं । प्रसङ्गात् शुभजातकनिरूपणं । सामान्यतः अर्हतां चरितकथनं । वेदनीयमोहनीयादिकर्म्मस्वरूपादिकथनं । एवं परीषह-उपसर्गादिस्वरूपकथनं । अवान्तरभेदकथनञ्च । अथ अन्तर्मुखतया मनःस्थैर्य्यमेव ध्यानमित्यादिलक्षणकथनपूर्व्वकं आर्त्त-रौद्र-धर्म्य-शुक्लभेदात् ध्यानस्य चातुर्व्विध्यकथनं । अथ आत्मवीर्य्यपरिणामविशेषाद्योगस्यापि त्रैविध्यकथनं । अथ समवसरणनिर्म्माणविधिकथनं । जरत्या उपाख्यानकथनं । अथ भगवद्वाक्यस्य संस्कारवत्त्व-औदात्य-उपचारपरीतता-मेघगम्भीरघोषत्व-प्रतिनादविधायिता-दाक्षिण्य-उपनीतरागत्व-महार्थता-अव्याहतत्व-शिष्टत्वप्रभृतिपञ्चत्रिंशद्गुणकत्वनिरूपणं । अथ साधूनां श्रावकाणाञ्च अहिंसा-सुनृत-ब्रह्मचर्य्य-अपरिग्रह-अस्तेयरूपपञ्चमहाव्रतविधानं । अनुव्रतनिरूपणं । तच्च षड्भङ्गिन्यायकथनं । अथ चक्रवर्त्तिस्वरूपादिकथनं । प्रासादनिर्म्माणविधिकथनं । तच्च तद्भेदकथनादिकञ्च । चतुःषष्टिपद-एकाशीतिपद-शतपदादिवास्तुन्यासकथनं । वास्तुदेवतादिनिरूपणं । अथ इन्दुमालायाः गर्भे नारदस्य उत्पत्त्यादिकथनं । तस्य देवताभिः पालितत्वाद् देवर्षीतिनामकथनपूर्व्वकं तच्चरितवर्णनं । अथ विमलवाहन-अभिचन्द्र-प्रसेनजित्प्रभृतीनां विवरणकथनं । ऋषभचरितकथनं । पञ्चकल्याणकथनं । अजितस्य जीवनवृत्तान्तकीर्त्तनं । श्रीसम्भवस्य जीवनकथनं । अभिनन्दनस्य जीवनीकथनं । पद्मप्रभस्य चरितकथनं । सुपार्श्वस्य चरितवर्णनं । एवं चन्द्रप्रभ-सुमति-सुपार्श्व-सुविधिश्रेयांस-वासुपूज्य-विमलस्य-अनन्तजिन-धर्म्मनाथ-शान्तिनाथ-कुसुनाथ-अरनाथ मुनिसुव्रत-नेमि-श्रीपार्श्वमहावीराणां जीवनीकीर्त्तनञ्च । अथ इन्द्रभूति-अग्निभूति-वायुभूति-व्यक्ति-सुधर्म्म-मण्डितपुत्र-मौर्य्यपुत्र-अकम्पित-अचलभ्राट-मैतार्य्य-प्रभासनामैकादशगणधराणां

नामनगरगोत्रादिकथनं। अथ भरत सगर मघवा-सनत्कुमार शान्ति कुन्थु अर-महापद्म हरिषेण-जयसेन ब्रह्मदत्त-तारक-विजय-अचल-मेरु-महाबल-वासुदेव-बलदेव-प्रतिवासुदेव-नवनिधि-चतुर्दशरत्नादीनां विवरणकथनं। एवं वसुदेव-बलदेव-कृष्णादीनां विवरणकीर्त्तनञ्च। अथ भविष्यकथनं। अथ चतुर्व्विधपुद्गलावर्त्तकथनं। औदारिकादिवर्गकर्म्मणां नामादिनिरूपणं। भावलोकस्वरूपादिकथनं।

No. 2609. आचारदिनकरः। Substance, country-made paper, 12 × 5 inches. Folia, 84. Lines, 7 on a page. Extent, 1,126 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect.

Achára-dinakara. Religious duties of Jains; comprising also a summary of their rituals. By Vardhamána Súri. The codex contains only the last section of the work.

अथ शान्तिकपौष्टिकविधि।

Beginning. तत्रादौ गुरुर्दद्यागुरुर्वा सुस्नातः कङ्कणमुद्राङ्कितकरः + + +

परमेष्ठिपूजाविधिकथनं। दिक्पालपूजाकथनं। राशिपूजनविधिकथनं। षोड़शविद्यादेवी-पूजनविधिकथनं। कालीगौरीगणेशकार्त्तिकेयादिपूजनविधिः। क्षेत्रपालपूजाविधिः। पञ्चा-स्तवस्नानादिविधिः। जिनस्तुतिविधानं। कलसस्थापनादिविधिकथनं। अथ शान्तिदण्डकपाठ-विधिकथनं। अथ पौष्टिकविधिकथनं। तत्र पूर्ववत् सर्व्वकृत्यकरणावश्यकताकथनं। अथ पौष्टिकदण्डकपाठविधिकथनं। अर्हद्बलिविधिकथनं। चतुःषष्टियन्त्रस्थापनाविधिकथनञ्च।

No. 2610. पन्नावणासुत्तम्। Substance, country-made paper, 12 × 5 inches. Folia, 257. Lines, 13 on a page. Extent, 8,560 ślokas. Character, Nágara. Date, Sm. 1866. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Paṇṇávaná Sutta. Jain metaphysics, discussing the leading topics of the Hindu Darsanas from a Jain standpoint. Anonymous.

ॐ नमः श्रीवीतरागाय नमः।

Beginning. नमो अरिहन्ताणं नमो सिद्धाणं नमो आयरियाणं
नमो उज्झायाणं नमो लोए सव्वसाहूणं।
ववगयजरमरणभरासिद्धे अभिवन्दि उणतिविहेणं
वन्दामि जिणवरिं दतेलुक्कगुरुं महावीरं।
सुयरयणनिहाणं जिणवरेणभवियजणनिव्वुइ
करेणं उवदंसियाभयवयापण्णवणासर्व्वभावाणं॥

End. निव्विण सव्वदुक्खाजातिजरामरणवं धणविमुक्कासासयमव्वावाहं चिट्ठं तिसुही सुहंयत्ता।

Colophon. इति श्रीपन्नावणासुत्तं सम्पूर्णम्। संवत् १८६६।

विषयः। अत्र प्राधान्येन जीवाजीवस्वरूपनिरूपणं। तत्र प्रसङ्गात् श्रुतजिनाः, अवधि-जिनाः, मनःपर्य्यायजिनाः केवलिजिनाश्चेति चतुर्व्विधजिनलक्षणादिकथनं। अथ प्रज्ञा-पनाविषयनिरूपणं। तत्र प्रकर्षेण निःशेषकुतीर्थितीर्थकरासाध्येन यथावस्थितस्वरूपनिरूपण-लक्षणेन ज्ञाप्यन्ते शिष्यबुद्धावारोप्यन्ते जीवाजीवादयः पदार्था अनयेति प्रज्ञापना। अथ सा द्विविधा प्रज्ञप्ता प्ररूपिता चेति। अथ जीवन्ति प्राणान् धारयन्तीति जीवाः। तेऽपि प्राणा द्विविधा द्रव्यप्राणाः भावप्राणाश्चेति। तत्र प्रथमं इन्द्रियादीनि। द्वितीयन्तु ज्ञानादीनि। अजीवास्तु धर्म्माधर्म्माकाशपुद्गलास्तिकायादिरूपाः। तत्र तेषां स्वरूपनिरूपणं। स्कन्धादिस्वरूप-कथनं। परमाणुप्रदेशसन्निवेशादिनिरूपणं। तेषां परिणामविशेषेण रूपरसादिपरिणामविशेष-कथनं। अथ जीवास्तु संसारसमापन्ना असंसारसमापन्नाश्चेति द्विधा। अथ तीर्य्यते संसार-सागरोऽनेनेति तीर्थं यथावस्थितसकलजीवाजीवादिपदार्थसार्थस्वरूपकं परमगुरुप्रणीतं

प्रवचनम्। तच्च निराधारं भवतीति संघोन वेदितव्यः। स्वयंबुद्धप्रत्येकबुद्धानां विशेषकथनं। तत्र प्रथमः वाह्यप्रत्ययमन्तरेणैव बुध्यते द्वितीयस्तु वाह्यं प्रत्ययमपेक्ष्य प्रत्येकं वाह्यं कारणमभिसमीक्ष्य बुद्ध इति। अथ बुद्धा आचार्य्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धा इत्यादिभेदनिरूपणं। स्त्रीणामपि निर्व्वाणप्राप्त्यधिकारनिरूपणं। अथ एकेन्द्रियादिजीवभेदकथनं। तत्र स्पर्शनमात्रेन्द्रिया वनस्पत्यादय एकेन्द्रिया जीवाः। स्पर्शरसनेन्द्रिया द्वीन्द्रियाः शङ्खशुक्तिकादयः। स्पर्शनरसनाघ्राणेन्द्रियाः त्रीन्द्रिया यूकामत्कुणादयः। स्पर्शरसनाघ्राणनयनेन्द्रियाश्चतुरिन्द्रियादंशमशकादयः। स्पर्शरसनाघ्राणश्रोत्रचक्षुरिन्द्रियाः पञ्चेन्द्रिया मनुष्यादयः। एतेषां प्रत्येकमवान्तरभेदनिरूपणञ्च। अथ पृथिव्यादीनां संस्थानवर्षभेददेशनगरादिनिरूपणं। रुचिनिरूपणमुखेन दर्शन-ज्ञान-चरित्राणां लक्षणादिनिरूपणं। तत्र सरागवीतरागादिदर्शनभेदकथनं। भवनवासिनो व्यन्तराः ज्योतिष्का वैमानिकाश्चेति चतुर्व्विधदेवताभेदनिरूपणं। किंपुरुष-किंपुरुषोत्तम-किन्नरोत्तम-हृदयङ्गम-रूपशालि-अनिन्दित-मनोरम-रतिप्रिय-रतिश्रेष्ठरूपदशविध-किन्नरकथनं। अथ पुरुष-सत्पुरुष-महापुरुष-मरुत्-मेरुप्रभ पुरुषवृषभ-पुरुषोत्तम-अतिपुरुष-महादेव-यशस्वदिति दशविधकिंपुरुषकथनं। अथ भुजग-भोगशालि-महाकाय-अतिकायस्कन्धशालि-मनोरम-महावेग महाद्युति मेरुकान्त-भासवदिति दशविधमहोरगकथनं। एवं गन्धर्व्व-यक्ष-राक्षसादिभेदकथनं। अथ पृथिवीकायिकानां जीवादीनां स्थानादिनिरूपणं। अथ चतुरशीतिविधनरकसंस्थानादिकथनं। गुण-पर्य्याययोर्विशेषकथनं। सिद्धानां लक्षणादिकथनं। मिथ्यादृष्टिसम्यग्दृष्टिप्रभृतिनिरूपणं। अथ पृथिव्यादिकायिकानां दिग्विभागादिकथनपूर्व्वकमल्पबहुत्वादिकथनं। तत्र दिग्द्वार गतिद्वार इन्द्रियद्वार-कायद्वार-योगद्वार-वेदद्वार-कषायद्वार-लेश्याद्वारादिसन्निवेशतिद्वारनिरूपणं। तिर्य्यग्योनिलक्षणनिरूपणं। मनुष्यगतिविषयकथनं। देवगतिकथनं। भवनपतिगतिनिर्णयः। ज्योतिष्कगतिनिर्णयः। वैमानिकगत्यादिकथनं। विनेयस्य गुरोश्च लक्षणादिकथनं। अथ सत्त्वानां जन्मतः प्रभृति आमरणात् नारकादिपर्य्यायरूपेण अवस्थितिचिन्तनं। अपि च सत्त्वानामौदयिक-क्षयोपशमिक-क्षायिकभावाश्रयपर्य्यायावधारणं। अथ जीवविपाकिज्ञानावरणीयादिकर्म्मक्षयोपशमभावाश्रयकथनं। अथ सत्त्वानामुत्क्रान्त्यादिचिन्तनं। अथ नारकादिभावेन उत्पन्नानां सत्त्वानां यथासम्भवं उच्छ्वासनिःश्वासकालपरिमाणकथनं। अथ तेषां वेदनीयमोहनीयापायायुरात्मपरिणामविशेषकथनं। तत्र रत्नप्रभादिस्थानकथनञ्च। अथ सत्त्वानां भाषादिनिरूपणं। स्त्रीलिङ्गपुंलिङ्गनपुंसकलिङ्गभेदनिमित्तादिकथनं। अथ शरीरनिरूपणं। तस्य परिणामनिरूपणञ्च। तत्र बन्धनपरिणामादिस्वरूपकथनञ्च। अथ क्रमेण कषायपरिणामेन्द्रियपरिणामादिनिरूपणं। जीवानां गतिनिरूपणं। अथात्मनो लेश्यापरिणामस्वरूपादिकथनं। अथ कायस्थितिपरिणामस्वरूपादिकथनं। तत्र सांव्यवहारिकासांव्यवहारिकभेदेन जीवस्य द्वैविध्यनिरूपणं। कायस्थितिविशेषे सम्यग्दृष्ट्यादिभेदेन जीवभेदनिरूपणं। नरकादिषु उत्पन्नानां शरीरसंस्थानादिकथनं। तेषां प्राणातिपातादि-

रूपक्रियाविशेषनिरूपणं कर्म्मबन्धस्वरूपादिचिन्तनं। वेदकस्वरूपादिकथनं। आहारनिरूपणं। तत्परिणामकथनञ्च। ज्ञानपरिणामस्वरूपकथनं। संज्ञापरिणामस्वरूपकथनं। चारित्रपरिणामस्वरूपचिन्तनं। अवधिस्वरूपादिनिरूपणं। आहार्य्यमाणपुद्गलविषये ज्ञानदर्शनसम्बन्धनिरूपणं। अथ रूपरसशब्दादिपरिचारणास्वरूपचिन्तनं। वेदनास्वरूपादिनिरूपणं। समुद्घातस्वरूपादिनिरूपणं। अथ सिद्धोपायतल्लक्षणादिकथनञ्च।

No. 2611. वीसस्थनकतपकाविधि, (विंशतिस्थानकतपस्याविधिः।) Substance, country-made paper, 12 × 5 inches. Folia, 80. Lines, 8 on a page. Extent, 1,974 ślokas. Character, Nágara. Date, Sm. 1850. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Correct.

Visasthanaka-tapaká-vidhi. Rules for twenty special Jain acts of penance, in Hindi. Anonymous.

Beginning. श्रीमदर्हन्तमानम्य गुरुञ्च ज्ञानसागरं।
विंशतेः स्थानकस्याहं लिखामि विधिविस्तरं॥

अथ बीसस्थनकतपकाविधि। तिहां प्रथमशुभनिर्देशमुक्तदिवसे नन्दीस्थापनपूर्व्वक सुविहितगुरुके समीपविंशतिस्थानकतपविधिपूर्व्वक उचरे एक ओलीदोमासे यावत् छमासे पुरीकरै कदाचित् छमासे मध्ये पुरीकरणसकैवे। इत्यादि

End. आज्ञानं नैव जानामि नैव जानामि पूजनं।
विसर्ज्जनं न जानामि क्षन्तिं परमेश्वरि॥
आ + हीनं क्रियाहीनं मन्त्रहीनञ्च यत्कृतं।
तत्सर्व्वं क्षम्यतां देवि प्रसीद परमेश्वरि॥

Colophon. इति।
शान्तिकं पौष्टिकञ्चैव वश्यमाकर्षणं तथा।
उच्चाटनं स्तम्भनञ्च सर्व्वकार्य्याणि साधयेत्।
इमं मन्त्रं प्रथमाराधनकाले स्मर्त्तव्यं। संवत् १८५०।

विषयः। अत्र उपवास आराधना-भक्ति-द्रव्यलेचकाल-उपसनादिस्वरूपादिनिरूपणं। साधुसंयमादिविधिकथनञ्च। देववन्दनविधिकथनं। सिद्धचक्रस्तवनादिकथनं। चैत्यवन्दनादिविधिकथनं।

No. 2612. श्रीपालरास। Substance, country-made paper, 12 × 5 inches. Folia, 12. Lines, 11 on a page. Extent, 376 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Srípála-rása. A discussion between S'rípâla, king of Ujjayiní, and certain S'rávakas, on Jain religion and the importance of initiation and other rites of that religion. A poem in Mágadhi. Anonymous.

Beginning आदिपुरुष आदिसरूप आदिराय आदेय।
परमातम परमेसरु नमो नमो नाभेय ॥ १ ॥
अरिहन्त सिद्धपुरीसरूप उवज्झायामुनिपवि।
दंसण नाण चारित्ततय एनवपदधरचित्त ॥ २ ॥
मयणासुंदर श्रीपालनो भणसुरासुरसाल।
षां भलतां सुख उपजै टलै दुरत जंजाल ॥ ३ ॥ इत्यादि।

End. पाठकपद्मगणिशिष्य वातकदर्शनलाभसमुष्य।
तामसीसमुनितत्तकुमार तिणएगावो चरित उदार ॥

Colophon. इति श्रीश्रीपालरास सम्पूर्ण।

विषयः। उज्जयिन्यधिपतेः श्रीपालस्य गौतमाभिधानेन श्रावकेण सह संवादादार्हत-धर्मग्रहणविवरणादिकथनं।

No. 2613. गौतमकुलकवृत्तिः, मूलसहिता। Substance, country-made paper, 12 × 5½ inches. Folia, 64. Lines, 8 on a page. Extent, 1,512 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Sitábcháñd Náhára, Bahádur. Appearance, new. Text, verse; commentary, prose. Incorrect.

Gautama-kulaka-vritti. A commentary on a treatise in verse on Jain morality and discipline; each maxim is explained in a verse which puts in marked contrast what is recommended and what is condemned. The text is called Gautama-kulaka, and attributed to the sage Gautama. The commentary is by Jnánatilaka Gani.

टीकायाः।

Beginning. नत्वा श्रीदेवगुरून् सत्तासत्त्वावबोधनं वक्ष्ये।
प्राचीनगौतमर्षिप्रणीतकुलकस्य वृत्तिमिमाम्॥

इह हि चातुर्गतिकसंसारहेतुकषायचतुष्टयान्तर्लोभस्यातिदुर्ज्जयत्वेन चिरावस्थायित्वेन सर्व्वपापमूलत्वेनादौ तदुपादानपुरःसरमस्यादिसूचमुच्यते,—तथा हि,—

मूलस्य,—
लुब्धा नरा अत्यपरा चरंति
मूढ़ा नरा कामपरा चरंति ।
बुद्धा नरा खंतिपरा चरंति
मिस्सा नरा तिन्निवि आयरंति ॥ इत्यादि ।

End. मूलस्य,—
असासयं जीवियमाउ लोए
धर्म्मं चरे साउजणोव दुइं ॥
टीकायाः,—
धर्म्मं निषेव्य सुखं लभन्ते ।
श्रीखरतरगणनायकजिनहंसयतीश्वरा भुवि बभूवुः ।
श्रीपुण्यसागरमहोपाध्यायास्तद्विनेयवराः ।
विजयन्ते तच्छिष्या वाचकवरपद्मराजमणिगणयः ॥
तेषामन्तेवासी विनिर्म्ममे ज्ञाननिलकगणिः ॥
गौतमकुलकसुदृत्तिं विलोक्य शास्त्राणि वाच्यतायां ।
वर्षे व्योमभवानीसुतास्त्रलेख्याग्रशाङ्कमिते ॥
दीपोत्सवपर्व्वदिने विजयिनि जिनचन्द्रयुगवरे जगति ।
यदशुद्धं तच्छोध्यं प्रसद्य सद्योऽत्र धीमद्भिः ॥

Colophon. इति श्रीगौतमकुलकवृत्तिः सम्पूर्णा ॥

विषयः । केवलं नीतिकथनं । तत्र लोभाभिभूता एव दुर्गतिं गच्छन्ति अतएव तन्निवृत्तौ यतनीयं । मूर्खा एव केवलं विषयसुखाभिलाषिणः कामपराश्च भवन्ति । विदितक्रोधजनितफलाः एव क्षमन्ते । विरोधः सर्व्वथा न कार्य्यः । क्रोधाभिभूताः कदापि न सुखं लभन्ते । अजरामरहेतुत्वेन सर्व्वरोगविनाशकत्वेन च सुधैव अहिंसा सदा सेवनीया । अप्रमत्तानामेव सर्व्वथा हितावाप्तिः । सत्यमेव शरणमतः तद्भाषणे सुतरां यतनीयं । सन्तोष एव सकलसुखनिदानं । विद्या प्रकृत्या अचण्डमेव पुरुषं भजते । कुशीलस्य अकीर्त्तिर्भवति । दरिद्रता सन्निवृत्तिमेव (भ्रष्टाचारमेव) नरं श्रयति । सर्व्वथा सदाचारपालने यतनीयं । लक्ष्मीः सत्ये प्रतिष्ठितमेव पुरुषमवलम्बते । मिथ्यापि कृतघ्नं बन्धुं त्यजन्ति । पापभीरुभिः चित्तसंयमे यतनीयं । सम्यग्विचारहीनमेव बुद्धयः परित्यजन्ति । अन्यासक्तचित्ते श्रोतरि किमपि न कथनीयं । चारित्ररक्षणमेव मोक्षनिदानम् । अनीतिभाज एव नृपतयः प्रजासु दण्डपरा भवन्ति । मन्त्रपरता विद्वत्त्वेव

धनते। साधुभिः सदार्थचिन्तनपरैर्भवितव्यं। उग्रतपस्विनः क्षमैव श्रीभावहा। उपशमवत एव समाधानं सिध्यति। विनय एव शिष्याणां शोभामावहति। ब्रह्मचारिणा निष्परिग्रहेण भाव्यं। क्षपमन्त्रिणा बुद्धिमता भवितव्यं। लज्जैव साध्वीनामलङ्करणं। चपलचित्तस्य आत्मैव परमः शत्रुः। सर्व्वथा जितेन्द्रियत्वमादरणीयं। दयादिलक्षण एव धर्म्मः सेवनीयः। प्राणिहिंसन मकार्य्यं। राग एव संसारबन्धननिमित्तं। सम्यक्त्वलाभे सद्भिः सर्व्वथा यतितव्यं। कदापि परस्त्रीः न सेवितव्या। विद्वद्भिः जातुचिदपि मूर्खाः न सेवनीयाः। विद्वांसमपि पिशुनं परित्यज्य धार्म्मिका एव सेवितव्याः। सुधीभिः तत्त्वज्ञानार्थं पण्डिता एव प्रष्टव्याः। सर्व्वथा साधव एव पुरुषाः प्रशंसनीयाः। सत्पुत्रस्य सच्छिष्यस्य च साम्यमेव चिन्तनीयं। मूर्खाणां सदैव पशुतुल्यत्वं युक्तमेव। अतैः सह दरिद्राणां सदृशत्वेन सर्व्वथा अर्थोपार्ज्जने गृहिणा यतितव्यं। मद्यपानरतस्य अर्थनाशो यशोहानिः दुर्गतिश्च भवति। वेश्यासक्तस्य कुलनाशो जायते। मृगयाद्यासक्तस्य क्षपस्य राज्यच्युतिः भवति। कदापि चौर्य्यं न विधेयं। परस्त्रीप्रसक्तिः सर्व्वथा परिहरणीया। निर्द्धनाय दानं कर्त्तव्यं। शक्तस्य क्षमा श्रेयस्करी। धर्म्म एव सकलसुखनिदानमिति।

टीकाकारस्तु प्रत्येकमुपाख्यानप्रदर्शनेन सर्व्वासां नीतीनां व्याख्यानमकरोत्।

No. 2614. ध्वजदण्डारोपणविधिः। Substance, country-made paper, 12 × 6 inches. Folia, 20. Lines, 8 on a page. Extent, 420 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Correct.

Dhvajadaṇḍáropaṇa-vidhi. The rituals for the consecration of flags, staffs, jars, &c., on or in Jain temples. Anonymous.

Beginning. अथ ध्वजदण्डारोपणविधिः।

तथाहि तिर्हा प्रथमभूमिशुद्धगङ्गोदकवांछुं पुष्पादिकं पगरपवित्रस्थानकनों जलआणंबु अगारिपलावितसंघतेडवो। इत्यादि।

End. इत्यादि सौभाग्यमन्त्रन्यासपूर्व्वसरिशिवादिग्रन्थिभिदृश्च उतारवां पछै नन्द्यावर्त्तविसर्ज्जवो। ॐ विसर विसर स्वस्थाने गच्छ गच्छ स्वाहा।

Colophon. इति नन्द्यावर्त्तविसर्ज्जनमन्त्रः। इति ध्वजदण्डारोपणविधिः सम्पूर्णः।

विषयः। अर्हत्प्रतिमादिप्रतिष्ठाङ्गध्वजकलसादिस्थापनादिविधिकथनं।

No. 2615. पञ्चकल्याणम्। Substance, country-made paper, 12 × 6 inches. Folia, 18. Lines, 6 on a page. Extent, 216 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Panchakalyána. A collection of five highly esteemed hymns in praise of Jina. Anonymous.

Beginning. अमरनिकरनिनजेहना भगतिरासं भरपुर।
पदपङ्कजपूजाकरीकरेङ्करम चक्कचुर ॥
षक्कोसयसमरिसया जिनवरजगसिणगार।
प्रणमीगास्युं नेहना पञ्चकल्याणकसार ॥ इत्यादि।

End. कपूर खेमाजिन ऊतमनां मेदिनदिन सुजससवाया।
श्रीगुरुपद्मविजयपदपङ्कजनमतां दुरितगमाया ॥
नन्ददिशागजगजचन्द्वरसंमधुस्नूदिपूर्णिनेध्याया।
श्रीसिद्धाचलतीर + + + रमीरूपविजाथं गुणगाया ॥

Colophon. श्रीपञ्चकल्याणं सम्पूर्णं।

विषयः। केवलज्ञानादिप्रार्थनाव्याजेन जिनस्य पञ्चविधलोचकीर्त्तनम्।

No. 2616. आगमसारोद्धारः। Substance, country-made paper, 12 × 5½ inches. Folia, 125. Lines, 11 on a page. Extent, 1,800 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect.

Agama-sárodhára. A digest in Mágadhi of the Jain A'gamas, giving expositions of various metaphysical and religious topics. By Parmánanda.

Beginning. हिवै भव्यजीवने प्रतिबोधवानिमित्ते मोक्षमारगनीवचनिकालिखियै छै।

ते कहै तिहां प्रथमजीव अनादिकालनो मिथ्यात्वीथो सोकालखवधिपां मोने चीणकरणकरै छै॥ इत्यादि।

End. परमागमस्युं राचयोलहिसो परमानन्द।
धर्म्मरागगरुधर्म्मसुंदरजीए सुखदन्द ॥
ग्रन्थकीयोमनरङ्गसुसितपञ्चफागुणमास।
सोमवार अरुतीजतिथिसफलफलीमन आस ॥

Colophon. इति श्रीआगमसारोद्धारग्रन्थ सम्पूर्ण।

विषयः। प्रवृत्तिकरणस्वरूपकथनं। अपूर्व्वकरणनिरूपणं। अनिवृत्तिकरणस्वरूपकथनं। ज्ञानावरणीकर्म्मनिरूपणं। दर्शनावरणीकर्म्मकथनं। वेदनीकर्म्मनिरूपणं। अन्तरायकर्म्मनिरूपणं। एवं गोत्रादिकर्म्मनिरूपणं। अथ व्यवहारज्ञाननिरूपणं। निश्चयज्ञाननिरूपनञ्च। अथ

अनुयोगनिरूपणं। तत्प्रपञ्चकथनञ्च। अथ धर्म्मास्तिकायनिरूपणं। आकाशास्तिकायनिरूपणं। पुद्गलास्तिकायनिरूपणं। जीवास्तिकायनिरूपणं। एतेषामस्तिकायानां गुणादिकथनञ्च। अथ द्रव्यार्थिकनिरूपणं। पर्य्यायार्थिकनिरूपणं। नैगमस्वरूपादिकथनं। व्यवहारनयादिस्वरूपकथनं। विरतिपरिणामकथनं। अविरतिपरिणामकथनं। वर्गणाभेदनिरूपणं। साधुसाध्वी-श्रावकश्राविकादीनां लक्षणादिकथनं। अहिंसानिरूपणं। प्रमाणनिरूपणं। अवक्तव्यादिनिरूपणं। चारित्रादिनिरूपणं। व्रतनिरूपणं। ध्यानप्रपञ्चनिरूपणं। भावनाप्रपञ्चनिरूपणं। कालीय-उत्कालीय-सेउत्कालीय-अंगेगविष्टपन्न-दशवैयालीयजीवाभिगम-पन्नवणा-महापन्नादि जैनागमानां संज्ञादिकथनं। अथ रुचिप्रपञ्चनिरूपणं। एकान्तमार्गकथनं। भोगमिथ्यात्वादिकथनं। विविधव्रतकथनं। देवतत्त्वकथनं। पापस्थाननिरूपणं। महाव्रतनिरूपणं। चतुर्दशगुणस्थानकविवेचनम्।

No. 2617. सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तिः। Substance, country-made paper, 13 × 4 inches. Folia, 659. Lines, 13 on a page. Extent, 22,488 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct.

Siddha-hemachandrábhidhána. A grammatico-explanatory lexicon of the Sanskrit language in which the application of the rules of grammar is illustrated by the explanation of a large number of words. The work is in eight parts, of which the codex contains the first seven parts relating to the Sanskrit language. The eighth refers to the Prákṛit language, and a codex of it has already been noticed under No. 2449 (vii, p. 208).

Beginning. ॐ नमो वीतरागाय।

प्रणम्य परमात्मानं श्रेयःशब्दानुशासनं।
आचार्य्यहेमचन्द्रेण स्तूयते किञ्चित् प्रकाश्यते॥

अर्हं॥ १॥ अर्हमित्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं सिद्धचक्रस्य आदिबीजं सकलागमोपनिषद्भूतमशेषविघ्नविधातनिघ्नमखिलदृष्टादृष्टफलसंकल्पकल्पद्रुमोपममाम्नाख्याध्ययनाध्यापनावधि प्रणिधेयम्। प्रणिधानञ्च। अनेनात्मनः सर्व्वतः सम्भेदस्तदभिधेयेन वा भेदः। वयमपि चैतच्छास्त्रारम्भे प्रणिदध्महे। अयमेव हि तात्त्विको नमस्कार इति। सिद्धिः स्याद्वादः। स्यादित्यव्ययमनेकान्तद्योतकं। ततः स्याद्वादोऽनेकान्तवादः। नित्यानित्याद्यनेकधर्म्मशबलैकवस्त्वभ्युपगमइति यावत्। इत्यादि।

End. उत्सर्गापवादः। अपवादात् क्वचिदुत्सर्गोऽपि न निष्ठार्थो शास्त्रप्रवृत्तिरिति॥

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनटीकायां सप्तमाध्यायस्य चतुर्थः पादः । शुभमस्तु ।

विषयः । प्रक्रियानुसारेण व्याकरणसूत्राणि विरचय्य स्वयमेव तद्वृत्तिनिर्म्माणोदाहरण प्रदर्शनादिना विशदीकरणम् ।

No. 2618. सिद्धचक्रविधिः । Substance, country-made paper, 12 × 5 inches. Folia, 9. Lines, 14 on a page. Extent, 236 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect.

Siddhachakra-vidhi. Rules for the formation and consecration of a mystic diagram called Siddhachakra. The diagram is used in the worship of different forms of Śakti, and forms a part of the secret worship of the Tántrics.

Beginning. श्रीसिद्धचक्राय नमः ।

यत् किञ्चित् परमं तत्त्वं प्रसिद्धं जिनशासनम् ।
तदत्र सिद्धचक्रेऽस्ति तदुद्धारमतः स्तुवे ॥
आद्यन्तवर्णजं गूढमूर्द्धाधो+युतं पदं ।
नादविन्दुकलोपेतमेतद्ध्येयमिहादितः ॥ इत्यादि ।

End. श्रेयःश्रीसुविलासवासभवनश्रीसिद्धचक्रस्थिता-
र्हत्सिद्धादिपदप्रभावविभवप्राग्भारविस्तारकाः ।
देवाः श्रीविमलेश्वरप्रभृतयो देव्यो जयाद्या ग्रहा
दिक्पालाश्च भवन्तु + + इमः श्रीसंघरत्नाकराः ॥

Colophon. इति श्रीसिद्धचक्रविधिः सम्पूर्णः ।

विषयः । तत्र सिद्धचक्रयन्त्रोद्धारविधिकथनं । सिद्धचक्रतपोविधानोद्यापनविधिकथनं । तच्चक्राराधनफलादिकथनं । मन्त्रसंस्थापनादिविधिकथनं । सन्निधानविधिकथनं । सन्निरोधनविधिकथनं । पूजनविधिकथनं । मूलनवपदपूजाविधिकथनं । अनाहतादिपदपूजाविधिकथनं । पञ्चामृतस्नानविधिः । उपचारदानादिविधिः । नमस्कारादिविधिः । स्तवनविधिकथनञ्च ।

No. 2619. परीक्षामुखलघुवृत्तिः, वा परीक्षामुखपञ्जिका । Substance, country-made paper, 14 × 4 inches. Folia, 60. Lines, 14 on a page. Extent, 1,962 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct.

Parîkshámukha-laghu-vṛitti ALIAS **Parîkshá-mukha-panjiká**. A commentary on the work noticed under No. 2419. Vol, VII. p. 176. It is a treatise on the logic of the Jains. By Anantavirya.

Beginning. नतामरशिरोरत्नप्रभाप्रोतनखत्विषे ।
नमो जिनाय दुर्व्वारमारवीरमदच्छिदे ॥
अकलङ्कवतोऽम्भोधेरुद्भ्रे येन धीमता ।
न्यायविद्यामृतं तस्मै नमो माणिक्यनन्दिने ॥
प्रभेन्दुवचनोदारचन्द्रिकाप्रसरे सति ।
मादृशाः क्व नु गण्यन्ते ज्योतिरिङ्गणसन्निभाः ॥
तथापि तद्वचोऽपूर्व्वरचनारुचिरं सतां ।
चेतोहरं भृतं यद्वन्ना नवघटे जलं ॥
वैजेयप्रियपुत्रस्य क्षीरपस्योपरोधतः ।
शास्त्रिषेणार्थमारब्धा परीक्षामुखपञ्जिका ॥

श्रीमन्नाथपारावारस्यामेयप्रमेयरत्नसारस्यावगाहनमत्युत्पन्नैः कर्तुं न पार्य्यते इति तदवगाहनाय + त प्रायमिदं प्रकरणमाचार्य्यः प्राह । तत्करणस्य च सम्बन्धादिचयापरिज्ञाने प्रेक्षावतां प्रवृत्तिर्न स्यादिति तन्नयानुवादपुरःसरं वस्तुनिर्देशपरं प्रतिज्ञाश्लोकमाह । प्रमाणादर्थसंसिद्धिस्तदभावाद्विपर्य्ययः । इति वक्ष्ये तयोर्लक्ष्म सिद्धमल्पं लघीयसः ॥ अहं वक्ष्ये किं तल्लक्ष्म लक्षणं किम्भूतं लक्ष्म—इत्यादि ।

End. श्रीमद्वैजयनामाभूदग्रणीर्गुणशालिनां ।
वदरीपालवंशाब्धीवोमण्युमणिरूर्ज्जितः ॥
तदीयपत्नी भुवि विश्रुता + + माणिक्यनामा गुणशीलधामा ।
यां रेवतीति प्रथिताम्बिकेति प्रभावतीति प्रवदन्ति सन्तः ॥
तस्यामभूद्विश्वजनीनवृत्तिर्दानाम्बुवाहो भुवि क्षीरपाख्यः ।
खगोचविस्तारनभोऽंशुमाली सम्यक्तारत्नाभरणार्चिताङ्गः ॥
तस्योपरोधवशतो विशदैरुकौर्म्माणिक्यनन्दिव्रततशास्त्रमगाधबोधं ।
सृष्टीकृतं कतिपयैर्वचनैरुदारैर्बालप्रबोधकरमेतदनल्पवीर्य्यैः ॥

Colophon. इति श्रीपरीक्षामुखलघुवृत्तिः समाप्ता ।

विषयः । माणिक्यनन्दिव्रतपरीक्षामुखाभिधानजैनन्यायसूत्रस्य व्याख्यानम् । (परीक्षामुखसूत्रमिदं पूर्व्वत्र विवृतमिति ज्ञेयम्) ।

No. 2620. दशाश्रुतस्कन्धसूत्रम्। Substance, country-made paper, 12 × 5 inches. Folia, 102. Lines, 6 on a page. Extent, 1,363 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Incorrect. Mágadhí.

Daśáśruta-skandha-sútra. One of the original texts of the Jain scriptures. It treats first of the lives of the 24 Jinas, giving prominence to Vardhamána; next of the genealogy of Sthaviras; and lastly of the Paryushaṇá or quadrimensial autumnal fast. By Bhadrabáhu.

Beginning. नमो अरिहंताणं; नमो सिद्धाणं। नमो आयरियाणं। नमो उवज्झायाणं। नमो लोए सव्वसाहूणं।

एसोपं चणमुक्कारो सव्वपावप्पणासणो।
मंगलाणं वसव्वेसि पढ़मं हवद्मंगलं॥

तेणं कालेणं तेणं समएणं समणे भगवं महावीरे पंचहत्थुत्तरे हात्था। इत्यादि।

End. सकारणं समुत्तं सच्चच्छं सउभयं सवागरणं भुत्ती अणुदं सेइति वेमि। इति।

Colophon. इति दशाश्रुतस्कन्धसूत्रं सम्पूर्णं॥

विषयः। अर्हतां चरितकथनं। तत्र सर्व्वतः प्राधान्यात् प्रथमं वर्द्धमानजिनस्य चरितकथनं। एवं संक्षेपेण अन्यान्यजिनानां चरितकीर्त्तनं। स्थविरावलिकथनं। पर्य्युषणाविधिकथनञ्च। पर्य्युषणाय आषाढ़ादिचतुर्मासान् यावत् यतीनां एकस्यैव एकत्रे अवस्थानं। तत्र स्थितस्य नियमादिकथनं। आहारादिविधिकथनञ्च।

No. 2621. कर्म्मविवागबालावबोधः। Substance, country-made paper, 14 × 4½ inches. Folia, 39. Lines, 17 on a page. Extent, 2,372 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráy Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect Mágadhí and Gujaratí.

Karmavivága-báláva-bodha. A commentary on the Jain Karmavipáka, a work on the consequences in a future life of works done in this life. By Matichandra, disciple of Guṇachandra.

Beginning. श्रेयोमार्गस्य वक्तारं केवारं कर्म्म + + णां।

केवारं विश्वतत्त्वानां वन्दे वीरं जगत्प्रभुं॥
गणचन्द्रं गुरुं नत्वा मतिचन्द्रेण धीमता।

क्रियते कर्म्मग्रन्थस्य व्याख्या बालावबोधिनी ॥
सिरिवीरजिणं वंदिय कम्मविवागं समा + ङ ।
वुत्थं कीरइ जिएण हेउहिं जेणतं उभिन्नएकम्मं ॥

अथ । सकलत्रिभुवनजनजनने चमत्कार उपजाथो । इत्यादि ।

End. एकम्मविवागनामे शास्त्रलिखं देवेन्द्रसूरिइं श्रीजगच्चन्द्रसूरिणे शिष्ये ।
गुणचन्द्रगणिशिष्येण मतिचन्द्रेण धीमता ।
व्याख्या कर्म्मविपाकस्यालेखि बालावबोधिनी ॥

Colophon. इति कम्मविवागबालावबोधः सम्पूर्णः ।

विषयः । जैनकर्म्मविपाकग्रन्थस्य गुर्ज्जरभाषया व्याख्यानम् ।

No. 2622. ज्ञातानुयोगः, वा ज्ञाताधर्म्मकथावृत्तिः । Substance, country-made paper, 11 × 6 inches. Folia, 130. Lines, 12 on a page. Extent, 3,870 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect Sanskrit.

Jṇátánuyoga, ALIAS Jṇátádharmakathá-vṛitti. A commentary on the Jṇátádharmakathá, one of the leading text books of the Jains. By Abhayadeva Súri.

Begining नत्वा श्रीमन्महावीरं प्रायोऽन्य + वीच्चितुः ।
ज्ञाताधर्म्मकथाङ्गस्यानुयोगः कश्चिदुच्यते ॥

तत्र च फलमङ्गलादिचर्य्यस्यानोत्तराद्वसेयः । केवलमत्र योगद्वारविशेषस्योपक्रमस्य प्रतिभेदरूपं प्रक्रान्तशास्त्रस्यं वीरजिनवरेन्द्रापेक्षया—इत्यादि ।

End. परिणेतारो यस्याः सा निर्विघ्नवरा अत एव वरवज्जितेतिशेषं सूचसिद्धं ।
समाप्ता द्वितीयश्रुतस्कन्धः ।

— — — — — — — —

यो जैनाभिमतं प्रमाणमनघं व्युत्पादयामासिवान्
प्रस्तावैर्निखिलैर्निरस्य निखिलं बौद्धादिसम्बन्धितं ।
नानाटङ्किकथाकथा + + मतिक्रान्तं + + तपो-
+ सम्बन्धविहारमप्रतिहतं शास्त्रानुसारात् तथा ॥
तस्याचार्य्यजिनेश्वरस्य सदृवद्वादीन्द्रविस्पर्द्धिन
स्तद्बन्धोरपि बुद्धिसागर इति ख्यातस्य सूरे + + + ।
छन्दोबन्धनिबद्धबन्धुरवचःशब्दादिसल्लक्षणः

श्रीसंविग्नविहारिणः श्रुतनिधेश्चारित्रचूडामणेः ॥
शिष्येणाभयदेवाख्यसूरिणा विदुषिः कृता ।
ज्ञाताधर्मकथाङ्गस्य श्रुतभक्त्या समासतः ॥

Colophon. समाप्ता चेयं ज्ञाताधर्मकथावृत्तिः ।

विषयः । ज्ञाताधर्मकथाभिधानसूचग्रन्थस्य श्रुतस्कन्धाभिधानप्रकरणस्य व्याख्यानम् ।

No. 2623. प्रद्युम्नचरितम् । Substance, country-made paper. 13 × 5 inches. Folia, 112. Lines, 7 on a page. Extent, 2,282 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect Sanskrita.

Pradyumna-charita. A Jain version of the story of Pradyumna, son of Kṛishṇa by Rukminí. By Mahasena A'chárya. It is an epic poem, and professes to be a condensed version of a more elaborate work by Gaṇes'vara and others. The object of the work is to show that Kṛishṇa, Balaráma, and the rest of the Yádava race accepted the Jain religion from Neminátha, and were staunch Jains. The story of Pradyumna as given in the Bhágavata Puráṇa remains in its main outline untouched, but the episodes, scenes and persons are frequently changed to suit altered circumstances.

Beginning. श्रीमन्तमानम्य जिनेन्द्रनेमिं ध्यानाग्निदग्धाखिलघातिकक्षम् ।
व्यापारयामास न यच्च बाणान् जगद्विजेता मकरध्वजोऽपि ॥
बालेऽपि यस्याप्रतिमं सुरेन्द्रो विलोक्य रूपं पुनरीक्षते स्म ।
चक्षुः सहस्रं युगपद्विधाय नत्वा च तं वीरजिनं विरागम् ॥
जिनेन्द्रवक्त्राम्बुजराजहंसीं प्रणम्य गुरूंश्च मथ भारतीञ्च ।
उपेन्द्रसूनोश्चरितं प्रवक्ष्ये यथागमं पावनमात्मशक्त्या ॥
कवीन्द्रसीमानमितैर्यदुक्तं गणेश्वरादैरतिविस्तरेण ।
तत्पादपद्मद्वयभक्तिशक्त्या संक्षिप्य तद्वस्तुमयं श्रमेण ॥ इत्यादि ।

End. राज्यं प्राज्यमुदस्य निर्ममतमं तप्त्वा तपो दुश्चरं
ध्यानाग्नौ सकलं विकर्मसमिधो हुत्वा पयः केवलं ।
यावज्ज्ञेयविसर्पिविश्वकरणग्रामातिगं निश्चलं
देयाद्वः पदमव्ययं स भगवान् + + + जिनेन्द्रो विभुः ॥

Colophon. इति श्रीसिन्धुराज + + महामहत्तमश्रीपद्मगुरोः श्रीमहसेनाचार्यस्य कृतौ प्रद्युम्नचरिते चतुर्दशः सर्गः समाप्तः । ॐ अर्हते नमः । समाप्तोऽयं ग्रन्थः ।

विषयः। प्रथमे सर्गे,—उपेन्द्रस्य द्वारकापुरीवर्णनं। २यै सर्गे,—नारदागमनकथनं। बलभद्रकृष्णादिकृततदुपचारादिकथनं। अथ तत्र सहसा समागतस्य कृष्णसहोदरस्य नेमिजिनस्य अभ्यर्थनादिकथनं। नारदस्य सत्यभामाग्रहगमनादिविवरणकथनं। तत्र सत्यभामां प्रति जातरोषेण महर्षिणा कृष्णसमीपे रुक्मिण्याः रूपगुणादिकथनं। ३ये सर्गे,—कुण्डिनपुरगमनपूर्व्वकं कृष्णस्य रुक्मिणीहरणवृत्तान्तवर्णनं। कृष्णकृतशिशुपालवधवर्णनं। हरिणा सह रुक्मिण्या विवाहः। पुरसुन्दरीणां विभ्रमादिवर्णनं। सत्यभामाकृतरुक्मिणीपादपूजनादिवर्णनञ्च। ४र्थे, —सर्गे — प्रद्युम्नस्य जन्मोत्सवादिवर्णनं। धूमशिखाभिधानदानवकृततदपहरणकथनं। तथा सम्बरकृततत्पालनादिवृत्तान्तकीर्त्तनं। ५मे सर्गे,—पुत्रवियोगविधुरायाः रुक्मिण्याः परितापादिवर्णनं। अथ नारदकृततदन्वेषणादिवृत्तान्तवर्णनं। ६ठे सर्गे,—प्रसङ्गाद्योध्याधिपतेः हरिश्चन्द्राभिधानस्य राज्ञो विवरणकीर्त्तनं। जैनधर्म्मसुशासनादिकीर्त्तनं। ७मे सर्गे,—कोशलाधिपतेर्हेमनाभस्य मधुकैटभनामधेयौ द्वौ पुत्रौ बभूवतुरितितद्विवरणकथनं। वसन्तवर्णनं। सन्ध्यावर्णनं। ८मे सर्गे,—रत्या सह प्रद्युम्नस्य परिणयवर्णनं। अथ नारदेन सह प्रद्युम्नस्य द्वारकागमनादिवर्णनं। ९मे सर्गे,—विमानस्थयोर्नारदप्रद्युम्नयोर्द्वारकागमनकाले गिरिवनप्रभृतिवर्णनं। अथ सम्बरमायया भिल्लकरूपेण प्रद्युम्नस्य रुक्मिणीसमीपगमनादिरहस्यवर्णनं। सिंहादिरूपधारिणा तेन सह बलदेवादीनां युद्धवर्णनं। १०मे सर्गे,—कृष्णसैन्यमारसैन्ययोर्युद्धवर्णनं। अथ नारदस्य श्रीकृष्णादिसमीपे प्रद्युम्नस्य परिचयादिदानवर्णनं। ११, १२,१३,१४सर्गे—बलबलानुजप्रभृतीनां नेमिनाथसमीपात् जैनधर्म्मानुष्ठानश्रवणादिकथनञ्च।

No. 2624. यशोधरचरितम्। Substance, country-made paper, 16 × 5, inches. Folia, 85 Lines, 7 on a page. Extent, 1,183 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Generally correct. Sanskrita.

Yaśodhara-charita Legend of one Yas'odhara, a king, who abjured his family custom of sacrificing animals in honour of Sakti and became a Jain. By Srutaságara, disciple of Vidyánandí. The object of the legend is to extol Jain morality.

Beginning. विद्यानन्दीश्वरं देवं नाभिराजसमुद्भवं।
स्तवेऽहं मरुदेव्यङ्गसम्भवं वृषभं जिनम्॥
अकलङ्कं जिनधीशमजितं विजयात्मजं।
जितशक्रमहाराजनन्दनं प्रणमाम्यहम्॥
सम्भवं सर्व्वज्ञं खस्तिखावस्तिसम्भवं।
दृढ़राजसुषेणासम्भवं चिन्तयाम्यहं॥

शिवकोटिप्रदं वन्दे शरण्यमभिनन्दनं ।
स्वयंवरमहाराजसिद्धार्थस्वामिनीसुतं ॥
उमास्वामिनमर्हन्तं श्रयामि सुमतीश्वरं ॥
श्रीमेघरामराजेन्द्रमङ्गला+सुमङ्गलं ॥
भद्रबाहुं जगद्भद्रं भजे पद्मप्रभुं विभुं ।
कौशाम्बीधरणाधीशसुसीमासुतनूद्भवं ॥
— — — — — — — — — — — — ।

अथास्ति दक्षिणे मेरोर्जम्बूद्वीपस्य भारते ।
वर्षे देशस्तु यौधेयो विधेयो यत्र सद्गुणः ॥
दिव्यदृष्टिर्विधातुर्व्वा स्वर्गविद्वेषकारिणः ।
स देशो वर्ण्यते केन न वर्ण्यः केन वा कृतः ॥ इत्यादि ।

End. तर्कव्याकरणार्हतप्रविलसत्सिद्धान्तसारामल-
छन्दोऽलङ्कृतिपूर्व्वनव्यकृतधीसंश्रव्यकाव्योदये ।
चञ्चच्चारुधिया प्रमोदितमतिर्भव्यः कृताभ्यर्थनः
साधुश्रीमतिसागरेण कृतवानेतच्चरित्रं शुभम् ॥

Colophon. इति श्रीभट्टारकश्रीविद्यानन्दिप्रियशिष्यब्रह्मश्रीश्रुतसागरविरचिते यशोधरचरिते चतुर्थः परिच्छेदः समाप्तः ।

विषयः । प्रथमे परिच्छेदे,—राजपुरवास्तव्यस्य महासेनाङ्गजस्य चण्डमार्य्याभिधानायाः कालिकायाः कल्याणार्थं देव्याः पुरतो विविधच्छागमहिषादिबलिदानविवरणकथनं । तत्र अभयमतेर्विवरणकथनं । यशोधरनृपतेर्जन्मवृत्तान्तकथनं । द्वितीये परिच्छेदे— कामासक्तस्य पुरुषस्य नरकदुःखवर्णनमुखेन प्राणिहिंसनस्य अशुभजनकत्वनिरूपणं । यशोधरस्य पूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च । तृतीये परिच्छेदे — अभयरुचिनामकस्य कस्यचित् मारदत्ताभिधाननरपतिपुरत स्वजन्मवृत्तान्तकथनं । देहात्मवादनिरूपणपूर्व्वकं तन्निरासकथनञ्च । यशोधरनृपतेः दुश्चरिताया वृत्तान्तकथनं । चतुर्थे परिच्छेदे,—अहिंसकधर्ममाहात्म्यकीर्त्तनं । विनयादिमाहात्म्यकीर्त्तनं । रूपयौवनधनधान्यादीनामनित्यत्वकथनं । जैनधर्ममाहात्म्यकथनं । अभयरुचेः, अभयमतेर्मारदत्तस्य, यशोमतेः, कल्याणमित्रस्य, कुसुमावल्याः श्रीसुदत्तस्य च स्वर्गगमनकथनञ्च ।

No. 2625. विहिप्पपासूत्तम्, (विधिप्रपासूत्रम् ।) Substance, country-made paper, 14 × 6 inches. Folia, 178. Lines, 8 on a page. Extent, 3,628 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Mágadhí.

Vihippapá-sútta (Sanskrit, **Vidhiprapásútra**). A collection of rituals for various Jain rites and ceremonials. Anonymous. In Mágadhí.

Beginning. णमिय महावीरजिनं सम्मं सरिउं गुरुव एसं च ।
सावयमुणि कज्जाणं सामारिं लिहामि अहं ॥
सम्मत्तमुल्लत्तेणं गिहिधम्मकप्पतरुणो ।
पढ़मं समत्तारोय णविभणइ + + + ॥
तत्थजिणभवणे समोसरणे वा सुहेसु तिहिमुक्तादु एसु उवसमाद् गुणगणासय ।
इत्यादि ।

End. विहिसग्गा प्पाणाम सामायारी इमा चिरं जयइ ।
पल्लायन्ती हिययं सिद्धिपुरीपवथियजणाणं ॥

Colophon. इति श्रीविहिप्पपासुत्तं समाप्तं ।

विषयः । सम्यक्त्वारोपणविधिकथनं । परिग्रहपरिमाणकथनं । सामायकारोपणग्रहणपारणविधिकथनं । उपधानविधिकथनं । मालारोपणविधिकथनं । प्रतिक्रमणपञ्चकविधिकथनं । कल्याणकादितपोभेदकथनं । नन्दिरचनाविधिकथनं । अर्हदादिस्तोत्रकथनं । प्रव्रज्याविधिकथनं । स्थण्डिलप्रतिलेखनादिविवेचनं । उपयोगविधिकथनं । मण्डलीतपोविधिकथनं । उत्थापणाविधिकथनं । योगविधानकथनं । अनध्यायविधिकथनं । तच स्वाध्यायकालादिनिरूपणञ्च । कल्पाकल्पविधिकथनं । आचाराङ्गादियोगकथनं । उपाङ्गादियोगकथनं । प्रकीर्णकयोगकथनञ्च । वाचनाविधिकथनं । अर्थस्थापनाविधिकथनं । उपाध्यायाचार्य्यपदस्थापनाविधिकथनं । गणानुज्ञाविधिकथनं । व्रतादावनग्रनविधिकथनं । महापरिष्ठापनिकाविधिकथनं । साधुप्रायश्चित्तविधिकथनं । गृहिप्रायश्चित्तविधिकथनं । अर्हन्मूर्त्यादिप्रतिष्ठाविधिकथनं । नन्द्यावर्त्तस्थापनाविधिकथनं । जलानयनविधिकथनं । कलशारोपणविधिकथनं । ध्वजारोपणविधिकथनं । कूर्म्मचक्रप्रतिष्ठाविधिकथनं । स्थापनाचार्य्यादिप्रतिष्ठाविधिकथनं । मुद्राविधिकथनं । यात्राविधिकथनं । तिथिविधिकथनं । अङ्गविद्यासिद्धिविधानकथनञ्च ।

No. 2626. क्षेत्रसमासटीका, वा बृहत्क्षेत्रसमासवृत्तिः । Substance, country-made paper, 12 × 6 inches. Folia, 172. Lines, 15 on a page. Extent, 8,224 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Sinh, Bahádur. Appearance, new. Prose. Generally correct.

Kshetrasamása-tíká, ALIAS Vṛihatkshetra-samása-vṛitti. A commentary on Jinabhadra Súri's treatise on mensuration called Kshetrasamása. By Malaya Giri. A Jain work.

Beginning. जयति जिणवचनमवितथमभितगभीरार्थमखिलनयकलितं ।
अजितं पर+ +गगणैः शिवसुखफलदायि परमशिवम् ॥
कलिकालेऽपि यथास्खलितजिनसिद्धान्तप्रकाशकरणेन ।
जयति भरतैकदीपो जिनभद्रगणिक्षमाश्रमणः ॥
विदधेऽपि यथाशक्ति क्षेत्रसमासं समासतः स्पष्टं ।
यद्वगतौ मन्दा अपि जायन्ते श्रुतविदः परमाः ॥

इह जिनभद्रगणिक्षमाश्रवणो मन्दमेधसामवबोधाय सकलजम्बूद्वीपप्रज्ञप्त्यादिशास्त्रसंक्षेपं समुद्दिधीर्षुरविघ्नेनेष्टप्रसिद्ध्यर्थमिष्टदेवतानमस्कारं कुर्वन्नाह प्रतिज्ञार्थमभिधेयादिकञ्च प्रतिपादयिषुरिदमाह । नमिउण । इत्यादि ।

End. शरणं जिननिर्दिष्टं धर्म्मशरणमाश्रिताः ।
अर्हतो मङ्गलं सिद्धा मङ्गलं मम साधवः ॥
मङ्गलं मङ्गलं धर्म्मस्तन्मङ्गलमश्रियमिति ।

Colophon. इति श्रीमलयगिरिरचिता क्षेत्रसमासटीका पारमुपागमत् ।
इति श्रीबृहत्क्षेत्रसमासवृत्तिः सम्पूर्णा ।

विषयः । जिनभद्रगणिकृतक्षेत्रसमाससूत्रस्य व्याख्यानम् ।

No. 2627. सूत्रकृताङ्गवार्त्तिकम् । Substance, country-made paper, 14 × 6 inches. Folia, 202. Lines, 14 on a page. Extent, 10,200 ślokas. Character, Nágara. Date, ? Place of deposit, *Ajimganj, Ráya* Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct. Gujráti.

Sútrakṛitáṅga-vártika. A commentary in Gujráti on the Jain text called Sútrakṛitáṅga Sútra. By Pásachandra.

Beginning. प्रणम्य सद्गुरून् भक्त्या बालानां बोधहेतवे ।
किञ्चित् सूत्रकृताङ्गस्य लिख्यते वार्त्तिकं मया ॥

प्रथम श्रीआचाराङ्गकहीने । पछी सुयगड़ांग कह्युं । तेनो सम्बन्ध मेलवेछे, जे कारण श्रीआचाराङ्ग मांहे । जीवो छक्काय परुवणायते सिंव हेण बन्धोत्ति ॥ इत्यादि कह्युं छे । ते सर्व परमार्थने जाणवु जोइए । एम आचाराङ्गसाथे आ सुयगड़ाङ्गनो सम्बन्ध जाणवो । इत्यादि ।

End. एवीजा श्रीसूयगड़ाङ्गनावीजाश्रुतस्कन्धनो संक्षेपार्थ बालावबोध समाप्त थयो ।

सम्प्रत्तं सूयगड़ाङ्गं आदितः । सर्व्वाणि अध्ययनानि त्रयोविंशतिकानि सम्पूर्णानि ।

Colophon. श्रीसाधुरत्नशेण पाशचन्द्रेण दलितः ।

इतं बालावबोधार्थं द्वितीयाङ्गस्य वार्त्तिकं ॥

विषयः । सूचकृताङ्गसूचस्य गुर्ज्जरभाषया व्याख्यानम् ।

No. 2628. सूचकृताङ्गटीका । Substance, country-made paper, 13 × 6 inches. Folia, 302. Lines, 12 on a page. Extent, 14,673 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct. Sanskrita.

Sútrakṛitáṅga-ṭíká. Another commentary on the *Sútrakṛitáṅga Sútra*. By S'ila Áchárya, with the co-operation of the Váhari Gaṇi.

Beginning. स्वपरसमयार्थसूचकमनन्तगमपर्य्यायार्थगुणकलितम् ।
सूचकृतमङ्गमतुलं विदधेऽमि जिनान्नमस्कृत्य ॥
व्याख्यातमङ्गमिह यद्यपि सूरिभूखै-
र्भक्त्या तथापि विवरीतुमहं यतिष्ये ।
किं पक्षिराजगतमप्यवगम्य सम्यक्
तेनैव वाञ्छति पथा श्लथभो न गन्तुम् ॥
ये मय्यवज्ञां व्यधुरिङ्गबोधा जानन्ति ते किञ्चन तानपास्य ।
मत्तोऽपि यो मन्दमतिस्तथाऽस्ति तस्योपकाराय ममैष यत्नः ॥

इत्यपारसंसारान्तर्गतेनासुमताव्याख्यातिदुर्लभं मनुजत्वं सुकुलोत्पत्तिसमग्रेन्द्रियसामग्र्याद्युपेतेनार्हद्धर्मनमग्रेषकर्म्माच्छित्तये यतितव्यं । कर्म्माच्छेदश्च सम्यग्विवेकसव्यपेक्षः । असावपि आप्तोपदेशमन्तरेण न भवति । इत्यादि ।

End. उक्तञ्च ।
सव्वेसिं पिणयाणं बहुविहवत्तव्वयं णिसामेत्ता ।
तं सवणय विसुद्धं जं चरणगुणट्ठिउ साहू ॥

समाप्तमिदं नालन्दाख्यं सप्तममध्ययनं ।

समाप्ता चेयं सूचकृतद्वितीयाङ्गस्य टीका । छता चेयं शीलाचार्य्येण वाहरिगणिसहायेन ।
यदवाप्तमत्र पुण्यं टीकाकरणे मया समाधिष्टता ।
तेनापैततमस्को भव्यः कल्याणभाग् भवतात् ॥

विषयः । सूचकृताङ्गसूचस्य व्याख्यानम् ।

No. 2629. सूचकृताङ्गदीपिका। Substance, country-made paper, 13 × 6 inches. Folia, 282. Lines, 9 on a page. Extent, 10,748 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct. Sanskrita.

Sútrakṛitáṅga-dípiká. Another commentary on the Sútrakṛitaṅga Sútra. Anonymous. by हर्षकुल in Sam. 1583.

Beginning. प्रणम्य श्रीजिनं वीरं गौतमादिगुरूंस्तथा।

स्वाम्योपज्ञतये कुर्व्वे द्वितीयाङ्गस्य दीपिकाम्॥

इह हि प्रवचने चत्वारोऽनुयोगाः। तथाहि चरणकरणानुयोगः। द्रव्यानुयोगः। धर्म्मकथानुयोगः। गणितानुयोगश्च। तत्र प्रथमं श्रीमदाचाराङ्गं चरणकरणानुयोगप्राधान्येन व्याख्यातं। अथेदं श्रीसूचकृताख्यं द्वितीयाङ्गं द्रव्यानुयोगप्राधान्येन व्याख्यायते। सूचकृताङ्गमिति कः शब्दार्थः। उच्यते। सूचं स्वपरसमयसूचनं कृतं येन तत् सूचं तदेवाङ्गमिति। तत्र श्रुतस्कन्धद्वयं। प्रथमश्रुतस्कन्धे षोड़श अध्ययनानि। द्वितीये सप्त। तत्र प्रथमश्रुतस्कन्धस्य प्रथमाध्ययने चत्वार उद्देशकाः। इत्यादि।

End. तद्यथा। सोऽहं ब्रवीमि येन मया भगवद्न्तिके श्रुतमिति। नालन्दीयाख्यमिदं सप्तममध्ययनं समाप्तं।

विषयः। सूचकृताङ्गसूचस्य व्याख्यानम्।

No. 2630. सारस्वतदीपिका। Substance, country-made paper, 12 × 6 inches. Folia, 120. Lines, 16—17 on a page. Extent, 6,159 ślokas. Character, Nágara. Date, Sm. 1727. Place of deposit, Ájimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Generally correct.

Sárasvata-dípiká. A commentary on the Sárasvata Grammar of Anubhúti Svarúpa Áchárya. By Chandrakírti Súri. Vide *ante* Nos. 141 and 2543.

Beginning. नमोऽस्तु सर्व्वकल्याणपद्मकाननभास्वते।

जगत्त्रितयनाथाय पराय परमात्मने॥

नमः श्रीगुरवे वासवृद्धये दत्तसिद्धये।

मतिप्रदानशीलायै सरस्वत्यै नमो नमः॥

अथ श्रीमत्परमहंसपरिव्राजकाचार्य्यः श्रीमदनुभूतिस्वरूपाचार्य्यः निःशेषविघ्नसंघातशान्त्यर्थं सत्स्वपि देवेष्वपरेषु ऐहिकामुष्मिकफलस्निग्धांश्च फलद्वयदानात्समानपास्य भगवन्नमस्कृ-

तिपूर्व्वकं सारस्वतीं प्रक्रियां चिकीर्षुः सरस्वतीदत्तवर आदादेव प्रस्तावनाश्लोकमाह प्रणम्येत्यादि। अथैतस्य साधनापूर्व्वकं व्याख्यालेशः प्रारभ्यते। णम् प्रह्वीभावे। आदेः णः। स्वः। नम्। प्रपूर्व्वसमासे क्यप्प्रत्ययः। इत्यादि।

End. तैरियं पद्मचन्द्राङ्कोपाध्यायाभ्यर्थना कृता।
शुभा सुबोधिकानाम्नी श्रीसारस्वतदीपिका॥
श्रीचन्द्रकीर्त्तिसूरीन्द्रपादाम्भोजमधुव्रतः।
हर्षकीर्त्तिरिमां टीकां प्रथमादर्शकेऽलिखत्॥
अज्ञानध्वान्तविध्वंसविधानदीपिकालिभा।
दीपिकेयं विजयतां वाच्यमाना बुधैश्चिरम्।
स्वल्पस्य सिद्धस्य सुबोधकस्य सारस्वतव्याकरणस्य टीकां।
सुबोधिकाख्यं + + + + + सूरीश्वरः श्रीप्रभुचन्द्रकीर्त्तिः॥
स्फुटं सप्तसहस्राणि शतमेकमनुष्टुभाम्।
सारस्वतस्य टीकाया ग्रन्थमानमिहोदितम्॥

Colophon. इति श्रीमन्नागपुरीयतपागच्छाधिराजभट्टारकश्रीचन्द्रकीर्त्तिसूरिविरचित-श्रीसारस्वतव्याकरणस्य दीपिका सम्पूर्णा। संवत् १७२७।

विषयः। अनुभूतिस्वरूपाचार्य्यकृतसारस्वतचन्द्रिकाभिधानव्याकरणस्य व्याख्यानम्।

No. 2631. सामाचारीशतकम्। Substance. country-made paper, 12 × 6 inches. Folia, 273. Lines, 8 on a page. Extent, 5,995 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Sanskrit and Mágadhí.

Sámáchárí-śataka. An elaborate treatise on Jain rites and ceremonies. By Samayasundara Upádhyáya.

Beginning. श्रीवीरञ्च गुरुं नत्वा स्मृत्वा गच्छपरम्पराम्।
प्रश्नोत्तरशतग्रन्थं वक्ष्ये शास्त्रानुसारतः॥
नानाप्रकाराः सन्देहा उत्पद्यन्तेऽल्पमेधसां।
तच्च प्रकरणे स्वीयगच्छाचारानुगामिनां॥
स्यात्सन्देहेन मिथ्यात्वं मिथ्यात्वेन भवभ्रमैः॥
तस्मात् तस्य व्यपोहाय प्रक्रमः क्रियते मया॥

— — — — — — — —।

प्रश्नोत्तरमयं सामाचारीनामिदमद्भुतम् ।
शास्त्रं सुविहितावारविचारप्रतिपादकं ॥
श्रीमद्वरतरे गच्छे श्रीजिनचन्द्रसूरयः ।
युगप्रधाना इत्याख्यां प्रापिताः पातिसाहिना ॥
— — — — — — — — ।
तेषां प्रसादमासाद्य शिष्यः समयसुन्दरः ।
प्रश्नोत्तरशते पञ्च प्रकाशान् तनुते क्रमात् ॥

तत्र प्रथमं तावत् श्रीवृद्धवरतरगच्छे क्रियमाणसामाचारीक्रियानुष्ठानानि शास्त्रसम्मत्या शिष्यप्रश्नोद्देशेन समर्थयन्नाह—इत्यादि ।

End. खरतरगच्छाधीशा जिनचन्द्रयुगप्रधानगुरुराजाः ।
श्रीपातिशाहमान्याः समभूवन् भुवि विख्याताः ॥
श्रीपूज्यमुख्यशिष्या दत्ताः श्रीसकलचन्द्रनामानः ।
मद्गुरवो गुणरत्नैषामेष प्रसादो मे ॥
एवं द्वादशभिः सम्यक् पूर्णं प्रश्नोत्तरैः स्फुटम् ।
प्रकाशं पञ्चमं चक्रे गणिसमयसुन्दरः ॥

Colophon. इति श्रीसमयसुन्दरोपाध्यायविरचिते पञ्चप्रकाशे समाचारीशतके पञ्चमः प्रकाशः सम्पूर्णः ।

विषयः । सामायिकदण्डकोद्गरणानन्तरं ईर्य्याधिकारकथनं । चतुर्थ्यां पौषधाधिकारकथनं । महावीरस्य षट्कल्याणाधिकारकथनं । खरतराधिकारकथनं । प्रतिक्रमणाधिकारकथनं । साधूनां साध्वीभिः सह एकस्मिन् गच्छे अवस्थित्यादिनिषेधाधिकारकथनं । पर्य्युषिताधिकारकथनं । पाक्षिकप्रतिक्रमणाधिकारकथनं । वर्णान्तरप्राप्तपानीयप्रदत्त्यधिकारकथनं । अखण्डद्रव्यग्रहणाधिकारकथनं । अपक्वदुग्धग्रहणाधिकारकथनं । श्रावकाणां पानकादिग्रहणनिषेधाधिकारकथनं । तरुणाः स्त्रिया मूलनायकदेवपूजानिषेधाधिकारकथनं । श्रावकाणां प्रतिमावाचननिषेधाधिकारकथनं । सामायिकदण्डकवाचनाधिकारकथनं । नवीनसामायिकग्रहणाधिकारकथनं । श्रावकाणां जातमृतसूतकपिण्डनिषेधाधिकारकथनं । श्रावणभाद्रयोर्द्विनवद्धौ पर्य्युषणाधिकारकथनं । कल्पसूत्रवाचने नववाचनानियमाभावकथनं । सूरेः प्रतिष्ठाधिकारकथनं । तिथिच्चये पूर्व्वा तिथिर्ग्राह्येतिकथनं । एवं तिथिवृद्धौ च कर्त्तव्येतिकथनं । सामायिकग्रहणे स्वाध्यायकरणकथनं । प्रातः सन्ध्यायाञ्च कम्बलवस्त्रादिप्रतिलेखने विशेषकथनं । कार्त्तिकमासवृद्धौ प्रथमकार्त्तिके चातुर्मासिकप्रतिक्रमणाधिकारकथनं । अथ जिनप्रतिमादिविधिकथनं । जिनप्रतिमास्थापनादिविधिकथनं । तत्पूजादिफलकथनं । देवानां विरत्यादिधर्म्मच्छिन्नं । श्रावकाणां मुखवस्त्रिकाधिकारकथनं । साधूनां भक्तपानादियोग्यद्रव्य-

निरूपणं। अशनादिनिर्णयकथनं। लवण-तक्र-दधि-पक्वान्नादीनां याह्याग्राह्यत्वकथनं। पञ्चम्यादीनां पर्व्वत्वनिरूपणं। अथ जिनवल्लभसूरिसामाचारकथनं। जिनदत्तसूरिसामाचारककथनं। जिनपतिसूरिसामाचारकथनं। गच्छाधिपतिसामान्याचार्य्योपाध्यायानां प्रतिपत्तिविधिकथनं। अनुयोगवाद्विसर्ज्जनविधिकथनं। पर्य्युषणापर्व्वणि भवनदेवताकायोत्सर्गविधिकथनं। श्रावकाणामतिचारचिन्तनपाठविधिकथनं। तत्र श्रुतादिकरणे तद्दोषनिवारणविधिकथनं। अक्षाध्यायविवेचनं। चैत्यपूर्णिमायां देववन्दनविधिः। श्रावकाणां देवतावसरस्थापनाविधिकथनं। दीक्षादानविधिः। सप्तोपधानक्रियाविधिः। विंशतिस्थानकतपोविधिः। प्राभातिकप्रतिक्रमणविधिः। श्रुतदेवतादिकायोत्सर्गस्थापनाविधिकथनं। पाक्षीयरात्रौ क्षुण्मयघटरत्नविधिकथनं। शान्तिविधिकथनञ्च।

No. 2632. कर्म्मशतयबालावबोधः। Substance, country-made paper, 14 × 4½ inches. Folia, 39. Lines, 17 on a page. Extent, 2,372 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñha, Bahádur. Appearance, new. Prose and verse. Incorrect. Mágadhí and Gujrátí.

Karmaśataya-bálá-bodha. An epitome of future retributions for works done in this life. By Matichandra.

Beginning. रत्नत्रयोपदेष्टारं नत्वा वीरं जिनेश्वरं।
स्वल्पोऽपि शतकस्यार्थो मतिचन्द्रेण लिख्यते॥
नमिय जिणं धुवरं धयघाय पुणपरि+ मे।
यर च उह विरागावुणं बंध विह सामीय॥

अर्थः। जिण कहिए रागद्वेषमोहदुर्निवारवैरवारिणा जेता अष्टमहाप्रातिहार्य्यलक्षणाद्। इत्यादि।

End. करालकलिपालपातालतलने विषे। निमज्ज धर्म्मदरणधुरीणश्रीमान् जगच्चन्द्रसूरि तच्चरणसरसीरुहचञ्चरीकदेवेन्द्रसूरि तेनै कर्म्मप्रकृतिपञ्चसङ्ग्रहषट्कर्म्मग्रन्थादिशास्त्रलिखेहै आत्मस्मरणार्थे॥

Colophon. इति श्रीमद्वृहत्खरतरगच्छीमतिचन्द्रमुनिविरचितकर्म्मशतयबालावबोधः समाप्तः।

विषयः। कर्म्मविपाकसङ्ग्रहशतकस्य गुर्ज्जरभाषया व्याख्यानम्।

No. 2633. आत्रेयसंहिता । Substance, Káśmírí paper, 13 × 7 inches. Folia, 267. Lines, 15 on a page. Extent, 8,762 slokas. Character Nagara. Date, ? Place of deposit, Ludhiyáná, Sardár Atar Siñh, Bahádur. Appearance, old. Verse. Incorrect.

Atreya-sañhitá. An original treatise on Hindu Medicine. It is usually attributed to Átreya, a son or descendant of Atri, one of the oldest Vedic sages. This statement, however, is contradicted as regards the text now under notice. It opens with a statement that Atri had obtained from Brahmá a voluminous treatise of four hundred thousand verses, some of which Átreya compiled in an abridgement of two hundred thousand verses, and shorter digests were subsequently compiled by other sages. These digests are named Átreyí, Gárgí, Márkaṇḍi, Vaishṇaví, Aśvíní, Bhárgaví, Sauryá, Mátaṅgí, Parásarí, Áṅgirá, Vásakí, Kautsí, Jábálí, Kásyapí, Vaisvámitrí, Tvaṅgí, Bhárdvájí, Gautamí, Kháranádí, Agnívaisyí, Kharapádí, and Paushkalí. It is further stated that Atri was the chief physician and founder of the science of medicine of the first or *Kṛita* age. Charaka was the leading author of the second or *Tretá yuga*. Susrata, a disciple of Dhanvaṇtari, was the teacher of the third or *Dvápára* age, and Vágbhaṭa of the fourth or *Kali* age. All these introductory remarks cannot come from Atri, and the work in its entirety cannot belong to that sage. It is obvious, however, from the manner in which the work is written,—short quotations or texts which the work comments upon and amplifies,—that the quotations are from some now lost work of Atri. This is the plan followed also by Charaka, and the same quotations are given in the name of Atri or Átreya. The conclusion to be deduced from this is, that the work is by some unknown author commenting, amplifying and elaborating the rules of Atri. Commentators are of opinion that each of the four founders of schools of medicine had a chief pupil who wrote down the doctrines of his teacher, and that subsequently the notes of the pupil were revised and recast by a compiler. Thus in the case of Dhanvantari, the sage was the expounder or *Vaktá*, Suśrata was the pupil-hearer or *śrotá*, and Nágárjuna the compiler or *Prati-sañskartá*; and in the case of Charaka Átreya was the expounder, Agniveśa the pupil-hearer, and Charaka the compiler. I have failed to find out references to the expounders, pupil-hearers and compilers of the lectures of Atri and Vágbhaṭa; but there is no doubt that the work under notice is the production of a compiler. In one place I find the names of Agniveśa, Bheḍa, Jatukarṇa, Parás'ara, Hárita and

Kshárapáṇi mentioned as the principal compilers: they are frequently cited as authorities. I have seen a second codex of this work in the library of Rájá Rájendranárayaṇa, Bahádur, Calcutta, but it is very corrupt, and does not correspond with the text now under notice. The Sanskrit College of Calcutta has two codices, under the name of Atrí Saṅhitá, but they are frágments. It is scarcely necessary to add here that there is a law text under the name of *Atri* or *Átreya Saṅhitá,* which has nothing to do with this work.

The work under notice comprises 78 chapters. The contents are given in the Sanskrit abstract.

Beginning. ॐस्वस्ति श्रीगणेशाय नमः। श्रीधन्वन्तरये नमः। ॐनमः प्रजापतिभ्यः विलिभिधन्वन्तरिसुश्रुतप्रभृतिभ्यः। अथातः आयुर्वेदोत्पत्तिनामाध्यायं व्याख्यास्यामः। अथोवाच भगवान् धन्वन्तरिः।

नत्वा शिवं परमतत्त्वकलाधिरूढं ज्ञानामृतैकचटुलं परमात्मरूपं।
रागादिरोगशमनं दमनं स्मरस्य शान्तं त्रयाधिपधरं त्रिगुणात्मरूढं ॥ १ ॥

नाभिपद्मसमुत्पन्नो ब्रह्मा विष्णोरजायत।
सृष्टिसृष्टे न जानाति परं मोहेन मोहितः ॥ २ ॥
पुनः प्रविश्य नालीये पद्मे नारायणस्य च।
ब्रह्मणो रूपमाधाय विलोकयत कारणं ॥ ३ ॥
ततः स्थितिज्ञो निःसृत्य ब्रह्मा च बहिरात्मना।
सर्गव्यापारमाकुर्व्वन ससर्ज त्रिजगन्मुनिः ॥ ४ ॥
त्रिजगत्क्रमपथा भेदमायुर्वेदं सभाद्यकं ॥ ५ ॥
त्रयस्त्रिंशत्कोटिदेवै + + च ब्रह्मणः सभा।
अष्टाशीतिसहस्रैस्तु ऋषिभिः परिशोभिता ॥ ६ ॥
सार्द्धकोटिभिरष्टाभिर्दिव्यदेवाङ्गनादिभिः।
सश्रीकानाहरांश्चैग (?) प्रौढाम्भोजविराजिता ॥ ७ ॥
तत्र पद्मासनासीन आयुर्वेदमुवाच तान्।
+ + + ऋषीणामहतोपमान् ॥ ८ ॥
समन्त्रा वेदसंयुक्ता चतुर्मुखसमीरिता।
अष्टाङ्गिका चतुर्लक्षा संहिता ब्रह्मणोदिता ॥ ९ ॥
आत्रेया चाचिणा प्रोक्ता द्विलक्षा सारसंहिता।
त्रैलोक्यस्योपकाराय जितेन्द्रियमहात्मना ॥ १० ॥
आत्रेयस्तपसा सम्यक्परमज्ञानलोचनः।

संवृतो वल्कलैः शिष्यैर्हिमवन्तमुपेयिवान् ॥ ११ ॥
हिमवद्दुग्गरे कूले सिद्धर्षिगणसेविते।
प्रशान्तसृमरा (सृगसं) कीर्णे नानापादपशोभिते ॥ १२ ॥
युग्मं, तत्रस्थं तपते जाबं (?) तरुणादित्यतेजसं।
शुद्धस्फटिकवत् शुभ्रं भूतिभूषितविग्रहं ॥ १३ ॥
जटाजूटाटवीमौलिं भासितं शुद्धकुण्डलं।
आत्रेयं ऋषिभिः सर्व्वैः सेवितं तपसान्वितं ॥ १४ ॥
पप्रच्छुः ऋषयः सर्व्वे भृगुकुत्साङ्गिरा वसुः।
जाबालिकाश्यपश्रीकगौतमौतङ्कविष्णवः ॥ १५ ॥
अश्विनौ गर्गमातङ्गविश्वामित्रपराशराः।
मार्कण्डेयाग्निवैश्यार्कभारद्वाजादयो मुनिः ॥ १६ ॥
भगवन् जगदाधार लोकानां हितकाम्यया।
आयुर्वेदं समासेन ब्रूहि नः पुरतः प्रभो ॥ १७ ॥
आयुर्वेदाम्बुधेस्तेषामात्रेयो मुनिसत्तमः।
सारं सारं समुद्धृत्य ऋषीणां तमचीकथत् ॥ १८ ॥
आत्रेयवचनाम्भोधेरायुर्वेदामृतं वरं।
ववर्षुर्भुवने शुभ्रं संगृह्य मुनिवारिदाः ॥ १९ ॥
एतद्वाक्यामृतं पीत्वा चक्रिरे ऋषिभिस्तथा।
स्वस्वनामाङ्किताः सर्व्वे संहिताः पुण्यसंहिताः ॥ २० ॥
आत्रेयी च तथा गार्गी मार्कण्डी वैष्णवी तथा।
आश्विनी भार्गवी सैर्य्या मातङ्गी च पराशरी ॥ २१ ॥
आङ्गिरा वासकी कौत्सी जाबाली काश्यपी तथा।
वैश्वामित्री तथा लाङ्गी भारद्वाजी च गौतमी ॥ २२ ॥
खारनाद्यग्निवैश्यी च चारपादी च पौष्कली।
इत्यादिसंहिता बुद्ध्या मुनिभिः परिकीर्त्तिताः ॥ २३ ॥
आयुर्वेदो बुधैः सारं सारं ग्राह्यं महर्षिभिः।
वरुणक्रौञ्च नामाङ्कः पुरुषैः सुश्रुतादिभिः ॥ २४ ॥
एता वेदसमा ज्ञेया नावज्ञा क्रियते मया।
अन्यानि वल्कशास्त्राणि चिकित्सानि च चक्रिरे ॥ २५ ॥
संहिता श्रूयते येन वाच्यते पठ्यते सदा।
स नीरुक् च महासाधुः पुण्यात्मा स शिवं व्रजेत् ॥ २६ ॥

अत्रिः कृतयुगे वैद्यः त्रेतायां चरकोत्तमः ।
द्वापरे सुश्रुतः प्रोक्तः कलौ वाग्भट एव हि ॥ २७ ॥
एते त्रयो महर्षयश्च संपश्यन्ते युगे युगे ।
धन्वन्तरेश्च शिष्योऽयं सुश्रुतो मुनिसत्तमः ॥ २८ ॥
मुख्या च संहिताचेयी अपराश्च ततः परं । इत्यादि,
अथातो मुख्यशिष्योऽसौ हारीतो मुनिसत्तमः ।
पादौ निपत्य शिरसा योजितः करसंपुटे ॥ ३२ ॥
पप्रच्छ गुरुमाचेदं विनयावनतोऽपि च ।
गुरुः प्रसन्नः प्रोवाच दृष्टावत् क्षमतोत्तमं ॥ ३३ ॥

End. खण्डितलात् परिसमाप्तिसूचकवाक्यानि न सन्ति ।

विषयः । १मे अध्याये वैद्यगुणदोषकीर्त्तनं । २ये अध्याये चिकित्सासंग्रहः । ३ये अध्याये रोगोपचारक्रमकथनं । ४र्थे अध्याये देशकालबलाबलनिर्णयः । ५मे अध्याये ऋतुचर्य्याकथनं । ६ष्ठे अध्याये दिनचर्य्यानिरूपणं । ७मे अध्याये श्रोणितोत्पत्तिनियमः । ८मे अध्याये दोषधातुमलानां लक्षणं तेषां क्षयवृद्धिनिरूपणञ्च । ९मे अध्याये दोषप्रतिषेधकथनं । १०मे अध्याये आतुरोपक्रमकथनं । ११शे अध्याये द्रव्यरसगुणार्य्यविपाककथनं । १२शे अध्याये द्रव्यविशेषविज्ञानं । १३शे अध्याये रसविशेषविज्ञानं । १४शे अध्याये रोगानुत्पत्तिहेतुकथनं । १५शे अध्याये तोयपानविधिः । १६शे अध्याये क्षीरदधिघृतादिगुणकथनं । १७शे अध्याये मूत्रगुणनिर्णयः । १८शे अध्याये इक्षुगुणनिर्णयः । १९शे अध्याये तुषोदककाञ्जिकादिद्रव्यगुणकथनं । २०शे अध्याये रक्तशालिधान्यादीनां गुणकथनं । २१शे अध्याये शाकगुणनिर्णयः । २२शे अध्याये फलगुणनिर्णयः । २३शे अध्याये विविधमधुगुणकीर्त्तनं । २४शे अध्याये मद्यगुणकीर्त्तनं । २५शे अध्याये चतुष्पदमांसगुणकीर्त्तनं । २६शे अध्याये पक्षिमांसगुणकीर्त्तनं । २७शे अध्याये जलचरमांसगुणकथनं । २८शे अध्याये भोज्यद्रव्यगुणकथनं । २९शे अध्याये द्रव्यसंग्रहः । ३०शे अध्याये रोगिणां पापदोषप्रतीकारकथनं । ३१शे अध्याये शुभाशुभस्वप्ननिर्देशः । ३२शे अध्याये अरिष्टव्याधिकथनं । ३३शे अध्याये वैद्यानयनार्थं तद्गृहगमनसमये शुभाशुभनिमित्तकथनं । ३४शे अध्याये रोगोत्पत्तौ शुभाशुभलक्षणं । ३५शे अध्याये रोगोत्पत्तौ शुभाशुभलग्नादिकथनं । ३६शे अध्याये नाड़ीपरीक्षा । ३७शे अध्याये मूत्रपरीक्षा । ३८शे अध्याये रोगसङ्करकारणनिर्देशः । ३९शे अध्याये रोगनिर्णयस्यावश्यकताकथनं । ४०शे अध्याये वातपित्तश्लेष्मसन्निपातानां संक्षेपतश्चिकित्साकथनं । ४१शे अध्याये ज्वरनिदानं, ज्वरचिकित्सा-पित्तज्वरचिकित्सा-श्लेष्मज्वरचिकित्सा-सन्निपातज्वरचिकित्सा—भूतज्वरचिकित्सा, माहेन्द्रज्वरादीनां लक्षणं तेषां चिकित्सा च । ४२शे अध्याये कर्णनेत्रादिस्थानभेदे सान्निपातिकलक्षणं तस्य चिकित्सा च । ४३शे अध्याये अतिसारनिदानं तस्य चिकित्सा, ग्रहणीनिदानं तस्य चित्सा, गुल्मनिदानं यक्ष्मनिदानं तयोः चिकित्सा, वातगु-

लक्षणं तस्य चिकित्सा, पित्तगुल्मलक्षणं तस्य चिकित्सा, अजीर्णनिदानं तस्य चिकित्सा, छर्दिनिदानं तस्य चिकित्सा, मन्दाग्निचिकित्सा, तीव्राग्निचिकित्सा, अरोचकचिकित्सा च। ४४मे अध्याये शूलचिकित्सा। ४५मे अध्याये पाण्डुरोगनिदानं तस्य चिकित्सा। ४६मे अध्याये क्षयरोगराजयक्ष्मनिदानं तयोः चिकित्सा। ४७मे अध्याये रक्तपित्तनिदानं तस्य चिकित्सा, नासाप्रदृत्तरुधिरचिकित्सा, मुखप्रदृत्तरक्तचिकित्सा, रक्तातिसारचिकित्सा च। ४८मे अध्याये अर्शनिदानं तस्य चिकित्सा। ४९मे अध्याये वातश्लेष्मादिकासलक्षणं तेषां चिकित्सा। ५०मे अध्याये हिक्कानिदानं श्वासनिदानं तयोश्चिकित्सा। ५१मे अध्याये स्वरभेदचिकित्सा छर्दिचिकित्सा च। ५२मे अध्याये तृष्णानिदानं तत्चिकित्सा। ५३मे अध्याये मूर्च्छाभ्रमनिद्रासन्न्यासनिदानं तेषां चिकित्सा। ५४मे अध्याये मदात्ययचिकित्सा। ५५मे अध्याये वातव्याधिनिदानं तस्य चिकित्सा। ५६मे अध्याये आमवातनिदानं तस्य चिकित्सा, रक्तप्रसेकनिदानं तत्चिकित्सा वातरक्तनिदानं तस्य चिकित्सा। ५७मे अध्याये शीतपित्तोदर्दकोष्ठनिदानं तेषां चिकित्सा। ५८मे अध्याये अम्लपित्तनिदानं तस्य चिकित्सा। ५९मे अध्याये व्रणशोथनिदानं तयोश्चिकित्सा। ६०मे अध्याये उदरनिदानं तस्य चिकित्सा। ६१ मे अध्याये मूत्रकृच्छ्रनिदानं तस्य चिकित्सा। ६२मे अध्याये मूत्राघातनिदानं तस्य चिकित्सा। ६३मे अध्याये अश्मरीनिदानं तस्य चिकित्सा। ६४मे अध्याये अन्तर्दृद्धिनिदानं तस्य चिकित्सा। ६५मे अध्याये विसर्पनिदानं तस्य चिकित्सा क्षुद्ररोगनिदानं तेषां चिकित्सा च। ६६मे अध्याये विद्रधिनिदानं तस्य चिकित्सा। ६७मे अध्याये दुष्टव्रणशस्त्रोपनिदानं तेषां चिकित्सा। ६८मे अध्याये ग्रन्थ्यर्बुदगलगदानां निदानं तेषां चिकित्सा, गण्डमालाचिकित्सा, लूतागण्डमालाचिकित्सा च। ६९मे अध्याये कुष्ठनिदानं तेषां चिकित्सा। ७०मे अध्याये गूढगर्भनिदानं तस्य चिकित्सा, सूतिकानिदानं स्त्र्यरोगनिदानं अङ्गग्रहनिदानं, योनिदोषनिदानं तस्य चिकित्सा, स्त्र्यरोगचिकित्सा, योनिशूलचिकित्सा, अङ्गग्रहचिकित्सा च। ७१मे अध्याये क्षीणाष्टविधरोगनिदानं बालरोगनिदानं तेषां चिकित्सा, बालानां प्रज्ञाकरणं, बालानां अपस्मारचिकित्सा च। ७२मे अध्याये भिन्नादीनां चिकित्सा, शल्योद्धारचिकित्सा, विषचिकित्सा, भग्नचिकित्सा, अग्निदग्धचिकित्सा च। ७३मे अध्याये मुखरोगनिदानं तस्य चिकित्सा। ७४मे अध्याये शिरोरोगनिदानं तस्य चिकित्सा, नासारोगनिदानं तस्य चिकित्सा, कर्णरोगनिदानं तस्य चिकित्सा, नेत्ररोगाणां निदानं तेषां चिकित्सा च। ७५मे अध्याये औषधकरणविधिः तैलपाकविधिः। ७६मे अध्याये शारीरस्थानकथनं। ७७मे अध्याये देहसम्भवकथनं अध्यात्मकथनं च।

No. 2634. काव्यप्रकाशटीका। Substance, Káśmíri paper, 13 × 7 inches. Folia, 148. Lines, 13 on a page. Extent, 3,606 ślokas. Character, Nágara. Date, ? Place of deposit, Ludhiyáná, Sardár Atar Siñh Bahádur. Appearance, old. Prose. Incorrect.

Kávyaprakáśa-ṭíká. A commentary on the *Kávya-prákáśa*, a treatise on rhetoric. By Narahari. This is distinct from Nos. 1157, 1526, 1527, 1651, and 1681 already noticed.

Beginning. ॐस्वस्ति श्रीगणेशाय नमः श्रीरामचन्द्राय नमः ।

दृष्टिसंज्ञमभिनौमि सिद्धिदं विघ्नराजमतिसुन्दराधरं ।
यस्य स्मरणलेशतोऽखिलो विघ्नराशिरपयाति दूरतः ॥ १ ॥
हंसगा सितदुकूलभूषणा चौक्षणा कुचनता चतुर्भुजा ।
देववन्द्यचरणा शुचिस्मिता भारती वसतु वाचि मे सदा ॥ २ ॥
जयन्ति गिरिजापतेश्चरणरेणवो येऽन्वहं
वहन्त्यखिलमङ्गलव्रततिसन्ततेर्बीजतां ।
धृता हरिसुरेश्वरप्रभृतिभिः स्वमौलिभिरथ ।
लेशतां कृतकृतत्वतां विमलयन्ति ये मानसं ॥ ३ ॥
अपि पञ्चबाणमिवं गौरीमुखसाम्यलेशलोभेन ।
मौलौ सदा मृगाङ्कं कलयत्कल्याणकेलयेऽस्तु शिवः ॥ ४ ॥
विधातुकामः सुकृतं गरीयः क्षमातलं स्वर्ग इवावतीर्णः ।
आलम्बनं सर्व्वविशेषणानां जयत्यखण्डस्थितिरब्धिजेशः ॥ ५ ॥
फलमिव सुकृतानां लोकधात्र्याः समग्रं विगलितमिव भूमौ नाकलोकस्य खण्डं ।
नगमतिगरीयः सर्व्वसंसारसारस्थिभुवनगिरिनाम्ना तत्र विख्यातमास्ते ॥ ६ ॥
तत्राभवत्सकलशास्त्रविचारपात्रं श्रीवात्सगोत्रसुरकाननपारिजातः ।
अन्यद्विधातुरबलं वनमाप्तवाचां रामेश्वरः कलिकलङ्ककथान्तरायः ॥ ७ ॥
आसीत् प्रमाणपदवाक्यविचारशीलः साहित्यसूक्तिविसिनीकलराजहंसः ।
अस्माद्भटग्रहणनाटितलोभवृत्तिस्तस्मात्मजोनिपुणधीर्नरसिंहभट्टः ॥ ८ ।
तस्माद्चिन्त्यमहिमा महनीयकीर्त्तिः श्रीमल्लिनाथ इति मान्यगुणो बभूव यः ।
सोमयागविधिना कलिखण्डनाभिरद्वैतसिद्धमिव सत्ययुगं चकार ॥ ९ ॥
लक्ष्मीरिव सुरारावे पुरारातेरिवाम्बिका ।
तस्य धर्म्मवरा त्वासीन्नाङ्गमेति कुलोज्ज्वला ॥ १० ॥
ज्येष्ठस्तदीयतनयो विनयोदितश्रीनारायणोऽभवद्शेषनरेन्द्रमान्यः ।
वाग्देवताकमलयोरपि यस्य गोत्रे सीमाविभागकलहो न कदापि शान्तः ॥ ११ ॥
विरिञ्चेः पर्य्यायो भुवि सदवतारः फणिपतेस्त्विदेषो दोषाणां सकलगुणमाणिक्य-जलधिः ।
अवाचां प्राचां वा सकलविदुषां मौलिकुसुमं कनीयांस्तत्सूनूर्जयति नयशाली नरहरिः ॥ १२ ॥

सवसुग्रहहस्तेन ब्रह्मणा समलंकृते।
काले नरहरेर्जन्म कस्य नासीत् मनोहरं॥ १३॥
तत्काले सह मङ्गलेन गुरुणा मित्रेण लाभे वणिग्राशिस्थ प्रमदश्रयेण समभूदुच्चैः सकाव्यो बुधः।
सत्केतुशुभहेतवे द्विजपतिर्जातः कुलीरागते मैचं भ्रान्तिमयं दधार कलशं जन्मोत्सवाडम्बरे॥ १४॥
विचार्य्य सर्व्वं सुखमेव दुःखं सुधामये ब्रह्मणि लोलुपस्य।
सन्न्यासतस्यस्य बभूव सार्थो सरस्वतीतीर्थ इति प्रसिद्धिः॥ १५॥
तर्के कर्कशकेलिना बलवता दानेन विद्यारसैर्भीमांसागुणमांसलेन परितः सांख्येऽप्यसंख्योक्तिना।
साहित्यामृतसागरेण पणिनो व्याख्यासु विख्यावता काश्यां तेन सदाशयेन किमपि ब्रह्मामृतं पीयते॥ १६॥
काश्यां सरस्वतीतीर्थयतिना तेन रच्यते।
टीका काव्यप्रकाशस्य बालचित्तानुरञ्जनी॥ १७॥
ननु नियतीत्यादि।

End. खण्डितत्वात् परिसमाप्तिसूचकवाक्यानि न सन्ति।

विषयः। काव्यप्रकाशस्य व्याख्या।

No. 2635. भृगुसंहिता। Substance, Káśmírí paper, 13 × 5½ inches. Folia, 434. Lines, 9 on a page. Extent, 9,032 ślokas. Character, Nágara. Date, ? Place of deposit, Ludhiáná, Sardára Atar Siñh, Bahádur. Appearance, old. Verse. Incorrect.

Bhṛigu-Saṅhitá. An elaborate treatise on astrology, alleged to be by the sage Bhṛigu, but obviously a mediæval compilation.

Beginning. श्रीगणेशाय नमः। दृषलग्नोदये जन्म लग्नेशो भाद्दसंस्थितः।
धने रविबुधौ भौमस्तथैव राहुसंज्ञकः॥
सुखेषु वाक्पतिः सम्यक् षष्ठे शनिनिशाकरौ।
एवं ग्रहानुमानेन योगोऽयं वक्ष्य उच्यते।

End. खण्डितत्वात् परिसमाप्तिसूचकवाक्यानि न सन्ति।

अस्मिन् पुस्तके विलेखितयोगपर्य्यन्तं लिखनमस्ति। विलेखितयोगो यथा।
दृषलग्नोदये जन्म तथैव सिंहिकासुतः।

सहजे भवने मन्दो निधने सूर्य्यसोमजौ ।
भृगुचन्द्रौ तथा भाग्यैकादशे भवने कुजः ॥
द्वादशे सुरपूज्यस्य योगोऽयञ्च विलेखितः ।

Colophon. अध्यायसमाप्तिसूचकवाक्यं। इति श्रीभृगुसंहितायां भृगुशुक्रसंवादे माहिषयोगफलकथनो नाम ।

विषयः । मेषादिलग्नविशेषे ग्रहविशेषाणां स्थित्या लग्नविशेषे जातस्य योगविशेष उक्तस्य योगस्य फलकीर्त्तनं च ।

No. 2636. वीतरागस्तोत्रम् । Substance, country-made paper, 12 × 5½ inches. Folia, 12. Lines, 7 on a page. Extent, 220 ślokas. Character, Nágara. Date, Sm. 1908. Place of deposit, Ájimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect.

Vítarága-stotra. A score of hymns in praise of the last Jina. Anonymous.

Beginning. यः परात्मा परं ज्योतिः परमः परमेष्ठिनाम् ।
आदित्यवर्णं तमसः परस्तादामनन्ति यं ॥
सर्व्वे ये नोदमूल्यन्त समूलाः क्लेशपादपाः ।
मूर्द्धा यस्मै नमस्यन्ति सुरासुरनरेश्वराः ।
प्रावर्त्तन्त यतो विद्याः पुरुषार्थप्रसाधिकाः ।
यस्य ज्ञानं भवद्भाविभूतभावावभासकृत् ॥ इत्यादि ।

End. तव प्रेक्ष्योऽस्मि दासोऽस्मि सेवकोऽस्मि च किङ्करः ।
ओमिति प्रतिपन्न (?) स्व नाम नातः परं ब्रुवे ॥

Colophon. इति श्रीवीतरागस्तोत्रे विंशतिस्तवः सम्पूर्णः । संवत् १९०८ ।

विषयः । अर्हतो गणमाहात्म्यप्रथाजिन स्तवावलीकथनं ।

No. 2637. अङ्गुलिविचारसप्ततिकासूत्रम् : Substance, country-made paper, 12 × 5½ inches. Folia, 4. Lines, 13 on a page. Extent, 130 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Mágadhí.

Aṇguli-vichára-saptatiká-sútra. A short treatise on the Jaina system of linear measurements, in Mágadhí. Anonymous.

Beginning. उसभसमगमणमुसभं जिणमणिमिससामि संथ अमुणोहं ।
नमि उणङ्गुलुलक्खण संखेवमिणं पव्वक्खामि ॥
उस्से हङ्गुलमानं गुलंचत इचपमाणनामं च ।
इयतिथि अङ्गुलाइं वा वारिज्जंति समयंमि । इत्यादि ।

End. सिरिमं मुणिचन्दमुणीसरेहिं सुणानमणुसरं तेहिं सुत्तग इज्झत्ति सारं रयियमिणं सपरगुणे हेउं ।

Colophon. इत्यङ्गुलिविचारसप्ततिकास्तवं समाप्तं ।

विषयः । अङ्गुलितस्त्रिनन्वक्रोशादिपरिमाणस्वरूपादिकथनं ।

No. 2638. विशेषशतकम् । Substance, country-made paper; 12 × 6 inches. Folia, 61. Lines, 8 on a page. Extent, 1,750 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Partly Sañskṛit, partly Mágadhí.

Viśesha-śataka. A treatise on Jaina Áchára or rules of domestic purity, &c. By Samayasundara Upádhyáya. The work opens with an account of Kṛishṇa's birth and family according to Jain tradition, or Jain transmogrification of Hindu tradition.

Beginning. सुधर्मस्वामिनं नत्वा तदीयवचनानुगं ।
विशेषशतकं वक्ष्ये शिष्यप्रश्नोत्तरप्रदम् ॥
ननु श्रीकृष्णवासुदेवस्तृतीयनरके समुत्पन्नश्च षोडशलेऽपि तस्यायुः सप्तसागरोपममेव इत्यादि ।

End. सुगन्धिद्रव्यादिना + + धावनादिकुर्य्यात् । गच्छन्निर्गतस्तु य+ + या प्रासुकोदकादिना लोकोपघानसंसक्तिभयान्मलापनयनं कुर्य्यादिति ।

Colophon. इति श्रीसमयसुन्दरोपाध्यायविरचितं विशेषशतकं सम्पूर्णं ॥

विषयः । श्रीकृष्णस्य जन्मचतुष्टयकथाकीर्त्तनं । मूढामूढत्वाधिकर्मविवेचनं । साधूनामनशने रात्रौ दीपकरणविधिकथनं । तालदन्तजन्यस्य वायोः सचित्तत्वादिविवेचनं । चेटकनृपतेः सप्तकन्यानां कथाकीर्त्तनं । द्वारिकाया उत्पत्तिकथनं । समुद्रविजयस्य राज्ञः षोड़शपुत्राणां विवरणकथनं । ग्लानार्त्तस्य साधोरग्नितापनेन तद्रोगकरणे गृहस्थस्य फलकथनं । स्थविरकल्पिकानां वस्त्रप्रक्षालनविचारः । विकलेन्द्रियाणां रुधिरादिपातेऽपि दोषाभावकथनं । सम्यग्दृशां व्याकरणादिमिथ्याश्रुताध्ययनेऽपि न दोष इति निरूपणं । पार्श्वस्थादिकारितचैत्येऽपि वन्दनाधिकारकथनं । दिगम्बरसम्प्रदायकृतचैत्यस्य शुक्लाम्बराणामवन्द्यत्वनिरूपणं । विशेष-

कारणादेव क्वचित् साधूनां दिवानिद्राधिकारकथनं। शिक्षकादिनिमित्तं कदाचित्साधूनां द्रव्य-रक्षणविधिकथनं। पूजासमये सचित्ताचित्तजलस्नानश्वेतवस्त्रादिपरिधानविधिकथनं। विशेष पुष्पादिना पूजाधिकारकथनं। गजदन्तानां पवित्रनादिकथनं। आदित्यादिपञ्चसंवत्सरविवेकः। साधोः सचित्ताचित्तलवणपाणीयादिपरिष्ठापनादिविधिकथनं। तण्डुलादिविवेचनं। अथ दर्श-नज्ञानयोर्भेदकथनं। स्त्रीणामपि मुक्तिमार्गाधिकारकथनं। जातिभव्यजीवानां लक्षणादिक-थनं। मिथ्यात्वस्य गुणस्थानत्वविवेचनं। साधूनां ग्राह्याग्राह्यवस्तुविचारकथनादिकञ्च।

No. 2639. एकाक्षरनाममालिका। Substance, country-made paper, 12 × 6 inches. Folia, 14. Lines, 15 on a page. Extent, 511 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect.

Ekákshara-náma-málikā. A dictionary of words of one syllable or of the various meanings of the letters of the Sanskrit alphabet. By Vis'vas'ambhu.

Beginning. आगमेभ्योऽभिधानेभ्यो धातुभ्यः शब्दशासनात्।
एतदेकाक्षरं नामाभिधानं क्रियते मया॥
कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः।
कश्चात्मनि समाख्यातः कः प्रकाश उदाहृतः। इत्यादि।

End. च हर्षे चैव हिंसायां क्षीरे क्षारे क्षरौ च क्षः।
क्षौरत्यागे चरणे व्याधः क्षः क्षेत्रे च क्षये गृहे॥

Colophon. इति श्रीविश्वश्रम्भुप्रणीता एकाक्षरमालिका समाप्ता।

विषयः। ककारादिक्षकारान्तवर्णनां विविधार्थकथनं।

No. 2640. क्षेत्रसमासवृत्तिः। Substance, country-made paper, 12 × 5½ inches. Folia, 37. Lines, 15 on a page. Extent, 1,386 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Sañskṛita with Mágadhí quotations.

Kshetra-samása-vṛitti. An epitome of Malayagíri's commentary on the Kshetra-samása,—a treatise on mensuration. Anonymous. This is a Jain system of mensuration.

Beginning. अर्हमिति ब्रह्मपदं परमं परमेष्ठिवाचकं सिद्धं।
ध्यायामि धवलममलं मूलं सर्व्वार्थसिद्धीनाम्।
— — — — — — — — —।

51011

जयति श्रीमलयगिरिर्यत्कृतविवरणबलेन सूत्रार्थं ।
गुरुगदितमिव व्यक्तं बुध्यन्ते मन्दमतयोऽपि ॥
— — — — — — — — — ।

तत्रादौ मङ्गलाभिधेयाद्यर्थमाद्यां सूत्रगाथामाह । वीरं जेयसेहर इत्यादि ।

End. अक्खरमत्ताहीणं जं च पढिअं अत्थमाणेहिं ।
तं खमहमुज्ज सव्वं जिणवयणविणिग्गया वाणी ॥

Colophon. इति चेचसमासवृत्तिः समाप्ता ।

विषयः । मलयगिरिकृतवृहत्चेचसमासटीकायाः सारसङ्कलनेन विनिर्म्मितेयं चेचसमासविवृतिः ।

No. 2641. गुणस्थानप्रकरणम्, वृत्तिसहितम् । Substance, country-made paper, 13 × 5 inches. Folia, 22. Lines, 18—19 on a page. Extent, 992 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Text in verse. Commentary in prose. Generally correct. Sañskṛit.

Guṇasthána-prakaraṇa. With a commentary (*vṛitti*), a treatise on Jain philosophy, beginning with the definition of truth and falsehood and ending with Yoga perfection. By Ratnas'ekhara Súrí.

Beginning. टीकायाः,—

अर्हत्पदं हृदि ध्यात्वा गुणस्थानविचारिणाम्।
अनुष्टुभामियं वृत्तिर्लिख्यते ह्यवचूर्णिवत् ॥

तत्रादौ मङ्गलार्थमभीष्टदैवतं नमस्कारस्य सम्बन्धदेशाविर्भावकमाद्यपद्यमाह गुणति । यत्र यत्र पूर्व्वापान्नगुणविशेषाविर्भावो भवति तत्तद्गुणस्थानमित्युच्यते ।

मूलस्य यथा,—

गुणस्थानक्रमारोहृहतमोहं जिनेश्वरं ।
नमस्कृत्य गुणस्थानस्वरूपं किञ्चिदुच्यते ॥
चतुर्दशगुणश्रेणिस्थानकानि तदादिमं ।
मिथ्यात्वाख्यं द्वितीयन्तु स्थानं सास्वादनाभिधं ॥ इत्यादि ।

End. मूलस्य,—

इत्युद्गतो गुणस्थानरत्नराशिः श्रुतार्णवात् ।
पूर्व्वर्षिसूक्तिना चैव रत्नशेखरसूरिभिः ॥

Colophon. इति गुणस्थानप्रकरणं समाप्तम् ।

टीकायाः,—

श्लोकैः प्रायः पूर्व्वर्षिरचितैः श्लोकैरेव इत्यर्थः । कैरुद्धृतो रत्नशेखरसूरिभिर्बृहद्गच्छीय-श्रीवज्रसेनसूरिशिष्यैः श्रीहेमतिलकसूरिपदप्रतिष्ठितैः श्रीरत्नशेखरसूरिभिः स्वपरोपकाराय प्रकरणरूपतया प्रकटित इत्यर्थः । श्रीरस्तु ।

विषयः । तत्र प्रथमगुणस्थाने मिथ्यात्वस्वरूपविवेचनं । मिथ्यात्वञ्च अभिग्रहिकभेदेन द्विविधं । अथ सुप्तचैतन्यानां संज्ञिपञ्चेन्द्रियादिजीवानाम् अदेवागुर्व्वधर्म्मेषु क्रमेण या देवगुरुधर्म्मबुद्धिः सम्पद्यते तदभिग्रहिकं मिथ्यात्वं । अनभिग्रहिकन्तु मोहस्वरूपं । तत्र अधर्म्मे धर्म्मसंज्ञा धर्म्मे अधर्म्मसंज्ञा अजीवे जीवसंज्ञा जीवे अजीवसंज्ञा इत्यादिरूपं । यथा मनुष्यो मदिरोन्मादात् हितमहितं वा किमपि न जानाति नष्टचैतन्यत्वात् । तथा मिथ्यात्वमोहितो जीवो धर्म्माधर्म्मौ सम्यग् न जानाति अज्ञानत्वात् । अत एव सर्व्वथा मिथ्यात्वपरिहाराय प्रयत्नः कार्य्यः । एवं द्वितीये गुणस्थाने सासादनस्वरूपादिनिरूपणं । तत्र जीवोऽयं ज्ञानाज्ञानानुवन्धिनां मध्ये एकस्मिन्नपि क्रोधादौ उदीर्णे सति प्रथमौपशमिकसम्यक्त्वात् परिच्युतस्सन्मिथ्यात्वभूमिमण्डलं नासादयति तावत् समयादावलीषट्कान्तं कालं सासादनगुणस्थानवर्त्ती भवतीतिनिरूपणं । अथ तृतीये मिश्र-गुणस्थानस्वरूपादिनिरूपणं । तत्र जीवो हि सम्यक्त्वमिथ्यात्वयोरेकतरे भावे वर्त्तमानो मिश्रगुण-स्थानस्थो भवतीतिनिरूपणं । अथ चतुर्थे अविरतसम्यक्त्वदृष्टिगुणस्थानकथनं । तत्र जीवस्य सर्व्वज्ञप्रणीतेषु तत्त्वेषु पूर्व्वाभ्यासविशेषजनितात्यन्तनैर्म्मल्यगुणात्मस्वभावादुपदेशाद्वा या रुचि-रूपा भावना समुत्पद्यते तत्सम्यक्श्रद्धानलक्षणमुच्यते। तत्र कृपाप्रशमसंवेगनिर्व्वेदास्तिक्यलक्षणा गुणा यस्य वर्त्तन्ते स खलु भव्यो जीवो भवति । अत्र संवेगः मोक्षाभिलाष इति निरूपणञ्च ।

अथ पञ्चमे,—देशविरतिगुणस्थानकथनं । अत्र पूर्व्वोक्तप्रकारेण तत्स्वरूपादिकथनं । एवं षष्ठे,—प्रमत्तगुणस्थानकथनं । सप्तमे,—अप्रमत्तगुणस्थानकथनं । अष्टमे, अपूर्व्वकरणबादर-सूक्ष्मसम्परायोपशान्तमोहक्षीणमोहाख्यपञ्चगुणस्थानकथनं । तत्र योगविधिकथनं । ध्यानधा-रणाप्राणायामादिस्वरूपकथनञ्च । अथ सयोगिगुणस्थानकथनं । अयोगिगुणस्थानकथनं । सिद्धानां स्थित्यादिनिरूपणं । सिद्धानां ज्ञानदर्शनादिविषयकथनञ्च ।

No. 2642. आचारदिनकरः, (बृहत्) । Substance, country-made paper, 16 × 5 inches. Folia, 532. Lines, 8 on a page. Extent, 15,140 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimgañj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose and verse. Generally correct. Sañskṛita with Mágadhí quotations.

Áchára-dinakara. An elaborate treatise on Jain duty, embracing all the various topics usually included in the Hindu Smṛitis under the head of Áchára. By Vardhamána Súri. There is a Hindu work

under this name by Dinakara Achárya, but it is quite distinct. The topics have been named in detail in the following Sanskrit abstract of the contents of the work.

Beginning. नत्वा ज्ञानमयं लोके य आचारं प्रणीतवान्।
केनापि हेतुना तस्मै नम आद्याय योगिने॥
आत्मान्तर्ज्ञानहेतोर्वा कारुण्यादथ देहिनाम्।
य आचाराध्यायं चक्रे तं वन्देऽर्हन्तमादिमं॥
तत्प्रसादात्तु स्वालोक्यपथि तत्त्वोपयोगिनि।
यो लोकाचारमाचख्यौ तस्मै सर्व्वात्मने नमः॥
अनादितत्त्वज्ञातापि स्वयमोक्षपदेऽपि च।
स्वयं चचाराचारं यो नमस्तस्मै स्वयम्भुवे॥
यस्याः श्रुतेः परा वाणी पूजनात् परमश्रियः।
तत्स्वालोकः परं ध्यानात् तस्या अर्हद्गिरे नमः॥
— — — — — — — —।
सत्यज्ञानसुखालोक्यः पञ्चकैवल्यकारणं।
तच्चाचारवतां नृणामुन्मीलति विशेषतः॥

इह केचिद्घनमोहान्धधियः + + + सौगत-वैशेषिक-नैयायिक-सांख्य-चार्व्वाकादय-स्तत्त्वालोकनामानुसारिण एव यदृष्टतत्परमार्थाः स्वहृदयोपात्तप्रमात्प्रमेयप्रमाणप्रभावा आचारमेव तिरस्कुर्व्वन्ति। न तेषां वचः सद्भिः प्रमाणपथमुपनेयं। यतः भगवान् अर्हन्नपि विदितसमस्तपरमार्थः — — — —सम्यक्चारोपणरूपमाचारमाचीर्णवान्। इत्यादि।

End. आचारसम्यादितसर्व्वकार्य्या
आत्मध्यानप्राप्तविशुद्धिभावाः।
समाधितः प्राप्य शिवं वरिष्ठा
नराः महानन्दभृतो जयन्ति॥

Colophon. इत्याचार्य्यश्रीवर्द्धमानसूरिरचिते आचारदिनकरे तत्त्वालोककीर्त्तनो नाम महाद्योतः सम्पूर्णः। सम्पूर्णोऽयं ग्रन्थः।

विषयः। जैनानामाचारविधिनिरूपणं। आचारस्य प्रामाण्यकथनं। तच्च यत्याचारगार्हस्थ्याचारभेदेन तस्य द्वैविध्यनिरूपणं। तच्च गृहस्थानां षोड़शसंस्काराः, यथा,—गर्भाधान-पुंसवन-जातकर्म्म-चन्द्रार्कदर्शन-क्षीरपान षष्ठीजागरण-शुचिकर्म्म-नामकरण-अन्नप्राशन-कर्णवेध-मुण्डन-उपनयन-पाठारम्भ-विवाह-व्रतारोप-मृत्युविधिरूपाः। तथा यतीनामपि षोड़शविधयः। क्रमेण यथा,—ब्रह्मचर्य्यं, क्षुल्लकं, प्रव्रज्या, उत्थापना, योगोद्वहनं, वाचनानुज्ञा, सोपाध्या

थपदस्थितिः, आचार्य्यपदयुक्तिः, प्रतिमोद्वहनं, व्रतिनीव्रतदानं, प्रवर्त्तिनीपदक्रमः, महत्तरापदाचारः, दिनरात्रिस्थितिः, ऋतुस्थितिः, मरणविधिश्चेति। अथ यतिगृहस्थयोः समानास्तावदष्टौ यथा,—चैत्यबिम्बप्रतिष्ठा, शान्तिकं, पौष्टिकं, बलिकर्म्म, प्रायश्चित्तं, सदावश्यकविधिः, तपोविधिः, पदारोपणञ्चेति। अथ यतिभिः, व्रतारोपं विहाय गृहस्थानामन्ये संस्कारा न सम्पादनीया इति नियमकथनं। अथ गर्भाधानसंस्कारविधिकथनं। तच्च जैनवेदमन्त्रविधानञ्च। गर्भाधानयोग्यमासतिथ्यादिनिरूपणञ्च। अथ पुंसवनविधिकथनं। तच्च नक्षत्रवारादिविशेषकथनं। अथ जातकर्म्मविधिकथनं। तच्च जलाभिमन्त्रणादिविधिकथनञ्च। अथ सूर्य्येन्दुप्रदर्शनविधिकथनं। तच्च सूर्य्यादीनां जैनवेदोक्तमन्त्रकथनं। एवं परत्रापि ज्ञेयम्। क्षीराशनविधिकथनं। षष्ठीसंस्कारविधिकथनं। शुचिकर्म्मसंस्कारविधिकथनं। तच्च अशौचकालादिनिरूपणं। षोड़शपुरुषादर्व्वाक् ज्ञातिभ्योऽशौचं गृह्यते—इति कथनं। नामकरणविधिकथनं। तच्च मण्डलीपूजादिकथनं। कर्णवेधविधिकथनं। चूड़ाकरणविधिकथनं। उपनयनविधिकथनं। तच्च इक्ष्वाकुवंश्यनारदवंश्यप्राच्योदीच्यवंश्यानां जैनब्राह्मणानामुपनयनं जैनोपवीतधारणञ्च कर्त्तव्यमितिनिरूपणं। एवं क्षत्रियवंश्यानां जिनचक्रवर्त्तिबलदेववासुदेवादिसन्तानानामुपनयनादिधारणावश्यकताकथनं। जिनोपवीतलक्षणं। युगभेदेन स्वर्णरौप्यतान्त्रकार्पासभेदेन उपवीतस्य चातुर्व्विध्यकथनं। वैश्यानान्तु सर्व्वदा कार्पाससूत्रमेव विहितमितिकथनं। उपनयनादौ वेदिस्थापनादिविधिकथनं। व्रतादेशविधिकथनं। अत्र ब्राह्मणक्षत्रियवैश्यभेदेन व्रतकथनञ्च। चातुर्व्वर्ण्यसमानव्रतादेशकथनं। व्रतविसर्জ্জनकालकथनं। गोदानविधिकथनं। गोभूमिरत्नादिदानमन्त्रादिकथनं। अष्टव्रात्यनैवेद्यादिभोजिनां ब्राह्मणानां वटुकरणविधिकथनं। तत्र कौपीनादिधारणविधिकथनं। विद्यारम्भविधिकथनं। विवाहविधिकथनं। ब्राह्मादिविवाहानां कलियुगे अभावात् प्राजापत्यविवाहस्यैव कर्त्तव्यत्वप्रतिपादनं। कन्यादानविधिकथनं। तत्र कुलकरस्थापनादिविधिकथनं। अग्निन्यासादिकथनं। लाजाकर्म्मविधिकथनं। विवाहयोग्यकन्यादिनिरूपणं। व्रतारोपणविधिकथनं। तत्र सम्यक्त्वसामायिकारोपणविधिकथनं। देशविरतिसामायिकारोपणविधिकथनं। प्रतिमोद्वहनविधिकथनं। तत्र दर्शनप्रतिमाव्रतप्रतिमादिकथनं। उपधानविधिकथनं। तत्र उपधानयन्त्रादिनिरूपणं। अथ जैनानां दिनचर्य्या (आह्निककृत्य)-कथनं। तद्विधिकथनञ्च। अथ मुखादिप्रक्षालनार्थं जलाभिमन्त्रणविधिकथनं। अस्तिलकादिकरणविधिः। पुष्पेण पूजाविधिः। फलेन पूजाविधिः। अर्हन्मन्त्रादिकथनं। तद्वन्दनविधिकथनं। आरात्रिकविधिः। प्रतिमायाः कलसाभिषेकविधिः। तच्च इन्द्राग्नियमवरुणकुबेरब्रह्मसूर्य्यादिपूजाविधिकथनं। अथ मुमूर्षुकृत्यनिरूपणं। अन्त्यसंस्कारविधिकथनञ्च। तत्र शवसंस्कारादिविधिकथनञ्च। अथ यतीनामाचारनिरूपणं। तत्र ब्रह्मव्रतविधिकथनं। प्रव्रज्याविधिकथनं। तत्राधिकारिनिरूपणं। अथ वाचनानन्दाविधिकथनं। उपाध्यायपद-

स्थापनाविधिकथनं। आचार्य्यपदस्थापनाविधिकथनं। आचार्य्यपदानधिकारिनिरूपणं। यतीनां द्वादशप्रतिमोद्वहनविधिकथनं। अथ व्रतिनीव्रतदानविधिकथनं। प्रवर्त्तिनीपदस्थापनाविधिकथनं। महत्तरापदस्थापनाविधिकथनं। यतीनामहोरात्रचर्य्याकथनं। स्थविरकल्पिनामुपकरणसंख्यादिकथनं। एवं साध्वीनामुपकरणादिकथनं। पात्रनिर्योगकथनं। स्वयंबुद्धसाधूनां द्वादशविधोपाधिनिरूपणं। अथ साधूनामृतुचर्य्याविधिकथनं। विहारनिर्म्माणविधिकथनं। तत्करणयोग्यदेशादिनिरूपणं। तत्र म्लेच्छदेशादिकथनं। तत्र शक-जवन-रूण-रोमककुवात-चीन-मानवप्रभृतीनां म्लेच्छदेशत्वकथनं। आर्य्यदेशनिरूपणं। विहारारम्भयोग्यतिथिनक्षत्रादिनिरूपणं। पर्य्युन्नाराधनविधिकथनं। महापरिष्ठापनविधिकथनं। अथ जिनप्रतिमाप्रतिष्ठाविधिकथनं। तत्र ग्रहयागकङ्कणमोचनादिविधिकथनं। चैत्यप्रतिष्ठाविधिकथनं। ध्वजकलसप्रतिष्ठादिकथनं। जिनबिम्बपरिकरप्रतिष्ठाविधिकथनं। जलपट्टवोरणादिप्रतिष्ठाविधिः। अथ देवीप्रतिमाप्रतिष्ठाविधिः। क्षेत्रपालादिप्रतिष्ठाविधिकथनं। गणपत्यादिप्रतिष्ठाविधिकथनं। समवसरण (रथविशेषः) प्रतिष्ठाविधिकथनं। पित्तमूर्त्तिप्रतिष्ठाविधिकथनं। यतिमूर्त्तिप्रतिष्ठाकथनं। सूर्य्यादिग्रहप्रतिष्ठाविधिकथनं। गृहप्रतिष्ठाविधिकथनं। दुर्गादिप्रतिष्ठाविधिकथनं। वनदेवताप्रतिष्ठाविधिकथनं। दुर्गयन्त्रादिप्रतिष्ठाविधिकथनं। प्रतिष्ठालक्षणकथनञ्च। अथ शान्तिकरणविधिकथनं। तत्र द्वादशराज्यादिपूजाविधिकथनं। एवं सर्व्वेषां नक्षत्राणां पूजाविधिकथनं। अथ योगयात्रानुसारेण नक्षत्रशान्तिकथनं। तत्र ग्रहाणां मण्डलादिस्थापनाविधिकथनं। नवग्रहपूजाकथनं। ग्रहशान्त्यर्थं स्नानविधिकथनं। अथ पौष्टिककर्म्मविधिकथनं। अथ बलिविधिकथनं। तत्र अर्हद्बल्यादिदानविधिकथनं। अथ प्रायश्चित्तविधिकथनं। तत्र प्रायश्चित्तं नाम प्रमादकृतस्य पापस्य विशुद्धिहेतुः कर्म्मविशेषः। जानन्नपि क्रोधादिना प्रेरितश्चेत् पापमाचरति तस्य प्रायश्चित्तेन नापगमः किन्तु तत्र जन्मनि जन्मान्तरे वा भोगेनेतिनिरूपणं। प्रायश्चित्ताधिकारिलक्षणं। प्रायश्चित्तानाचरणे दोषकथनं। प्रायश्चित्तग्रहणविधिकथनं। अथ प्रतिक्रमणप्रायश्चित्तविधिकथनं। विवेकानुप्रायश्चित्तकथनं। कायोत्सर्गार्हप्रायश्चित्तकथनं। ज्ञानातिचारप्रायश्चित्तकथनं। दर्शनातिचारप्रायश्चित्तं। चारित्रातिचारप्रायश्चित्तं। वीर्य्यातिचारप्रायश्चित्तं। तपोऽर्हप्रायश्चित्तं। छेदार्हप्रायश्चित्तं। अनवस्थाप्रायश्चित्तं। पाराञ्चिकप्रायश्चित्तं। प्रायश्चित्ताधिकारे श्रावककल्पकथनं। सामान्यप्रायश्चित्तकथनं। यतीनां प्रायश्चित्तविधिकथनं। अथ ज्ञानार्हप्रायश्चित्तं। दानार्हप्रायश्चित्तं। विशोधनार्हप्रायश्चित्तं। नित्यानुष्ठेयविधानकथनं। तत्र विविधस्तवपाठादिविधिकथनं। अथ वन्दनविधिकथनं। प्रतिक्रमणविधिकथनं। श्रामणविधिकथनं। प्रतिक्रमणविधिकथनं। यतिप्रतिक्रमणविधिकथनं। गृहिप्रतिक्रमणविधिकथनं। कायोत्सर्गविधिकथनं। अथ गुणप्रत्याख्यानविधिकथनं। मुद्रिनिरूपणं। सामायिकयोजनाविधिकथनं। अथ तपोविधिकथनं। तत्र नमस्कारतपःकथनं। एकावलीतपःकथनं। पञ्चपरमेष्ठितपःकथनं। रत्नत्रयमौनतपःकथनं। श्रेणीतपःकथनं। फल-

तपः। सर्व्वाङ्गसुन्दरतपः। रोहिनीतपः। मोक्षदण्डतपः। अदुःखदेवीतपः। अमृताष्टमीतपः। अखण्डदशमीतपः। अथ अर्हत्पूजा-गुरुपूजा-प्रवचनश्रुतिरपूजा-धर्म्मध्यानादिरूपविंशतिस्थानकथनं। अथ पदारोपविधिकथनं। तत्र यतिपदारोपविधिकथनं। विप्राणां पदारोपविधिकथनं। उपाध्यायपदारोपविधिः। एवं ब्राह्मणक्षत्रियादिपदारोपविधिः। अथ मण्डलेश्वर-ग्रामाधिपति-मन्त्रि-सेनापतिलक्षणादिकथनं। अथ व्यवहारनिरूपणं।

No. 2643. विंशतिस्थानकविचारामृतसङ्ग्रहः। Substance, country-made paper, 11 × 4½ inches. Folia, 165. Lines, 9 on a page. Extent, 2,952 ślokas. Character, Nágara. Date, Sm. 1818. Place of deposit, Ajimgánj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect. Sañskṛit and Mágadhí.

Viñśati-sthánaka-vichárámṛita-saṅgraha. Summary of the religious doctrines and duties of the Jains. By Jinaharsha Gaṇi, disciple of Jayachandra Súri. This is an excellent summary, and enters at considerable length into the details of the duties enjoined. The contents are given below in Sanskrit.

Beginning. श्रीभूर्भुवःस्वस्त्रितयं पुनाना द्रव्याभिधानाद्भुतभावरूपैः।
त्रिकालवर्त्तिस्त्रितयो जिनेन्द्राः क्षुनन्तु सर्व्वाद्भुतसौख्यलक्ष्मीम्॥
जिनेन्द्रपदवीप्राप्तिनिमित्तं सुदृशां तपः।
विंशतिस्थानव्याख्यानं जयति श्रीजिनागमे॥
दानशीलतपोभावभेदैर्द्धर्म्मश्चतुर्व्विधः।
प्रणीतसकलश्रेयोलतारामसुखावहः॥
यतः। दानं सुपात्रे विशदञ्च शीलं
तपोविचित्रं शुभभावना च।
भवार्णवोत्तारणयानपात्रं धर्म्मं चतुर्द्धा मुनयो वदन्ति॥ इत्यादि।

End. ग्रन्थस्यास्य पवित्रस्य वाचनाश्रवणादिभिः।
लभन्ते प्राणिनः प्रौढं श्रीजिनेश्वरसम्पदं॥

Colophon. इति श्रीविंशतिस्थानकविचारामृतसङ्ग्रहे श्रीतपागच्छेशश्रीजयचन्द्रसूरिराजशिष्येण जिनहर्षगणिना निर्म्मिते विंशतिस्थानककथा॥ सम्पूर्णश्चायं ग्रन्थः।

विषयः। दानशीलतपोभावभेदेन धर्म्मस्य चतुर्व्विधत्वकथनं। तत्र प्रत्येकं तेषां लक्षणादिकथनञ्च। दानादीनां सम्यग्दर्शनादुपयोगित्वेन तत्प्राप्तुकामेन जिनपरिचर्य्या विधेयेति तत्पूजाविधिकथनं। तत्र प्रातःकृत्यस्नानाभिषेकादिविधिनिरूपणञ्च। जिनमूर्त्तिपरिचर्य्याविधा-

ननिरूपणं। ध्यानभद्रादिनिरूपणं। जिनविम्बार्चनदर्शनादिमाहात्म्यकीर्त्तनं। तच्च प्रसङ्गेन चम्पपुराधिपस्य सिंहरथाभिधाननरपतेरुपाख्यानकथणं। द्रव्यभावभेदेन अर्हद्भक्तेर्द्वैविध्यकथनं। सात्त्विकभक्तिमाहात्म्यकथनं। अथ पुष्पार्च्चा-नदाज्ञापरिरक्षण-नद्रव्यपरिरक्षण-उत्सव-तीर्थयात्राभेदेन तस्याः पञ्चलक्षणलक्षकथनं। पुनराभोगानाभोगभेदात् तस्या द्विविधत्वकथनञ्च। अथ सिद्धभक्तिलिप्सुना तीर्थयात्रा विधेयेतिकथनं। तच्च शत्रुञ्जयगिरियात्राया मुख्यत्वकथनं। तच्च साकेतपत्तनाधिपतेः हस्तिपालनरेन्द्रस्य उपाख्यानकथनं। जीवस्य शिवस्वरूपत्वकथन-पूर्व्वकं तद्गत्वे सत्फलप्राप्तिसद्भावे दुर्गतिप्राप्तिरेवेतिनिरूपणं। अनन्तज्ञानदर्शनानन्दमयाः सिद्धा एव जन्मजरादिक्लेशरहितास्तेषां लोकस्य सिद्धक्षेत्रतया प्रसिद्धत्वमिति कथनं। धर्म्मघोषाख्यस्य मुनिनाथस्य दृष्टान्तकथनं। सिद्धभक्तिप्राप्त्युपायकथनपूर्व्वकं शत्रुञ्जयगिरिरेव सिद्धस्थानमिति निरूपणं। अथ विवेकिना निर्व्याजं द्रव्यभक्तिः भावभक्तिश्च विधेयेतिनिरूपणं। तच्च सद्भाव-पूर्व्वकं द्वादशव्रतानुष्ठान-सर्व्वज्ञशासनभावना-प्रासादार्हत्प्रतिमाप्रतिष्ठा-तीर्थयात्यारूपैव द्रव्यभक्तिरितिकथनं। तथा सम्यग्गुणादिमत्तया पुनः पुनरेकाग्रतया च ध्यानेन आत्मनस्तन्मयीकरणमेव भावभक्तिरितिनिरूपणञ्च। तच्च वसन्तपुरवास्तव्यस्य जिनदासाभिधानस्य श्रेष्ठिन उपाख्यानकथनं। पुरुषार्थकामेन विवेकिना गुरुभक्तिः कर्त्तव्येतिनिरूपणं। अत्र पुरुषोत्तमस्य नृपतेरुपाख्यानकथनं। अथ विवेकिना स्थविरावली वन्दनीया। सा च लौकिकलोकोत्तरभेदात् द्विविधा। अत्राद्याः स्थविरा जनकजनन्यादयः। तेष्वपि लोकद्वयसुखावहत्वेन भक्तिः कर्त्तव्या। अथ लोकोत्तरस्थविराश्च पञ्चमहाव्रतभूषिता निःसङ्गचित्ततत्तयो यतय एव। न हि पलितादिमात्रेण दृढत्वं भवति, किन्तु विवेकसंयमादिनैवेतिनिरूपणं। अत्र पद्मोत्तरस्य नृपतेरुपाख्यानकथनं। महेन्द्रपालस्य नरपतेरुपाख्यानकथनं। तपस्विनां गौरवं विधेयमितिनिरूपणं। इन्द्रियजयावश्यकताकथनं। कषायोदयनिरोधादिवाञ्छातपःकथनं। प्रायश्चित्तादिरूपाभ्यन्तरतपोनिरूपणं। विनयनिरूपणं। वाचना-पृच्छना-परिवर्त्तना-अनुप्रेक्षा-धर्म्मकथारूपपञ्चविधस्वाध्यायकथनं। आर्त्त-रौद्र-धर्म्म-शुक्लभेदेन चतुर्व्विधध्यानकथनं। अथ कषायोदयनिरोधादिरूपद्वादशविधतपोविशिष्टा एव तपस्विनो नान्ये इति निरूपणं। अत्र ऋषभद्दासस्य उपाख्यानकथनं। वीरभद्राभिधानस्य श्रेष्ठिन उपाख्यानकथनञ्च। अथ ज्ञानयोगकथनं। तच्च देवराजर्षेरुपाख्यानकथनं। सम्यग्दर्शननिरूपणं। अत्र हरिविक्रमनृपतेरुपाख्यानकथनं। अथ विवेकिना अर्हदादिषु चतुर्दशपदेषु विनयो विधेय इति कथनं। तच्च विनीयते अपनीयते अष्टप्रकारं क्लिष्टकर्म्म अनेनेति विनय इति निर्व्वाचनकथनञ्च। अथ निर्व्वाणसाधकान् योगान् साधयतीति साधुरिति तल्लक्षणकथनं। तच्च धनिमुनेरुपाख्यानकथनं। अरणदेवाख्यानकथनञ्च। अथ विवेकिना निर्म्मलशीलं कर्त्तव्यमितिकथनं। तच्च चन्द्रवर्म्मणो नृपतेरुपाख्यानकथनं। अथ धर्म्मध्यान-शुक्लध्यानरूपशुभध्यानद्वयकथनं। एवं रौद्रध्यानार्त्तध्यानरूपाशुभध्यानकथनं। तच्च हरिवाहनस्य कथाकीर्त्तनं। अथ विवेकिना प्रीतिपूर्व्वकं सर्व्वश्रेयोनिदानं धर्म्ममूलं सर्व्वमेव दातव्यमिति-

कथनं। अथ नरवाहनस्य उपाख्यानकथनं। अथ मनःशुद्धिविधिकथनं। तच जीमूतकेतोरुपाख्यानकथनं। अथ समाधिविधिकथनं। अथ विवेकिना श्रुतग्राहिणा भवितव्यमितिकथनं। अथ सागरचन्द्रस्य उपाख्यानकथनं। अतः श्रौतभक्तिनिरूपणं। अथ रत्नचूड़स्य उपाख्यानकथनं। अथ अर्हत्त्रिकालपूजापञ्चशक्रस्तववन्दनादिविधिकथनञ्च॥

No. 2644. सुयपण्णत्तिसुत्तम्, (सूर्य्यप्रज्ञप्तिसूत्रम्।) Substance, country-made paper, 12 × 4 inches. Folia, 78. Lines, 11 on a page. Extent, 2,345 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Mágadhí.

Suya-paṇṇati-sutta (Sanskrit, *Súrya-prajṇapti-sútra*). Jain astronomy alleged to have been related by Mahávíra in course of conversation with a Guṇadhara of the name of Indrabhúti.

Beginning. णमो अरिहन्ताणं। तेणं कालेणं तेणं समयेणं मिथिलानामनयरी होत्था रिद्धिग्मियसमिद्धाए मुदियजणजाणवयाजावपासादीया इतजियसत्तुरायाधारिणी देवी। इत्यादि।

End. वीरवरस्स भयवयोजरामरणकिलेसदोसरहियस्स।
वंदामि विनयपणतो सोक्खुप्पा एसयापा एव॥
सुयपण्णत्तिसुत्तं समत्तो शुभमस्तु। कल्याणमस्तु।

विषयः। इन्द्रभूतिनामकेन केनचिद्गणधरेण सह संवादेन भगवतो महावीरस्य ज्योतिर्विद्याकथनं। तच द्वावेव सूर्य्यौ चन्द्रौ च क्रमेण सुमेरुमुभयतः परिभ्रमत इति निरूपणं। दिनरात्रिकारणकथनं। सूर्य्यादीनां संस्थानादिकथनं। क्षणलवमुहूर्तादीनां लक्षणादिकथनं। सौरचान्द्रमासादिनिनिरूपणं। नक्षत्रनिरूपणं। नक्षत्रमासादिनिरूपणं। राशिनिरूपणं। लग्नादिनिरूपणं। उदयास्तमयनिरूपणं। सूर्य्यादीनां गत्यादिनिरूपणं। मौनपरिभाषाकथनं। ग्रहादीनां मण्डलविष्कम्भादिनिरूपणं। अतीचारादिनिरूपणं। मण्डलादिविभागकथनं। नक्षत्रसंस्थाकथनं। राहुनिरूपणं।

No. 2645. श्रीपालचरित्रम्, लघुव्याख्यासहितम्। Substance, country-made paper, 12 × 5 inches. Folia, 270. Lines, 7 on a page. Extent, 4,706 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Text, Mágadhí verse; commentary, Sanskrit. prose. Incorrect.

Śrípála-charitra. History of Śrípála, a devout Jain prince, in Mágadhí verse, with a prose Sanskrit commentary entitled *Laghuvyákhyá.* By Jinaharsha Súri.

Beginning. मूलस्य ॥ अरिहाइ नवपयाइं झाइत्ता हिययकमलमज्झंमि ।
सिरिसिद्धचक्कमाहप्पमुत्तमं किंपि जंपेमि ॥

टीकायाः—

ध्यात्वा नवपदीं भक्त्या श्रीश्रीपालमहीभुजः ।
चरितं कीर्त्तयिष्यामि रम्यं संस्कृतभाषया ॥

अर्हदादिनवपदानि हृदयकमलमध्ये ध्यात्वा उत्तमं श्रीसिद्धचक्रस्य यन्त्रराजस्य माहात्म्यं किमपि जल्पेमि कथयामि ।

End. मूलस्य ॥ सायरमेरुजा महियलं मिजावकणय चलामि ।
ससिसूरावट्ठंति तावनं दत्तवाइसंता कहा एसा ॥

यावन्महीतले पृथ्वीतले सागरः समुद्रो मेरुश्च कनकाचलो द्वावपि वर्त्तेते । तथा नभः स्थले आकाशे यावत् शशिसूरौ चन्द्रसूर्यौ वर्त्तेते तावत् एषा श्रीपालनरेन्द्रकथा वाच्यमाना सती नन्दतु सद्गतिं लभताम् ॥

Colophon. टीकायाः॥ इति श्रीश्रीपालनरेन्द्रस्य कथा श्रीसिद्धचक्रमाहात्म्ययुक्ता समाप्ता।

1869 वर्षे नन्दगुहास्यसिद्धिवसुधासंख्ये शुभे चाश्विने ।
मासे निर्म्मलचन्द्रके सुविजयाख्यायां दशम्यां तिथौ ॥
पूज्यश्रीजिनहर्षसूरिगणभृत् सद्धर्म्मराज्ये मुदा ।
श्रीश्रीपालनरेन्द्रचारुचरिते व्याख्या समासात् कृता ॥

इति श्रीपालचरितस्य लघुव्याख्या समाप्ता ।

विषयः । मगधविषये राजगृहनगरे श्रेणिकनामा नरपतिरासीत् । तस्य च अवरोधवरुलेऽपि नन्दा चेल्लणा चेति द्वे प्रधाने भार्य्ये । तत्र प्रथमायां अभयकुमारनामा कुमारः समजनि, द्वितीयायान्तु अशोकश्रेष्ठः, हल्लः, विहल्लश्चेति त्रयः पुत्राः समजायन्त । अस्मिन्नवसरे गौतमादिभिः गणधरनिकरैः परिवृतः सेव्यमानो भगवान् महावीरः तत्र विहरति स्म । अथैकदा धर्म्मं शुश्रूषया समवेतान् श्रेणिकादीन् समुपलभ्य भगवतो महावीरस्य अभ्यनुज्ञया गौतमस्वामी तत्कथयितुमारेभे । तत्र दान-शील-तपो-भावभेदेन धर्म्मस्य चतुर्विधत्वकीर्त्तनं। भावश्च मनोविषयो मनोगोचरोऽतीतिनिरूपणं । तत्र भाव एव भवभ्रमनस्य परमं निदानमितिकथनञ्च । अत एव भावादिविशुद्ध्यर्थं भगवदर्हत्प्रोक्तं नवपदमाश्रयणीयं । तद्यथा, अर्हन्तः, सिद्धाः, आचार्य्याः, उपाध्यायाः, साधवः, सम्यक्त्वं, ज्ञानं, चारित्रं, तपश्चेति । तत्र अर्हन्तः अष्टादशदोषैर्विमुक्ता

विशुद्धज्ञानमया इति निरूपणं। सिद्धाश्च जिनादिपञ्चदशभेदप्रसिद्धाः विमुक्तकर्मबन्धा अनन्तज्ञानदर्शनादिसम्पन्ना इत्यादिक्रमेण प्रत्येकं लक्षणादिकथनं। पदानि खल्वेतानि जिनधर्मसारभूतानि कल्याणलिप्सुभिः सम्यगनुष्ठेयानि। पदानामेषां समुदयैः समुदितं श्रीसिद्धचक्रमाराधयन् श्रीपालराज इव मनुजो निरतिशयं सुखं प्राप्नोतीतिकथनपूर्व्वकं विशेषेण श्रीपालराजस्य चरितकीर्त्तनं। तन्मध्ये मदनसुन्दर्य्या अलौकिकजैनधर्म्मभावकथनञ्च। सिद्धचक्रमाहात्म्यकीर्त्तनञ्च।

No. 2646. श्रीकल्पसिद्धान्तः वा पर्य्युषणाकल्पदशश्रुतस्कन्धः, वृत्तिसहितः। Substance, country-made paper, 13 × 5 inches. Folia, 91. Lines, 14—16 on a page. Extent, 1,064 ślokas. Character, Nágara. Date, Sm. 1768. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Text., Mágadhí; Commentary, Sanskrit.

Śríkalpa-siddhánta ALIAS **Paryúshaṇá-kalpa-daśa-srúta-skandha,** with a commentary. Brief biographical notices of the 24 Jinas, beginning with Rishabha and ending with Mahávíra. In course of these notices, the peculiar religious and social characteristics of their times, and the lives of many saints and wise men are recited. Anonymous.

Beginning. मूलस्य। सूचमर्थस्तथा चान्यं वाच्यमेतत्त्रयं समं।
इत्तावस्यां समानीतमेत+धिक्यमन्यतः॥

तच तावत् श्रीकल्पसिद्धान्तस्य अधिकारत्रयवाचिकेयं गाथा।

पुरिमचरमाणकप्पो मंगलं वद्धमाणतित्थंमि।
तोपरि कहियो जिणगणहरादं थेरावलिचरिअं॥

अस्यार्थः,—श्रीआदिवीर+ +तीर्थ+ +कल्पाचारः, मङ्गलं भवतु। इत्यादि।

End मूलस्य,—

सहेतुं सकारणं सवृत्तं स अर्थं स+जयं सज्जागरणं भुज्जो उवदंसेमि पज्जोसणाकप्पो दसासुअक्खंधो संपुर्णं।

इतिः,—

Colophon. इति समुचार्य्य वचःस्थानस्थं इतं सर्व्वं पापयेन संमील्य स्थाल+उत्थाय च भुक्तमेव मध्यदिने + +कृतं पापं सर्व्वमपि अपनेतव्यं न रचणीयमिति स इष्टान्तः। इति सामाचारी।

अस्मिन् ग्रन्थे अन्येऽपि वक्त्राः कथाः सन्ति लेशमात्रेण कथिताः। इति संवत् १७६८।

विषयः। ऋषभादारभ्य महावीरपर्य्यन्तं सर्व्वेषां जिनानां संक्षेपेण चरितकथनं तच्च कल्पभेदकथनं। आचारभेदकथनञ्च। गौतमादीनां गणधराणां स्थविरावलीनाञ्च चरितकथनं। साधुसमाचारकीर्त्तनञ्च।

No. 2647. निरयावलिश्रुतस्कन्धटीका। Substance, country-made paper, 16 × 4 inches. Folia, 22. Lines, 7 on a page. Extent, 606 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Nirayávali-srúta-skandha-ṭíká. A commentary on the Nirayávali-srúta-skandha—a work on hells by Sudharma Svámí By Chandra Súri.

Beginning. पार्श्वनाथं नमस्कृत्य प्रायेऽन्यग्रन्थवीक्षिताः।
निरयावलीयश्रुतस्कन्धव्याख्या प्रकाश्यते॥

तच्च निरयावलिव्याख्याङ्गग्रन्थस्यार्थं महावीरमुखनिर्गतः, तमभिधित्सुराचार्य्यः सुधर्म्मस्वामी सूचकारः। तेषां कालेणमित्यादि ग्रन्थं तावदाह। अस्मिन् काले अवसर्पिण्यां। इत्यादि।

End. सकलकर्म्मक्षतविकाररहिततया तात्पर्य्यमाह। सर्व्वदुःखानामन्तं करिष्यति।

Colophon. इति श्रीचन्द्रसूरिविरचितनिरयावलिश्रुतस्कन्धटीका समाप्ता।

विषयः। सुधर्म्मस्वामिकृतनिरयावलीयश्रुतस्कन्धस्य व्याख्यानम्।

No. 2648. परमहंससम्बोधचरितम्। Substance, country-made paper, 14 × 3½ inches. Folia, 63. Lines, 6 on a page. Extent, 1,157 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse, Incorrect. Sanskrit and Mágadhí.

Parama-hañsa-sambodha-charita. The duties of Paramahañsas or wise men. The object is to extol the merits of metaphysical knowledge, or of abstract truth, which alone can effect salvation. It shows also that Arhat is the Supreme divinity, and Brahmá and the other gods are his servants. By Navyaraṅga, disciple of Guṇaśekhara Gaṇi.

Beginning. चिदानन्दमयं सार्व्वं प्रणम्य परमेश्वरम्।
परमहंससम्बोधचरितं किञ्चिदुच्यते॥

यद्यन्तगविज्ञानं देहिनां नास्ति दी + नम्।
तर्हि किं वाग्भरै + + रजागलस्तनोपमैः॥
ज्ञानदर्शनचारित्रतपोरूपचतुष्टयम्।
मुक्तेः स्थानमुशन्त्यत्र जीवा यान्ति परं पदम्॥ इत्यादि।

End. मूलमन्त्रं मनोमात्र्यं फलवन्तौ तपोजपौ।
अनेन सप्रभावेण सर्व्वं सम्पद्यते सुखम्॥

Colophon. इति श्रीमत्खरतरग + वाचनाचार्य्य श्रीगुणशेखरगणिशिष्यनयरङ्गविरचिते परमहंससम्बोधचरिते पुनः परमहंसमात्राज्यप्राप्तिवर्णनो नामाष्टमः प्रस्तावः समाप्तः।

विषयः। सम्यग्ज्ञानदर्शनचारित्रसम्पत्त्या परमसुखं लभ्यते नान्येन केनचिदुपायेनेति-कथनं। तच्च ज्ञानस्यैव प्राधान्यकथनं। भगवान् अर्हन्नेव परमेश्वरः, ब्रह्मादयः सर्व्वे तस्यैव परिकरा इति निरूपणं। परमहंसानां चारित्रकथनञ्च।

No. 2649. चन्दपण्णत्तिसूत्तम्, (चन्द्रप्रज्ञप्तिसूत्रम्।) Substance, country-made paper, 14 × 4 inches. Folia, 98. Lines, 6 on a page. Extent, 1,543 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose, Magadhí. Incorrect.

Chandapaṇṇatti-sútta (Sanskrit, **Chandra-prajṇapti-sútra.**) Astronomical dissertations on the size, distance, character, light, eclipses, &c., of the sun and the moon according to Jain belief. It is a work of considerable interest.

Beginning. ॐ नमो अरिहंताणं।
जयति भवणलिणकुलेयविगसियवत्तपत्तलद्दलाच्छा।
वीराग इंदमयगलसल्लियगयविक्कमो भववं॥
नमि उण असुरसुरगरुयलभुयगपरिवन्दिये गतकिलेसे।
अरिहे सिद्धाय रिउचि भाये सव्वसाऊया फुड़ वियड़पाय॥ इत्यादि।

End. अरहंत मेर गणहरमेर किररहोत्तिचोलीणो।
तन्हीधितिउद्दाणु ज्ञात्तकम्मचरवरियषाणं॥
धारेयव्वं नियमं णय अरिणीए सुदायव्वं।

Colophon. इति चन्दपण्णत्तिसुत्तं समत्तो।

विषयः। तत्र प्रथमे प्राभृते,—सूर्य्यो वर्षमध्ये कतिमण्डलानि एकवारं कति वा द्विरारं व्रजतीति तन्निरूपणं। २ये, =तस्य तिर्य्यक् गमननिरूपणं। ३ये सूर्य्यचन्द्रयोः चेचमानादिनिरू-

पणं। ४र्थे,—तयोः संख्यितिनिरूपणं। द्वावपि सूर्य्यौ चन्द्रौ च परस्परं कियत्प्रमाणमन्तरं लब्धा चरतीतिनिरूपणञ्च। ५मे,—कियत्प्रमाणं द्वीपं समुद्रं वा अवगाह्य सूर्य्यस्तारं चरतीतितन्निरूपणं। ६ष्ठे,—एकेन रात्रिन्दिवेन एकैकः सूर्य्यः कियत्प्रमाणं क्षेत्रं विकाश्य चरतीति तन्निरूपणं। ७मे,—सूर्य्यमण्डलादीनां संस्थानादिकथनं। ८मे,—सूर्य्यादीनामुदयास्तमयादिकारणकथनं। छायापरिमाणकथनं। ९मे,—नक्षत्रविषयकमुह्लत्तादिनिरूपणं। नक्षत्राणामष्टाविंशतिसंख्यकत्वकथनं। १०मे,—योगनिरूपणं। ११,१२शे,—द्वादशसंवत्सरनिरूपणं। १३शे—चन्द्रमसः कलाया ह्रासवृद्धिकारणकथनं। १४शे,—पूर्णिमाभावस्थानिरूपणं। १५शे,—चन्द्रादीनां मध्ये कः शीघ्रगतिरिति तन्निरूपणं। १६शे,—ज्योत्स्नालक्षणादिकथनं। १७शे,—चन्द्रादीनामुपपातादिनिरूपणं। १८शे चन्द्रादीनां समतलाद्भूभागादुच्चतादिनिरूपणं। नक्षत्राणां संस्थितिकथनं। १९शे,—सूर्य्यादीनां जम्बूद्वीपादिचारकथनं। २०शे,—ग्रहणादिनिरूपणञ्च।

No. 2650. चन्द्रप्रज्ञप्तिटीका। Substance, country-made paper, 16 × 4 inches. Folia, 316. Lines, 8 on a page. Extent, 9,796 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Chandra-pajṇapti-ṭíká. A commentary on the work noticed under the next preceding number. By Malayagiri.

Beginning. मुक्ताफलमिव करतलकलितं विश्वं समस्तमपि सततम्।
यो वेत्ति विगतकर्म्मा स जयति नमो जिनो वीरः॥
सर्व्वश्रुतपारगताः प्रतिदृतिनिःशेषकुपथसन्तानाः।
जगदेकतिलकभूता जयन्ति गणधारिणः सर्व्वे॥
विलसतु मनसि सदा मे जिनवाणी परमकल्पलतिकेव।
कल्पितसकलनरामराः शिवसुखफलदानदुर्ल्ललिताः॥
चन्द्रप्रज्ञप्तिमहं गुरूपदेशानुसारतः किञ्चित्।
विवृणोमि यथाशक्ति स्वष्टं स्वपरोपकाराय॥

तत्राविघ्नेन दृष्टप्रसिद्ध्यर्थमादाविष्टदेवतास्तवमाह। जयइ णवणलिण। इत्यादि।

End. चन्द्रप्रज्ञप्तिमिमामतिगम्भीरां विवृणुता कृशलम्।
यदवापि मलयगिरिणा साधुजनक्षेम भवतु ततो॥

Colophon. इति श्रीमलयगिरिविरचिता चन्द्रप्रज्ञप्तिटीका समाप्ता।

विषयः। चन्दपण्णत्तिसुत्तनामकजैनज्योतिषग्रन्थस्य व्याख्यानम्।

No. 2651. तन्दुलवैयारियपकिण्णम्, (तण्डुलवैचारिकप्रकीर्णम्।)
Substance, country-made paper, 14 × 6 inches. Folia, 60. Lines, 4 on a page. Extent, 752 ślokas. Character, Nágara. Date, Sm. 1915. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose, Magadhí Gáthá. Incorrect.

Tandula-vaiyáriya-pakiṇṇa. (Sanskrit, **Taṇḍula-vaicháriika-prakírṇa**). A treatise on biology and physiology discussing various topics about conception, single and simultaneously manifold, nourishment of the fœtus, its health and disease, its gradual development, delivery, various stages of life, virtue and vice, &c. Anonymous.

Beginning. निज्जरिय जरामरणं वन्दित्ता जिनवरं महावीरं।
वुत्थं पइण्णयमिणं तन्दुलवेयालियं नाम॥
सुणह गणिए दसदिसा वाससया उसु जह विभज्जन्ति।
संकलिए वीगसिए जंवायं सेसयं होइ॥
जन्तियमित्ते दिवसे जन्तियराइ मुहुत्तमुस्सासे।
गच्छंमि वसइ जीवो आहारविहिं च वुच्छामि॥ इत्यादि।

End. आहारो उस्सासो सन्धिसिराउय रोमकुवाइ।
पित्तं सहिरं सुक्कं गणियं गणियप्पहाणेहिं॥
एवं सगदसरीरं आइजरामरणवेयणावडुलं।
तह घत्तइकाउंजे जहसुव्वइ सव्वदुक्खाणं॥

Colophon. इति तन्दुलवैयारियं पकिण्णं समत्तो।

विषयः। ग्रन्थोऽयं, तण्डुलानां वर्षशतायुष्कपुरुषप्रतिदिनभोगानां संख्याविचारेण उपलक्षितत्वात् तण्डुलवैचारिकेति नाम्ना प्रसिद्धिं गतः। अथ जीवस्य गर्भे वासकालनिरूपणं। तत्राहारनिरूपणं। अथ जीवः अष्टौ सहस्राणि त्रीणि शतं पञ्चविंशत्याधिकानि मुहूर्त्तानि यावत् गर्भे वसतीतिकथनं। एवं तस्य तत्र वासकाले निःश्वासोच्छ्वासादिसंख्यानिरूपणं। गर्भस्थानसंस्थानादिकथनं। गर्भसञ्चारप्रक्रियाकथनं। स्त्रीणां पञ्चपञ्चाशद्वर्षपर्य्यन्तं गर्भधारणकालः। पुरुषाणान्तु सप्तसप्ततिवर्षं यावत् पुत्रोत्पादनसामर्थ्यं वर्त्तते इति निरूपणं। गर्भाधानयोग्यशुक्रादिनिरूपणं। एकत्र गर्भाधाने बहवो जीवा उत्पद्यन्ते, तेषां एको द्वौ त्रयो वा जीवन्ति, अपरेतु तत्रैव म्रियन्ते इति निरूपणं। बहूनामपि पितृणामेक औरसः पुत्रो भवितुमर्हतीति तत्प्रक्रियाकथनं। क्वचिद्द्वादशवर्षपर्य्यन्तमपि गर्भधारणकाल इतिनिरूपणं। गर्भस्थस्त्रीपुरुषज्ञानोपायकथनं। नपुंसकादिलक्षणकथनं। गर्भाधानोत्तरं क्रमेण जीवस्य शरीरोपचयप्रकारकथनं। आहारनिरूपणञ्च। तत्र नाभिनाड्या मातुः शरीररसादीन गर्भस्थः

पिवतीतिकथनं। भ्रूणस्य, मातुः पितुश्चापि शरीरांशविशेषेण यद्यदङ्गमुपजायते तन्निरूपणं। गर्भस्थस्यापि धर्मादिपिपासा जायते इतिकथनं। प्रसवप्रकारकथनं। जीवस्य बाल्यादिदशदशाकथनं। सुखिनः दुःखिनोऽपि वा जीवस्य जिनशासनानुसारेण जीवनातिवाहनकर्त्तव्यताकथनं। अथ कलाकाष्ठामुहूर्त्तादिपरिमाणादिकथनं। जीवानां भोगरोगादिनिरूपणं। जीवानां शुभाशुभशरीरचिह्नादिनिरूपणं। मानोपपन्नशरीरनिरूपणं। जीवशरीरे अस्थ्यादिसंस्थाननत्तन्नामादिकथनं। जीवस्य आहारनिरूपणं। तच्च तण्डुलपरिमाणादिकथनञ्च। एवं जीवभोग्यबलवर्णादिपरिमाणकथनं। अथ मासवर्षयुगादिपरिमाणकथनं। अथ शरीरविद्याकथनं। जीवस्य कामक्रोधादितारतम्यनिमित्तकथनं। पापपुण्यनिरूपणं। कर्म्मफलकथनं। स्त्रीचरित्रकथनं। भोगकथनञ्च।

No. 2652. तण्डुलवैचारिकप्रकीर्णावचूरिः। Substance, country-made paper, 12 × 6 inches. Folia, 72. Lines, 8 on a page. Extent, 1,917 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Generally correct. Sanskrit.

Taṇḍula-vaichárika-prakirṇávachúri. A commentary on the work noticed under the next preceding number. Anonymous.

Beginning. ऋषभं हर्षसंयुक्तं वीरं वैरनिवारकं।
गौतमं गुणसंयुक्तं सिद्धान्तं सिद्धिदायकं॥
प्रणम्य स्वगुरुं भक्त्या वल्ये व्याख्यां गुरुक्रमात्।
प्रकीर्णतण्डुलाख्यस्य वैराग्यरसवारिधेः॥

ननु कियन्ति प्रकीर्णानि कथं तेषाञ्चोत्पत्तिः। उच्यते नन्दी, अणुओगदाराइ दवि, दच्छउ, तण्डुलवेयालियः, + दाविजयमित्यादीनि। इत्यादि।

End. संयमादिकमितिशेषः। जेति पादपूरणे यथा मुञ्च। केभ्यः सर्व्वदुःखेभ्यः। बलसारराज ऋषिवदिति।

Colophon. इति तण्डुलवैचारिकप्रकीर्णावचूरिः समाप्ता।

विषयः। तन्दुलवैचारियपकिण्णाभिधानप्रकरणस्य व्याख्यानम्।

No. 2653. अवचूर्णिः। Substance, country-made paper, 14 × 6 inches. Folia, 28. Lines, 19 on a page. Extent, 2,327 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

Avachúrṇi. An epitome of Somatilaka Súri's treatise on numeration. By Guṇaratna Súri.

Beginning. श्रीवीरजिनवरेन्द्रं स + कान्ततमोरविं ।
नत्वा नव्यलघुक्षेत्रसमासो ह्यवचूर्ण्यते ॥

तत्रेदमादिमं सूत्रं सिरिनिलयं । अत्र आद्यपदचतुष्टयेन चत्वारोऽतिशयाः पूजाद्यतिशयाद्या उक्ताः । उत्तरार्द्धेन अभिधेयं चोक्तं । इत्यादि ।

End. फूर्ज्जीयद्गुणप्रकरवासितविष्टपानां
श्रीदेवसुन्दरमहरूपसूरिराजाम् ।
शिष्योऽवचूर्णिमकरोद्गुणरत्नसूरिः
संस्कारबोधविधये स्वपरार्थमेताम् ।

Colophon. इति श्रीसोमतिलकसूरिविरचितस्य लघुक्षेत्रसमासस्य अवचूर्णिः श्रीगुणरत्नसूरिविरचिता समाप्ता ।

विषयः । सोमतिलकसूरिकृतलघूक्षेत्रसमासप्रकरणस्य व्याख्यानम् ।

No. 2654. लिङ्गानुशासनोद्धारः । Substance, country-made paper, 14 × 6 inches. Folia, 14. Lines, 14 on a page. Extent, 906 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Generally correct. Sanskrit.

Liṅgánuśasanoddhára. A commentary on Hemachandra's Liṅgánusásana—a dictionary of the Sanskrit language. By Jayánanda Súri.

Beginning. श्रीसिद्धहेमचन्द्रव्याकरणनिवेशितानि लिङ्गानि ।
आचार्य्यो हेमचन्द्रो रिष्टणोत्यर्हं नमस्कृत्य ॥

पुमिति । कटणघपभमयवषस इत्येतदन्तं सत् पुंलिङ्गः स्यात् । कादयोऽकारान्ता गृह्यन्ते । इत्यादि ।

End. अत्र यदुक्तं लिङ्गस्वरूपं तद्बहुलं ज्ञेयं तेन कठानां धर्म्मे आम्नाये वा काठकं कालापकं । इत्यादि ।

Colophon. इति लिङ्गानुशासनोद्धारः समाप्तः । परमगुरुभट्टारकप्रभुश्रीजयानन्दसूरिपादैर्विरचितः ।

विषयः । हेमचन्द्रकृतलिङ्गानुशासनस्य व्याख्यानम् ।

No. 2655. सप्ततिकावृत्तिः, वा कर्म्मविपाकविवृतिः। Substance, country-made paper, 14 × 4 inches. Folia, 280. Lines, 12 on a page. Extent, 12,972 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

Saptatiká-vṛitti ALIAS **Karmavipáka-vivṛiti.** A commentary on the Saptatiká-sútta—a treatise on future retributions of works done in this life. By Malayagiri.

Beginning. दिनेश च+न चरप्रतापैरनन्तकालप्रचितं समन्तात्।
योऽशेषयत् कर्म्मविपाकपङ्कं देवो मुदे वोऽस्तु स वर्द्धमानः॥
ज्ञानादिगुणगुरूणां धर्म्मगुरूणां प्रणम्य पदकमलं।
कर्म्मविपाकविवृतिः स्तुतिबीजविवृद्धये विदधे॥

तदा चैवाभीष्टदेवतास्तवनादिप्रतिपादिकामिमां गाथामाह सिरिवीरेति। श्रिया सकलत्रिभुवनजननचमत्कारकारिकारः—इत्यादि।

End. प्रकरणमेतद्विषमं सप्ततिकाख्यं वृत्तिताकुशलम्।
यदि वापि मलयगिरिणा सिद्धिं तेनाश्नुता लोके॥
अर्हतो मङ्गलसिद्धान्मङ्गलसंयतानर्हम्।
आणिश्चिये जिनाख्यातं धर्म्मं परममङ्गलम्॥

Colophon. इति श्रीमलयगिरिविरचिता सप्ततिकाविवृतिः समाप्ता।

विषयः। सत्तरीवृत्ताभिधानजैनकर्म्मविपाकस्य व्याख्यानम्।

No. 2656. षोड़शविवरणम्। Substance, country-made paper, 14 × 5 inches. Folia, 18. Lines, 7 on a page. Extent, 305 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Sanskrit. Generally correct.

Shoḍaśa-vivaraṇa. A epitome of the leading doctrines of the Jain faith. Haribhadra Súri.

Beginning. प्रणिपत्य जिनं वीरं सद्धर्म्मपरीक्षकादिभावानाम्।
लिङ्गादिभेदतः खलु वक्ष्ये किञ्चित् समासेन॥
बालः पश्यति लिङ्गं मध्यमबुद्धिर्विचारयति वृत्तम्।
आगमतत्त्वन्तु बुधः परीक्षते सर्व्वयत्नेन॥
बालो ह्यसदारम्भो मध्यमबुद्धिस्तु मध्यमाचारः।

ज्ञेय इह तत्त्वमार्गेऽनुवन्धस्तु मार्गानुसारीयः ॥
वाङ्मलिङ्गमसारं तत्प्रतिबद्धा न धर्म्मनिष्पत्तिः ।
धारयति कार्य्यवशतो यस्मादिङ्गम्बकोऽप्येतत् । इत्यादि ।

End. धर्म्मश्रवणे यत्नः सततं कार्य्यो बहुश्रुतसमीपेषु ।
हितकाङ्क्षितैर्हरिभद्रसूरिभिर्वचनं ननु ह्यारिभद्रमिदम् ॥

Colophon. इति श्रीहरिभद्रसूरिकृतं षोड़शविवरणं सम्पूर्णम् ।

विषयः । संक्षेपेण जैनधर्म्मतत्त्वसारकीर्त्तनम् ।

No. 2657. दशवैयालिअसुत्तं, (दशवैकालिकसूत्रम् ।) Substance, country-made paper, 13 × 6 inches. Folia, 126. Lines, 4 on a page. Extent, 882 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Verse. Generally correct. Mágadhí.

Daśavaiyália-sútta (Sanskrit, **Daśavaikálika-sútra**). On the religious duties of Jains. By Sadyambhava Súri.

Beginning. धम्मो मङ्गलमुक्किट्ठं अहिंसा संजमो तवो ।
देवावितं नमसंति जस्सधम्मे सयामणो ।
जहा दुम्मस पुप्फेसु भमरे आवियइ रसं ।
तय पुप्फं किलामेइ सोयपीणेइ अप्पयं ॥ इत्यादि ।

End. अप्पाउ खलु मयय रक्खियव्वो सव्विं दिएहिं सुसमाहि एहिं ।
अरक्खिउ जाइपहं उवेइ सुरक्खिउं सव्वदुहानमुच्च । इति ।

Colophon. इति दसवैयालियसुत्तं सम्मत्तो ॥

विषयः । ग्रन्थोऽयं दशभिरध्ययनैः गुम्फितत्वात् तथा ग्रन्थकारेण दशभिः दिनांशविशेषैः निर्म्मितत्वाच्च दशवैकालिकसूत्रेति नाम्ना परिचितः । अत्र विशेषेण साधुमार्गनिरूपणं । तत्र प्रथमेऽध्ययने—अहिंसा-संयम-तपोरूपयतिधर्म्मनिरूपणं । यथा भ्रमरैः पुष्पान्यक्लिश्नित्वा मकरन्दं पीयते तथा साधुमार्गप्रवर्त्तमानैः यतिभिरपि गृहस्थानमभिक्लिश्नैव जीविका विधेया । एष हि तेषां परमो धर्म्मः । आत्मप्रदेशात् शुभाशुभकर्म्मपुद्गलानां दूरीकरणं धर्म्म इति तल्लक्षणं तत्प्रशंसाकीर्त्तनञ्च । २ये,—अधैर्य्यं न सेवनीयमितिनिरूपणं । जिनशासनमङ्गीकरणीयमित्यादिनिर्णयश्च । ३ये,—साधूनामाचारादिकथनं । ४र्थे,—जीवनिकायरक्षाविधिकथनं । जीवाजीवविभागकथनं । चारित्रधर्म्मविवेचनं । उपदेशधर्म्मफलादिकथनञ्च । ५मे,—साधूनामाहारशुद्धिनिरूपणं । ६ष्ठे,—साधूनामनाचरणीयकथनं । ७मे,—तेषां वाक्यशुद्धिनिरू-

पणं। ८मे,—आचाररूपनिधानकथनं। ९मे,—साधूनां विनयादिकथनं। १०मे,—भिक्षूणां गुणादिनिरूपणञ्च।

No. 2658. धातुमाला। Substance, country-made paper, 13 × 6 inches. Folia, 12. Lines, 12 on a page. Extent, 381 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Dhátumálá. A vocabulary of Sanskrit roots with their meanings. By Hemachandra A'chárya.

Beginning. ॐनमः सिद्धार्हते।

भू सत्तायां, पा पाने, घ्रा गन्धोपादाने, ध्मा शब्दाग्निसंयोगयोः, ष्ठा गतिनिवृत्तौ, म्ना अभ्यासे। इत्यादि।

End. धृषण प्रहसने, हिंसृण् हिंसायां, गर्हण् विनिन्दने, सहण् मर्षणे। वङ्गल-मतं निदर्शनं परस्मैभाषा।

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचिता धातुमाला समाप्ता।

विषयः। धातूनां गणभेदादिकथनपूर्व्वकमर्थनिरूपणम्।

No. 2659. सूयगड़ाङ्गसूत्तम, (सूत्रकृताङ्गसूत्रम्।) Substance, country-made paper, 14 × 4 inches. Folia, 384. Lines, 5 on a page. Extent, 4,018 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Generally correct. Mágadhí.

Súyagaḍáṅga-sútta (Sanskrit, **Sútrakṛitáṅga-sútra**). On sins and their retributions, illustrated by many stories and anecdotes.

Beginning. वुज्झिमेभ्क्तिति उट्ठिज्जा बन्धणं परिजाणिया।
किमाह बन्धणं वीरो किं वा जाणन्ति उट्ठई॥ १॥
चित्तमन्तमचित्तं वा परिगिभ्ज किसामवि।
अन्नं वा अणुजाणाइ एवं दुक्खाणमुच्चइ॥ २॥
सयं निवायए पाणे अहवाऽन्नेहिं घायए।
हणन्तं वा णजाणाई वेरं वड्ढई अप्पणो॥ ३॥
जेस्सिं कुले समुप्पन्ने जेहिं वा संवसे नरे।
ममाइ लुप्पइ बाले अन्ने हि मुच्छिए॥ ४॥ इत्यादि।

End. भगवउ महावीरस्स अन्तिए चाउज्जामाउ धम्माउ पञ्च महव्वइयं सपडिक्कमणं धम्मं उपसंपज्जित्ताणं विहर इत्ति बेमि ॥

इति नालन्दइज्जं सत्तमं अज्झयणं समत्तं ।

Colophon. इति सूयगड़ाङ्गवीयसूयक्खन्धो समत्तो । इति सूयगड़ाङ्गसूत्तं ।

विषयः । सूचं खपरसमयसूचनं कृतं येन तत् सूचं तदेवाङ्गमिति सूचकृताङ्गमिति सूचं । तच्च प्रथमश्रुतस्कन्धस्य प्रथमाध्याये,—चार्व्वाककपिलकणादाचपादशैवोदनिजैमिनिशाक्यभृतिमतानुसारिसु कुमार्गप्रणेतृसं प्रसाध्य जैनमतस्य अभ्यर्हितत्वनिरूपणं । द्वितीये अध्याये,-खसमयगुणान् परसमयदोषांश्च ज्ञात्वा खसमये एव बोधो विधेय इति निरूपणं । तृतीये अध्याये,—अथ प्रतिबोधं प्राप्तस्य सम्यगुत्थानेन उत्थितस्यापि सतः कदाचिदनुकूलप्रतिकूलोपसर्गाः प्रादुर्भवेयुस्ते च उदीर्णाः सम्यक् सोढव्या इति प्रतिपादनं । चतुर्थे अध्याये,—संबुद्धेन खीपरीषहस्य सम्यगेव सोढव्य इति प्रसङ्गेन खीणां दोषाकरत्वनिरूपणं । पञ्चमे अध्याये,—उपसर्गभीरोः खीवशगस्य नरकपातो भवति । तच्च च येन पापेन यादृशी नरकपीड़ा जायते तन्नरककवर्णनं । तथा च यत्कर्म्म यादृशं पूर्व्वजन्मान्तरे कृतं तत् तादृशमेव संसारे अनुगच्छति एतान् नरकान् श्रुत्वा धीरो न हिंस्यात् कञ्चन प्राणिनमितिनिरूपणं । षष्ठे अध्याये,—एवमनुकूलप्रतिकूलोपसर्गसहनेन खीवर्জ্জनेन च भगवान् महावीरो जेतव्यस्य कर्म्मणः संसारस्य वा पराभवेन जयमाहात्म्यतः तस्यैव वीरस्य विशेषेण गुणगणकीर्त्तनं । सप्तमे अध्याये,—अथ कुशीलत्वञ्च संयमवीर्य्यान्तरायोदयात् तत्क्षयोपशमाच्च भवतीत्यतो वीर्य्यप्रतिपादननिरूपणं । वीर्य्यञ्च जीवस्य शक्तिविशेष इति निरूपणञ्च । नवमे अध्याये,—अथ साधुवीर्य्यं धर्म्मं प्रति उद्यमं कुरुते, तच्च यथावस्थितधर्म्मलक्षणकथनं । तच्च दुर्गतिगमनधरणलक्षणो धर्म्मः । स च क्षान्त्यादिलक्षणो वा दशविध इति निरूपणं । दशमे अध्याये,—स च धर्म्मः समाधौ सति अविकलो भवतीतिसमाधिनिरूपणं । स च द्रव्यचेचारित्रादर्शनादिभेदादनेकधेतिनिरूपणं । एकादशे अध्याये,—प्रशस्तज्ञानदर्शनतपश्चारित्ररूपो भावमार्गः । स एव मोक्षमार्ग इति निरूपणं । द्वादशे अध्याये,—स च मार्गः कुमार्गव्युदासेन सम्यग्मार्गेतां प्रतिपद्यते । अतः वैनयिकादिपाषण्डमतनिराकरणकथनं । तच्च क्रमेण अक्रियावाद-अज्ञानवादादिखण्डनं । त्रयोदशे अध्याये—तत्त्वज्ञाननिरूपणं । चतुर्दशे अध्याये,—शिष्याणां गुणदोषकथनं । तच्च गुणसम्पदुपेतेन च विनेयेन शिष्येण नित्यं गुणानुरूपगुरुकुलवासो विधेय इतिनिरूपणं । पञ्चदशे अध्याये,—मोक्षमार्गप्रसाधकरूपसम्यक्चरित्रनिरूपणं । षोड़शे अध्ययने,—उक्तेषु पञ्चदशस्वपि अध्ययनेषु ये अर्था अभिहिता विधिप्रतिषेधद्वारेण तान् तथैव आचरन् साधुर्भवतीतिनिरूपणं । अथ द्वितीयश्रुतस्कन्धस्य प्रथमे अध्ययने,—ग्रन्थप्रयोगविद्या जिनस्यैव सिद्धा विज्ञानरूपा, नान्यस्य कस्यचित् । यया विद्यया तीर्थकरदर्शितया भव्यजनपौण्डरीकाः सिद्धिमुपगच्छन्तीति सोदाहरणनिरूपणं । तच्च पुष्करिणीपुण्डरीकदृष्टान्तेन तीर्थिकाः सम्यङ्मोक्षोपायाभावात् कर्म्मणां बन्धकाः प्रतिपा-

दिताः, साधवश्च सम्यग्दर्शनादिमोक्षमार्गप्रवृत्तत्वात् सदुपदेशदानेन अपरेषामपि मोचका इति निरूपणं। द्वितीये अध्ययने,—अथ स भिक्षुः द्वादशक्रियास्थानवर्जकः अधर्मपक्षत्यागी धर्मपक्षज्ञः त्रयोदशक्रियास्थानवर्ती आत्महितः सन् आत्मानं संयमेन संसारचक्रान्निष्काशयतीतिनिरूपणं। तृतीये अध्ययने,—कर्मक्षपणार्थमुद्यतेन भिक्षुणा द्वादशक्रियास्थानरहितेन अन्यक्रियास्थानसेविना सदाचारगुप्तेन भवितव्यं। धर्माधारभूतस्य शरीरस्य आधारो भवत्याहारः। स च मुमुक्षुणा उद्देशकादिदृष्टिवो ग्राह्यः तथाहि यो यत्र उत्पद्यते स तच्छरीराहारको भवति कदाहारगुप्तस्य कर्म्म आदत्ते, कर्म्मणा च नानाविधासु योनिषु अरघट्टघटीन्यायेन पौनःपुन्येन पर्य्यटतीतिनिरूपणं। चतुर्थे अध्ययने,—यथा आत्मनोदण्डाद्युपघाते दुःखमुत्पद्यते एवं सर्व्वेषामपि प्राणिनामित्यात्मौपम्यया तदुपघातान्निवर्त्तितव्यं। एष धर्म्मः सर्व्वापायचाणलक्षणो ध्रुवोऽप्रच्युतानुत्पन्नस्थिरस्वभावो नित्य इतिनिरूपणं। पञ्चमे अध्ययने,—आचारादिनिरूपणं। षष्ठे अध्ययने अनाचारफलं ज्ञात्वा सदाचारे प्रयत्नः कार्य्य इति कथनमुखेन दृष्टान्ततया आर्द्रककुमारस्य उपाख्यानकीर्त्तनं। सप्तमे अध्ययने,—श्रावकविधिकथनं। तच्च राजगृहनगरनिवासिनः सलेपाभिधानस्य गृहपतेर्दृष्टान्तकीर्त्तनं। प्रव्रज्याव्यतिरेकेणापि धर्म्मः अनुष्ठीयते इति कथनमुखेन रत्नशेखरस्य राज्ञ उपाख्यानकथनं।

No. 2660. त्रिषष्टिशलाकापुरुषचरितम्। Substance, country-made paper, 13 × 4 inches. Folia, 298. Lines, 8 on a page. Extent, 5,494 ślokas. Character, Nágara. Date, Sm. 1424. Place of deposit, Ajimganj, Ráy Dhanapat Siñh, Bahadur. Appearance, decayed and destroyed by worms. Verse. Sanskrit. Incorrect.

Trishashṭi-śaláká-purusha-charita. An epic poem on the being of sixty-three auspicious marks, *i. e.*, Jina. By Hemachandra Súri. The work comprises 12 cantos, and their contents are as follow :— I. Previous life of Neminátha Jina. II. Account of Vasudeva marrying, among others, the daughter of Jarásandha. III. Vasudeva's marriage with Kaṇakavatí. IV. His marriage with the daughters of snakes *(sarpa-kanyá)*, *i. e.*, Nagas. V. Birth of Baladeva, Kṛishṇa, Nemi, and others. Destruction of Kañsa. Foundation of the city of Dváraká. Kuvera's gift of the Śárṅga bow and other weapons to Kṛishṇa. VI. Kṛishṇa's marriage with Rukmiṇí and others. Origin of the Páṇḍavas. Marriage of Draupadí. Birth of Pradyumna. VII. Marriage of Sámba and Pradyumna. Destruction of Jarásandha. VIII. Rape of Ushá. The destruction of Váṇa. IX. Ordination of Nemi as a Jain hermit. Creation and emancipation. X. Rape of Draupadí by the

king of Amarakaṅka, an island. Her redemption by the Páṇḍavas. Story of Pálakopa. XI. Conflagration of Dváraká. Translation of Kṛishṇa and his family to their celestial abode. XII. Baladeva's ascent to heaven. Nemi's final emancipation (nirváṇá). The emancipation of the Páṇḍavas.

The changes in this work of the Hindu stories of the Harivañs'a are worthy of note. Coming from the pen of Hemachandra of the 10th or 11th century, they do not, however, justify any assumption of the stories having had a Jain origin, independently of the Hindu version.

Beginning. ॐनमो विश्वनाथाय जन्मतो ब्रह्मचारिणे।
कर्म्मवज्जीवनोच्छेदनेमयेऽरिष्टनेमये॥
श्रीनेमेरर्हतः कृष्णविष्णो रामस्य सीरिणः।
जरासन्धप्रतिहरेश्चरितं कीर्त्तयिष्यते॥
जम्बूद्वीपे द्वीपेऽचैव क्षेत्रेऽचैवास्ति भारते।
अचलायाः शिरोरत्ननाम्नाचलपुरं पुरं॥
तत्राभूद्विक्रमधनाभिधानो वसुधाधरः।
यथार्थनामा समरे विक्रमाक्रान्तशात्रवः॥
कृतान्त इव दुष्प्रेक्ष्योऽसुहृदां सुहृदां पुनः।
स नेत्रानन्दजननो निशाकर इवाभवत्॥
कल्पद्रुमः प्रणयिनां वज्रदण्डश्च वैरिणां।
चकासामास तस्योच्चैर्दोर्दण्डश्चण्डतेजसः॥ इत्यादि।

End. द्वाविंशोऽर्हन्नथ च नवमः शार्ङ्गभृत्सीरपाणि-
स्तद्वैरी चेत्यतुलमहसः कीर्त्तिताः पर्व्वणीह।
चत्वारोऽपि प्रवचनदि+सम्यगुद्दीप्य येषा-
मेकैकोऽपि श्रुतिपथगतो विस्मयाय त्रिलोक्याः॥

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये अष्टमपर्व्वणि बलदेवस्वर्गगमने नेमिनिर्व्वाणपाण्डवनिर्व्वाणो नाम द्वादशः सर्गः। संवत् १४२४

विषयः। प्रथमे सर्गे,—नेमिजिनस्य पूर्वजन्मवृत्तान्तकीर्त्तनं। तच शङ्खभूपालादीनां विवरणकथनञ्च। २ये सर्गे,—वसुदेवस्य श्यामायुकोशलाविद्याधरीप्रभृतीनां तथा जरासन्धसुतायाः नन्दिसेनायाश्च पाणिग्रहणादिविवरणकथनं। ३ये सर्गे,—कुबेरमुखात् कनकवत्याः पूर्वजन्मवृत्तान्तं श्रुत्वा वसुदेवस्य तत्पाणिग्रहणकथनं। ४र्थे सर्गे,—वसुदेवस्य सर्पकन्यापरिणयकरणविवरणकथनं। ५मे सर्गे,—बलदेव-कृष्ण-नेमिप्रभृतीनां जन्मवृत्तान्तकीर्त्तनं। कंसवधकथनं।

द्वारकापुरीनिर्म्माणकथनं। कुवेरस्य कृष्णाय शार्ङ्गधनुरादिदानकथनञ्च। ६ष्ठे सर्गे,—श्रीकृष्णस्य रुक्मिण्यादिपरिणयवर्णनं। पाण्डवानामुत्पत्तिकथनं। द्रौपदीस्वयंवरवर्णनं। प्रद्युम्नस्य जन्मतदपहरणादिकीर्त्तनञ्च। ७मे सर्गे,—शाम्बप्रद्युम्नयोर्व्विवाहवर्णनं। जरासन्धवधवर्णनञ्च। ८मे सर्गे,—उषाहरणविवरणकथनं। बाणवधवर्णनञ्च। ९मे सर्गे,—नेमिजिनस्य दीक्षाकथनं। कैवल्योत्पत्त्यादिकथनञ्च। १०मे सर्गे,—अमरकङ्कद्वीपाधिपतेद्रौपदीहरणवृत्तान्तकथनं। पाण्डवादिकृततदुद्धारकथनं। पालकोपाख्यानकीर्त्तनञ्च। ११शे सर्गे,—द्वारकादाहवर्णनं। श्रीकृष्णादीनां स्वधामगमनवर्णनञ्च। १२शे सर्गे,—बलदेवस्य स्वर्गगमनकथनं। नेमिजिनस्य निर्व्वाणप्राप्तिकथनं। पाण्डवानां निर्व्वाणप्राप्तिकीर्त्तनञ्च।

No 2661. शान्तिनाथचरित्रम्। Substance, country-made paper, 13 × 4 inches. Folia, 315. Lines, 8 on a page. Extent, 5,587 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráy Dhanapat Siñh, Bahádur. Appearance, old. Prose. Sanskrit. Incorrect.

Sántinátha-charita. Story of Sántinátha, a Jina. By Bhávachandra Súri.

Beginning. प्रणिपत्यार्हतः सर्व्वान् वागदेवीं सद्गुरूनपि।
गद्यबन्धेन वक्ष्यामि श्रीशान्तिचरितं मुदा॥

सर्व्वे संसारिणो जीवा अनन्तशोऽनन्तकालं भवभ्रमणं कुर्व्वन्तः सन्ति। परन्तुयेन प्राणिना क्वाधिकसम्यक्त्वं यदा समुपार्ज्जितं तदा तस्य भवसंख्या स्यात्। यथा श्रीवृषभदेवेन धनसार्थवाहभवे सुदृतपोनिर्म्मलाचाणां पवित्रचारित्राणां सत्पात्राणां शान्तिकं प्राज्यमाज्यदानं प्रददे। तत्पुण्यप्रभावात् चयोदशभवे—इत्यादि।

End. इत्थं शान्तिजिनेश्वरस्य मयकाः प्रोक्ता भवा द्वादश
श्राद्धद्वादशसंख्यसद्व्रतकथासङ्गेखनाबन्धुरं।
स चक्रायुधनामधेयगणभृद्व्याख्यानसंवर्द्धितं
व्याख्यातं सकलं चरित्रमपि तत् तस्यैव तीर्थेशितुः॥
यस्योपसर्गाः स्मरणात् प्रयान्ति विश्वे यदीयाश्च गुणा न+न्ति।
मृगाङ्कलक्ष्मीं कनकस्य कान्तिं सङ्घस्य शान्तिं स करोतु शान्तिः॥

Colophon. इति श्रीभावचन्द्रसूरिविरचिते गद्यबन्धे श्रीशान्तिनाथचरित्रे द्वादशभववर्णनो नाम षष्ठः प्रस्तावः।

विषयः। शान्तिनाथजिनस्य पूर्व्वजन्मद्वादशभवविवरणकथनपूर्व्वकं तस्य निर्व्वाणप्राप्तिवृत्तान्तकीर्त्तनं।

No. 2662. उपनयनकारिका। Substance, country-made paper, 8¼ × 4 inches. Folia, 2. Lines, 9 on a page. Extent, 21 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Upanayana-káriká. A metrical version of the rules for the investiture of the sacred cord, or the sacrament of Upanayana. Anonymous.

Beginning. अथ उपनयनकारिका।

आज्यसंस्कारपर्य्यन्तमुपलेपादि पूर्ववत्।
परिधानं भवेदस्य वाससेवाहतेन तु॥
भवेत् प्रावरणं कार्यः क्षौमाजिनमथापि वा।
एवम्भूतं कुमारं तं कुर्य्याद्यज्ञोपवीतिकं॥ इत्यादि।

End. अवशेषं ततस्तिष्टेत्सायंसन्ध्यामुपास्य च।
पूर्णपाचनिधानान्तमुपलेपादि पूर्ववत्॥

विषयः। यज्ञोपवीतस्य दृतिकर्त्तव्यताकथनं।

No. 2663. रामायणरहस्यम्, वा रामहृदयम्। Substance, country-made, paper, 9 × 3¾ inches. Folia, 5. Lines, 13 on a page. Extent, 103 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Rámáyaṇa-rahasya ALIAS **Rámahṛidaya.** A copy of the work noticed under No. 2288, (VII, p. 59), but the readings are different.

Beginning. बालावबोधकमनल्पधियामपूर्व-
व्युत्पत्तिहेतुमिदमन्वययोजनाभिः।
साकाङ्क्षशब्दविवृतार्थकरं महार्थं
रामायणस्य हृदयं विदधेऽग्निवेश्यः॥
चारायणादिशिष्याणामवबोधविधित्सया।
चक्रे रामायणेऽशेषदुर्बोधपददीपिका॥ इत्यादि।

End. अग्निवेश्येन मुनिना विहितं बालबुद्धये।
रामायणीयमखिलं रहस्यमिदमुत्तमं॥
एकोनषष्टिश्लोकात्मसारं रामायणोद्भवं।
यः शृणोति नरस्तस्य भुक्तिमुक्तिर्न दूरतः॥

Colophon. इत्यग्निवेश्यमुनिप्रोक्तरामायणरहस्यम् समाप्तम्।

विषयः। पञ्चदशवर्षीयो रामचन्द्रः षड्वर्षदेशीयां जानकीं परिणीतवानितिकथनं। एवंक्रमेण रामस्य सप्तविंशतिवर्षे यौवराज्याभिषेकप्रस्तावकथनं। वनगमन-पञ्चवटीवास-सीताहरण-समुद्रबन्धन-दशाननहननादिकालनिरूपणं। क्वचित् तिथिविशेषादिकथनञ्च।

No. 2664. द्वादशाब्दादूर्द्धं प्रवासादागतविधिः (प्रयोगसहितः।) Substance, country-made, paper, 10½ × 4¼ inches. Folia, 2. Lines, 11 on a page. Extent, 49 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text. Verse; ceremonial directions in prose. Incorrect.

Dvádaśábdádúrdha-pravásádágata-vidhi. Rites to be performed on return home after 12 years' sojourn in a foreign country. By Garga.

Beginning. अथ द्वादशाब्दादूर्द्धं सुहृदवलोकनविधिः।

दम्पती पितृपुत्रौ च श्वशुरौ भ्रातरौ तथा।
पितृव्यमातुलौ चैव दौहित्रो भागिनेयकः।
पुत्रिकापितरौ चैव भ्रातरौ भगिनी तथा।
द्वादशाब्दे व्यतीते तु दूरदेशं गते यदि। इत्यादि।

End. इति श्रुतिः।

इत्थं यः कुरुते विप्र तस्यानिष्टं न विद्यते।
आयुष्कामो नरश्चेमामश्रुत्वा नावलोकयेत्॥
पूर्व्वावलोकितानान्तु विधिरेष उदाहृतः।
न चैवादृष्टपूर्व्वाणामिति प्राऽऽर्षनीषिणः॥

Colophon. इति गर्गसंहितायां द्वादशाब्दादूर्द्धं प्रवासादागतविधिः।

विषयः। द्वादशाब्दान् यावदप्राप्तप्रवृत्तिकानां पित्रादीनां दृष्टचराणां प्रथमसन्दर्शनकाले दुरदृष्टनिवारणाय शान्तिविधिकथनं। तत्प्रयोगकथनञ्च।

No. 2665. कौपीनपञ्चकम्। Substance, country-made, paper, 8 × 4 inches. Folia, 2. Lines, 6 on a page. Extent, 9 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Kaupina-pañchaka. Moral obligations of Sannyásis. By Śaṅkara Áchárya. Asceticism in every respect is what is most insisted upon.

Beginning. वेदान्तवाक्येषु सदा रमन्तो भिक्षान्नमात्रेण च तुष्टिमन्तः ।
निःशोकवन्तः करुणैकवन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ १ ॥ इत्यादि ।

End. पञ्चाक्षरं पावनमुच्चरन्तः पतिं पशूनां हृदि भावयन्तः ।
भिक्षाशिनो दिक्षु परिभ्रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ ५ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशङ्कराचार्य्यविरचितं कौपीनपञ्चकं समाप्तम् ।

विषयः । सन्न्यासिभिः सर्व्वदा वीतरागैर्भवितव्यमित्युपदेशकथनं ।

No. 2666. चमत्कारचिन्तामणिः, अन्वयार्थदीपिकासहितः । Substance, country-made paper, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 29. Lines, 8--10 on a page. Extent, 705 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, verse; commentary, prose. Incorrect.

Chamatkára-chintámaṇi, with a commentary entitled *Anvayártha-dípiká*. On horoscopy. Text, by Náráyaṇa Áchárya; commentary by Dharmeśvara.

Beginning. टीकायाः,—

अथ लग्नभावकुण्डलिकायां जातकोक्तभावफलज्ञानाय चमत्कारचिन्तामणिं विवक्षुर्नारायणाचार्य्यः प्रारिप्सितनिर्विघ्नसमाप्त्यर्थं श्रीकृष्णप्रणामरूपं मङ्गलाचरणं शिष्यशिक्षायै निबध्नाति लसत्पीतपट्टाम्बरं कृष्णचन्द्रं मुदा राधया--इत्यादि ।

मूलस्य,—

क्वणत्किङ्किणीजालकोल्लाहलाढ्यं लसत्पीतवासोवसानं चलन्तं ।
यशोदाङ्गणे योगिनामप्यगम्यं भजेऽहं मुकुन्दं घनश्यामवर्णं ॥ इत्यादि ।

End. मूलस्य,—

शिखी + च गावो + गुञ्जाङ्घ्रिनेचे रजा पीड़नं मातुलाग्ने + + मे ।
सदा राजराजतुल्यं नरं सद्यथं तद्रिपूणां विनाशं रणेऽसौ करोति ॥ इति ।

टीकायाः,—

अन्येनैव समर्था भवन्ति—इति विशेषः ।

चमत्कारचिन्तामणेश्चारुटीकां चकारान्वयार्थप्रबोधप्रदीपां ।

सुदेवज्ञधर्म्मेश्वरो मालवीयः प्रमोदाय भूदेवविद्वज्जनानां ॥

Colophon. इति श्रीचमत्कारचिन्तामणेरन्वर्थदीपिकायां ग्रहभावफलाध्यायः ।

विषयः । ग्रहाणां भावविशेषेषु जातस्य शुभाशुभफलकीर्त्तनम् ।

No. 2667. पवनपावनप्रयोगः । Substance, country-made paper, 8 × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 82 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Pavana-pávana-prayoga. Rules for performing the rite called *Pavana-pávana*. Anonymous.

Beginning. ॐ देशकालौ सङ्कीर्त्य पवनपावनसङ्कैराख्यानं पावयिष्ये । अथाचार्य्य ऋत्विग्यजमानैः सह एकविंशतिदर्भपिञ्जूलान्यादाय सप्तभिः सप्तभिः पवयति—इत्यादि ।

End. यचेदं ब्रह्म क्रियते परिधिर्जीवनायकमपनः शोशुचद्घं । पुरुषसूक्तं पठित्वा ॥

Colophon. इति पवनपावनः समाप्तः ।

विषयः । पवनपावनशान्तिप्रयोगकथनं ।

No. 2668. मेघमाला वा रत्नमाला, मयूरचित्रप्रकरणम् । Substance, country-made paper, 9½ × 4 inches. Folia, 12 Lines, 10 on a page. Extent, 563 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Meghamálá ALIAS **Ratnamálá,** ALIAS **Mayúrachitra-prakaraṇa.** Aeromancy, or divination from appearances in the air and clouds. Anonymous.

Beginning. अथातः संप्रवक्ष्यामि फलं योगसमुद्भवं ।
मासवारतिथीनाञ्च सम्यग्ज्ञानप्रकाशकं ॥

प्रतिपदि रविवारश्चैत्रमासे यदि स्यान्न भवति वडवहिर्दुःखिता लोकसङ्घाः । अमृतकिरणवारो + + + वाक्पतीनां भवति ननु धरित्री शस्यतोयाभिपूर्णा । इत्यादि ।

End. गुरुशुक्रस्तथा चन्द्रो यै ते वारो यदा भवेत् ।
सुभिक्षं जायते नित्य उत्साहस्य गृहे गृहे ॥

विषयः । मासतिथिवारविशेषे मेघादिदर्शनेन भाविवर्षणादिज्ञानकथनं सुभिक्षदुर्भिक्षादिपूर्व्वलक्षणकथनञ्च ।

No. 2669. उद्धारकोशः वा कोशध्याननिर्णयः । Substance, country-made paper, 5 × 2¾ inches. Folia, 68. Lines, 7 on a page. Extent, 526 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Uddhára-kośa ALIAS **Kośadhyána-nirṇaya.** The secret mantras of the ten great goddesses, *Mahávidyás,* and their attendants. By Dakshiṇámúrti Muni. Secret mantras are usually divided into two classes; 1. *V'ija mantras* or mystic syllables which are alleged to have the inherent power of insuring the grace of the god or goddess to whom they are addressed; 2nd, *dhyána* or stanzas which describe the personal forms in which the divinities are to be reflected upon. Meanings of both these classes of mantras are explained in the work. This seems to be a separate recension of No. 2343 of Vol. VII, p. 114.

Beginning. उद्धारकोशेपयोगी उद्धारकोशोक्तो मन्त्रप्रकाशः । श्रीं० ह्रीं० क्लीं० ऐं० सौं० ॐ ह्रीं० श्रीं० क्लीं० ५५४६४ सौं० ऐं० क्लीं० ह्रीं० श्रीं० इति चिपुर्य्याः । इत्यादि ।

End. उभौ तावम्बिका देवी देवेशस्यन्द्रशेखरः ।

Colophon. इति श्रीदक्षिणामूर्त्तिमुनिविरचिते उद्धारकोशे सकलागमसारे षोड़श-देवीसप्तकुमारनवग्रह — — — ध्याननिर्णयो नाम सप्तमःकल्पः ।

विषयः । दशमहाविद्यामन्त्रोद्धारविधिकथनं । तत्सखीनां तत्परिवाराणाञ्च मन्त्रोद्धारादिकथनं । दशमहाविद्यादीनां ध्यानकथनञ्च ।

No. 2670. केशवीशिक्षाव्याख्या, मूलसहिता । Substance, Foolscap paper, 8 × 6½ inches. Folia, 9. Lines, 10 on a page. Extent, 156 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Keśaví-śikshá-vyákhyá. A commentary on the Keśaví-śikshá, a treatise on Phonology of the Mádhyandiní Sákhá of the Yajur Veda. Anonymous. The last has been noticed under No. 1238, and a commentary under No. 1340 (*ante* Vol. III. pp. 204—340).

Beginning. अथातो अथातः केशवीशिक्षां व्याख्यास्यामः

नत्वा गणपतिं वेदपरिभाषाङ्गसूचकं ।
उच्यते केशवेनेदं वेदाध्यायिसुखाप्तये ॥

तत्रादौ वेदपरिभाषाया अङ्गानां नवानां सूचाणां मध्ये येन सूचेण इत्यादि ।

End. ह्रस्वोदात्तादिभिर्भेदैर्ह्रस्व + स्वरलक्षणं ।
शिक्षादिभिः षड़ङ्गैश्च विज्ञेयं वेदपाठकैः ॥

Colophon. इति केशवकृतकारिका समाप्ता ।

विषयः । यजुर्व्वेदमाध्यन्दिनीशाखीयशिक्षायाः केशवनिर्म्मिताया व्याख्यानम् ।

No. 2671. बुधस्मृतिः । Substance, country-made paper, 8 × 7½ inches. Folia, 2. Lines, 10 on a page. Extent, 30 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Budha Smriti. An original text of the Smritis. By Budha. Contents: Nature of religious duty, investiture with the sacred cord, investiture with the sacred cord made of deer skin, the use of the Gáyatrí, marriage, qualities of brides, the sacrament of conception, domestic duties, acceptance of alms, profession, asceticism, hermitage, and duties of kings.

Beginning. अथातो बुधधर्म्मशास्त्रं व्याख्यास्यामः । श्रेयोऽभ्युदयसाधनो धर्म्मः । गर्भाष्टमे ब्राह्मणो वसन्त आत्मानमुपनयेत् । एकादशे क्षत्रियो ग्रीष्मे । इत्यादि ।

End. गृहीत्वा देवब्राह्मणपूजनं । एवं कुर्व्वन् दृष्टमदृष्टञ्च लभेतेति ।
इति बुधप्रोक्तं धर्म्मशास्त्रम् ।

Colophon. इति श्रीबुधप्रोक्ता बुधस्मृतिः समाप्ता ।

विषयः । धर्म्मलक्षणकथनं । उपनयनविधिकथनं । मेखलाजिनादिधारणविधिकथनं । सावित्रीवेदव्रतादिविधिकथनं । उद्वाहविधिकथनं । कन्यानिरूपणं । गर्भाधानादिविधिकथनं । गृहकर्म्मविधिकथनं । प्रतिग्रहादिविधिकथनं । वृत्तिनिरूपणं । वानप्रस्थविधिकथनं । पारिव्रज्यविधिकथनं । राजधर्म्मकथनञ्च ।

No. 2672. स्वराङ्गुशः, (सटीकः) । Substance, country-made paper, 8 × 7 inches. Folia, 13. Lines, 10 on a page. Extent, 243 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, verse; Commentary, prose. Incorrect.

Svaráṅkuśa, with a commentary. A treatise on the intonation of the Ṛig Veda according to the school of Áśvaláyana. By Jayanta Svámí. This work has been already noticed under No. 1235 (III, p. 202) but the commentary attached to this codex is new.

Beginning. हेरम्बं चण्डिकां नत्वा शम्भुं सूर्य्यं हरिं गुरुम्।
सरस्वतीं कविवरान् वक्ष्येऽहं स्वरनिर्णयम्॥

अहं जयन्तस्वामी स्वरनिर्णयं वक्ष्ये इत्यन्वयः। स्वराणां स्वरेषु स्वरैर्वा निर्णयस्तं। इत्यादि।

End. जयन्तस्वामिना प्रोक्ता श्लोकानामेकविंशतिः।
स्वराङ्कुशेति विख्याता वह्वृचां स्वरसिद्धये॥

स्पष्टोऽर्थः। वह्वृचस्वरसिद्धये इत्यपि क्वचित्—तदा तु षष्ठीतत्पुरुषः कर्त्तव्यः। प्रकृतशब्दस्वाकारान्तो बोध्यः। वह्वृचा आश्वलायना इत्यर्थः। स्वरसिद्धिस्तच्च तत्साधनिकेति बोध्यम्।

Colophon. इति श्रीस्वराङ्कुशः समाप्तः।

विषयः। आश्वलायनीयऋक्संहितायां,—उदात्तानुदात्तस्वरितस्वराणामवान्तरभेदकथनपूर्व्वकं तत्तत्स्थाननिरूपनादिकथनं।

No. 2673. तर्ककौमुदी। Substance, country-made paper, 11 × 6 inches. Folia, 13. Lines, 16 on a page. Extent, 468 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Tarka-kaumudí. Explanations of the categories of the Vaiśeshika system. By Laugákshí-bháskara. Hall's Contributions, p. 78.

Beginning. श्रीवासुदेवं नवनीरदाभं रमाधरालङ्कृतपार्श्वभागम्।
मत्स्यादिरूपैः कृतलोकतोषं विद्यानिदानं परमं नमामि॥
अक्षपादमुनिं नत्वा कणादञ्च ततः परम्।
लौगाक्षिणा भास्करेण तन्यते तर्ककौमुदी॥

तत्राभिधेयाः पदार्थास्ते च द्रव्यगुणकर्म्मसमवायसामान्यविशेषाभावाः सप्तैव। तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। इत्यादि।

End. विद्वाङ्करशर्म्मा + बालव्युत्पत्तिसिद्धये।
यथाक + दिसिद्धान्तामकरोत् तर्ककौमुदीम्॥

Colophon. इति तर्ककौमुदी समाप्ता।

विषयः। द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावानां वैशेषिकोक्तपदार्थानां स्वरूपादिनिरूपणम।

No. 2674. काव्यामृततरङ्गिणी, (काव्यप्रकाशखण्डनम्।) Substance, country-made paper, 10 × 4 inches. Folia, 9. Lines, 11 on a page. Extent, 365 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Kávyámṛita-taraṅginí ALIAS **Kávya prakáśa-khaṇḍana,** A criticism on the 7th book of Mammaṭa Bhaṭṭa's Kávyaprakáśa, a treatise on rhetoric. The codex is incomplete, and the author's name has not been made out.

Beginning. (अथ काव्यामृततरङ्गिणी प्रारभ्यते।)

कमपि प्रतिबन्धमन्धंकरणमल्लङ्कारदत्तचित्तानाम्।
तोषाय तार्किकाणां करवैखरवैरिणं नत्वा॥
परररचितकाव्यकण्टकखण्डनशततताण्डवं कुर्म्मः।
कवयो + + कटा खेरं खेलन्तु काव्यगहनेषु।

तत्रादावनुवादपूर्व्वकं काव्यखण्डनमारभ्यते। नियतीति। नियतिरदृष्टं—इत्यादि।

End. अत्र जन्तुपदमदाहृते प्रयुक्तं तच्च नाभिधायकमिति। तदपि न चारु तात्पर्य्यानुपपत्त्या लक्षणया—इत्यतः खण्डितम्।

विषयः। मम्मटभट्टकृतकाव्यप्रकाशस्य सप्तमोल्लासीयकियदंशपर्य्यन्तं दोषप्रदर्शनेन खण्डनम्।

No. 2675. विवरणप्रमेयसङ्ग्रहः। Substance, country-made paper, 14 × 3 inches. Folia, 137. Lines, 8 on a page. Extent, 3,510 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vivaraṇa-prameya-saṅgraha. A different recension of the work noticed under No. 48, Vol. I, p. 28.

Beginning. आत्मा श्रोतव्य इत्यस्य विधेर्वेदान्तवाक्यतः।
विचारो विषयः साक्षात् स निरूप्योऽत्र वर्णके॥
वेदान्तव्यवधानेन ब्रह्मैक्यं विषयो विधेः।
निरूपितः स पूर्व्वस्मिन् वर्णके स प्रयोजनः॥
वेदान्ता यदि मूर्ख्याः स्युर्विषयेण फलेन च।
तदा दूरे तद्विचारोऽतस्तयोः पूर्व्वमीरणम्॥
सम्भाविते विचारेऽथ पूर्व्वमीमांसया + +।
गते न वेति सन्देहे निर्णयोऽत्राभिधीयते॥

अनु वेदात्मानामर्थनिर्णयाय न्यायकलापोऽपेक्षितः। स च अथातो धर्मजिज्ञासेति सूत्रैः स + तः। न च विधिवाक्यार्थमात्रस्य तत्र निर्णयः प्रस्तुतः—इत्यादि।

End. यद्विद्यातीर्थगुरोः शुश्रूषान्या न रोचते तस्मात्।
अस्त्येषा भक्तिफला श्रीविद्यातीर्थपादयोः सेवा॥

Colophon. इति श्रीविवरणप्रमेयसङ्ग्रहे चतुर्थस्कन्धे द्वितीयवर्णकं समाप्तं।
समाप्तश्चायं विवरणप्रमेयसङ्ग्रहः।

विषयः। (प्रथमं खण्डितम्।) आत्मा वा अरे श्रोतव्य इत्यादिविधिविमर्शनमुखेन कृत्स्नवेदस्य विधिमात्रपरत्ववादनिरसनं। उत्तरमीमांसाया आरम्भप्रयोजनकथनप्रसङ्गेन पूर्वमीमांसायाः क्रमेण द्वादशाध्यायविवरणकथनं। विधिस्वरूपादिविवेचनं। वेदलक्षणादिनिरूपणं। तत्प्रामाण्यकथनं। पूर्वमीमांसायां शरीरेन्द्रियसाध्या विधिभेदा निरूपिताः। उत्तरमीमांसायान्तु मानससाध्यो विधिभेदो निरूपित इति तयोः पौर्वापर्यसामञ्जस्यकथनं। ब्रह्मसूत्रचतुःसूत्र्यां शाङ्करमतेन पदार्थनिरूपणञ्च।

No. 2676. दमयन्तीकथाविवृतिः। Substance, country-made paper, 14 × 5 inches. Folia, 370. Lines, 11 on a page. Extent, 9,640 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñha, Bahádur. Appearance, old. Prose. Generally correct.

Damayantí-kathá-vivṛiti. A commentary on Trivikrama Bhaṭṭa's romance called Damayanti-kathá. By Guṇavinaya-Gaṇi, disciple of Jayasoma Gaṇi, who was a disciple of Pramodamáṇikya Gaṇi. See No. 68, Vol. I, p. 38, or No. 1412, Vol. IV, p. 33.

Beginning. ध्यात्वा सरस्वतीं देवीं विबुधानन्ददायिनीं।
सुवर्णां पूर्णरूपां तां — — — — — तां।
— — — — — — — — — — — —॥
कियत्प्रदानां यद्यप्यनिन्द्यां विवृतिं चकार।
तथापि तच्छेषपदार्थसार्थतां प्रकाशनात् तां विवृणोमि चम्पूं॥

क्वचित्पुरे वरेण्ये पुण्यमतिभाक् द्राक्प्रबोधितसकलशास्त्रोपनिषत्कमलो विमलो ध्वस्तसमस्ततमःप्रसर आदित्य इव नेमादित्यो द्विजो बभूव। तस्य सुतः विविक्रमः समजनिष्ट गरिष्ठः अन्यदा हि स्वपितरि स्वबन्धुविवाहादिप्रयोजने बहिर्ग्रामं गते समाजगाम मतिमान् कश्चिदपरस्तत्पुरे विद्वान्। तेन + + + न्वेषिणावसरं प्राप्य सदसि प्रोचे, राजन् मया सार्द्धं न कोऽपि वादं कर्तुमलं। यदि पुनः श्रीमतां पुरे कश्चिद् विपश्चित् स्यात् तदा मया सह सम-

ज्ञात् कृतप्रतिपक्षवादो वादः कार्य्यतां — — — — — — शङ्करमेव स्तुवन्नाह—जयती-त्यादि। चन्द्रमौलिः सुधांशुशेखरः जयति। इत्यादि।

End. मैत्रीमुखपुनरवलोकने च सङ्गो विद्यते यस्यासौ उभयसङ्गी। अत इति ठनाविनीनिमैलर्थे। ग्रन्थान्तरे अतिविद्गध इति पाठः स च स्पष्ट एव॥

Colophon. इति वाचनाचार्य्यश्रीमच्छ्रीप्रमोदमाणिक्यगणिशिष्यश्रीजयसोमगणिच्छिष्यपण्डितश्रीगुणविनयविरचितायां श्रीविविक्रमभट्टविरचितदमयन्तीकथाविवृतौ सप्तम उच्छ्वासः समाप्तः।

विषयः। विविक्रमभट्टकृतदमयन्तीकथाभिधानचम्पूकाव्यस्य व्याख्यानम्।

No. 2677. क्षेत्रसमासटीका। Substance, country-made paper, 12 × 5 inches. Folia, 174. Lines, 16—17 on a page. Extent, 9,126 ślokas. Character, Nágara. Date, Sm. 1700. Place of deposit, Ajimganj, Ráya Dhanapat Siñha, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

Kshetra-samása-ṭíká. A commentary on the *Kshetra-samása*, a treatise on mensuration by Jinabhadra Gaṇi. By Malaya Giri. This is distinct from No. 2640, *ante*, p. 101.

Beginning. जयति जिनवचनमवितथमभितगभीरार्थमखिलनयकलितं।
अजितं परतीर्थिगणैः शिवसुखफलदायि परमशिवं॥
कलिकालेऽपि यथास्थितजिनसिद्धान्तप्रकाशकरणेन।
जयति भरतैकदीपो जिनभद्रगणिः क्षमाश्रमणः॥
विदधेऽभि यथाशक्ति क्षेत्रसमासं समासतः स्पष्टं।
यद्वगतौ मन्दा अपि जायन्ते श्रुतविदः परमाः॥

इह जिनभद्रगणिः क्षमाश्रमणो मन्दमेधसामवबोधाय सकलजम्बूद्वीपप्रज्ञप्त्यादिशास्त्रसंक्षेपसमुद्धर्तुकामः अविघ्नेनेष्टप्रसिद्ध्यर्थमिष्टदेवतानमस्कारं प्रेक्षावतां प्रवृत्त्यर्थमभिधेयादिकं च प्रतिपादयिषुरिदमाह नमिउण—इति।

End. यदगदितमल्पमतिना जिनवचनविरुद्धमत्र टीकायां।
विदुषां सूक्ष्मधियां प्रसादमाधाय तत् शोध्यं॥
इममतिगभीरतरं क्षेत्रसमासं विवृण्वता कुशलं।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः॥

Colophon. इति श्रीमलयगिरिविरचितायां क्षेत्रसमासटीकायां पुष्करवरद्वीपसमुद्रपक्षमोऽधिकारः समाप्तः। संवत् १७००

विषयः। जिनभद्रगणिकृतक्षेत्रसमासाभिधानग्रन्थस्य व्याख्यानम्।

No. 2678. नन्द्यध्ययनटीका। Substance, country-made paper, 14 × 5 inches. Folia, 78. Lines, 22 on a page. Extent, 7,672 ślokas. Character, Nágara. Date, Sm. 1498. Place of deposit, Ajimganj, Ráya Dhanapat Siñha, Bahádur. Appearance, old. Prose. Generally correct.

Nandyadhyayana-ṭíká. A commentary on a treatise for the performance of the rite called Nandyadhyayana. By Malaya Giri.

Beginning. जयति जगदे + + + + + म + + त तिमिरं।
रविविम्ब + + + + स्थित परि + + काशं जिनेश्वचः।

इह सर्व्वे+सार + + न जन्तुना नरकतिर्य्यङ्नरामरगतिनिबन्धनविविधशरीर-मानसानेकदुःखोपनिपातपीड़ितेन (पीड़ानिर्व्वेदतः) संसारपरिजिहीर्षया जन्मजरामरण-रोगशोकाद्यशेषापद्रवासंस्पृष्टपरमानन्दरूपनिःश्रेयसपदमधिरोढुकामेन तदवाप्तये स्वपरसम-मानसीभूय स्वपरोपकाराय यतितव्यं। तचापि महत्याभाशयविशुद्धौ परोपक्रतिः कर्त्तुं शक्यते, इत्याशयविशुद्धिप्रकर्षसम्पादनाय विशेषतः परोपकारे यत्न आस्थेयः। परोपकारस्य द्विधा। द्रव्यतो भावतश्च। तत्र द्रव्यतो विविधान्नपानधनकाञ्चनप्रदानादिजनितः। इत्यादि।

End. वक्तृधर्मल्पशब्दं नन्द्यध्ययनं विदुता कुशलं।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः॥
अर्हन्तो मङ्गलं मे स्युः सिद्धाश्च मम मङ्गलं।
साधवो मङ्गलं सम्यक् जैनो धर्म्मश्च मङ्गलं॥

Colophon. इति श्रीमलयगिरिसूरिविरचिता नन्द्यध्ययनटीका समाप्ता। संवत् १४९८।

विषयः। नन्द्यध्ययनसूत्रस्य व्याख्यानम्।

No. 2679. समयसारप्रकरणम्। Substance, country-made paper, 13 × 5 inches. Folia, 9. Lines, 11 on a page. Extent, 268 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanspat Siñha, Bahádur. Appearance, new. Prose. Incorrect Mágadhí.

Samayasára-prakaraṇa. An epitome of Jain metaphysics. Anonymous.

Beginning. संघं नुमोक्खमक्खंति च उवं गामि उत्तमं।
सुद्धंज उतिवं गामि दिद्धं ए गतिचं नङ॥
धम्माउ हेमणि उलोपमं जीवासमच्छिउ०।
पुण्यकम्म भरे+०ति सुद्धाभासेण गच्छिया॥ इत्यादि।

End. लोकाणदेव वंदव्व हियापउ महाजिणे ॥
देवाणंद समुद्द देउसयं सिवं दिउ ॥

Colophon. इअ आराहणाविराहणाणलिङ्गवणोनाम समयसारस्स दसमो अच्छाउ। इति समयसारप्रकरणं समाप्तं।

विषयः। संक्षेपेण जीव-अजीव-आस्रव-सम्वर-बन्ध-निर्जर-मोक्षरूपसप्तपदार्थनिरूपणं। तीर्थसिद्धादिनिरूपणञ्च।

No. 2680. प्रक्रियाभूषणम्। Substance, country-made paper, 11 × 6 inches. Folia, 61. Lines, 15 on a page. Extent, 2108 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Rayá Dhanapat Siñha, Bahádur. Appearance, new. Prose. Incorrect.

Prakriyá-bhúshaṇa. An elementary grammar of the Sanskrit language. By Śrínivásadása.

Beginning. श्रीशं नत्वा गुणावासं क्रियते मुग्धसंविदे।
श्रीश्रीनिवासदासेन प्रक्रियाभूषणं गिरः ॥

अ इ उ ऋ ऌ समानाः। अनेन क्रमेणैते वर्णा ज्ञेयास्ते च समानसंज्ञाः स्युः। नैतेषु ह्रस्वेषु सन्धिः अविवक्षितत्वात्। विवक्षितस्तु सन्धिः स्यात्। इत्यादि।

End. लोकाच्छेषस्य सिद्धिर्ज्ञेया। यथामान्नरादेः ॥
+ + रामानुजाचार्य्यसमाश्रयणशालिना।
श्रीश्रीनिवासदासेन प्रक्रियाभूषणं कृतं ॥
मुग्धज्ञानोदयायेदं मोदाय च मणीषिणां ॥
यदत्र नास्ति विद्वद्भिस्तं लोकेष्ववगम्यतां।

Colophon. इति श्रीश्रीमन्नारायणचरणनलिनद्विरेफाणां प्रतिवादीभकेशरिणां श्रीमद्वेङ्कटाचार्य्याणां चरणारविन्दभ्रमरायमाणमानसेन श्रीश्रीनिवासदासेन कृतं प्रक्रियाभूषणं समाप्तम्।

विषयः। बालानां सुखबोधाय संक्षेपेण सोदाहरणव्याकरणप्रक्रियाकथनम्।

No. 2681. शीलचम्पकमाला। Substance, country-made paper, 12 × 5 inches. Folia, 16. Lines, 8 on a page. Extent, 384 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñha Bahádur. Appearance, fresh. Verse. Incorrect Sanskrit.

Síla-champakamálá. On good behaviour, illustrated by a story of one Lalitáṅga, king of Vitala. Anonymous.

Beginning. दानं निर्द्रविणे भूत्वा नाराद्धुं किल शक्यते ।
वाच्यहेलनपेचं तत् तच्छीलं परिशीलयतां ॥
भो भव्या भवपाथोधेः परं कूलं यदीप्सवः ।
समाश्रयत तच्छीलं पोतज्ञाननियामकं ॥ इत्यादि ।

End. दिग्दारिकमेदभिन्निगदितं यस्मै धनं +द्वचः
कायेसन्न करोति कारयति नो नो वानुजानाति च ।
इत्यष्टादशभेदमिन्दुविमलं यो ब्रह्म धत्ते दृढं
सोत्कण्ठं स्वमुखश्रिया परमया धीमांस्तमेवाऽन्विष्यतां ॥

Colophon. इति श्रीशीलचम्पकमाला समाप्ता ।

विषयः । साधुशीलस्य प्रशंसाकथनपूर्व्वकं शीलमेव परम्परया निर्व्वाणप्राप्तिनिदानमितिनिरूपणं । अत्र विशालनगराधिपतेः ललिताङ्गाभिधेयस्य नरपतेरुपाख्यानकीर्त्तनं ।

No. 2682. मूत्रपरीक्षा । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 26 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect. Sanskrit.

Múttra-parikshá. On the diagnosis of disease by the examination of the urine of the patient, and the various processes to be followed in making such examination. Anonymous.

Beginning. श्रीमत्पार्श्वजिनाधीशं केवलज्ञानभास्करं ।
प्रणम्य हृदये ध्यात्वा वक्ष्ये मूत्रपरीक्षणं ॥
गृहीत्वा रोगिणो मूत्रं सूर्य्यतापेषु धारयेत् ।
तस्य मध्ये क्षिपेत् तैलं तन्मूत्रस्य परीक्षणं ।
यदा विकाशमाप्नोति तदा साध्यं विनिर्द्दिशेत् ॥
विन्दुरूपेण मध्यस्थमसाध्यं परिकीर्त्तयेत् । इत्यादि ।

End. मूत्रमध्ये यदा तैलं नराकारं प्रजायते ।
यद्दोषं विजानीयाद्दोषादोषं तथैव च ॥
मूत्रेण दृश्यते तैलं मस्तकद्वयसंयुतं ।
+ + + तरयो दोषा ध्रुवं ज्ञेया विचक्षणैः ॥

Colophon. इति मूत्रपरीक्षा समाप्ता ।

विषयः । मूत्रपरीक्षणेन रोगस्य साध्यासाध्यत्वादिनिरूपणम् ।

No. 2683. अजीर्णमञ्जरी, वा अजीर्णरसमञ्जरी। Substance, country-made paper, 11 × 6 inches. Folia, 6. Lines, 7 on a page. Extent, 88 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Sanskrit. Generally correct.

Ajírṇa-maṇjarí ALIAS **Ajírṇa-rasamaṇjarí.** A treatise on dyspepsia and its treatment. Anonymous.

Beginning. श्रीमदायुर्व्वेदायणीं नमस्कृत्य ग्रन्थप्रारम्भे।

अजीर्णरसमञ्जरीयं वक्ष्येऽहं लोकसुखहेतोः॥

अजीर्णप्रभवा रोगास्तदजीर्णं चतुर्व्विधं।

आमः विपक्वं विष्टब्धं रसशेषं चतुर्थकं॥

आमे च सर्व्व उद्गारा विपक्वे उदरे व्यथा।

विष्टब्धे चाङ्गभङ्गः स्याद्रसशेषे विजृम्भिका॥ इत्यादि।

End. एतन्महाजीर्णविषापनोदा

आर्याचिरायाहृतमञ्जरीयं।

सत्यस्य + नन्दमयी + + ता

+ + दवैनामवधारयन्तु॥

Colophon. इत्यजीर्णमञ्जरी समाप्ता।

विषयः। अजीर्णजनितरोगविशेषकथनपूर्व्वकं तत्र तत्र भैषज्यविधानकीर्त्तनम्।

No. 2684. कालज्ञानम्, हिन्दीभाषाव्याख्यासहितम्। Substance, country-made paper, 11 × 5 inches. Folia, 20. Lines, 15 on a page. Extent, 675 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Sanskrit. Generally correct.

Kálajṇána, with a Hindí commentary. On prognosis and forecasting the issue of disease from the appearance of the fœces and the urine of the patient, and the character of his breath. Anonymous.

Beginning. कालज्ञानकलायुक्तं ग्रन्थज्ञानञ्च भाषितं।

येन षण्मासतः पूर्व्वं ज्ञायते मृत्यू रोगिणः॥

कालः हजति भूतानि कालः संहरते प्रजाः।

सुप्तेषु जागर्त्ति कालः कालो हि दुरतिक्रमः॥

काले देवा विनश्यन्ति काले चासुरपन्नगाः।
नरेन्द्राः सर्व्वे जीवाश्च सर्व्वं काले विनश्यति ॥ इत्यादि।

End. षड्ङ्गकं धनुश्चक्रं मूचे नैलच्च दृश्यते।
एकद्विचिचतुष्कच्च क्रमाच्चायेन मृत्युदं ॥
षेतोत्यलं यदा मूचे दृश्यते परिवेष्टितं।
चिकित्सा तस्य कर्त्तव्या कथिता वज्रजामले ॥

Colophon. इति कालज्ञानं सम्पूर्णम्।

विषयः। निःश्वासमलमूत्रादिपरीक्षया रोगिणो जीवितकालं निर्णीय शुभाशुभलक्षण-कथनपूर्व्वकं चिकित्साविधानकथनं।

No. 2685. श्रीतपागच्छपट्टावलीसूत्रम्, वृत्तिसहितम्। Substance, country-made paper, 12 × 4 inches. Folia, 19. Lines, 15 on a page. Extent, 855 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Text, in Mágadhí verse. Commentary, in Sanskrit prose. Incorrect.

Tapágachchha-paṭṭávalí-sútra, with a gloss. Genealogy of the successive chief priests of the Tapágachchha sect of the Jains, from the time of Vardhamána Jina to that of the Emperor Akbar. The text is in the Mágadhí language, the gloss, by Dharmaságara Gaṇi, is in Sanskrit.

Beginning. टीकायाः,—

अथ गुरुपरिपाटीकथनाय सङ्गतिमाह सिरिमंतेा त्ति। यतदेार्नित्याभिसम्बन्धात् येन कारणेन श्रीमान् सत्रीकः इत्यादि।

मूलस्य,—
सिरिमंतेा सुखहेउ गुरुपरिवाड़ीइत्था गउसंतेा।
पजोसवणकप्पो वाइ जेण तेा तं वुत्थं ॥
गुरुपरिवाड़ीमूलं तित्थयरो वड्ढमाणणामेणं।
नप्पट्ठोदयपट्टमो सुहम्मणामेण गणसामी ॥ इत्यादि।

End. मूलस्य,—
सिरि + + विजयसेनसूरिप्पमुहेहिं णेगसाऊवग्गेहिं।
परिकलिया पुहविचले विहरंतादिसउमे भद्दं ॥
टीकायाः,—
विजयसेनसूरिप्रभृत्यनेकसाधुभिः परिकलिताः पृथिवीतालविहारं कुर्व्वाणा मे मम भद्रं प्रयच्छतु।

Colophon. इति श्रीपट्टावलीसूत्रम्।

इति महोपाध्यायश्रीधर्म्मसागरगणिविरचिता श्रीतपागच्छपट्टावलीसूत्रवृत्तिः समाप्ता।

विषयः। तपागच्छसम्प्रदायानां वर्द्धमानजिनेश्वरादारभ्य तद्वंशजानाम् अकब्बरनरपतिसमसामयिकश्रीहरिविजयसूरीणां निर्व्वाणाधिगमं यावत् गुरुपरम्पराणां नामधामकर्म्मजीवितकालादिकीर्त्तनम्। तच्च तेषां क्रमेण नामानि यथा,—वर्द्धमानस्य शिष्यः सुधर्म्मास्वामी। एवं जम्बूस्वामी, प्रभवस्वामी, शय्यम्भवस्वामी, यशोभद्रस्वामी, सम्भूतविजयस्वामी, स्थूलभद्रस्वामी, आर्य्यमहागिरिः, आर्य्यसुहस्ती, इन्द्रदिन्नसूरिः, दिन्नसूरिः, सीहसूरिः, वज्रस्वामी, वज्रसेनः, चन्द्रसूरिः, सामन्तभद्रसूरिः, वृद्धदेवसूरिः, प्रद्योतनसूरिः, मानदेवसूरिः, मानतुङ्गसूरिः, वीरसूरिः, जयदेवसूरिः, देवानन्दसूरिः, विक्रमसूरिः, नरसिंहसूरिः, समुद्रसूरिः, मानदेवसूरिः, विबुधप्रभसूरिः, जयानन्दसूरिः, रविप्रभसूरिः, यशोदेवसूरिः, प्रद्युम्नसूरिः, मानदेवसूरिः, विमलचन्द्रसूरिः, उद्योतनसूरिः, सर्व्वदेवसूरिः, देवसूरिः, सदेवसूरिः, यशोभद्रसूरिः, नेमिचन्द्रसूरिः, मुनिचन्द्रसूरिः, जिनदेवसूरिः, विजयसिंहसूरिः, सोमप्रभसूरिः, जगच्चन्द्रसूरिः, देवेन्द्रसूरिः, धर्म्मघोषसूरिः, सोमप्रभसूरिः, सोमतिलकसूरिः, देवसुन्दरसूरिः, सोमसुन्दरसूरिः, मुनिसुन्दरसूरिः, रत्नशेखरसूरिः, क्षीरसागरसूरिः, सुमतिसाधुसूरिः, हेमविमलसूरिः, आनन्दविमलसूरिः, विजयदानसूरिः, हीरविजयसूरिः, हरिविजयसूरिश्चेति।

No. 2686. गौतमप्रश्नावली, सुखबोधिकावृत्तिसहिता। Substance, country-made paper, 11 × 4 inches. Folia, 66. Lines, 8 on a page. Extent, 1,572 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráy Dhanapat Siñh, Bahádur. Appearance, fresh. Text, in Magadhí, verse. Commentary, in Sanskrit. Incorrect.

Gautama-praśnávali, with a gloss entitled *Sukha-bodhiká-vṛitti*. A dialogue between Vardhamána and Gautama in course of which the former explains to the latter the causes of birth, death, disease, health, prosperity, fortune and misfortune, caste, personal defects and excellences, loss of children, and all the other accidents of existence, as also the means of release from such accidents. Each topic is illustrated by one or more anecdotes. The text is by Jinaharsha Súrí. The gloss, by Matevardhana, was completed in the year, 1737.

Beginning. टीकायाः,—

वीरजिनं प्रणम्यादौ बालानां सुखबोधिका ।
श्रीमद्गौतमप्रश्नाख्याः क्रियते वृत्तिरद्भुता ॥

मूलस्य,—
नमिऊण तित्थणाहं जाणंतो तह गोयमो भयवं ।
अवूहाण वोहणत्थं धम्माधम्मफलं वक्खे ॥ इत्यादि ।

End. मूलस्य,—
अठयालिस पुन्नत्तरेहिं गाहाणं होइ चउसट्ठी ।
संखेवेणं भणिया गोयम पुच्छामहा + वे ॥ इति ।
अथ टीकायाः,— — —
अतः भव्यलोकैरियं गौतमप्रश्नावली पठनीया श्रोतव्या । इति ।
श्रीजिनहर्षसूरीणाः सुशिष्याः पाठकारकाः ।
श्रीमत्सुमतिसिंहाश्च मच्छिष्येमैनिवर्द्धनैः ॥
पाठकपदसंयुक्तैः कृता चेयं कथालिका ।
श्रीमद्गौतमप्रश्नाख्याः सुगमा सुखबोधिका ॥
सिन्धौ रामे मुनौ चन्द्रे वर्षेऽस्मिन् मार्गशीर्षके ।
श्रीमत्यां जगतारिण्यां नगर्य्यां + शुभे दिने ॥

Colophon. इति गौतमप्रश्नावल्याः सुखबोधिका वृत्तिः सम्पूर्णा ।

विषयः । गौतमं प्रति वर्द्धमानजिनस्य उपदेशकथनं । तच जीवस्य नरकप्राप्तिकारणकथनं । अच विविधाख्यानकौर्त्तनञ्च । एवं जीवस्य स्वर्गप्राप्तिनिदानकौर्त्तनं । अचापि विविधोपाख्यानकथनं । एवं परत्रापि । तस्य तिर्य्यक्त्वप्राप्तिहेतुकथनादिकं । मनुष्यत्वप्राप्तिहेतुकथनं । पुरुषत्वप्राप्तिहेतुकथनं । स्त्रीत्वप्राप्तिहेतुकथनं । नपुंसकत्वप्राप्तिहेतुकथनं । अल्पायुष्कप्राप्तिहेतुकथनं । दीर्घायुष्कप्राप्तिहेतुकथनं । अभोगित्वप्राप्तिहेतुकथनं । भोगित्वप्राप्तिहेतुकथनं । बुद्धिमत्ताप्राप्तिहेतुकथनं । दुर्बुद्धिप्राप्तिहेतुकथनं । मेधाप्राप्तिहेतुकथनं । पाण्डित्यप्राप्तिहेतुकथनं । मूर्खत्वप्राप्तिहेतुकथनं । भीरुत्वप्राप्तिहेतुकथनं । धीरत्वप्राप्तिहेतुकथनं । विद्यावत्त्वप्राप्तिहेतुकथनं । साफल्यप्राप्तिहेतुकथनं । अर्थनाशहेतुकथनं । अर्थागमहेतुकथनं । लक्ष्मीस्थैर्य्यहेतुकथनं । पुत्रनाशहेतुकथनं । बहुपुत्रलाभहेतुकथनं । बधिरताहेतुकथनं । जन्मान्धताहेतुकथनं । अजीर्णरोगप्राप्तिहेतुकथनं । कुब्जत्वहेतुकथनं । कुष्ठरोगप्राप्तिहेतुकथनं । दास्यप्राप्तिहेतुकथनं । दरिद्रताहेतुकथनं । ऐश्वर्य्यप्राप्तिहेतुकथनं । रोगित्वप्राप्तिहेतुकथनं । हीनाङ्गत्वहेतुकथनं । मूकत्वहेतुकथनं । हीनचरणत्वादिहेतुकथनं । वक्त्रवेदनाहेतुकथनं । वेदनाविमुक्तिहेतुकथनं । पञ्चेन्द्रियत्वप्राप्तिहेतुकथनं । एकेन्द्रियत्वप्राप्तिहेतु-

कथनं । संसारस्थैर्य्यहेतुकथनं । लोकसंसारत्वकथनं । कथं संसारसागरमुत्तीर्य्य जीवो सिद्धपुरं (मोक्षक्षेत्रं) प्राप्नोतीति तत्कारणकीर्त्तनञ्च ।

No. 2687. उपदेशमालाप्रकरणम् । Substance, country-made paper, 14 × 5 inches. Folia, 27. Lines, 11 on a page. Extent, 691 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur, Appearance, fresh. Verse. Incorrect. Mágadhí.

Upadeśa-málá-prakaraṇa. A summary of the religious duties of Jains. In Mágadhí. Anonymous. धर्मदास.

Beginning. णमिउण जिणवरिंदे इंदन रिंदच्चिए तिलोय गुरु ।
उव एस मालमिणाम वुच्छामि गुरुवए सेणं ॥
जगचूड़ामणि जिणो उस भो वीरो तिलोय सिरितिलउ ।
एगो लोगा दुव्वो एगोचरक्क तिउवणस्स ॥ इत्यादि ।

End. अक्खरमत्ताहीणं जं चिरपढ़ियं अणाण माणेणं ।
तं खमउ मज्झ सव्वं जिणवयण विणिग्गया वाणी ॥

Colophon. इति उपदेशमालाप्रकरणं समाप्तम् ।

विषयः । सम्यक्चारित्रदर्शनज्ञानस्वरूपनिरूपणपूर्व्वकं जिनवचनानां याथार्थ्यकथनं । जैनधर्म्मसंक्षेपकथनञ्च । इन्द्रभूतिनामानं गणधर—(आचार्य्यविशेषं) मुद्दिश्य वर्द्धमानजिनस्य जैनधर्म्मतत्त्वकथनं । तत्सारसङ्ग्रहेण विविधोपाख्यानयोजनपुरःसरं जैनानां कर्त्तव्यनिरूपणं । तच्च सर्व्वथा अहिंसैव सेवनीयेतिनिरूपणं । जीवाजीवादितत्त्वनिरूपणं । सम्यक्त्वादिकारण-निरूपणं । मोक्षमार्गोपदेशकथनञ्च ।

No. 2688. चतुर्व्विंशतिस्तुतिः । Substance, country-made paper, 14 × 5 inches. Folia, 16. Lines, 8 on a page. Extent, 344 ślokas. Character, Nágara. Date, ? Place of deposit, Ajinganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect. Sanskrit.

Chaturviñśati-stuti. Hymns in praise of the twenty-four Jinas, beginning with Rishabha, and ending with Vardhamána. The principal topics in the career of each of them are prominently noticed. By Chhapyabhaṭṭa Súri. The hymns are in Sanskrit.

Beginning. भव्याम्भोजविबोधनैकतरणे विस्तारिकर्म्मावली
रक्षासामजनाभिनन्दनमहानन्दापदाभास्करैः ।

भक्त्या वन्दितपादपद्मविदुषां सम्पादय + + ना
रक्षासामजनाभिनन्दनमहानष्टापदाभास्वरैः ॥
ते वः पान्तु जिनोत्तमाः चतरजो नाचिचिपुर्यन्मनो-
द्दाराविभ्रमरोचिताः सुमनसो मन्दारवाराजिताः ।
यत्पादौ च सुरोज्झिताः सुरभयाश्चक्रुःपतन्तोऽम्बरा-
द्दाराविभ्रमरोचिताः सुमनसो मन्दारवाराजिताः ॥ (?) इत्यादि ।

End. सिंहे सिंहेलयालः जयति खरनखैर्वीतनिष्ठे तनिष्ठे
शुक्ले शुक्लेशनाशं दिशति शुभशतो पण्डिते खण्डिते च ।
याते या तेजसाद्या तड़िदिव जलदे भाति धीरातिधीरा
पत्या पत्यापनी + न्मुदितसमपरार्द्धाधनं वा धनं वा ॥

Colophon. ऋषभदेवरिक्तता चतुर्विंशतिस्तुतिः समाप्ता ।

विषयः । यमकालङ्कृतश्लोकैः ऋषभदेवादारभ्य वर्द्धमानं यावत् चतुर्विंशतिजिनानां स्तोत्र्याजेन गुणानुकीर्त्तनम् ।

No. 2689. सिन्दूरप्रकरणम् । Substance, country-made paper, 13 × 5 inches. Folia, 13. Lines, 9 on a page. Extent, 236 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect. Sanskrit.

Sindúra-prakaraṇa. Instructions on Jain religious duties. By Somaprabhá Áchárya.

Beginning. सिन्दूरप्रकरस्पृषःकरिशिरःक्रोड़े कषायाटवी-
दावार्चिर्निचयः प्रबोधदिवसप्रारम्भसूर्योदयः ।
मुक्तिस्त्रीकुचकुम्भकुङ्कुमरसः श्रेयस्तरोः पल्लव-
प्रोल्लासः क्रमयोर्नखद्युतिभरः पार्श्वप्रभोः पातु वः ॥
सन्तः सन्तु मम प्रसन्नमनसो वाचां विचारोद्यता
स्तेऽम्भः कमलानि तत्परिमलं वाता वितन्वन्ति यत् ।
किं वाभ्यर्थनयाऽनया यदि गुणोऽस्त्यासां ततस्ते स्वयं
कर्त्तारः प्रथनं नचेदथ यशः प्रत्यर्थिना तेन किं ॥
त्रिवर्गसंसाधनमन्तरेण पशोरिवायुर्विफलं नरस्य ।
तचापि धर्म्मं प्रवरं वदन्ति न तं विना यद्भवतोऽर्थकामौ ॥ इत्यादि ।

End. ऋषभदजितदेवाचार्य्यपट्टोदयाद्रि-

श्रुमणिविजयसिंहाचार्य्यपादारविन्दे।
मधुकरसमतां यत्नेन सोमप्रभेण
व्यरचि मुनिपराज्ञासूक्तमुक्तावलीयं ॥

Colophon. इति श्रीमद्बृहच्छ्रमण्डनश्रीसोमप्रभाचार्य्यविरचितं सिन्दूरप्रकरणाख्यमुपदेशशास्त्रं समाप्तम्।

विषयः। धर्म्मसाधनस्य आवश्यकताकथनं। वैराग्यस्य अभ्यर्थितत्वकथनं। जिनार्च्चनमाहात्म्यकीर्त्तनं। तत्पूजाक्रमकीर्त्तनं। गुरुपसत्तिविधिकथनं। सङ्घस्यपूजाविधिकथनं। अहिंसामाहात्म्यादिकथनं। अव्रतनिन्दनं। खेयादिदूषणं। एवं क्रोधादिनिन्दाकीर्त्तनं। मानमायादिपरित्यागमाहात्म्यकथनं। सौजन्यप्रशंसाकीर्त्तनं। इन्द्रियदमावश्यकता। सम्यक्त्वस्यचञ्चलताकथनं। दानमाहात्म्यकथनं। तपोमाहात्म्यकथनं। भावनामाहात्म्यकथनञ्च।

No. 2690. सप्तव्यसनकथासमुच्चयम्। Substance, country-made paper, 13 × 6 inches. Folia, 122. Lines, 8 on a page. Extent, 2,501 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect. Sanskrit.

Saptavyasana-kathá-samuchchaya. Stories condemning indulgence in the seven vices of gambling with the dice, indulgence in flesh-meat, indulgence in spirituous drinks, whoredom, injury to others, theft and adultery. By Somakírti Áchárya, disciple of Somasena-deva Áchárya Bhaṭṭáraka.

Beginning. प्रणम्य श्रीजिनान् सिद्धानाचार्य्यान् पाठकान् यतीन्।
सर्व्वद्वन्द्वविनिर्म्मुक्तान् सर्व्वकामार्थदायकान् ॥
ननोऽपि शारदां देवीं कल्याणावलिवल्लरीं।
जिनेन्द्रवद्नोद्भूतां नत्वा भक्त्या प्रमोदतः ॥
गुरूणां चरणौ नत्वा वक्ष्ये बुद्ध्यनुसारतः।
सप्तानां व्यसनानां हि कथां भव्यहिताय वै ॥
द्यूतं मांसं सुरा वेश्या पापर्द्धिचौरिकास्तथा।
परस्त्रीगमनञ्चेति सप्तैव व्यसनानि हि ॥
एकैकव्यसनाभूता ये ये जीवा यथा परं।
दुःखं नानाविधं प्राप्तास्तांस्तान् वक्ष्ये विशेषतः ॥ इत्यादि।

End. सहस्रद्वयसंख्योऽयं सप्तषष्टिसमन्वितः।
सप्तैव व्यसनाद्यैश्च कथासमुच्चयं ततः। ? ।)

यावत् सुदर्शनो मेरुर्यावत्सागरभूधराः ।
तावन्नन्दत्वयं लोके ग्रन्थो भव्यजनार्चितः ॥

Colophon. इत्याचार्य्यभट्टारकश्रीसोमसेनदेवशिष्याचार्य्यश्रीसोमकीर्त्तिविरचिते सप्तव्यसनकथासमुच्चये परस्त्रीव्यसनफलवर्णनो नाम सप्तमः सर्गः ।

विषयः । द्यूतादिसप्तव्यसनानां दोषकीर्त्तनं । तत्र प्रथमे सर्गे,—द्यूतस्य नितरां हेयत्वकथनमुखेन द्यूतासक्तस्य युधिष्ठिरस्य तज्जनितक्लेशप्राप्त्यादिविवरणकथनं । द्वितीये सर्गे,—मांसभक्षणस्य निन्दितत्वनिरूपणप्रसङ्गेन तद्भक्षणशीलस्य कुशाग्रनगराधिपतिकुमारस्य वकाभिधेयस्य निरयादिप्राप्तिविवरणकथनं । तृतीये सर्गे,—सुरायां सुतरां हेयत्वप्रतिपादनमुखेन सुरापाननिरतानां यादवानां निधनप्राप्तिविवरणकथनं । चतुर्थे सर्गे,—वेश्यागमनस्य नितरां गर्हणीयत्वकथनमुखेन चम्पानगरवास्तव्यस्य चारुदत्तस्य दुर्गतिवर्णनं । पञ्चमे सर्गे,—परपीड़नादिरूपपापानुष्ठानस्य परमनिन्दितत्वकथनप्रसङ्गेन तन्निरतस्य उज्जयन्यधिपतेः ब्रह्मदत्ताभिधानस्य नरपतेः रौरवादिनरकगमनवृत्तान्तकीर्त्तनं । षष्ठे सर्गे,—चौरस्य नितरां हेयत्वकथनप्रसङ्गात् शिवभूतिनामकस्य कस्यचिद्ब्राह्मणस्य तदनुष्ठानेन दुर्दशावर्णनं । सप्तमे सर्गे,—परदारगमनस्य परमगर्हणीयत्वकथनमुखेन तदासक्तलोलुपस्य राक्षसपतेर्दशाननस्य परमदुर्गतिप्राप्तिवृत्तान्तकीर्त्तनञ्च ।

No. 2691. गुणवर्म्मचरित्रम् । Substance, country-made paper, 14 × 5 inches. Folia, 306. Lines, 8 on a page. Extent, 6,100 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Guṇavarma-charita. Story of Guṇavarma, a pious Jain. In eastern Hindi. By Jṇánaságara Gaṇi.

Beginning. सुखसंपतदायक सदापायक आसतुरिंद ।
पणमुपास जिणेश + + गोमि सुरतरुकंद ॥
सासननायकसमरीये वर्द्धमानजिनवंद ।
सिद्धारथकुलतिलो + सल + । णीनंद ॥
ब्राह्मी लिपिवली प्रणमीये भयवद् अंगे जेह ।
गोतमसरिषाजसनमेऊं पणसमरुतेह ॥ इत्यादि ।

End. न्यायसागरनें सकलचंद्रलखो सेवनफुले धान्न ।
भवीजनजीमपऊंचेमन आसरे भालमे शासनपांत्र ॥

Colophon. इति श्रीमद्बलगच्छाधिराजसकलभट्टारकचक्रचक्रवर्त्ति + + + +

समनीभालस्थलतिलकायमानपूज्यपुरन्दरपूज्यभट्टारकश्री + + विद्यासागरसूरीश्वराणां शिष्य-पण्डितश्रीज्ञानसागरगणिविरचितश्रीपूजाधिकारे गुणवर्म्मचरित्रं समाप्तम्। शुभं भवतु।

विषयः। गुणवर्म्मणो जीवनवृत्तान्तकथनं।

No. 2692. श्रवणभूषणम्। Substance, country-made paper, 12 × 4 inches. Folia, 17. Lines, 15 on a page. Extent, 651 ślokas. Character, Nágara. Date, ? Place of dedosit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Śravaṇa-bhushaṇa. A commentary on the poem entitled *Vidagdha-mukha-maṇḍana.* By Narahari Bhaṭṭa.

Beginning. हे हेरम्ब किमम्ब किं तव करे तातस्य चान्द्री कला
छत्त्यं किं शरजन्मनोऽक्षमनया दम्भान्तरं स्यादिति।
तात + + ति शत्रुतामिति तदाच्छिद्य तदन्यां कलां
व्याकाशे जयति प्रसारितकरः स्वम्बेरम + मणिः॥
यः साहित्यसुधेन्दुनैरहरिवल्लालनन्दनः कुरुते।
स श्रवणभूषणाख्यं विदग्धमुखमण्डनव्याख्याम्॥
— — — — — — — — — ग्रन्थस्यादौ ग्रन्थान्तरायोपशान्तये खेष्टदेवतामनुस्मरणरूपं मङ्गलमाचरति सिद्धौषधानीति।

End. कामिनीयामिन्योः समानि विशेषणानि चुनदम्भाक्षरम्। इति।

Colophon. इति श्रीनरहरिभट्टविरचिते श्रवणभूषणे चतुर्थः परिच्छेदः। समाप्तोऽयं श्रवणभूषणग्रन्थः।

विषयः। धर्म्मदासवृत्तविदग्धमुखमण्डनग्रन्थस्य व्याख्यानम्।

No 2693. श्रीपालचरित्रम्। Substance, country-made paper, 13 × 6 inches. Folia, 75. Lines, 8 on a page. Extent, 1,480 ślokas. Character, Nágara. Date, Sm. 1882. Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Śrípála-charita. A prose Sanskrit version of the work noticed under No. 2645, (*ante* p. 110). By Jívarája.

Beginning. प्रणम्य सिद्धचक्रञ्च सद्गुरुं निजमानसे।
श्रीपालचरित्रं वक्ष्ये सुगमं शिष्यहेतवे॥

जम्बूद्वीपे भरतक्षेत्रे विविधसम्पद्विभूषितसर्व्वप्रदेशे मगधदेशे गतदरे राजगृहनगरे श्रेणिको नाम राजा राज्यं करोति स्म इत्यादि।

End. यक्षाणां श्रोतृणाञ्च सुखं भवतु वंशे
इदं यावच्च श्रीरस्तु सुखं भूयात्।
संवत्सिद्धि(न्धु)रसाष्टैकप्रमिते मार्गशीर्षके। 1868
मासे हि क्षयपक्षे च दशम्यां चरितं कृतं॥
श्रीजिनहर्षसूरीणां राज्ये रम्ये प्रवर्त्तते।
प्राकृतात् संस्कृतं रम्यं कृतञ्च जयकीर्त्तिना।
श्रीमत्खरतरे गच्छे कीर्त्तिरत्नाख्यसूरयः।
तच्छाखायां सुजाता हि पाठकाः सुखलाभकाः।
तेषां शिष्या महादक्षा जिनहंसासु वाचकाः।
तेषां शिष्याः सदाचाराः श्रीलमाणिक्यमूर्त्तयः।
महोपाध्यायपदवीधारकास्ते जितेन्द्रियाः।
तच्छिष्या भावहर्षाख्या महाविद्याधरा वराः॥
— — — — — — — — —।
श्रीराजाधिराजस्य मूलराजस्य भूपतेः।
राज्ये प्रतापसंयुक्ते पुस्तिकेयं कृता मया।
श्रीचिन्तामणिपार्श्वेशो रक्षां करोतु नित्यशः।
जीवराजेन रचितं श्रीपालचरितं शुभं।
कुशलेनाथ लिखितं श्रीमद्गुरुप्रसादतः॥

Colophon. इति श्रीपालचरिते गद्यबन्धे चतुर्थः प्रस्तावः। शं भूयात्। संवत् १८८१।

विषयः। वर्द्धमानाभिधानेन जिनेन्द्रेण सह प्रथमगणधरस्य गौतमस्य संवादेन सिद्धचक्रसिद्धिकामेन नव पदानि अवश्यमनुष्ठेयानि। तानि च, प्रथममर्हत्पदं, द्वितीयं सिद्धपदं, तृतीयमाचार्य्यपदं, चतुर्थमुपाध्यायपदं। पञ्चमं साधुपदं षष्ठं दर्शनपदं, सप्तमं ज्ञानपदं, अष्टमं चारित्रपदं, नवमं तपःपदमिति। तत्र सिद्धचक्रमाहात्म्यकथनमुखेन नवपदानुष्ठानविधिकीर्त्तनप्रसङ्गेन श्रीपालस्य राज्ञः जीवनीकथनं। (एतच्चरितन्तु अन्यत्र विस्तृतमित्युपेक्षितमत्र)।

No. 2694. दानादिकुलकम्, वृत्तिसहितम्। Substance, country-made paper, 14 × 5 inches. Folia, 436. Lines, 9 on a page. Extent, 12,079 slokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya

Dhanapat Siñh, Bahádur. Appearance, fresh. Text, verse ; commentary, prose.

Dánádikulaka with a gloss. A poem in praise of Jain virtues, illustrated by ancedotes of the different Jinas.

Beginning इष्टेः,—

ॐ नमो नाभिभूपालसम्भवाय स्वयम्भुवे ।
विलसत्केवलालोकलोकालोकविकाशिने ॥
श्रेयसे श्रीमदिक्ष्वाकुकुलालङ्कारकारिणे ।
त्रैलोक्यकमलारामविकाशैकविवस्वते ॥ युग्मम् ॥
श्रीशान्तिर्विलसत्कान्तिरजसं क्षजताच्छिवं ।
अभूद्विश्वचये शान्तिर्यस्मिन् कुक्षिमुपेयुषि ॥
नमोऽस्तु विश्वविश्वैकस्वामिनेमिजिनार्हते ।
लसल्लक्ष्मीनिवासाय विनष्टानेकनाकिने ॥
अश्वसेनधराधीशवंशाकाशैकभास्करः ।
पातु पुण्यात्मनो नित्यं श्रीपार्श्वः परमेश्वरः ॥
— — — — — — — — — ।
चरमतीर्थेशतः स्तुतिरूपमङ्गलमाचरति ॥
मूलस्य,—
परिहरिय रज्जसारो उप्पाडिय संजमियगुरुभारो ।
खं धाउ देव+सं विथरंतो जयउ वीरजिणो ॥ इत्यादि ।

End. स मुनिः कृताराधनो विहितानशनोऽपि तस्य गुरोः पुरतो यन्त्रे चिन्नः । इत्यतः खण्डितत्वात् परिसमाप्तिसूचकं वाक्यं नास्ति ॥

विषयः । अत्र क्रमेण दान-शील-तपो-भावानां माहात्म्यकीर्त्तनं । तत्र महावीरस्य षड्विंशति पूर्व्वजन्मविवरणकथनं । सप्तविंशे तु जन्मनि जिनेन्द्रत्वेन वर्द्धमानस्य प्रादुर्भावकथनं । यथा, इहैव भरतक्षेत्रे ब्राह्मणकुण्डग्रामे ऋषभदत्तनामा कश्चिद् ब्राह्मण आसीत् । तस्य च देवानन्दा नाम पत्नी बभूव । अथ सा अन्तर्व्वत्नी संवृत्ता विविधान् शुभस्वप्नान् ददर्श । एवं काले गच्छति द्व्यशीतिदिवसेषु अतीतेषु इन्द्रो गर्भागतं भगवन्तं श्रुत्वा श्रुत्वा च एवमचिन्तयत् । अहो भगवान् कथं नीचकुले (ब्राह्मणकुले) जन्मग्रहणमिच्छति । अथ अस्माकं महाकुलेषु परिवेष्टुमधिकारोऽस्तीति निश्चित्य क्षत्रियकुण्डग्रामाधिपतेः सिद्धार्थक्षत्रियस्य त्रिशलाभिधानायां भार्य्यायां देवानन्दायां गर्भमाहृत्य सञ्चारयामास । तत्र च त्रिशलापि गर्भिणी आसीत् तद्गर्भञ्च देवानन्दायां निक्षिक्षेप । अथ त्रिशला चैत्रशुक्लत्रयोदश्यां भगवन्तं पुत्रत्वेन सुषुवे । अथ

शक्रः तत्र आगत्य स्वामिनं करपुटेन गृहीत्वा मेरुशिखरं समानीय अभिषिच्य तं कुमारं पुनरेव मातुरङ्कं गमयामास। अथ सिद्धार्थनृपोऽपि पुत्रस्य जन्मोत्सवादिकं विधाय नानाकृयदानसम्मानपूर्वकं धनादिभिर्वर्द्धितत्वाद्वर्द्धमान इति नाम कृतवान्। तथा वज्रेणापि अचोभ्योऽयं कुमार इति तस्य महावीर इति अपरनामाभिधानं बभूव। अथ क्रमेण लब्धसर्वविद्योऽसौ महावीरः समरवीरस्य राज्ञो दुहितरं यशोदानाम्नीमपयेमे। ततस्तयोः प्रियदर्शनाभिधाना कन्या अभवत्। सा च अजमालिना नाम्ना राजपुत्रेण परिणीता। अथातीते अष्टाविंशतिवर्षे महावीरः प्रव्रज्यां जिगमिषुः नन्दिवर्द्धनं नाम्ना स्वीयभ्रातरं राजपदे प्रतिष्ठाप्य तदनुरोधेन वर्षद्वयं यावत् तत्र राज्ये अवस्थानं स्वीचकार। अथ तत्र व्रतधरो भगवान् महावीरो विशुद्धध्यानमङ्गीकृत्य विविधानि दानानि ददौ। अथ समतीते वर्षद्वये असौ ज्ञानषण्डवनं प्रविश्य पञ्चमुष्टिभिः स्वीयकेशान् उत्पाटयामास। तांश्च महेन्द्रः क्षीरसागरे निचिक्षेप। अथ जन्मतः त्रिंशद्वर्षे अतीते मार्गशीर्षे मासि कृष्णदशम्यां चारित्रेण समं भगवतः तूर्यं मनःपर्यवज्ञानं समुदपद्यते। ततः स्वामी चारित्ररथमारुह्य विहाराय प्रतस्थे। अथ मुहूर्तेन च कुमारग्राममनुप्राप्तः तत्र नगरबहिरुद्याने कृतासनो बभूव। समनन्तरञ्च सायं कश्चित् कृषकः सर्वं दिनं हृषान् वाहयित्वा तान् स्वामिसमीपे मुक्त्वा गोदोहाय गृहं जगाम। ते तु खैरं चरन्तो वनं प्रविविशुः। अथ कृषकः समागत्य संदृश्य च स्वामिनाहं न जानामीति दम्भोत्तरखेधामनुसन्धानाय राज्ञापि महावनं जगाम। अथ तत्र तानलभमानः भृशतरां क्षोभमापन्नः स्थितः। ततः स्वयमागतानपि हृषान् स्वामिनः समीपे दृष्ट्वा 'अयं चौरः' इति मत्वा तं भितरां तिरस्कार अथ ततः ब्राह्मणवरूथ्यामादिकं पर्य्यटन् चातुर्मास्यव्रतानुष्ठायी पितुर्मित्रं कश्चित् ब्राह्मणं दारिद्र्यनिपीडितं दृष्ट्वा तस्मै परिहितस्य वाससः अर्द्धं समर्प्य तोषयामास। अथ क्रमेण विहरन् स्वचरणन्यासैः पृथिवीं पावयन् जृम्भकं सन्निवेशं प्राप। तत्र ऋजुवालुकानदीतीरे श्यामाकगृहिणः क्षेत्रे शालतरोरधस्ते अयत्नचैत्यस्य आसन्ने स्थिरोधसि विजये मुहूर्ते भगवतो वर्द्धमानस्य घनघातिकर्म्मणि क्षुटिते वैशाखशुक्लदशम्यां तस्य केवलज्ञाने समुत्पन्ने कम्पितासनाः सुरेन्द्रादयः तत्र समागत्य समवसरणं विदधिरे। अथ कार्त्तिकामावस्यायां पश्चिमत्वणदाक्षणे शुक्लध्यानाभियोगात् शेषकर्म्मेन्धनानि भस्मीकृत्य स्वातिनक्षत्रे भगवान् परमं पदं प्राप। अथ विशेषेण दानमाहात्म्यकथनं। दानञ्च धर्म्मार्थकामभेदेन त्रिविधं। केवलं धर्म्मोद्देशेन साधुभ्यो धार्म्मिकेभ्यो वा यद्दानं तद्धार्म्मिकं। स्वार्थमुद्दिश्य स्वकीर्त्तिजनकं याचकादिभ्योयद्दानं तदार्थिकं। कामदानन्तु स्वकलत्रपरकलत्रादिभ्यो यद्दानं। दानफलकीर्त्तनोदाहरणतया ऋषभनाथस्य चरित्रकथनं। अभयदानमाहात्म्यकथनं। तत्र श्रीनरपतेरुपाख्यानकथनं। जिनधर्म्ममाहात्म्यकथनं। तत्र बलवन्मोहाभिधानस्य राज्ञ उपाख्यानकथनं। शान्तिनाथचरित्रकथनं। साधुभ्यः अन्नादिदानमाहात्म्यकथनं। तत्र भरतस्य चक्रवर्त्तिन उपाख्यानकथनं। मुनीभ्यः औषधदानफलकथनं। तत्र वैद्यस्य जीवानन्दाभिधानस्य उपाख्यानं। साधुभ्य

परमान्नदानमाहात्म्यकीर्त्तनं। तच धन्येतिविश्रुतायाः कस्याश्चित् कामिन्या उपाख्यानकथनं। घृतवस्त्रादिदानमाहात्म्यकथनं। तच आर्य्यरक्षितस्य कथाकथनं। शालिभद्रस्य उपाख्यानकथनं। जन्मान्तरीयदानमाहात्म्यकथनं। तच धनपुण्यकस्य उपाख्यानकथनं। जिनभक्तिमाहात्म्यकथनं। अच उदयनस्य राज्ञ उपाख्यानकथनं। अनुकम्पाभक्तिदानमाहात्म्यकथनं। तच मूलदेवस्य उपाख्यानकथनं। विक्रमादित्यस्य उपाख्यानकथनं। सांवत्सरिकमहादानकथनं। तच श्रेयांसककथाकीर्त्तनं। चन्दनमालाया उपाख्यानं। अथ शीलमाहात्म्यकथनं। तच नेमिजिनस्य चरित्रकथनं। शीलप्रशंसाकीर्त्तनं। अच राजीमत्या उपाख्यानकथनं। शीलप्रभावकथनमुखेन रामचन्द्रस्य चरित्रकथनं। सीताचरित्रकथनं। सुभद्रायाश्चरित्रकथनं। नर्म्मदासुन्दरीदृष्टान्तकथनं। कलावतीविवरणकथनं। शीलवत्याः स्वरूपकथनं। सुलसायाः उपाख्यानकथनं। स्थूलभद्रचरित्रकथनं। वज्रस्वामिचरित्रकथनं। सुदर्शनश्रेष्ठिकथाकीर्त्तनं। सुन्दर्य्या उपाख्यानकथनं। सुनन्दाया उपाख्यानकथनं। मनोरमाया उपाख्यानकथनं। अञ्जनासुन्दर्य्या उपाख्यानकथनं। मृगावत्या उपाख्यानकथनं। अथ तपोमाहात्म्यवर्णनं। अच बाहुबलिकथाकीर्त्तनं। तपोऽधिकारनिरूपणं। तच अक्षयनिधितपोनिरूपणं। तीर्थङ्करजननीतपोनिरूपणं। गौतमस्वामिकथाकीर्त्तनं। सनत्कुमारचक्रिदृष्टान्तकीर्त्तनं। दृढ़प्रहारिकथाकथनं। नन्दिषेणतपःफलकथनच्च। तपःप्रभाववर्णनं। अच विविधोपाख्यानकथनं। सुन्दरीतपःस्वरूपवर्णनं। जम्बुस्वामिचरित्रकथनं। उत्कृष्टतपोवर्णनं। बलदेवतपोवर्णनं। विष्णुकुमारतपोवर्णनं। अथ भावनानिरूपणं। तच पार्श्वनाथचरित्रकथनं। प्रसन्नचन्द्रराजर्षिकथाकीर्त्तनं। मृगावतीचरित्रकथनं। इलापुत्रस्य विवरणकथनं। कपिलस्य केवलिभावनाकथनं। भावनायाः परमपुरुषार्थकारणत्वप्रदर्शनं। पुण्यचूलाकथाकथनं। गौतमदीक्षितस्य पञ्चदशशतभावनाप्रदर्शनकथनं।—(इतः किञ्चित्खण्डितं।)

No. 2695. अध्यात्मकल्पद्रुमः। Substance, country-made paper, 12 × 5 inches. Folia, 61. Lines, 3—4 on a page. Extent, 477 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect.

Adhyátma-kalpadruma. On asceism, its essentials and objects. By Munisundara Súri.

Beginning. ॐ नमः। अथायं श्रीमान् शान्तरसाधिराजः सकलागमादिसुशास्त्राणां वेपनिषद्भूतसुधारसायमान ऐहिकामुष्मिकानन्दसन्दोहसाधनतया पारमार्थिकोपदेश्यतया च सर्व्वरससारभूतत्वात् शान्तरसभावनात्माध्यात्मकल्पद्रुमाभिधानं। इत्यादि।

End. इमामिति मतिमानधीतचित्ते रमयति विरमत्यथं भवी द्राक्।
स च नियमतो रमेत वाञ्छिन् स च + + भवा विजयश्रिया श्रिवश्रीः॥

Colophon. इति षोड़शाधिकारः सम्पूर्णः ।

इति नवमशान्तरसभावनात्माध्यात्मकल्पद्रुमनामायं ग्रन्थः सम्पूर्णः ।

विषयः । शृङ्गारहास्यकरुणादिषु रसेषु शान्तरसस्यैव कृपतिसम्मितत्वकथनं । शान्तरसमाहात्म्यकीर्त्तनं । जीवस्य शान्तरससमाश्रयणे फलकथनं । जीवस्य साम्यागमकारणकथनं । चित्तस्य मैत्रीभावलक्षणादिकथनं । मदादिपरित्यागावश्यकताकथनं । आत्मनो निर्म्मलतायां शान्तरसावस्थानकथनं । अथ यथार्थज्ञानयुक्तस्य प्रमादत्वकथनं । कलत्रशत्रुमित्रादिभेदज्ञानपरिहानकथनं । सर्व्ववस्तूनामनित्यत्वकथनं । जगति साम्यभाजां जीवानामल्पत्वकथनं । रागद्वेषादीनां मिथ्यात्वकथनं । जीवस्य मृत्युपारवश्यत्वकथनं । धनादिषु सुखादिज्ञानस्य मूढतानिदानत्वकथनं । य एव स्वजनास्त एव शत्रव इति निरूपणं । जीवानां पुद्गलानाञ्च नानापरिणामप्रदर्शनेन रागद्वेषादिपरिहारकर्त्तव्यताकथनं । अथ स्त्रीणां निन्दाकथनं । तच्छरीराणां नितरामशुचित्वकथनं । कामिनीनां शरीरस्पर्शनादौ मोक्षजननकथनं । अत एव शान्तरसलिप्सुना तासां सङ्गः परिहरणीय इति निरूपणं । अपत्यादिषु ममत्वपरित्यागकर्त्तव्यताकथनं । अथ धनेभ्य एव अनर्थपरम्परा जायते इति निरूपणं । तेभ्यः सुखस्य किञ्चित्करत्वं दुःखस्य च बहुलजनकत्वं विज्ञाय निवर्त्तितव्यमितिकथनं । परिग्रहस्य पापजनकत्वकथनं । अथ देहाभिमानपरित्यागावश्यकताकथनं । शरीरस्य कारागृहादपि अधिकक्लेशनिदानत्वकथनं । इन्द्रियार्थेभ्यो प्रमादरहित्यावश्यकत्वकथनं । ऐहिकसुखस्य हेयत्वकथनं । कषायादिपरित्यागस्य मोक्षजनकत्वकथनं । एवं क्रोधलोभमानादीनां परित्यागफलकथनं । मोक्षकामेन जैनशास्त्राश्रयकरणावश्यकतानिरूपणं । केवलं शास्त्रपठनेन न मुक्तिर्भवति किन्तु तज्ज्ञानेनेतिकथनं । अथ अल्पाध्ययनेऽपि सत्क्रियाया उत्कर्षनिरूपणं । अथ असाधुकर्म्मानुष्ठातुः नरकतिर्य्यगादिगतिवर्णनं । सर्व्वथा मनोवशीकरणं कर्त्तव्यमितिनिरूपणं । तच्च तपोजपादीनामुपयोगितात्कथनं । मनःसमाधुपायकथनं । वैराग्यस्यावश्यकताकथनं । परपीड़नादिभ्य आत्मनो विरत्युपायकथनं । पापपुण्यनिरूपणं । दानादिधर्म्मस्य माहात्म्यकथनं । सर्व्वेषां कर्म्मणां भावपूर्व्वकं कर्त्तव्यतानिरूपणं । अथ धर्म्माय गुरूपसदनावश्यकताकथनं । कुगुरुनिरूपणं । यतीनां शिक्षाविधानकथनं । यतीनां कर्म्मविशेषेण निन्द्यानिन्द्यत्वादिकथनं । संयमस्य नितरामावश्यकताकथनं । संयममाहात्म्यकथनं । अथ सामान्यतो यतीनां गृहिणाञ्च धर्म्मकथनं । मनःकायादिसंवरणकथनं । तपःशीलादिमाहात्म्यकथनं । आत्मनः प्राधान्यकथनं । निःसङ्गेन भाव्यमितिनिरूपणं ।

No. 2696. मलयसुन्दरीचरित्रम् । Substance, country-made paper, 13 × 5 inches. Folia, 162. Lines, 8 on a page. Extent, 3,792 ślokas.

Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Malaya-sundara-charita. Story of Malayasundarí, a Jain devotee; in eastern Hindi. By Vijaya Gaṇi.

Beginning. स्वस्ति श्रीसुखसम्पदापूरण परमनुदार।
आदीश्वर आनन्दनिधि प्रणमु प्रेम अपार॥
फणिमणिमण्डित नीलतनकरुणारसभरपूर।
पारसजलधरवल्लवो बोधबीज अङ्कुर॥
शासननायकसाद्विवो गिरुउ गुणविलसन्त।
हरि++न हियड़ेधरूं महावीर अंकुवंत॥

End. पाठलनगरनो संघविवेकीतस आग्रहधीसिदि।
तिउं खण्डे+द सर्व्वसंख्याइढाल एकाणूं कीधीरे॥
जे भविभावे भणस्ये पुणस्ये लहेस्यं तें जयमाल।
गुणचाली समीकहिकां ते चोधोखं चनौढालरे॥

Colophon. इति श्रीमलयासुन्दरीचरित्रे श्रीविजयगणिविरचिते प्राकृतप्रबन्धे सिला षदाने पूर्व्वभववर्णनं नाम चतुर्थखण्डः समाप्तः।

विषयः। मलयसुन्दर्य्या जिनभक्तायाः उपाख्यानकथनं।

No. 2697. लीलावतीसुमतिविलासरासः। Substance, country-made paper, 13 × 5 inches. Folia, 28. Lines, 9 on a page. Extent, 309 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Lilávatí-sumati-vilása-rása. Story of Lilávatí and Sumati, illustrating Jain virtues; in eastern Hindi. By Udayaratna.

Beginning. परमपुरुष प्रभु पासजिन सरसिति सद्गुरुपायः।
वंदी गुणलीलवती वेलु बुद्धिवनाय।
लीलालहिर लीलावतीसुमतिविलाससमुद्र।
दिअगासुंए दंपति उत्तमगुण अचुद्र॥ इत्यादि।

End. धन्यासीरासं सोहावीए एकवीसमीढालिजी।
उदयरत्नकहेताजमें वामीसुखसुं पतिसुरसालजी॥

Colophon. इति श्रीलीलावतीसुमतिविलासरास सम्पूर्ण।

विषयः। लीलावतीसुमत्योरुपाख्यानवर्णनम्।

No. 2698. स्मृतिचन्द्रिका । Substance, country-made paper, 12 × 5 inches. Folia, 88. Lines, 6 on a page. Extent, 1,136 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Paṇḍit Syámalála Duve. Prose and verse. Incorrect.

Smṛiti-chandriká. A summary of the Smṛitis. Author's name unknown. Although its colophon states the work as contained in the codex to be complete, it is obvious that it originally discoursed upon the whole range of the Smṛitis, and the codex comprises only one portion of it—that treating of the lunar days and the religious duties and rites appertaining thereto. Had the work been limited to the lunar days, it would have been named *Tithí-chandriká* and not *Smṛiti-chandriká*.

Beginning. नमस्कृत्य महेशानमज्ञानध्वान्तनाशनं ।

क्रियते बालबोधाय रम्येयं स्मृतिचन्द्रिका ॥

तत्रादौ तिथिस्वरूपनिरूपणं । तथाहि । अमादिपौर्णमास्यन्ता या एव शशिनः कलाः । तिथयस्ताः समाख्याताः षोड़शैव वरानने ॥ इत्यादि ।

End. अतएव तत्र तत्र संक्रान्तिषु द्रव्यविशेषदानेन तज्जनितदोषपरीहार इति ।

Colophon. इति स्मृतिचन्द्रिका समाप्ता ।

विषयः । तिथिस्वरूपकथनं । पञ्चभेदव्यवस्थाकथनं । क्वचिद्राचियुग्मादरकथनं । युग्मेतरतिथिव्यवस्थाकथनं । विधेयकर्म्मणि पूज्यकालापेक्षाकथनं । युग्मादरस्तु देवकृत्ये न पित्रकृत्ये इति निरूपणं । अथ प्रतिपदादितिथिषु तत्तत्कृत्यविधानं । द्यूतप्रतिपन्निरूपणं । मनोरथद्वितीयाविधिः । भ्रातृद्वितीयाविधिकथनं । रम्भातृतीयाविधिः । अक्षयतृतीयाविधिः । भाद्रचतुर्थीविधिः । वरदाचतुर्थीविधिः । नागपञ्चमीविधिः । औपञ्चमीविधिः । अरण्यषष्ठीविधिः । स्कन्दषष्ठीविधिः । मनोरथसप्तमीविधिः । विजयासप्तमीविधिः । आरोग्यसप्तमीविधिः । विधानसप्तमीविधिः । रथसप्तमीविधिः । दूर्व्वाष्टमीविधिः । महाष्टमीविधिः । जन्माष्टमीविधिः । गोष्ठाष्टमीविधिः । भीष्माष्टमीविधिकथनं । अशोकाष्टमीविधिः । श्रीरामनवमीविधिकथनं । दशहराविधिकथनं । शयनैकादशीविधिः । चातुर्मास्यविधिः । पिपीतकीद्वादशीविधिः । अवणद्वादशीविधिः । गोविन्दद्वादशीविधिः । मधुश्रवणद्वादशीविधिः । सावित्रीचतुर्दशीविधिः । अघोरचतुर्दशीविधिः । अनन्तचतुर्दशीविधिः । पाषाणचतुर्दशीविधिः । शिवचतुर्दशीविधिः । मदनचतुर्दशीविधिः । महाज्येष्ठीविधिः । कोजागरपूर्णिमाविधिः । संक्रान्तिकृत्यनिरूपणञ्च ।

No. 2699. उत्तराध्ययनवृत्तिः । Substance, country-made paper, 11 × 4 inches. Folia, 332. Lines, 13 on a page. Extent, 9,234 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Uttarádhyayana-vṛitti. A Sanskrit commentary on the *Uttarádhyayana*, a Jain Sútra text in Mágadhí. By Nemichandra Súri.

Beginning. प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ।

सिद्धांश्च सर्व्वसाधूंश्च स्मृत्वा च श्रुतदेवतां ॥

आत्मनः स्मृतये वक्ष्ये जड़मतिसंक्षेपरुचिहितार्थञ्च ।

एकैकार्थनिबद्धां दृष्टिं सूत्रस्य सुखबोधां ॥

वक्तुर्थादुद्धतत्वाद्विवरणात् समुदृत्य ।

अध्ययनानामुत्तरं पूर्व्वाणामेक + + गतं ॥

इह अर्थान्तराणि पाठान्तराणि च सूत्रे दृष्टटीकातः बोद्धव्यानि यतोऽयं प्रारम्भो + + निकामाचं । + + + + + तानि च षट्त्रिंशद्भवन्ति । तच्च विनमूलत्वात् (?) । इत्यादि ।

End. योग उपधानादिव्यापारः । तदनतिक्रमेण यथायोग्यमित्यर्थः ।

Colophon. इत्युत्तराध्ययनटीकायां षट्त्रिंशमध्ययनं समाप्तं ।

— — — — — — — — ।

विश्रुतस्य महापीठे वृहद्गच्छस्य मण्डलं ।

श्रीमान् विद्या + + + दः सूरिरद्योतनाभिधः ॥

शिष्यस्तस्याभवद्देवोऽभूदुपाध्यायः सतां मतः ।

यचैकान्तगुणैः पूर्णैर्दोषैर्लेभे पदं नहि ॥

नेमिचन्द्रसूरिरकृतवान् दृष्टिं + + ।

विनेयो गुरुसौदर्य्यश्रीमन्मुनिचन्द्राचार्य्यवचनेन ॥

इत्युत्तराध्ययनवृत्तिः समाप्ता ।

विषयः । उत्तराध्ययनाभिधानजैनसूत्रस्य व्याख्यानम् ।

No. 2700. तत्त्वमञ्जरी । Substance, country-made paper, 14 × 4 inches. Folia, 42. Lines, 7 on a page. Extent, 753 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Paṇḍit Syámalála Duve. Appearance, fresh. Prose and verse. Incorrect.

Tattva-manjarí. An epitome of Vaishṇavite philosophy. By Aniruddha. CONTENTS: Identity of the Godhead. Refutation of the

theory of the undefined. Refutation of the theory of non-duality. Refutation of the theory regarding the unity of the animal soul. Multiplicity of souls, and the true nature thereof. The relation of individual souls to the Divine Soul. The molicularity of individual souls. Refutation of the theories of the body being the soul, and of the intellect being the soul. Refutation of the theory of the soul being all-pervading. Authority of the Vedas: their characteristics. Distinction between the mandatory and the laudatory portions of the Vedas. Proof. The importance of testimony as a proof. The means of obtaining the Godhead. Faith. Knowledge. Emancipation. True enjoyment.

Beginning. जगदीशं हरिं नत्वा सच्चिदानन्दविग्रहं।
अनिरुद्धश्चकारेमां भगवत्तत्त्वमञ्जरीं॥

अथ विग्रहस्य पूर्णस्वरूपभूतत्वस्थापकप्रकरणारम्भे प्रथमतस्तावद्वेदान्तवाक्यमित्थं विचारणीयं। इत्यादि।

End. ईक्षते च लोकान् ब्रह्मलोकादीन् भोगांश्च विश्वजनोपभोग्यान् धारयतीति।

Colophon. इति श्रीतत्त्वमञ्जरी परिपूर्णा।

विषयः। भगवत्स्वरूपनिरूपणं। वेदान्तवाक्यानां निर्विशेषपरत्वमाशङ्क्य तत्खण्डनपूर्वकं सविशेषकत्वनिरूपणं। अद्वैतवादखण्डनं। एकजीववादनिरासपूर्वकं नानाजीववादकथनं। प्रत्यगात्मस्वरूपादिकथनं। तस्य भगवदंशत्वकथनं। अणुपरिमाणत्वकथनञ्च। अथ देहात्मवादविज्ञानवादादिखण्डनं। आत्मनो विभुत्ववादनिरसनं। वेदप्रामाण्यकथनं। तल्लक्षणादिकथनं। विध्यर्थवादादिविवेचनं। प्रत्यक्षानुमानादिप्रमाणनिरूपणं। शब्दप्रमाणस्य सर्व्वप्रमाणापेक्षया अभ्यर्हियत्वकथनं। भगवत्प्राप्त्युपायकथनं। भक्तिस्वरूपापाङ्गं ज्ञानमेव तत्साधनमितिनिरूपणं। भक्तिलक्षणादिकथनं। मुक्तिनिरूपणं। भोगनिरूपणञ्च।

No. 2701. भक्तिचन्द्रिका। Substance, country-made paper, 14 × 4 inches. Folia, 32. Lines, 8 on a page. Extent, 672 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Pandit Syámalála Duve. Appearance, new. Prose and verse. Incorrect.

Bhakti-chandriká. Attributes of faith and the means of attaining emancipation thereby. By Dámodara.

Beginning. नवीननीरदश्यामं राधाविद्युल्लतान्वितं।
वन्दे वृन्दावनाधीशं मुकुन्दं नन्दनन्दनं॥

अथ सपरिकरभगवद्भक्तिनिरूप्यते । तत्र शाण्डिल्यः । सा परानुरक्तिरीश्वरे । इह अनुरक्तिपदेन प्रीतिरभिधीयते । इत्यादि ।

End. यं लब्ध्वनिर्देश्यमव्यक्तं पर्य्युपासते ।
ते प्राप्नुवन्ति मामेव सर्व्वभूतहिते रताः ॥
इति श्रीमुखेनोक्तेः ॥ इति

Colophon. इति श्रीदामोदरप्रणीता भक्तिचन्द्रिका परिपूर्णा ।

विषयः । भक्तिस्वरूपविवेचनं । वैधीरागानुगाभेदेन तस्या द्वैविध्यकथनं । भक्त्यङ्गनिरूपणं । स्मरणकीर्त्तनादिलक्षणकथनं । भगवद्भक्तलक्षणं । उत्तममध्यमाधमभेदेन तस्य त्रिविधत्वनिरूपणं । भगवत्स्वरूपनिरूपणं । तस्य निराकारत्ववादखण्डनपूर्व्वकं सच्चिदानन्दविग्रहत्वकथनं । जीवस्य भगवदंशत्वकथनं । संसारस्य सत्यत्वकथनं । मायावादनिन्दनं । भगवान् श्रीकृष्ण एव परब्रह्मशब्दवाच्य इति निरूपणं । मुक्त्यर्थसमन्वयकथनं । श्रीमद्भागवतस्य सर्व्वप्रमाणश्रेष्ठत्वकथनं । भक्तौ अधिकारिनिरूपणं । शान्त-दास्य-सख्य-वात्सल्यादिभावनिरूपणं । भगवद्भक्तेः रसत्वनिरूपणं । मुक्तावपि भगवद्भक्तानामनभिरुचिरितिकथनं । ज्ञानतो भक्तेः श्रेष्ठत्वकथनं । भक्तिरेव भगवत्प्राप्त्युपाय इति निरूपणं । सालोक्यसायुज्यादिनिरूपणं । भगवत्सेवाप्रकारकथनं । नामापराधनिरूपणं । प्रेमभक्तिनिरूपणञ्च ।

No. 2702. मितभाषिणी । Substance, country-made paper, 11 × 4 inches. Folia, 60. Lines, 8 on a page. Extent, 1,593 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct.

Mitabháshiṇí. A commentary on S'iláditya's *Sapta-padárthábhidhána*, an epitome of the Vaiśeshika categories. By Mádhava Sarasvatí, of Saurásh*t*ra.

Beginning. विघ्नेशादीन् नमस्कृत्य माधवाख्यसरस्वती ।
शिलादित्यकृतेटीकां करोति मितभाषिणीम् ॥

विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं कर्त्तव्यविषयविघ्नविघातकं परमेश्वरनमस्कारलक्षणं मङ्गलमाचरन् अर्थाद्विषयप्रयोजने दर्शयति शेषव इति । ननु नमस्कारादिमङ्गलाचरणं फलप्रमाणयोरभावाद्युक्तमिति चेन्न, फलं तावत् कर्त्तव्यविषयविघ्नध्वंस एव वरीवर्त्ति नत्वभीष्टसमाप्तिः । तच्च मङ्गलस्य अन्वयव्यतिरेकाभ्यां व्यभिचारात् । कृतेऽपि मङ्गले कादम्बर्य्यादौ समाप्त्यभावात् — — — — — प्रयोगस्तु । नमस्कारो वेदबोधितकर्त्तव्यताकः अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शाद्याचारवत् — इति । इत्यादि ।

End. सौराष्ट्रदेशोऽखिलराष्ट्रवर्य्यः सदाकरो दक्षिणभूमिनिष्ठः।
विराजते सङ्घगिरीन्द्रसानौ यचाखि गोकर्णमहाविलेशः॥
तद्देशजन्मा यतिरेकदण्डी सरस्वतीमस्तकमाधवाख्यः।
सोऽयं शिलादित्यकृतेरकार्षीत् टीकामिमां बालसुखप्रदत्यै॥

Colophon. इति मितभाषिणी समाप्ता।

विषयः। शिलादित्यकृतसप्तपदार्थाभिधानवैशेषिकन्यायप्रकरणस्य व्याख्यानम्।

No. 2703. वीरस्तवः, व्याख्यासहितः। Substance, country-made paper, 12 × 3½ inches. Folia, 5. Lines, 22 on a page. Extent, 447 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Text, Mágadhí verse; Commentary, Sanskrit prose. Correct.

Vírastava, with a commentary. A hymn in praise of Vardhamána Jina, in Mágadhi. By Jinavallabha, with a Sanskrit commentary by Nayanasundara Gaṇi.

Beginning. मूलस्य,—

दुरियरयसमीरं मोहपं कोहनीरं
पणमिय जिणवीरं निज्जियाणं गवीरं।
भवभड़पड़िकूलं तस्स मुक्खाणुकूलं
चरियमिह समूलं किं चिकित्तेमि छूलं॥

टीकायाः,—

बर्द्धयतु बर्द्धमानः श्रीसिद्धान्तरुचिवाचको वाचं।
चित्तचमत्कृतिचतुरं चतुरनराणां वचो यस्य॥

श्रीमहावीरस्य चरित्रं व्याख्यायते। तस्येदमादिमं काव्यं। दूरित्य इति। कीर्त्तयामि कथयामि। कः कर्त्ता अहं। किं कर्म्मतापन्नं चरित्रं। किं कृत्वा प्रणम्य प्रकर्षेण नत्वा। इत्यादि।

End. मूलस्य,—

एवं वीरजिणेसणेसरयमं मोहंधविद्धंसणं
भव्वं भोरुहवोहसोहजणयं दोमायरच्छेयणं।
भावज्जं कुसलाणुबं धिकुसलं पत्तोत्तकिं चीनउ
जायजा जिणवल्लहो महसया पायप्पणामो+ह॥

इति वीरस्तवः।

टीकायाः,—

Colophon. इति खरतरगच्छे श्रीजिनचन्द्रसूरिविजयराज्ये श्रीजिनराजसूरिशाखायां शिष्यश्रीजयसागरमहोपाध्यायसं+ नीयवाचनाचार्य्य+ + धूर्य्यजीवकलसगणिशिष्यनयनसुन्दरगणिविरचिता वीरस्तवव्याख्या समाप्ता ।

हे जिन तव पादे प्रणामो मम सदा वल्लभो जायतामिति ॥ अत्र शार्दूलविक्रीड़ितं छन्दः । श्रीजिनवल्लभ इति कविनाम इति इत्तार्थः ।

विषयः । स्तोत्रव्याजेन वर्द्धमानजिनस्य पवित्रचरित्रकीर्त्तनं ॥

No. 2704. अनुयोगद्वारवृत्तिः । Substance, country-made paper, 11 × 4 inches. Folia, 262. Lines, 9 on a page. Extent, 6,166 ślokas. Character, Nágara. Date, Sm. 1699. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct.

Anuyogadvára-vritti. A Sanskrit commentary on the Jain Sútra entitled *Anuyogadvára*. By Hemachandra Súri.

Beginning. सम्यक्सुरेन्द्रशतसंस्तुतपादपद्म-

मुद्दामकामकविराजकठोरसिंहं ।

सद्धर्म्मदेशकवरं वरदं नतोऽस्मि

वीरं विशुद्धतरबोधनिधिं सुधीरं ॥

अनुयोगभृतां पादान् वन्दे श्रीगौतमादिसूरीणां ।

निष्कारणबन्धूनां विशेषतो धर्म्मदेशॄणां ॥

यस्याः प्रसादमतुलं संप्राप्य भवन्ति भव्यजननिवहाः ।

अनुयोगवेदिनस्तान् प्रथतः श्रुतदेवतां वन्दे ॥

इत्यतिगभीरमहानीरनिधिमध्यनिपतितानर्घ्यरत्नमिवातिदुर्लभं सम्प्राप्य मानुषं जन्म ततोऽपि लब्ध्वा त्रिभुवनैकचित्तश्रीमज्जिनप्रणीतबोधिलाभं । इत्यादि ।

End. तच्छिष्यलवप्राप्यैरगीतार्थापि शिष्टजनतुष्ट्यै ।

श्रीहेमचन्द्रसूरिभिरियमनुरचिता प्राक्तनवृत्तिः ॥

अनुयोगद्वारवृत्तिः समाप्ता । संवत् १६९९ ।

विषयः । अनुयोगद्वाराभिधानजैनसूत्रस्य व्याख्यानम् ।

No. 2705. प्रायश्चित्तसामाचारी, व्याख्यासहितः । Substance, country-made paper, 10 × 4 inches. Folia, 8. Lines, 9 on a page. Extent, 180

ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Text, Mágadhí Gáthá; Commentary, Sanskrit. Generally correct.

Práyaśchitta-sámáchári. A treatise on expiations according to the ordinances of the Jains. By Tilaka A'chárya.

Beginning. टीकायाः,—

प्रणिपत्य जिनं वीरं श्रावकाणां विशुद्धिकृत् ।
प्रायश्चित्तं खगाथोक्तं व्याख्यामि सुखबुद्धये ॥

तत्रेयं नमस्काराभिधेयाभिधायिकाद्यगाथा । (मूलस्य,)—

सिरिवीरजिणं नमिउं पच्छित्तं सावयाणवोत्थामि ।
वीमं सिउणवङ्कसो सामायरीउं विविहाउं ॥ इत्यादि ।

End. मूलस्य,—

इत्युत्तरसयणतिगं रेवइ रोहिणि पुणव्वसूणदुगं ।
अणुराहसमं भणिया सोलसा आलोयणा रिक्खा ॥

टीकायाः,—

प्रायेणैतान्यालोचनीयपदानि सम्भवन्ति तेषामेव प्रायश्चित्तसामाचारी ।

Colophon. इति तिलकाचार्य्यकृतप्रायश्चित्तसामाचारिटीका ।

विषयः । जैनानां प्रायश्चित्तविधिकथनं । तत्र ज्ञानातिचारविषयकथनं । दर्शनातिचारकथनं । चारित्र्यातिचारकथनं । तत्र अणुव्रतविधानं । मृषादत्तपरिग्रहादिप्रायश्चित्तकथनं । निह्नवनविषयकप्रायश्चित्तकथनं । वीर्य्याचारविषयकप्रायश्चित्तकथनं । यत्र यतीनां मृहिनाञ्च विशेषकथनं ।

No. 2706. होलिकाविधिः । Substance, country-made paper, 10 × 4 inches. Folia, 3. Lines, 12 on a page. Extent, 92 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect. Sanskrit.

Holikávidhi. The story of Holiká, a daughter of Jayadharma, a king of Jayapura. Becoming a widow at an early age, she lived a dissolute life for some time, and then expiated her sins by entering a burning pyre. This is a Jain version of a Hindu tale which is related to account for the origin of the Holi festival. The Jains, too, have a festival of the same name. The work under notice provides the rules for the fast.

Beginning. होलिका फाल्गुने मासि द्विविधा द्रव्यभावतः ।
तत्राद्या धर्म्महीनानां द्वितीया धर्म्मिणां तथा ॥

अस्यायमर्थः । लोकाः इदं पर्व्वहोलिकेति वदन्ति । सा च द्विधा द्रव्यतो भावतश्चेति । इत्यादि ।

End. भव्यात्मभिः शुभेच्छुभिस्तन्न कर्त्तव्यं किन्तु श्रीजिनोक्तधर्म्म एव सेव्यः । स चाच जगति जनानामिष्टार्थसाधक इति ।

Colophon. इति होलिकाविधिः ।

विषयः । द्रव्यभेदात् भावभेदाच्च होलिका द्विविधा । तत्राद्या जैनधर्म्मविमुखैरनुसेवनीया । द्वितीया तु तदन्यैरिति कथनं । तच्च होलिकाया उत्पत्तिकथनप्रसङ्गेन जयपराधिपस्य जयधर्म्माभिधानस्य नरपतेः होलिकेतिनामधेया काचित् कन्या समजनि । सा च निजपूर्व्वजन्मसञ्चितदुरितपरिपाकेण अकाले विवाहितापि वैधव्यं समधिजगाम । अथ तस्याः दुश्चरित्यादिकीर्त्तनपूर्व्वकमग्निप्रवेशादिविवरणकीर्त्तनं ।

No. 2707. मौन्येकादशीकथा, व्याख्यासहिता । Substance, country-made paper, 12 × 4 inches. Folia, 15. Lines, 8 on a page. Extent, 315 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Mágadhí Gáthá. Incorrect.

Maunyekádas'í-kathá. A Jain story about a fast on the 11th of the moon, and called Mauní-ekadas'í. This legalizes for the Jains the ordinary Hindu fast on the eleventh of the moon. Anonymous.

Beginning. मूलस्य,—
सिरिवीरं नमिऊणं पुच्छे सिरिगोयमो समासेणं ।
भयवं कहेसुइदिं इग्यारहमौनकरणेणं ॥
पभणइ नेमि जिणं देो पव्वाणिय पंचएग पक्खंमि ।
बीया दुविहे धम्मे सद्दजइणं जे भणिया ॥
व्याख्यायाः,—
श्रीमद्वावीरं नत्वा श्रीगोतमो गणेाधरः ।

तं पप्रच्छ । भगवन् एकादश्यां तिथौ मौनेन वाचंयमः भवेत् । तदा कीदृशं फलं प्राप्नोति । इत्यादि ।

End. मूलस्य,—
न वगं दंशणपणना न विग्घपरघायं छविय ।
भयकुच्छमिच्छसासं जिणगणतीसा अपरिचत्ता ॥

व्याख्यायाः;—

अमुना प्रकारेण महामुनिः सुव्रतस्वामी कथानकं श्रुत्वा ये भव्यजीवा एकादशीतप आराधयन्ति। ते जीवा इह लोके सुखिनो भूत्वा परलोके ऋद्धिवृद्धिं प्राप्नुवन्ति।

Colophon. इति मौन्येकादशीकथा।

विषयः। वर्द्धमानजिनेन सह गणधरस्य गौतमस्य संवादेन द्वारकामधिष्ठितस्य कृष्णवासुदेवस्य अभ्यर्थनया प्रसन्नस्य नेमिजिनस्य मौन्येकादशीमाहात्म्यकीर्त्तनम्।

No. 2708. कम्मपइडी, (कर्म्मप्रकृतिः।) Substance, country-made paper, 10 × 4 inches. Folia, 82. Lines, 6 on a page. Extent, 1,414 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Sinh, Bahádur. Appearance, fresh. Prose. Incorrect. Mágadhí.

Kammapaidí. The Jain theory of works (*karma*) and their fruits. Anonymous.

Beginning. ॐनमो वीतरागाय।

सिद्धं सिद्धत्थे सुय वंदिय निद्दोस सव्वकम्ममलं कम्मट्ठगस्स करण + मुदय सत्तानवोच्छामि। इत्यादि।

End. जस्सवरसासनावयवफरिसपविकसियविमलमइ किरणा। विमलं वि कम्ममइले सोमे सरणं महावीरो॥

Colophon. इति कम्मपइडी समत्तो।

विषयः। तत्र प्रथमतो बन्धन-संक्रमण-उद्वर्त्तना-अपवर्त्तना-उदीरणा-उपशमनानिधत्ति-निकाचनारूपाष्टविधकरणनिरूपणं। तत्र बन्धो नाम कर्म्म पुद्गलानां जीवप्रदेशैः सह वज्रायःपिण्डवत् अन्योन्यानुगमः। तथा च बध्यते अष्टप्रकारं कर्म्म येन तद्बन्धनं। एवं संक्रम्यते प्रकृत्यादिरूपतया अध्यवस्याप्यते येन तत् संक्रमणं तथा उद्वर्त्यते प्राबल्येन प्रभूतीक्रियते स्थित्यादि यया जीववीर्य्यविशेषपरिणत्या सा उद्वर्त्तना। एवमन्यच। करणान्यमूनि च जीववीर्य्यरूपाणीतिनिरूपणं। अथ स्थित्यादिषु जीवप्रदेशस्थितिनिरूपणं। तत्र अविभागप्ररूपणा-वर्गणाप्ररूपणा-अन्तरप्ररूपणादिस्वरूपकथनं। योगस्थानादिनिरूपणं। वृद्धिहानिरहितस्य जीवस्य योगस्थानावस्थितिकालनिरूपणं। अथ सूक्ष्म-बादरै-केन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियासंज्ञि-पञ्चेन्द्रियाणां पर्य्याप्तापर्य्याप्तानां जघन्योत्कृष्टविषये अल्पबहुत्वनिरूपणं। अथ परमाणुवर्गणानिरूपणं अत्र वर्गणाशब्दः समुदायवाचीति ज्ञेयं। परमाणुस्कन्धादिनिरूपणं। मूलप्रकृतिनिरूपणं। उत्तरप्रकृतिनिरूपणं। अथ वैक्रियाहारकतैजसकार्म्मणभेदेन चतुर्विधशरीरनिरूपणं। आवरणी-

यमोहनीयादिस्वरूपकथनं। अथ चतुर्दश अनुयोगद्वाराणि, यथा,—अविभागप्ररूपणा, वर्गणा प्ररूपणा। स्पर्द्धकप्ररूपणा, अन्तरप्ररूपणा, स्थानप्ररूपणा, कण्डकप्ररूपणा षट्स्थानकप्ररूपणा। अधस्तनस्थानप्ररूपणा, वृद्धिप्ररूपणा, समयप्ररूपणा, यवमध्यप्ररूपणा, ओजोयुग्मप्ररूपणा, पर्य्यवसानप्ररूपणा, अल्पबहुत्वप्ररूपणा चेति। तत्र तत्र परमाणूनां हीनहीनतरगुणहीनतरादिविभागकथनञ्च। आवलिकानिरूपणं। मनुष्यादीनां स्थितिनिरूपणं। अथ ज्ञानावरणीयवर्गेदर्शनावरणीयवर्ग-वेदनीयवर्ग-दर्शनमोहनीयवर्ग-चारित्रमोहनीयवर्ग-क्षोककषायमोहनीयवर्ग नामवर्ग-गोत्रवर्ग-अन्तरायवर्गाणां स्थित्यादिनिरूपणं। अथ जीवसमुद्घातनिरूपणं। अथ विशेषेण संक्रमकरणस्वरूपादिनिरूपणं। तत्र अनादिमिथ्यादृष्ट्यादिनिरूपणं। पञ्चविधपतद्ग्रहस्थाननिरूपणं। पतद्ग्रहञ्च एकविंशत्प्रकृतिसमुदयरूपइति ज्ञेयं। मूलप्रकृतिस्थितिसंक्रमः उत्तरप्रकृतिस्थितिसंक्रमश्चेति द्विविधस्थितिसंक्रमनिरूपणं। अथ विशेषेण उद्वर्त्तनास्वरूपादिनिरूपणं। अपवर्त्तनास्वरूपादिकथनं। उदीरणास्वरूपादिकथनं। तत्र प्रकृत्युदीरणा, स्थित्युदीरणा, अनुभागोदीरणा, प्रदेशोदीरणा चेति तस्याश्चातुर्विध्यकथनं। एवं ज्ञानावरणादिषु उदीरणाभेदनिरूपणं। तत्र तत्र शुभाशुभविपाक-पुद्गलविपाक-क्रोधादिविपाकप्रभृतिनिरूपणञ्च। अथ उपशमनास्वरूपादिनिरूपणं। तथा सा करणकृता अकरणकृता चेति द्विविधा। एवम् अनुदीर्णोपशमनादिभेदनिरूपणं। सम्यग्दृष्टिमिथ्यादृष्ट्यादिस्वरूपकथनं। देशविरतिसर्व्वविरतिप्रभृतिस्वरूपकथनं। अथ निधत्तिनिकाचस्वरूपादिकथनं। अथ उदयनिरूपणं। तत्र प्रकृत्युदयस्थित्युदयभेदेन तस्य द्वैविध्यादिनिरूपणं। अथ अनुभागसत्कर्म्मस्थानभेदादिनिरूपणञ्च।

No. 2709. कर्म्मप्रकृतिटीका। Substance, country-made paper, 11 × 5 inches. Folia, 171. Lines, 13 on a page. Extent, 7,481 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

A Sanskrit commentary on the work described under the next preceding No. By Malayagiri.

Beginning. प्रणम्य कर्म्मद्रुमचक्रनेमिं नमत्सुराधीशमरिष्टनेमिं।
कर्म्मप्रकृत्याः कियतां पदानां सुखावबोधाय करोमि टीकां॥
अयं गणभृद्विरचितः समग्रो यदक्षरादिर्वेदनीह किञ्चित्।
उपाधिसम्पर्कवशाद्विशेषो लोकेऽपि दृष्टः स्फटिकोपलस्य॥

इह शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्त्तमानाः सन्त इष्टदेवतानमस्कारपुरःसरमेव प्रवर्त्तन्ते। न चायमाचार्य्येण शिष्टसमयपरिपालनाय — — —

[End. एनामतिः श्रीरां कर्म्मप्रकृतिं विवृण्वता कुशलं ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥
अर्हन्तो मङ्गलं मे स्युः सिद्धास्य मम मङ्गलं ।
मङ्गलं साधवः सम्यक् जैनो धर्म्मस्य मङ्गलम् ॥

Colophon. इति श्रीमलयगिरिविरचिता कर्म्मप्रकृतिटीका समाप्ता ।

विषयः । कर्म्मप्रकृतिनामकजैनसूत्रस्य व्याख्यानं ।

No. 2710 भरतादिकथा, वा कथाकोशः । Substance, country-made paper, 11 × 4 inches. Folia, 528. Lines, 8 on a page. Extent, 13,175 ślokas Character, Nágara. Date, Sm. 1669. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect. Sanskrit and Mágadhí.

Bharatádikathá alias **Kathákáśa.** A collection of legends, giving Jain versions of the lives of ancient personages described in Hindu and Buddhist works. The leading heroes of the Mahábhárata are noticed at considerable length. By Subhaśíla, disciple of Muṇisundara Súri.

Beginning. ॐ नमः सर्व्वज्ञाय ।
युगादौ व्यवहाराध्वा सर्व्वो येन प्रकाशितः ।
स श्रीऋषभयोगीन्द्रो दद्याद्वोऽव्ययसम्पदं ॥
त्यक्त्वा चक्रित्रियं सद्यो ललौ यः संयमश्रियं ।
स श्रीशान्तिजिनो भूयाज्जनानां शिवशर्म्मणे ॥
येन सौरावतारेण यदुवंशः पवित्रितः ।
स श्रीनेमिजिनाधीशो भूयाद्व्ययसम्पदे ॥
— — — — — — — — — ।
तपागच्छाधिपाः श्रीमन्मुनिसुन्दरसूरयः ।
तच्छिष्यः शुभशीलाङ्को भरतादिकथां व्यधात् ॥

तथाहि तत्र प्रथमं भरतेश्वर बाहुबली अभयकुमारो धंदुणकुमारो शिवि उच्चधिया — — । इत्यादि ।

End. श्रीमन्मुनीशमुनिसुन्दरसूरिराज-
शिष्योमना + + इति + + + ।

एनां कथां वितनुते स्म नवाम्बरेषु
चन्द्रप्रमाणसमये किलविक्रमार्कात् ॥
भरहेसरबाहुबली इत्तिः शुभशीलविबुधरचितेयं ।
शोधा + + विद्वद्भिः सदयैः + + पसारणतः ॥
— — — — — — — — — — ।

Colophon. इति श्रीमत्पागच्छाधिराजश्रीमुनिसुन्दरसूरिशिष्यपण्डितश्रीशुभशीलविरचितकथाकोशे द्वितीयो महासत्त्वाधिकारः समाप्तः । शुभमस्तु । संवत् १६६९ ।

विषयः । सद्दानस्य शुभजनकत्वकथनमुखेन भरतस्य उपाख्यानकथनं । तच्च आदिजिनस्य ऋषभदेवस्य चयोदशजन्मविवरणकथनञ्च । जीवहिंसायाः निरतिशयपापजनकत्वकथनं । सत्पात्राय दानफलकथनं । अथ धनसार्थवाहस्य उपाख्यानकथनं । दारिद्र्यनाशनकथनं । अथ वज्रजङ्घस्य उपाख्यानकथनं । अथ भरतपुत्रस्य पुण्डरीकस्य उपाख्यानकथनं । अभयकुमारस्य मुक्तिप्राप्तिविवरणकथनं । द्वारकावासिमुकुन्दतनयस्य ढंढणकुमारस्य इत्तान्तकीर्त्तनं । श्रावकस्य उपाख्यानकथनं । राजगृहनगराधिपस्य श्रेणिकस्य इत्तान्तकथन । पुण्यचूडस्य उपाख्यानकथनं । अञ्जिकापुत्रस्य उपाख्यानकथनं । विजयराजस्य उपाख्यानकथनं । मङ्गुकस्य कथाकीर्त्तनं । अदत्तादानग्रहणकथाकीर्त्तनं । अथ नागदत्तस्य उपाख्यानकथनं । स्थूलभद्रकथाकीर्त्तनं । वज्रस्वामिचरित्रकीर्त्तनं । नन्दिषेणकथाकीर्त्तनं । कुशीलस्य चरित्रकथनं । कोशिगणधरस्य उपाख्यानकथनं । करकन्दूकथाकीर्त्तनं । चक्रविचक्रकथाकीर्त्तनं । सुदर्शनश्रेष्ठिकथा । शालमहाशालकथा । शालिभद्रकथा । वराहमिहिरस्य कथा । भद्रबाहुकथा । अथ अभिमानवर्ज्जनादिमाहात्म्यकथनमुखेन दशार्णभद्रराजर्षेरुपाख्यानकथनं । असारसंसारस्वरूपादिशुभभावनात्मकध्यानमाहात्म्यकथनं । तच्च यशोभद्रसूरेर्विवरणकथनं । शिवकुमारस्य इत्तान्तकथनं । जम्बूकुमारस्य उपाख्यानकथनं । प्रभवस्वामीदीक्षाइत्तान्तकथनञ्च । इलातीपुत्रस्य उपाख्यानकथनं । युगबाहुकथा । हस्तिसूरिकथा । आर्य्यरक्षितसूरिकथा । मनककथा । सरस्वतीभ्रातुः कालिकसूरेः कथा । सत्यभामाशाम्बप्रद्युम्नादीनामुपाख्यानकथनं । मूलदेवकथा । विष्णुकुमारचरित्रकथनं । आर्द्रकुमारयतिकथा । दृढप्रहारिकथा । मेघकुमारकथा । सुन्दकसूरिकथा । धनदेवधनमित्रयोरुपाख्यानकथनं । उत्तमचरित्रराजकथा । कुटुम्बप्रियायाः कथाकीर्त्तनं । कृपणकथा । सुलसाचरित्रकीर्त्तनं । मदनरेखाया उपाख्यानकथनं । मैमीकथा । नर्म्मदासुन्दरीकथा । ऋषिदत्ताकथा । सीताचरित्रकीर्त्तनं । तच्च सीताहरणादिदृष्टान्तकथनञ्च । सुभद्राचरित्रकथनं । अञ्जनासुन्दर्य्या उपाख्यानं । ज्येष्ठाया उपाख्यानं । मृगावत्या उपाख्यानम् । प्रभावत्या उपाख्यानम् । वेन्नातया उपाख्यानम् । ब्राह्मसुन्दर्य्या उपाख्यानं । रेवत्या उपाख्यानं । गान्धार्य्या उपाख्यानं कुन्त्या उपाख्यानं । देवक्या उपाख्यानं । द्रौपद्या कथा । धारिणीकथा । कलावतीकथा । पुण्यचूडाकथा । रुक्मिणीकथा । शीलवतीकथा ।

नन्दयन्नीकथा । रोहिणीश्लपसाद्दिविवरणकथनं । रतिसुन्दर्य्या उपाख्यानं । श्रीमत्या उपाख्यानकीर्त्तनञ्च ।

No. 2711. श्रीशीलोपदेशमाला, बालावबोधसहिता । Substance, country-made paper, 10 × 4 inches. Folia, 175. Lines, 13 on a page. Extent, 58,134 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Text, Gáthá, Commentary, Gujaráti. Incorrect.

Sílopadeśa-málá. With a commentary entitled *Bálávabodha.* A collection of stories in illustration of the merits of good conduct. By Jinachandra Súri; the commentary by Merusundara Upádhyáya. Sítá and other leading personages of Hindu works are noticed.

Beginning. मूलस्य,—

आबालवल्लभयारिं नेमिकुमारं नमिउ जयसारं ।
सीलोपएसमालं वुच्छामि विवेयकरिसालं ॥

टीकायाः,—

श्रीवामे + + मयश्रीसहितं मलितं गुणैः ।
प्रणिपत्य सत्यभक्त्यानन्नातिशयशालिनं ॥
श्रीजिनचन्द्रगुरूणामादेशान्मेरुसुन्दरविनेयः ।
श्रीलोपदेशमालां विवृणोति शिशुप्रबोधाय ॥

+ रि इष्टदेवता नमस्करी सीलोपदेशमालाना बालावबोध भणि आदिगाथाकहइ । इत्यादि ।

End. मूलस्य,—

इयजयसिंहमणीसरविणयजायकित्तिणा + + + मयं ।
सीलोपएसमालं आराहइ लहवो + + फलं ॥

टीकायाः,—

— — — — — — — — — — ।

सिद्धान्तोक्तगाथारूपप्रकरणभणतां गुणतां शुद्धशीलपालतां भावना भावउ जिम + + बीजमूं फल लहउ परम्पराइं मोक्षपणिपामिउं ॥

Colophon. इति श्रीशीलोपदेशमालावबोधश्रीखरतरगच्छनायकश्रीजिनचन्द्रसूरिविजय + श्रीमेरुसुन्दरोपाध्यायविरचितबालावबोध समाप्त ।

विषयः । उक्तमेव शीलेनैव सम्यग्ज्ञानदर्शनचरित्रप्राप्त्या मोक्षलाभो भवतीतिकथनम्

षेन विविधसाधुचरितकीर्त्तनं। तत्र साधुना शीलेनैव गुणसुन्दर्य्या मोक्षप्राप्तिरिति दृष्टान्तकथनं। शीलव्रतमाहात्म्यकथनप्रसङ्गेन ऋषीणां चरितकथनं। एवं विदेहाधिपतेः अभिचन्द्रस्य दृष्टान्तकथनं। नारदपर्व्वतकथोपाख्यानं। लीलावत्या उपाख्यानं। रिपुमर्दननारायणकथा। विजयपालस्य दृष्टान्तकथनं। पद्मावत्या उपाख्यानं। हरिणीकथा। द्वारकेशनारायणकथा। आर्द्रकऋषेरुपाख्यानं। अभयकुमारकथा। नन्दिषेणकथा। यशोमतीकथा। नेमिजिनस्य चरितकथनं। मल्लीचरितकथनं। मुनिभद्रस्य चरितकथनं। वयरस्वामिचरितकथनं। सुदर्शनोपाख्यानं। चक्रचूड़ोपाख्यानं। सुभद्रोपाख्यानं। मदनरेखायाः महासत्याः उपाख्यानं। अङ्गनासुन्दर्य्या उपाख्यानं। नर्म्मदासुन्दर्य्या उपाख्यानं। रतिसुन्दर्य्या उपाख्यानं। ऋषिदत्तायाः उपाख्यानं। दमयन्त्या उपाख्यानं। कमलायाः महासत्याः उपाख्यानं। कलावत्या उपाख्यानं। नन्दयन्त्या उपाख्यानं। रोहिण्या उपाख्यानं। कुलबालकस्य उपाख्यानं। रूपवत्या उपाख्यानं। देवदत्तस्य सुवर्णकारस्य उपाख्यानं। पण्डितस्य उपाख्यानं। दत्तदुहितुरुपाख्यानं। अगड़दत्तमुनेरुपाख्यानं। राजबालायाः उपाख्यानं। जनकतनयायाः सीतायाः उपाख्यानं। धनश्रीकस्य उपाख्यानकथनञ्च।

No. 2712. बन्धहेतूदयत्रिभङ्गी। Substance, country-made paper, 10 × 4½ inches. Folia, 18. Lines, 4 on a page. Extent, 216 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Mágadhí.

Bandha-hetúdaya-tribhaṅgí. Jain theory of bondage and emancipation. By Harshakus'ala Gaṇi.

Beginning. बंधणहेउविमुक्कं वंदित्ता वद्धमाणतित्थयरं।
गुणसट्ठियमग्गणस्स भणामि हेउदय सामित्तं॥
मिच्छे सासणमीसे अविरयदेसे पमत्त अपमत्ते।
नियट्टिअ नियट्टि सु+म वसमखीण सजोगि अजोगिगुणा॥ इत्यादि।

End. इअमग्गणठाणेहुं गुणवाणगजो अणेण हेउ+दउ।
भणिउ सपरहि अत्थं सिरिसायरसूरिसीसेण॥

Colophon. इति श्रीबन्धहेतूदयत्रिभङ्गी सम्पूर्णा।

विषयः। प्रथमतो बन्धहेतूनां मिथ्यात्व-सासादन-मिश्र-अविरति-प्रमत्तप्रभृतीनां गुणानामुद्देशकथनं। मार्गणास्थानकथनं। योगस्थानकथनं। तत्र तत्र बन्धहेतुलक्षणनिरूपणं। त्रिभङ्गीयन्त्रकथनञ्च। अथ नरकद्वारनिरूपणं। तिर्य्यग्द्वारनिरूपणं। तत्र तत्र त्रिभङ्गीयन्त्रकथनञ्च। मनुष्यद्वारनिरूपणं। तत्र युगलिनरनारीणां त्रिभङ्गादिकथनं। अथ देवदेवीनां त्रिभङ्गीक-

थनं। देवानां गतिनिरूपणं। इन्द्रियद्वारनिरूपणं। कायद्वारनिरूपणं। योगद्वारनिरूपणं। तच्च असत्योभयमनोवाग्योगादिविभङ्गीकथनं। एवं वैक्रियमिश्रकाययोगादिषु तत्कथनं। पुंवेदविभङ्गीकथनं। एवं स्त्रीवेदक्लीववेदविभङ्गीकथनं। क्रोध-मान-माया-लोभादिषु विभङ्गी-कथनं। मनःपर्य्यायज्ञानविभङ्गीकथनं। केवलज्ञानविभङ्गीकथनं। मतिश्रुतावधिविभङ्गीकथनं। अथ संयमद्वारकथनं। अथ देशविरति-परिहारचारित्रादिविभङ्गीकथनं। चक्षुः—अवधि-केवलदर्शनविभङ्गीकथनं। क्षायिकोपशमिकादिविभङ्गीकथनं। असंज्ञिविभङ्गीनिरूपणञ्च।

No. 2713. जीवविचारप्रकरणम्, वा (जीयवियारो।) Substance, country-made paper, 10 × 5 inches. Folia, 8. Lines, 6 on a page. Extent, 102 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Generally correct. Mágadhí.

Jíyaviyáro, (Sanskrit,) Jívavichára-prakaraṇa. Jain biology. By S'ánti Súri.

Beginning. भुवणपईवं वीरं नमिउण भणामि अवोहवोहत्थं।
जीवसरूवं किं चिवि जहभणियं पूव्वसूरीहिं॥
जीवा मुत्तासंसारिणोय तस थावराय संसारी।
पुढवि जलजलणवाऊ वणस्सइ थावरा नेया॥ इत्यादि।

End. एसो जीयवियारो संखेवरूइण जाणणहेउं।
संखित्तो उद्धरिउ रुद्दाउ सुयसमुद्दाउ॥

Colophon. इति श्रीजीवविचारप्रकरणं समाप्तं।

विषयः। तच्च मुक्तसंसारिभेदेन जीवानां द्वैविध्यकथनं। संसारिणोऽपि स्थावरजङ्गम-भेदात् द्विविधाः। अथ मही-जल-वह्नि वायु-वनस्पतीनां स्थावरजीवत्वकथनं। तच्च स्फटिक-विद्रुम-रत्न-हरिताल-कनकादिधातु-पाषाणादिरूपपृथ्वीकायजीवभेदकथनं। एवं मेघ-तुषार वर्षोपलादिरूपजलकायजीवभेदकथनं। अङ्गार-ज्वाला-मुर्मुर-विद्युदादिरूपतेजःकायजीव-भेदकथनं। ऊद्भ्रामकोत्कलिकामण्डलिप्रभृतिरूपवायुकायजीवभेदकथनं। वनस्पतिकायाः साधारणप्रत्येकभेदेन द्विधा। तच्च निगोदापराभिधानानां साधारणवनस्पतिकायजीवानाम् अनन्तभेदतया लोकप्रसिद्धा कन्द-च्छिन्नरुहादिरूपविविधकथनं। अथ पृथिव्यादयः पञ्च स्पर्श रूपैकेन्द्रियमुक्तजीवा इति निरूपणं। एवं शङ्खशम्बिप्रभृतयः स्पर्शरसनारूपेन्द्रिययुक्तत्वात् द्वीन्द्रिया इति कथनं। मत्कुण-यूक-पिपीलिकाप्रभृतयः स्पर्शरसनाघ्राणेन्द्रिययुक्तत्वात् त्रीन्द्रिया इति कथनं। दंशमशकाद्यः स्पर्श-रसना-घ्राण-श्रवणेन्द्रिययुक्तत्वात् चतुरिन्द्रिया इति निरू-

पणं। अथ स्पर्श-रसना-घ्राण-श्रवण दर्शनेन्द्रिययुक्ताः पञ्चेन्द्रियजीवाः नारक-तिर्य्यक्-मनुष्य-देवनाभेदेन चतुर्व्विधा इतिनिर्देशः। अथ नारकजीवानां पार्थिवादिभेदेन सप्तविधत्वकथनं। अथ तिरश्चां जलचरस्थलचरखेचरभेदेन त्रैविध्यनिरूपणं. तच तच संक्षेपेण जलचरादितिर्य्यग्भेदनिरूपणं। अथ मनुष्यास्त्रावत् त्रिविधाः। तच केचित् कृषिवाणिज्यादिकर्म्मप्रधानभूमिजातत्वात् कर्म्मभूमिजाः अपरे पुनः उक्तविधकर्म्मरहितायां भूमौजातत्वात् अकर्म्मभूमिजाः। केचिच अन्तरद्वीपजाता इतिनिरूपणं। अथ क्रमेण उत्कृष्टापकृष्टादिरूपभेदेन एकेन्द्रियादिजीवानां देहमानादिकथनं। एवं नारकतिर्य्यगादिजीवानां देहमानादिकथनं। अथ सर्व्वेषां जीवानां क्रमेण स्थितिरूपजीवितकालनिरूपणं। अथ जीवानां प्राणाः दशधा इति कथनपूर्व्वकम् एकेन्द्रियादिषु सर्व्वेषु जीवेषु विभागकथनं। जीवानां जन्ममरणयोरानन्त्यकथनं। तच च चतुरशीतिलक्षयोनिषु जीवानां जन्म भवतीतिकथनं। अथ मुक्तानां जन्मकर्म्मादिराहित्यकथनञ्च।

No. 2714. दशवैकालिकसूत्रवृत्तिः। Substance, country-made paper, 10 × 4 inches. Folia, 69. Lines, 13 on a page. Extent, 3,354 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Báhadur. Appearance, fresh. Incorrect. Text, in Mágadhí verse; Commentary in Sanskrit prose.

Daśa-vaikálika-sútra-vritti. A commentary on the well-known Jain text, entitled *Daśa-vaikálika-sútra*. By Vinayahañsa Yati.

Beginning. धम्मो मंगलमुक्कट्ठं अहिंसा संजमो तवो।
देवारितं नमंसंति जस्स धम्मे सया मणो॥

धर्म्मः उत्कृष्टं मङ्गलं। किं लक्षणो धर्म्मः। अहिंसा जीवदया। संयमः पञ्चेन्द्रियनियहः। तपो द्वादशधा। यस्य जन्तोर्धर्म्मे मनः सदा वर्त्तते। देवा अपि तं नमस्कुर्व्वन्ति। इत्यादि।

End. श्रीसीमन्धरपार्श्वात् + + + + + + + मविकानां जीवानां विबोधनार्थं एते द्वे + + आनीते।

Colophon. इति दशवैकालिकसूत्रवृत्तिः सम्पूर्णा।
श्रीनौजराख्यनगरे विधिपक्षनाथ-
श्रीभावसागरमुनीश्वरसुप्रसादात्।
सद्विनतां महिमरत्नसुपाठकानां
शिष्यो मुदा विनयहंसयतिः करोति॥
संवत्सरे युगलसप्ततिथिप्रमाणे १५७२
दृष्ट्वा विलोक्य मतिनो निजशिष्यकार्थं।

वृत्तिश्च सूत्रसहिता दशकालिकस्य
सा पण्डितैर्विजयते किल वाच्यमाना ॥

विषयः। दशवैयालियसुत्ताभिधानजैनसूत्रस्य व्याख्यानम्।

No. 2715. वीरविक्रमादित्यचरित्रम्। Substance, country-made paper; 12 × 5 inches. Folia, 114. Lines, 9 on a page. Extent, 3,065, ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Víravikramáditya-charitra. A Jain version of the history of Vikramáditya, king of Málava, rendered into verse from an original prose redaction. By Rámchandra Súri. This is quite distinct from the Vikramáñka-charita, edited by Dr. G. Buhler.

Beginning. प्रणम्य जगदानन्ददायकान् जिननायकान्।
गणेशान् गौतमाद्यांश्च गुरून् संसारनायकान्॥
सज्जनान् शोभकारांश्च शास्त्रबोधनकारकान्।
पञ्चदण्डातपत्रस्य कथां वक्ष्ये समासतः॥
तथाहि मालवे देशेऽवन्त्यां श्रीविक्रमो नृपः।
राज्यं करोति सत्त्वात्मा कर्म्मसाक्षीव भूतले॥
एकदा विक्रमो राजा पाटिकायां चतुष्पथे।
गच्छन् गाच्छिकवाटस्य मध्ये सौधोपरिस्थितां॥ इत्यादि।

End. श्रीविक्रमार्कौ नृपतिर्मुहूर्त्ते संस्थापितो भूपवरैरसंख्यैः।
सिंहासने ह्यद्युते निवेशितस्तदा महानन्दमहोत्सवेर्युतः॥
श्रीविक्रमार्कनरेश्वरस्य श्रीपञ्चदण्डातपच्छत्रवन्से।
पट्टे महाश्चर्य्यकरे यथोक्तैर्धर्म्मान्वितः पञ्चकतः प्रबन्धः॥
यथा शर्करया दुग्धं वनं सिंहेन भूष्यते।
काननं कल्पवृक्षेश्च राजहंसैः सरोवरं॥
ज्ञानकुम्भं वरैः रत्नैः सुवस्त्रैर्मानवो जनः।
गजेन्द्रो वरघण्टाभिः शस्त्रैः शूरो नृपो दलैः॥
— — — — — — — — — —।
श्रीसाधुपूर्णिमापक्षाः कानने कल्पपादपाः।
श्रीमद्भयचन्द्राख्याः सूरयो गुणभूरयः॥

तेषां पादप्रसादेन मया मूर्खेण निर्म्मितः।
ग्रन्थो विद्वज्जनैः शोध्यः कृपां कृत्वा ममोपरि॥
श्रीविक्रमार्कंकालात्तु खनि + + संख्यकैः।
वर्षे माघे सिते पक्षे + + चतुर्दशीदिने॥
पुष्ये रवौ लग्ननीर्थे श्रीरामचन्द्रेण सूरिणा।
गद्यात् पद्यमयोऽकारि प्रबन्धो जनरञ्जकः॥

— — — — — — — —

Colophon. इति श्रीमद्वीरविक्रमादित्यचरित्रं समाप्तम्।

विषयः। उज्जयनीनाथस्य वीरविक्रमादित्याभिधेयस्य राज्ञः अलौकिकदृत्तान्तभूयिष्ठतया वेतालादिसिद्धिकथनपूर्व्वकं जीवनीकथनं। अस्मिन् तु जैनधर्म्मं जयाद्देतिवर्णनञ्च।

No. 2716. षोड़शकप्रकरणम्। Substance, country-made paper, 15 × 4½ inches. Folia, 43. Lines, 3—4 on a page. Extent, 320 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Raya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Shoḍaśaka-prakaraṇa. An enquiry into the truth of the Jaina religion, and the duties compulsory on the Jains. By Haribhadra Súri. (*f.* No. 2656.)

Beginning. ॐ नमः प्रणिपत्य जिनं सद्धर्म्मपरीक्षकादिभावानाम्।
बालादिभेदतः खलु वक्ष्ये किञ्चित्समासेन॥
बालः पश्यति लिङ्गं मध्यमबुद्धिर्विचारयति वृत्तम्।
आगमतत्त्वन्तु बुधः परीक्षते सर्व्वयत्नेन॥
बालो ह्यसद्ग्राही मध्यमबुद्धिस्तु मध्यमाचारः।
ज्ञेय इह तत्त्वमार्गे बुधस्तु मार्गानुसारी यः॥ इत्यादि।

End. एते प्रवचनतः खलु समुद्भूता मन्दमतिहितार्थन्तु।
आत्मानुस्मरणाय च भावाभवविरहसिद्धिफलाः॥
धर्म्मश्रवणे यत्नः सततं कार्य्यो बहुश्रुतसमीपे।
हितकाङ्क्षिभिर्दृष्टसिद्धैर्वचनं + + हारिभद्रमिदम्॥

Colophon. इति षोड़शकप्रकरणम्॥

विषयः। सद्धर्म्मरूपजैनधर्म्मपरीक्षाविधिकथनं। तच्च उत्तम-मध्यमबालभेदेन परीक्षकस्य त्रैविध्यकथनं। तेषां प्रत्येकं व्यापारकथनं। अथ बालस्य वाह्यधर्म्मपरीक्षाधिकारित्वमात्रमिति निरूपणं। मध्यमस्यचारित्ररूपधर्म्माधिकारित्वनिर्णयः। अथ आत्मनश्चैतन्यरूपत्वव्यवस्थापनं।

तस्य परिणामिलादिकथनञ्च । अथ गुरोर्बालादीन् प्रति धर्म्मदेशनाविधिकथनं । आगमग्रहणस्य गुर्व्वधीनत्वादिकथनं । अथ चित्तमेव रागादिमलापगमेन पुष्टिगुद्दिश्यसमन्वितं धर्म्म इति-धर्म्मलक्षणकथनं । तच्च चित्तस्य उपचीयमानता पुष्टिः । गुडिसु पापक्षयेण । पापञ्च ज्ञानावरणीयादिसम्यग्ज्ञानादिगुणविघातहेतुत्वाति कर्म्म उच्यते । तथा च पुष्टिगुद्दिश्येऽस्मिन् प्रत्यचीकृते सति क्रमेण आनुपूर्व्व्या पुण्योपचयपापक्षयाभ्यां प्रवर्द्धमानाभ्यां तस्मिन् जन्मनि जन्मान्तरे वा प्रक्षयमाणवीर्य्यस्य जीवस्य मुक्तिः सर्व्वकर्म्मक्षयलक्षणेतिनिरूपणं । धर्म्मान्तरायरूपविघ्नजयविधिकथनं । औदार्य्यदाक्षिण्यादीनां धर्म्मलक्षणत्वकथनं । धर्म्मोय महादानादिविधिकथनं । देवार्च्चनविधिकथनं । जिनभवननिर्म्माणविधिकथनं । जिनबिम्बनिर्म्माणविधिकथनं । तत्प्रतिष्ठाविधिकथनं । तत्पूजाविधिकथनं श्रुतज्ञानलिङ्गकथनं । धर्म्मशुश्रूषामाहात्म्यकथनं । तच्च श्रुतमयज्ञानलक्षणकथनं । चिन्तामयज्ञानलक्षणकथनं । भावनाज्ञानलक्षणं । ज्ञानविपर्य्ययादिलक्षणकथनं । दीक्षाविधिकथनं । अथ निष्पन्नयोगानां मैत्र्यादिरूपचित्तपरिणामकथनं । अथ सालम्बननिरालम्बनभेदेन द्विविधयोगनिरूपणं । तच्च चित्तेपादिपरीहारावश्यकताकथनं । ध्यानविधिकथनमुखेन जिनेन्द्रमूर्त्तेः ध्येयत्वकथनं । कैवलज्ञानस्वरूपकथनं । परतत्त्वस्वरूपकथनं । तच्च वैशेषिकबौद्धादिमतखण्डनञ्च ।

No. 2717. षोड़शकविवरणम् । Substance, country-made paper, 14 × 4½ inches. Folia, 58. Lines, 9 on a page. Extent, 1,566 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Shoḍasáka-vivaraṇa. A commentary on the work noticed under the next preceding No. By Yaśobhadra Súri. This is distinct from the work noticed under Nos. 2656 and 2716, (*ante*, pp. 118, 170.).

Beginning. अर्हतमिवार्हतमनघं जगाद् जगतो हिताय यो वीरः ।
तस्मै मोहमहाविषविघातिने स्वात्ममः सततम् ॥
यस्याः संस्मृतिमाचाद्भवन्ति मतमः सुदृष्टपरमार्थाः ।
वाचस्य बोधविमलाः सा जयति सरस्वती देवी ॥

रह जलधिनिमग्नसत्त्वाभ्युज्जिहीर्षाभ्युद्यतेन खचितसम्यादननिपुणेन गुरुलाघवचिन्तावता प्रश्नार्थव्याकरणसमर्थेन विदुषा सद्धर्म्मपरीक्षायां यत्नो विधेयः । सा च परीक्षकमन्तरेण न सम्भवति तद्विनाभावित्वात् परीक्षायाः । — — — — — हरिभद्रसूरिरस्य चादावेव मङ्गलप्रयोजनाभिधेयसम्बन्धप्रतिपादनार्थमिदमार्य्यासूत्रमाह । प्रणिपत्येत्यादि ।

End. कृत्वा विवरणमेतत् पुण्यं यदवापि तेन भव्यजन ।
अध्यास्तां षोड़शकलाशशिमण्डलभास्वरं स्थानम् ।

कृतिरियं श्रीश्वेतपटाचार्य्यस्य यशोभद्रसूरेरिति ।

Colophon. इति षोड़शकविवरणम् ।

विषयः । हरिभद्रसूरिकृतषोड़शकप्रकरणस्य व्याख्यानम् ।

No. 2718. गुणस्थानक्रमारोहः लोकनालवृत्तिसहितः । Substance, country-made paper, 10 × 5 inches. Folia, 6. Lines, 9 on a page. Extent, 148 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect. Text, Mágadhí verse; Commentary, Sanskrit prose.

Guṇasthána-kramároha, with a commentary entitled **Loka-nála-vṛitṭi.** On the gradation of Jain virtues. By Jinabhadra Súri. The comment is by the author himself.

Beginning. मूलस्य ।

जिणदंसणं विणाजं लोयं पूरंति जम्ममरणेहिं ।
भमइ जिचोणंतभवे तस्स सरूवं किमवि वुत्तं ॥
रइसाहठाण सिंचपय कड़ित्थकरजूगनरागिइ लोगो ।
उप्पत्तिनामधुयगुण थमाइयदय पड़िपुणो ॥

टीकायाः जिणदंसणं इति । जिनदर्शनं विना यल्लोकं चतुर्दशरज्वात्मकं जन्ममरणे पूरयन्—इत्यादि ।

End. मूलस्य,—

इय पयरलिहियवग्गिय संवट्टियलोगसारसुवलत्थ ।
सुयधम्मकित्तिथं तह जयह जहा भमइनइ हविसं ॥

टीकायाः—

— — — — — — — — ।

लोकनालयन्त्रं हस्ते कृत्वा) गंढीला । एषा एव अवचूरि विलोक्या ॥

Colophon. इति श्रीजिनभद्रसूरिकृता लोकनालवृत्तिः समाप्ता ।

विषयः । निजकृतगुणस्थानक्रमारोहसूत्रस्य व्याख्यानम् ।

No. 2719. गुणस्थानक्रमारोहः । Substance, country-made paper, 10 × 5 inches. Folia, 19. Lines, 5 on a page. Extent, 220 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Generally correct. Sanskrit.

Guṇasthana-kramároha. On the gradation of Jain virtues. By Ratnaśekhara Súri. Fourteen virtues are reckoned, and their character, and the way in which devotees ascend from one to the next in order are described at length.

Beginning. गुणस्थानक्रमारोहंहतमोहं जिनेश्वरं।
नमस्कृत्य गुणस्थानस्वरूपं किञ्चिदुच्यते ॥
चतुर्दशगुणश्रेणीस्थानकानि तदादिमं ।
मिथ्यात्वाख्यं द्वितीयन्तु स्थानसासादनाभिधं ॥
तृतीयं मिश्रकं तूर्य्यं सम्यग्दर्शनमव्रतं ।
आद्यं पञ्चमं षष्ठं प्रमत्तश्रमणाभिधं ॥ इत्यादि ।

End. नात्मन्याभावरूपा न च जडिममयी व्योमवद्व्यापिनी नो
न व्याप्तिं दधाना विषयसुखघना नेच्छते सर्व्वविद्भिः ।
सद्रूपात्मप्रसादाद्गगनगमगुणौघेन संसारसारा
निःसीमात्यन्तसौख्योदयवसतिरनिः पातनी मुक्तिरुक्ता ॥
इत्युद्दृतो गुणस्थानरत्नराशिश्रुतार्णवात् ।
पूर्व्वर्षिसूक्तिनावैव रत्नशेखरसूरिभिः ॥

Colophon. इति श्रीगुणस्थानक्रमारोहः सम्पूर्णः ।

विषयः । ग्रन्थेऽस्मिन् भव्यजीवानां सिद्धिसौधाधिरोहणार्थं चतुर्दशगुणश्रेणीरूपनिःश्रेणिपरम्परया क्रमेण गुणान्तरप्राप्तिकथनं । तत्र चतुर्दशगुणा यथा,—प्रथमं मिथ्यात्वं नाम गुणस्थानकं । एवं द्वितीयं सासादनं । तृतीयं मिश्रं । चतुर्थं सम्यग्दर्शनं । पञ्चमं देशविरतिः । षष्ठं प्रमत्तसंयतः । सप्तमं प्रमत्तं । अष्टमं अपूर्व्वकरणं । नवमं विरतिबादरं । दशमं सूक्ष्मसम्परायं । एकादशं उपशान्तमोहं । द्वादशं क्षीणमोहं । त्रयोदशं संयोगः । चतुर्दशं अयोग इति । तत्र मिथ्यात्वलक्षणकथनपूर्व्वकं तद्दूषणादिकथनं । अस्य स्थानादिनिरूपणं । सासादनस्वरूपादिकथनं । एवमन्यान्यगुणस्थानानां स्वरूपादिकथनं । तत्र एकादशगुणस्थाने योगनिरूपणं । ध्यानादिनिरूपणं । आसनादिनिरूपणं । प्राणायामलक्षणादिकथनं । तत्र तत्र पूरककुम्भकादिलक्षणकथनं । प्राणायामेन पवनजये सति मनोजयस्य अवश्यम्भाविताकथनं । शुक्लध्यानादिभेदनिरूपणं । सवितर्कादिध्याननिरूपणं । तीर्थङ्करमाहात्म्यकथनं । सूक्ष्मयोगनिरूपणं । अथ योगी चरमे समये या द्वासप्ततिसंख्याः प्रकृतीः क्षपयति तत्कर्म्मप्रकृतिकथनं । तद्यथा,—देहपञ्चकं, बन्धनपञ्चकं, संघातपञ्चकं, अङ्गोपाङ्गत्रयं, संस्थानषट्कं, वर्णपञ्चकं, रसपञ्चकं, संहननषट्कं, स्पर्शाष्टकं, गन्धद्वयं, नीचैर्ग्गं, अनादेयं, दुर्भगं, अगुरुलघुकं, उपघातं, पराघातं, निर्म्माणं, अपर्य्याप्तं, उच्छ्वासं, अयशस्कं, विहायोगतिद्वयं । शुभाशुभद्वयं, स्थैर्य्या-

स्थैर्य्यद्वयं, देवगतिः, देवानुपूर्व्वी, प्रत्येकनाम, सुखरदुःखरद्वयं, वेद्यश्चेति । इमाः सर्व्वाः प्रकृतयः मुक्तिमार्गार्गलरूपा इति निरूपणं । सिद्धानां स्थितिनिरूपणं । तेषां ज्ञानदर्शनादिविषयकथनं । मुक्तिसुखरूपकथनञ्च ।

No. 2720. गुणस्थानक्रमारोहवृत्तिः । Substance, country-made paper, 10 × 5 inches. Folia, 20. Lines, 10 on a page. Extent, 624 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose Generally correct.

Guṇasthána-kramároha-vṛitti. A commentary on the work described in the next preceding No. By Ratnaśekhara Súri, the author of the text.

Beginning. अर्हत्पदं हृदि ध्यात्वा गुणस्थानविचारिणां ।
अनुष्टुभामियं वृत्तिर्लिख्यते ह्यवचूर्णिवत् ॥
तत्र मङ्गलार्थमभीष्टदेवतानमस्कारस्य सम्बन्धाविर्भावकमाद्यपद्यमाह, गुणस्थान इति ।
यत्र यत्र पूर्व्वाप्राप्तगुणविशेषाविर्भावो भवति । इत्यादि ।

End. स्वपरोपकाराय प्रकरणरूपतया प्रकटित इत्यर्थः ।
लिखितेयं गुणस्थानोद्धारश्लोकावचूर्णिका ॥
बुधाख्यिरेन्दु + + + श्री रत्नशेखरसूरिभिः ॥

Colophon. इति नागपुरीयतपागच्छमण्डनश्रीरत्नशेखरसूरिकृता गुणस्थानक्रमारोहवृत्तिः समाप्ताः ।

विषयः । निजकृतगुणस्थानक्रमारोहसूत्रस्य व्याख्यानम् ।

No. 2721. स्मृतिनिबन्धः । Substance, country-made paper, 14 × 5. inches. Folia, 248. Lines, 8 on a page. Extent, 6,444 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect.

Smṛiti-nibandha. An elaborate digest of the Hindu Smṛitis. By Nṛisiñha Bhaṭṭa.

Beginning. नमस्कृत्य महेशानं गिरिजार्द्धमनोहरं ।
निबन्धः क्रियते सम्यक् स्मृतिशास्त्रे महाद्भुतः ॥
यथादौ धर्म्मस्वरूपं विविच्यते । तत्र भगवान् जैमिनिः । चोदनालक्ष्योऽर्थो धर्म्मः । अत्र श्रवरः । इत्यादि ।

End. अत एव युगपत्पापानुष्ठानादपि तच न प्रायश्चित्ताधिक्यमिति।

Colophon. इति मीमांसकश्रीहर्षसिंहभट्टविरचिते स्मृतिनिबन्धे प्रायश्चित्तनिरूपणं।

विषयः। धर्म्मलक्षणादिनिरूपणं। विधिनिषेधार्थवादादिनिरूपणं। संकल्पादिलक्षणनिरूपणं। चतुराश्रमसामान्यधर्म्मकथनं। विशेषेण गार्हस्थ्यधर्म्मकथनं। गृहस्थानां (वह्वृचानां) आश्वलायनगृह्योक्तविधानेन कर्म्मानुष्ठानविधिकथनं। तच दारक्रियानिरूपणमुखेन विवाहविधिकथनं। सापिण्ड्यादिनिरूपनं। विवाह्ययोग्यकन्यादिलक्षणकथनं। अधिवेदनादिविधिकथनं। स्त्रीपुंसधर्म्मकथनं। अग्न्याधानादिविधिकथनं। गर्भाधानविधिकथनं। पुंसवनादिविधिकथनं। जातकर्म्मादिविधिकथनं। नामकरणान्नप्राशनविद्याचूडोपनयनवेदारम्भादिविधिकथनं। गुरुदक्षिणादिविधिकथनं। आह्निककृत्यनिरूपणं। तच प्रातःस्नानकालादिनिरूपणं। गायत्रीजपादिविधिकथनं। सन्ध्याविधिकथनं। अग्निहोत्रादिविधिकथनं। तर्पणादिविधिकथनं। वैश्वदेवादिविधिकथनं। विशेषेण पञ्चयज्ञविधिविवेचनं। भक्ष्याभक्ष्यनिरूपणं। तच तच विहिताविहितादिद्रव्यनिरूपणं। मुमूर्षुकृत्यनिरूपणं। दाहादिविधिकथनं। अशौचनिरूपणं। दशपिण्डदानादिविधिकथनं। एकादशाहकृत्यनिरूपणं। वृषोत्सर्गविधिकथनं। श्राद्धविधिकथनं। तच अधिकारादिनिरूपणं। मासिकसपिण्डनादिकालविवेचनं। अपकर्षादिविधिकथनं। मृत्युविशेषाशौचादिविधिकथनं। पर्वनरदाहविधिकथनं। आत्मघाते नारायणबलिविधिकथनं। दायभागनिरूपणं। प्रायश्चित्तविधिनिरूपणञ्च।

No. 2722. श्रीशोभनस्तुत्यवचूरिः। Substance, country-made paper, 10×4 inches. Folia, 16. Lines, 13 on a page. Extent, 884 ślokas. Character, Nágara. Date, ?. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Incorrect. Sanskrit.

Sobhanastutyavachúri. A gloss on Sobhana's twenty-four hymns in praise of Jina. Anonymous.

Beginning. तत्रादौ युगादिजिनस्तुतिमाह। भव्याम्भोज इति। हे नाभिनन्दन त्वं महान् उत्पन्नवान्। विदुषां सम्यादय इति सम्बन्धः। भव्याम्भोजानि भव्या एवाम्भोजानि कमलानि तेषां विबोधने एकोऽद्वितीयस्तरणिः सूर्य्यः। इत्यादि।

End. अम्बिके नीहारतारावलये सिंहे+संस्थिते सुतरां त्वं भव्यलोकमवेति सम्बन्धः।

Colophon. इति श्रीशोभनस्तुत्यवचूरिः॥

विषयः। शोभनानुतचतुर्विंशतिजिनस्तोत्ररूपस्य यमकालङ्कृतिमयकाव्यस्य व्याख्यानम्।

No. 2723. एकवीसठाणम्, (एकविंशतिस्थानम्।) Substance, country-made paper, 10 × 4 inches. Folia, 12. Lines, 5 on a page. Extent, 118 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Mágadhí.

Ekabísaṭhána (Sk. **Ekbiñsati-sṭhána**). Brief biographical notes on the name, birth-place, father's name, mother's name, the name of the Nakshatra and the zodiacal sign presiding at birth, asylum, height of body, duration of life, complexion, place of death, place of initiation, place of hermitage, rules of mendicancy, the place where supreme knowledge was obtained, number of successive teachers and followers, both male and female, previous births, heavens, and the place where perfection was achieved, by each of the 24 Jinas. By Siddhasena Súri.

Beginning. चवणविमाणा नयरी जणया जणनीओ रिक्खरासीओ।
लंछण पमाण आउ वण्ण अंतर दीक्खनवभिक्खा॥
नाणठाणगणहरमुणि अज्किय संख जक्ख देवीउ।
सिद्धट्ठाणं च कमेण साहिमो जिणवरिं दाणं॥ इत्यादि।

End. नवहिंसएं हिंसंति कहिं सचहिं परि+ड़ो विमलो।
उसहदसन्नणंतो सिसाउ सहस्स परिवारो॥
इय इक्कवीसठाणा उद्दरिया सिद्धसेण सूरिहिं।
चउवीस जिणवरानं असेससाहारणा भणिया॥

Colophon. इति श्रीएकवीसठाणं सम्पूर्णम्।

विषयः। ऋषभदेवादारभ्य वर्द्धमानपर्य्यन्तं चतुर्विंशतिजिनानां क्रमेण विमाननामकथनं। जन्मनगरीनामकथनं। पितृनामकथनं। मातृनामकथनं। जन्मनक्षत्रनामकथनं। राशिनामकथनं। लञ्छनकथनं। देहपरिमाणकथनं। आयुः कथनं। वर्णकथनं। अन्तरकालकथनं। दीक्षास्थानकथनं। तपस्यास्थानकथनं। भिक्षाविधिकथनं। ज्ञानस्थानकथनं। गणधरसंख्याकथनं। साधुसंख्याकथनं। साध्वीसंख्याकथनं। जन्मान्तरकथनं। (पूर्व्वजन्म)। देवीसंख्याकथनं। सिद्धस्थानकथनञ्च।

No. 2724. आलोचनास्तवः। Substance, country-made paper, 10 × 5 inches. Folia, 6. Lines, 4 on a page. Extent, 57 ślokas. Character, Nágara Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Sanskrit.

Alochaná-stava. A hymn in praise of Jina and prayer for his grace. By Ratnákara Súri.

Beginning. श्रेयः श्रियां मङ्गलकेलिसद्म नरेन्द्रदेवेन्द्रनताङ्घ्रिपद्म ।
सर्व्वज्ञ सर्व्वातिशय प्रधान चिरं जय ज्ञानकलानिधान ॥
जगत्त्रयाधार कृपावतार दुर्व्वारसंसारविकारवैद्य ।
श्रीवीतराग त्वयि मुग्धभावाद्विज्ञ प्रभो विज्ञपयामि किञ्चित् ॥ इत्यादि ।

End. दीनोद्धारधुरन्धरस्त्वदपरो नास्ते यदन्यः कृपा-
पात्रं नाथ जने जिनेश्वर तथाप्येतां न याचे श्रियं ।
किन्त्वर्हन् जिनमेव केवलमहो सद्बोधिरत्नं शिवं
श्रीरत्नाकरमङ्गलैकनिलयं श्रेयस्करं प्रार्थये ॥

Colophon. इति श्रीमदालोचनास्तवः समाप्तः ।

विषयः । वैषयिकसुखादेः नश्वरत्वमकिञ्चित्करत्वञ्चेति समालोच्य जिनेन्द्रस्तुतिव्याजेन तत्पुरतः वैराग्यप्रार्थनं ॥

No. 2725. आलोचनास्तवावचूरिः । Substance, country-made paper, 10 × 5 inches. Folia, 12. Lines, 10 on a page. Extent, 315 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Alochaná-stavávachúri. A gloss on the work noticed under the next preceding No. Anonymous.

Beginning. प्रणम्य श्रीमदर्हन्तमिष्टसिद्धिविधायकं ।
श्रेयः श्रियां मङ्गलस्य दृब्धिं कुर्व्वे शिष्टचितां ॥
श्रेय इति । हे नरेन्द्रदेवेन्द्रनताङ्घ्रिपद्म
नरेन्द्राश्चक्रवर्त्त्यादयः देवेन्द्राश्च । इत्यादि ।

End. एवेति निश्चये प्रार्थये याचे । कथं केवलमद्वितीयं शिवश्रीरत्नाकरेति-सम्बोधनं कथयता स्वोचकर्त्रा स्वनाम सूचितं श्रीरत्नाकरसूरिरिति ।

विषयः । रत्नाकरसूरिकृतालोचनास्तवस्य व्याख्यानम् ।

No. 2726. प्रवचनसारोद्धारवृत्तिः । Substance, country-made paper, 11 × 4½ inches. Folia, 286. Lines, 14—17 on a page. Extent, 17,998 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Correct.

Pravachana-sároddhára-vritti. A gloss on the Jain work called *Pravachana-sároddhára.* By Siddhasena Súri.

Beginning. सन्नदैरपि यत् तमोभिरखिलैर्न स्पृश्यते कुचचिच्
चञ्चत्कालकलाभिरप्यनकलं यन्नीयते न क्षयं।
तेजोभिः स्फुरितैः परैरपि हठादाक्रम्यते य + +
तज्जैनं + + जगत्प्रकाशनपटु ज्योतिः परं नन्दतु॥
यो ध्यानेन निमूलकाषमकषद्द्वेषादिविद्वेषिणो
यल्लोक्यविलोकनैक + + कं ज्योतिः किमथा + + +।
यः सद्भूतमशेषमर्थमवद + + दुर्व्वादिविचासनं
+ + र्थः सविता निर + स विभुः श्रीवर्द्धमानः सतां॥
स्वगुरूणामादेशं चिन्तामणिसोदरं समाप्य।
श्रेयःक्षते करोमि प्रवचनसारस्य वृत्तिमिमां॥

इह विशिष्टाः क्वचिदभीष्टशास्त्रप्रकरणवस्तुनि प्रवर्त्तमानाः श्रेयस्काम्यया विशिष्टाभीष्टदेवतानमस्कारपुरस्कारेणैव प्रवर्त्तन्ते इत्यादि।

End. अथं प्रवचनसारोद्धारो ग्रन्थो बुधैस्तत्त्वावबोध + + + + पठ्यमानो-नन्दतु शिष्यप्रशिष्यपरम्परा + + + + रूपां सद्धिमासाद्यतु।

Colophon. इति श्रीसिद्धसेनसूरिविरचिता प्रवचनसारोद्धारवृत्तिः समाप्ता॥

विषयः। प्रवचनसारोद्धारनामकजैनसूत्रस्य व्याख्यानम्।

No. 2727. वाक्यमञ्जरी। Substance, country-made paper, 10 × 5 inches. Folia, 5. Lines, 14 on a page. Extent, 150 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Vákya-manjarí. A few concise rules on Sanskrit composition and conversation in Sanskrit. Anonymous.

Beginning. नत्वा जिनेश्वरं देवमनन्तं परमं महः।
रच्यते बालकबुद्धिसिद्धये वाक्यमञ्जरी॥

कुत्रत्या + गता भवन्तः। कस्मादागताः। कां दिशमलङ्कुर्व्वन्ति स्म। कां दिशमलङ्कर्त्तुमीहते। कुत आगताः। कर्णाटदेशादागताः। इत्यादि।

End. अस्मान् मुक्त्वा न गन्तव्यं। अत्यन्तं प्रीतिकारिणो भवन्तः। सन्ति प्रावृषिका + +। एते ग्रहे। इति

Colophon. इति वाक्यमञ्जरी समाप्ता ।

विषयः । बालानां संस्कृतवाक्यप्रयोगपाटवाय तद्वाक्यविन्यासप्रकारकथनं ।

No. 2728. बन्धहेतूदयत्रिभङ्गीटीका । Substance, country-made paper, 10 × 5 inches. Folia, 21. Lines, 16—17 on a page. Extent, 903 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Bandha-hetúdaya-tribhaṅgí-ṭíká A commentary on Harshakus'ala Gaṇí's treatise on the cause of bondage, entitled *Bandha-hetúdaya-tribhaṅgí*. By Ṛishivánara.

Beginning. जयति जगत्त्रयनाथत्रिदिवतलविस्तृतप्रभावमणिरश्मिः ।
ब्राह्मणवाटकमुकुटः श्रीवीरेश्वरस्वरमतीर्थपतिः ॥
— — — — — — — — ।

तत्रादौ समुचितेष्टदेवतानमस्कारपूर्व्वकं शास्त्रं प्रस्तावयति बन्धन इति । बन्धनं कर्म्माणूनां जीवप्रदेशैः सह क्षीरनीरन्यायेन । इत्यादि ।

End. तपगणपुष्करतरणिश्रीमदानन्दविमलसूरीणां ।
शिष्येणेयं टीका विहिता गणिविजयविमलेन ।
— — — — — — — — ।

Colophon. इति श्रीविजयदानसूरिविजयमानराज्ये श्रीमदानन्दविमलसूरिशिष्यानुशिष्येण ऋषिवानरेण इयं बन्धहेतूदयत्रिभङ्गीटीका समर्थिता ।

विषयः । हर्षकुशलगणिविरचितबन्धहेतूदयत्रिभङ्गीनामकजैनसूत्रस्य व्याख्यानम् ।

No. 2729. लघुसङ्ग्रहणी । Substance, country-made paper, 10 × 4½ inches. Folia, 6. Lines, 3 on a page. Extent, 37 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect. Mágadhí.

Laghu-saṅgrahaṇí. An abridgment of a work by Chandra Súri entitled *Saṅgrahaṇí* or *Vṛihat-saṅgrahaṇí* on Jain Geography. By Haribhadra Súri.

Beginning. नमिअ जिणं सव्वण्णुजयपुङ्गं जगगुरुमहावीरं ।
जंबूदीवपयत्थे वुत्थं सुत्तास परहेउ ॥

खंडा जोयणवासा पव्वय कुड़ायतित्थ।
सेढ़िउ विजयद्दह सलिलाउ पिंड़ेसि होइ संघयणी ॥ इत्यादि।

End. खंडाइं गाहाइं इसेहिं दारेहिं जंबुद्दीवस्स।
संघयणीसमत्ता रइआ हरिभद्दसूरिहिं ॥

Colophon. इति श्रीलघुसङ्ग्रहणी समाप्ता।

विषयः। इहत्यसङ्ग्रहण्याः सारकथनं। अत्र जम्बूद्वीपीयखण्ड-योजन-क्षेत्र-पर्व्वत-कूट-तीर्थ-श्रेणी-विजय-द्रह-सलिलरूपद्वारकथनं।

No. 2730. कल्पलता। Substance, country-made paper, 10 × 5 inches. Folia, 181. Lines, 15 on a page. Extent, 8,631 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

Kalpalatá. A commentary on the well-known Kalpa-sútra. By Samayasundara Upádhyáya. There are several commentaries extant on the text.

Beginning. प्रणम्य परमं ज्योतिः पद्मापि परमेष्ठिनः।
दीक्षाज्ञानगुरूंश्चापि समोपक्षतिकारकान्॥
वक्ष्येऽहं कल्पसूत्रस्य व्याख्यानानि नवस्फुटं।
सुगमानि सुबोधानि नानाग्रन्थानुसारतः॥
न सूत्रं नावचूरिश्च न वृत्तिर्नान्य+च+।
ग्राह्यं व्याख्यानवेलायां पुरुकैरस्मिन् करस्थिते॥
— — — — — — — ।

वंदामि भद्दबाहुमिति। अर्हन्तः भगवन्तः। उत्पन्नदिव्यविमलज्ञाना महावीरस्वामिनः। इत्यादि।

End. सामाचारी साधून् प्रतीत्य विधिप्रतिषेधरूपा। कर्त्तव्येति। तदभिधेय-योगात् अध्ययनमपि पर्य्युषणाकल्पः। रत्नपरीक्षागजशिक्षादिवत्। इति व्याख्यातं कल्पसूत्रं।

Colophon. इति सुन्दरोपाध्यायकृता कल्पलता समाप्ता।

विषयः। जैनकल्पसूत्रस्य व्याख्यानम्।

No. 2731. गणितनाममाला। Substance, country-made paper, 10 × 4 inches. Folia, 8. Lines, 9 on a page. Extent, 180 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Pandit Syámalála Duve. Appearance, fresh. Prose and verse. Incorrect.

Ganita-námamálá. A glossary of astronomical technical terms. By Haridatta.

Beginning. गणितस्य नाममालां वक्ष्ये गुरुप्रसादतः।
बालानां सुखबोधाय हरिदत्तो द्विजाग्रणीः॥
अश्विनीदत्तभं दस्रं नासत्यं तुरगं हयं।
भरणी यमभं याम्यं प्रोक्तमन्तकमान्तकं। इत्यादि।

End. इति खग्रहोक्तसंज्ञा।
कण्डुलज्ञातिविप्रेण हरिदत्तेन धीमता।
नाममाला कृता श्रेष्ठा गुरोः प्रसादतो मया॥

Colophon. इति गणितनाममाला समाप्ता।

विषयः। अश्विन्यादिनक्षत्राणां पर्य्यायक्रमेण नामकथनं। एकादिक्षयस्त्रिंशत्पर्य्यन्तमङ्कानां नामकथनं। नक्षत्राणां सामान्यतः संज्ञाकथनं। एवं पर्य्यायक्रमेण राशीनां नामकथनं। द्वादशभावनामकथनं। केन्द्रत्रिकोणादिनामकथनं। ग्रहस्य नामकथनं। सूर्य्यनामकथनं। चन्द्रनामकथनं। भौमनामकथनं। बुधनामकथनं। बृहस्पतिनामकथनं। शुक्रनामकथनं। शनैश्चरनामकथनं। राहुकेतुनामकथनं। सामान्यतो ग्रहाणां नामकथनं। सामान्यतो माससंज्ञाकथनं। सावनचान्द्रसौरनाक्षत्रमासनामकथनं। घटिकासंज्ञाकथनं। प्रहरसंज्ञाकथनं। रात्रिसंज्ञाकथनं। दिननामकथनं। पूर्व्वाह्णापराह्णादिसंज्ञाकथनं। अहोरात्रसंज्ञाकथनं। पक्षसंज्ञाकथनं। ऋतुअयनवर्षसंज्ञाकथनं। तिथिनामकथनं। राश्यंशकलादिसंज्ञाकथनं। सप्तवर्गसंज्ञाकथनं। दिशां नामकथनं। चरस्थिरद्विस्वभावनामकथनं। दक्षिणायनोत्तरायणनामकथनं। संक्रान्तिनामकथनं। ह-चतुष्पद-जलकीट-सरीसृपनामकथनं। पापादिगणग्रहसंज्ञाकथनं। सूर्य्यादीनामुच्चनीचादिसंज्ञाकथनं। सूर्य्यादीनां मूलत्रिकोणसंज्ञाकथनं। खग्रहोक्तसंज्ञाकथनञ्च।

No. 2732. नन्दिपदच्छन्दः। Substance, country-made paper, 11 × 4 inches. Folia, 4. Lines, 13 on a page. Extent, 146 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Prákṛita.

Nandipadachhanda. On Prákṛit metres with illustrations. Anonymous.

Beginning नमिउण चलणजुअलं नेमिजिणेंदस्स भावओपयओ।
गाहालक्खणमेयं वुच्छामि गुरुवएसेणं॥
गरुअलहुअक्खराणं वेयत्थं सारयंच वुच्छामि।

पुब्भायविरुद्धकथाणं पाइय कव्वोवउगीणं ॥ इत्यादि ।

End. पासेउ पंचमो चक्की सोलसेाने जिणेाजसं ।
चक्कंच धम्मचक्कंच जस्सायचुच सेयउ ॥

Colophon. इति श्रीनन्दिपद्धन्दः समाप्तं ।

विषयः । प्राकृतकाव्योपयोगिनां गाथाखन्धकादिदृत्तानां लक्षणनिरूपणपूर्व्वकम् उदाहरणकथनं ।

No. 2733. पुद्गलषट्त्रिंशिकावृत्तिः । Substance, country-made paper, 12 × 4 inches. Folia, 12. Lines, 10 on a page. Extent, 308 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Generally correct.

Pudgalashaṭtriñśiká-vṛitti. A gloss on Abhayadeva Súri's Pudgalashaṭtriñśiká or thirty-six verses on matter. By Ratnasiñha Súri.

Beginning. यथास्थितानुजीवादिपदार्थगणदेशकं ।
सर्व्वज्ञं विदधत्स्तुत्यं नत्वा वीरजिनेश्वरं ॥
पुद्गलानां निगोदानां सतत्त्वप्रतिपादिकाः ।
गाथाः किञ्चिद्विविच्यन्ते भगवत्यङ्गवृत्तितः ॥

अथ प्रज्ञप्त्याख्यपञ्चमाङ्गस्य विवरणे पञ्चमशते सप्तमोद्देशके पुद्गलवचनप्रस्तावेोक्तार्थविवरणरूपा गाथा नवाङ्गवृत्तिकृद्भिः पूज्यश्रीमदभयदेवसूरिभिर्लिखिताः किञ्चिद्विदत्ताश्च तासां सम्प्रदायगम्यो गुरूपदेशात् कश्चिदर्थलवो लिख्यते ॥ तास्च लिखो गाऊण इत्यादि । इह पुद्गलानां क्षेत्रे अवगाहनाय इत्यादि ।

End. अत्र लक्षसंख्या पुद्गलानामल्पबहुत्वविचारणमव्युत्पन्नमतिशिष्यव्युत्पादनाय परमार्थतस्तु पुद्गलाननन्तानजिनाभिवितान् जानीयादिति ।

Colophon. इति श्रीरत्नसिंहसूरिविरचिता पुद्गलषट्त्रिंशिकावृत्तिः समाप्ता ।

विषयः । अभयदेवसूरिविरचितायाः पुद्गलषट्त्रिंशिकायाः व्याख्यानम् ।

No. 2734. नीतिशतकवृत्तिः । Substance, country-made paper, 9 × 4 inches. Folia, 18. Lines, 16 on a page. Extent, 864 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Níti-śataka-vṛitti. A gloss on Bhartrihari's Nítiśataka, a century of moral maxims. By Ghanasára. The text has been noticed under No. 1823 (Vol. IV, p. 40). It has also been repeatedly published.

Beginning. युगादिदेवोऽप्ययुगादिदेवः पुरा द्वितीयोऽपि सदाद्वितीयः।
स पञ्चशाखोऽपि सचक्षशाखः सोऽमङ्गलोऽपि मङ्गलमातनोतु ॥
सर्व्वोतिशयसंयुक्तं पञ्चाचारपरायणं।
श्रीवीरं गिरि + + रमभिवन्दे महात्मभिः ॥
नत्वार्हतं गुरुं देवीं सारदां कविसारदां।
श्रीमद्भर्त्तृहरिदत्तव्याख्यानं विरचाम्यहं ॥

तचेष्टदेवताप्रणिधानसमाधानविधानपूर्व्वमभीष्टदेवतासंस्मरणं विधाय भूपतिभर्त्तृहरि-विरचितनीतिशृङ्गारवैराग्यभावभावितकठिनकवितार्थसंसूचणं किमप्युदाहरणविवरणप्रपञ्चं देवगुरुभारतीप्रसादान्निवेदयिष्यामि। तथा च सूत्रं यां चिन्तयामीति। पुरा कदाचिदुज्जयिन्यां नगर्य्यां भर्त्तृहरिभूपतिः राजसभ्यलीसंसेव्यमानः + + + + + तच विप्रैकः करकलितविल्वफल आजगाम। इत्यादि।

End. श्रीसिद्धसूरिगुरुसन्निहितप्रतापा-
च्चञ्चत् कवित्वमतिमाप्य विचारदृष्ट्या।
रम्येह भर्त्तृहरिकाव्यवरस्य टीका
श्रीपाठकेन विदधे धनसारनाम्ना ॥

Colophon. इति नीतिशतकस्य टीका समाप्ता।

विषयः। भर्त्तृहरिनीतिशतकस्य व्याख्यानम्।

No. 2735. वर्द्धमानजिनस्तुतिः। Substance, country-made paper, 11 × 4 inches. Folia, 8. Lines, 11 on a page. Extent, 248 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Varddhamána-jinastuti. A hymn in praise of Varddhamána Jina. Author's name unknown.

Beginning. भव्याम्भोजविबोधनैकतरणे विस्फारकर्म्मावली
रम्भासामजलाभिनन्दनमहानष्टापदाभासुरैः।
भक्त्या वन्दितपादपद्मविदुषां सम्पादयन्प्रोज्झिता
रम्भासामजनाभिनन्दनमहानष्टापदाभासुरैः ॥
ते वः पान्तु जिनोत्तमाः चतरजो ना + क्षिपुर्यन्मनो
दारविभ्रमरोचिताः सुमनसो मन्दारवाराजिताः।
यत्पादौ च सुरोपिताः सुरभयाश्चक्रुः पतन्त्योम्बरा

द्वाराविभ्रमरोचिताः सुमनसो मन्दारवाराजिताः ॥ इत्यादि ।

End. सरभसनतनाकिनारीजनो + + पीठालुठ-
तारहारस्फुरद्भिसारक्रमाम्भोरुहे,
परमम्ब सुतरां गजार + वसन्नाश्रितारातिभाराजिते
भासिनीहारतारावलक्षेमदा ।
क्षणरुचिरो रुचेव + डा सङ्कटोत्कृष्ट
कण्ठोभटे संस्थिते भव्यलोकं लमम्बाम्बिके,
परमम्ब सुतरां गजारावसन्नाश्रितारातिभाराजिते
भासिनीहारतारावलक्षेमदा ॥

Colophon. इति वर्द्धमानजिनस्तुतिः ।

विषयः । स्रोचयाजेन वर्द्धमानाभिधानजिनस्य माहात्म्यादिकीर्त्तनं ।

No. 2736. पन्नवणाटीका, (टब्बा ।) Substance, country-made paper, 10 × 4 inches. Folia, 572. Lines, 14 on a page. Extent, 29,029 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Paṇṇavaṇá-ṭíká. A Gujaráti gloss on the Jaina text called *Paṇṇavaṇá*, (Prajñápaná). By Vanavimala. Glosses in Gujaráti on the Mágadhi scriptutres of the Jains have the generic name of *Ṭabbá*, and this is accordingly called a Ṭabbá.

Beginning. प्रणम्य श्रीमहावीरं नत्वाशेषसुरेश्वरं ।
प्रज्ञापनाख्यसूत्रस्य वक्ष्येऽर्थं लोकवार्त्तया ॥
सन्ति सूरिकृतटीकाद्या ग्रन्था मनोहराः ।
तथापि स्वशिष्याणां विनोदार्थं करोम्यहं ॥

नमो । नमस्कारउच्चा । अरिहन्तने अरिकं । वैरि अष्टकर्म्मनें । हणाच्छे जिणे तथा अरो कादिकअष्टमता प्रातिहार्जे करे शोभित—इत्यादि ।

End. श्रीमत्कृपागणविभासनतापनाशो
भव्या + मबुदयकैरवराविरत्नः ।
आसीद्गुरुर्विमलसोमगण + राजः
सौन्दर्य्यधैर्य्यगुणमण्डल + + राशिः ॥
गच्छे तत्र विशालसोमगुरवः श्रीसुन्दरयः साम्प्रतं
वर्त्तन्ते महिमण्डले गणपदं प्राप्ता प्रतिष्ठास्पदं ।

ज्ञानवाङ्मयसागराम्बुतरणे सद्बुद्धिना + चित
चारित्राचरणेन दुष्करतपःश्रीस्थूलभद्रोपमाः ॥
— — — — — — — — ।
तच्छिष्यसेवकः साधुर्वनविमलनामतः ।
प्रज्ञापनाख्यसूत्रस्य वृत्तिं चक्रे मनोहरां ॥

Colophon. इति श्रीपणवणाटीका समाप्ता ।

विषयः । प्रज्ञापनाख्यजैनसूत्रस्य (गुर्ज्जरभाषया) व्याख्यानम् ।

No. 2737. सङ्ग्रहणीवृत्तिः । Substance, country-made paper, 10 × 4 inches. Folia, 112. Lines, 13 on a page. Extent, 3,968 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Saṅgrahaṇí-vṛitti. A gloss on Chandra Súri's *Saṅgrahaṇí*, a work on Geography. By Devabhadra Súrt (Vide No. 2743, p. 192.)

Beginning. अत्यद्भूतं योगिभिरप्यगम्यं विधूतनिःशेषतमोवितानं ।
अचिन्त्यमाहात्म्यमजं निरञ्जनं ज्योतिर्जयत्येकमनन्तमव्ययं ॥
यस्याहतैर्वचोभिर्जीवत्यद्यापि भव्यलोकोऽयं ।
स जयत्यागमजलधिर्जिनभद्रगणिः क्षमाश्रमणः ॥
प्रसन्नगम्भीरपदा हितक्रमा मिताक्षरा वर्ज्जितपौनरुक्त्या ।
यैर्निर्म्मिता संग्रहणीयम + + नमेनसत्पदपङ्कजेभ्यः ॥

इह तावत् शास्त्रादौ संक्षिप्तरुचिनापि प्रायः शिष्टसमयानुवृत्तये विघ्नोपशान्तये च परममङ्गलालयोऽभीष्टदेवतास्तवः क्रियते, — — — — शास्त्रकारः सार्द्धं गाथामाह, नमिउ इति ।

End. वेदद्वारमपि प्राक् प्रपञ्चितमेव । तदेवं व्याख्याता चतुर्विंशतिद्वारात्मिका संक्षिप्ततरा सङ्ग्रहणी ।

Colophon. इति श्रीहर्षपुरीयगच्छालङ्कार + + धारिश्रीमद्भयसूरिपट्टरत्नश्रीहेमचन्द्रसूरिशिष्यश्रीचन्द्रसूरिचरणाम्बुजचञ्चरीकेण श्रीमुनिचन्द्रसूरिभ्यो लब्धप्रतिष्ठेन श्रीदेवभद्रसूरिणा विरचिता स्वगुरुप्रणीतसङ्ग्रहणी वृत्तिः समर्थिता ।

अङ्गान्युपाङ्गानि तथापराणि विलोक्य शास्त्राणि गुरूपदेशात् ।
विनिर्म्मिता वृत्तिरियं तथापि शोध्यं यदि स्याद्विबुधैर्विशोध्यम् ॥

विषयः । चन्द्रसूरिकृतसङ्ग्रहणीप्रकरणस्य व्याख्यानम् ।

No. 2738. वैराग्यशतकवृत्तिः । Substance, country-made paper, 9 × 4 inches. Folia, 17. Lines, 16 on a page. Extent, 714 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Vairágya-śataka-vṛitti. A gloss on Bhartṛihari's century of verses on asceticism. By Dhanasára, a Jain.

Beginning. दिक्कालाद्यनवच्छिन्नानन्तविज्ञानमूर्त्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥

तस्मै शान्ताय तेजसे परब्रह्मणे नमः । किं विशिष्टाय शान्ताय तेजसे । स्वानुभूत्येकमानाय स्वकीयायाः स्वानुभूतेः स्वानुभवात् । इत्यादि ।

End. + केशवगच्छगणनाङ्गनदीपभानोः
श्रीसिद्धसूरिगुरुरोमहिमाधिकस्य ।
शिष्येण तस्य धनसारवरेण रम्या
टीकेयमप्य + + भर्तृहरेर्व्यधायि ॥

Colophon. इति वैराग्यशतकस्य वृत्तिः समाप्ता ।

विषयः । भर्तृहरिकृतवैराग्यशतकस्य व्याख्यानम् ।

No. 2739. स्वोपज्ञशब्दार्थचन्द्रिकोद्धारः । Substance, country-made paper, 9 × 4 inches. Folia, 14. Lines, 9 on a page. Extent, 386 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Svopajña-śabdártha-chandrikoddhára. A commentary on the introductory verses of the *Sárasvata-chandriká* of Anubhútisvarúpa. By Kañsavijaya Gaṇi.

Beginning. ॐ नमः परमज्योतिःशालिने परमात्मने ।
त्रिजगत्पूजिताय श्रीपार्श्वनाथाय योगिने ॥
वर्द्धमानजिनः सिद्धो वर्द्धमानसदोदयः ।
स्तात् सिद्धार्थधराधीशवंशाकाशदिवाकरः ॥
सारदा वरदा दद्याद्विद्यादानं + + नना ।
कर्पूरपूरपूर्णेन्दुकुन्दजैचयशोभरा ॥

श्रीमत्तपागच्छ + स्य सुरशैलसुरद्रुमं ।
सर्व्वाभीष्टार्थसंसिद्धिनिर्व्विघ्नवरवेषसम् ॥
स्मृत्वा श्रीविजयानन्दगुरुं गुरुगुणैर्गुरुं ।
खोपज्ञचारुशब्दार्थचन्द्रिकोद्धार उच्यते ॥

इह किल निःशेषसविशेषस्फूर्ज्जदर्थ्यपदार्थसार्थपरमार्थजिज्ञासूनां शिशूनां सम्यक् शब्द व्युत्पत्तिबोधाय श्रीसारस्वतशब्दानुशासनादिमट्टत्तद्वितयस्य व्याख्या संहितादिभेदेन षोढा प्रसूयते । इत्यादि ।

End. निपातनाद्वैरत्वं कथमिति चव्ययं सिद्धं ।

इति सारस्वतद्वितीयपद्यस्य साधनिका प्रारब्धपद्धतिः ।

Colophon. इति श्रीमत्तपागच्छाधिराजश्रीगौतमगणधरोपमगुणसमाजसकलभट्टारकट्टन्दट्टन्दारकट्टन्दारकराजभट्टारकश्रीविजयानन्दसूरीश्वरशिष्यभुजिष्यपरमहंसविजयगणिस—मर्थिते खोपज्ञपद्यार्थचन्द्रिकोद्धारे श्रीसारस्वतशब्दानुशासनद्वितीयट्टत्तार्थस्वेशः सम्पूर्णः ।

विषयः । अनुभूतिस्वरूपाचार्य्यकृतसारस्वतचन्द्रिकाभिधव्याकरणस्यारम्भीयपद्य यस्य संहिता-पद-पदार्थ-पदविग्रह-चालना--प्रत्यवस्थानरूपषडङ्गप्रदर्शनपुरःसरं सोदाहरणव्याख्यानम् ।

No. 2740 मेघदूतटीका । Substance, country-made paper, 9 × 4 inches. Folia, 28. Lines, 17 on a page. Extent, 1,368 ślokas. Character, Nágara. Date, Sm. 1753. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Meghadúta-ṭíká. A commentary on the Meghadúta of Kalidása. By Śaśvata.

Beginning. श्रीमत्कवामदरसोल्लसदच्चिकोष-
मुद्दामकन्दलितकान्तिमुखं मुनेर्वः ।
अस्खलचटुल + शुलयुग्मिताक्ष-
नीलं विलोकितुमभीप्सितुमादधातु ॥
अस्मादृशां क्व नु कथा ननु कालिदासे
यद्वल्लभप्रभृतयः स्वयमुल्लसन्ति ।
यत्रैव किन्तु सरसीं न सरन्ति नागा-
स्तत्रैव चापलपराः शफराः स्फरन्ति ॥

द्विचा + + गभीरे हृदि कविवाचां तथा स्त्रीणां ॥
मध्यस्थैरवधीयेत मेघदूते स शाश्वतः ।
करोति लक्षितामेनां टीकामनतिविस्तरां ॥

इदं हि किल श्रूयते सकलनाकिलोकाभिलक्ष्यमाणवैभवो भगवद्भवानीश्वरसुहृन्निर्विशेषः कुसुमस्तवकाध्यासितनिखिलकिन्नरवर्गोत्तमाङ्गो राजराजः कदाचित् । इत्यादि ।

End. ईप्सितार्थस्य सम्प्रणयेषु अभिमतप्रयो-
जनस्य क्रियेव करणं सम्पादनमे ।
असमर्थैः मेघस्याचेतनत्वा+++ सन्देशे
+ + भिधानेऽपि मूकत्वमिति स्वरूपं ॥

Colophon. इति शाश्वतविरचिता मेघदूतटीका समाप्ता संवत् । १७५३ ॥

विषयः । कालिदासप्रणतमेघदूतस्य व्याख्यानम् ।

No. 2741. तत्त्वप्रकाशः । Substance, country-made paper, 12 × 4 inches. Folia, 136. Lines, 8 on a page. Extent, 3510 ślokas. Character, Nágara. Date, Sm. 1492. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Verse. Generally correct. Sanskrit.

Tattva-prakáśa. A poem in 11 cantos on the pre-eminence of the Jain system of religion. By Śílaratna Súri, desciple of Munisiñha Súri. It treats both of the esoteric and of the exoteric doctrines of the system, and gives a deal of information about geography, the gods of the Hindus, and different leading systems of philosophy current in India.

Beginning. अर्हं नौमि प्रहृष्टं सुविदितविनतं सर्व्वदा मङ्गलानां
सर्व्वेषामादिभूतं सुखजयमहोदार्य्यहेदार्ह्यं त्यहेतुं ।
स्वस्त्रीवल्लिमालोल्लसनजलधरं बन्धुरं बन्धुतुल्यं
प्रीणाय प्राणभाजां चिदमलकमले राजहंसोपमानं ॥
सर्व्वज्ञीवाहनस्यप्रबलमृगपतिस्फूर्ज्जदुर्ज्जेयनादं
श्रुत्या श्रुत्वा सकोपेऽश्रपदशरणतो निःसरन्नं हृषं नं ।
भ्रामं भ्रामञ्च भग्नं निजचरणगतं वीक्ष्य चाङ्केन नाम्ना
यस्तद्दुःखापहोऽभूत्स भवतु हृषभो भव्यकल्याणकर्त्ता ॥
— — — — — — — — ।
नानार्थयुक्तं नवतत्त्वमञ्जुलं सुदृष्टिभिः सत्त्वगुणैर्निरीक्षितं ॥
[illegible]मं प्रारभ्यते स्वान्यसुबोधहेतवे ॥ इत्यादि ।

End. जिनचरणसरोजस्थायिनी सारलक्ष्मी-
भवति जगति रम्या सर्व्वकल्याणमाला।
इह भवपरलोकद्वन्द्वनिर्द्वन्द्वसौख्यो-
दयसमुदयदात्री श्रेयसे सर्व्वसिद्धिः॥

Colophon. इति श्रीआगमिकश्रीमुनिसिंहसूरिशिष्यश्रीशीलरत्नसूरिविरचिते महाकाव्ये जिनचरणाङ्के तत्त्वप्रकाशे एकादशः सर्गः। शुभं भवतु।

लक्ष्मीस्थापितवंशमौक्तिकसमः श्रेष्ठीप्रसिद्धोऽभवद्-
धन्यः सज्जनपालनामविदितः सुश्रावकः सद्गुणः।
पत्नी शीलयुतास्य धर्म्मचतुरा रूढ़ीतिनाम्ना तयोः
पुत्राः षट् निपुणा इतीव भुवने षाण्ढोरुनूजा इव॥
— — — — — — —।
मन्त्री महणसिंहाख्यः श्रीदेवी तस्य वल्लभा।
तयोः पुत्राश्च चत्वारो मूर्त्तिमन्तो इषा इव।
— — — — — — —।
तृतीयः श्रसणो मन्त्री राजराजिषु + + +।
अभूत्तूर्य्यः स्फुरत्तेजास्तेजाख्यः सचिवाग्रणीः॥
महीपप्रमुखैराद्यसोदरैः + स्त्रिरादरात्।
कारितं पुस्तकारूढं काव्यं तत्त्वप्रकाशकं। संवत्। १४९२॥

विषयः। प्रथमे सर्गे,—मगधदेशाधिपस्य महीचन्द्रस्य गुणसेननामा कश्चित् तनयः आसीत्। तस्य शिक्षाविवरणप्रसङ्गेन संक्षेपतः सौगतमतकथनं शैवमतकथनं न्यायमतकथनं वैशेषिकमतकथनं मीमांसकमतकथनं वेदान्तमतकथनं सांख्यमतकथनं चार्व्वाकमतकथनं जैनमतस्य श्रेष्ठत्वकथनञ्च। द्वितीये सर्गे,—अथ विशेषेण जैनमतकीर्त्तनं। तच्च दया, सत्यं अस्तेयं दानं, सुशीलता चेति पञ्च धर्म्मा इति निरूपणं। जीवाजीव-पुण्य-पापाश्रव-संवर-निर्ज्जर-बन्ध-मोक्षरूपनवतत्त्वकथनं। अथ जीवाजीवस्य चतुर्दशभेदकथनं। पुण्यस्य द्विचत्वारिंशद्भेदकथनं। पापस्य द्व्यशीतिप्रकारभेदकथनं। आश्रवस्य द्विचत्वारिंशत्प्रकारभेदकथनं। संवरस्य सप्तपञ्चाशत्प्रकारभेदकथनं। निर्ज्जरस्य द्वादशविधभेदकथनं। बन्धस्य चतुर्व्विधत्वकथनं। मोक्षस्य च एकविधत्वकथनं। अथ ज्ञानापरपर्य्यायचेतनारूप एव जीव इति तल्लक्षणकथनं। तद्विपरीतोऽजीव इति अजीवलक्षणकथनं। यस्य परिणामेन शुभं भवति तत् पुण्यं। यस्य च परिणामेन अशुभं जायते तत्पापं। कर्म्मोपार्জ্জननिदानमाश्रवः। अशुभानां कर्म्मणां निवारणहेतुः संवरः। कर्म्मणां विनाशकारणं निर्ज्जरा। कर्म्मसंयोग एव बन्धः। कर्म्मवियोग एव मोक्ष इति

जीवादीनां लक्षणकथनं। अथ एकेन्द्रियादिपञ्चेन्द्रियपर्य्यन्तं जीवानां इन्द्रियादिसंख्यानङ्गे-दादिकथनं। अथ सूक्ष्मबादरभेदेन एकेन्द्रियजीवस्य द्वैविध्यकथनपूर्व्वकं तस्य अवान्तरभेदनि-रूपणं। तच्च तेषां गन्धरसस्पर्शनादिशरीरात्मकत्वकथनं। द्वतीये सर्गे,—बादरजीवस्य पृथिवी-कायत्वकथनं। अथ सुकुमार-कठोरभेदेन तस्य द्विविधत्वकथनं। तच्च कृष्ण-नील-पीत-रक्त-शुक्ल-पाण्डुर-पनका (मृत्तिकाविशेषः) भेदेन सुकुमारस्य षड्विधत्वकथनं। तथा शर्करा-वालुका-पाषाण-शिला-लवण-क्षार-लोह-ताम्र-स्वर्ण-रौप्य-हरिताल-मनःशिला--पारदाञ्जनप्रवालादिभे-देन कठोरकायस्य चत्वारिंशद्विधत्वप्राधान्यविशेषकथनं। एवं तेजःकायबादरजीव-निरूपणं। तच्च तच्च चन्द्रसूर्य्यमेघविद्युदुल्कापतितनिरूपणं। उङ्किज्जादिभेदनिरूपणं। तच्च उङ्किज्जानां श्रेणीविभागकथनं। सजीवनिर्जीववीजादिकथनं। एवं द्वीन्द्रिय-त्रीन्द्रिय-चतुरि न्द्रियजीवभेदादिकथनं। चतुर्थे सर्गे,—नारक-तिर्य्यक्-मानव-देवभेदात् पञ्चेन्द्रियाणां चतुर्व्वि-धत्वनिरूपणं। तच्च रत्नप्रभ-शर्कराप्रभ-बालुकाप्रभ-चम्पकप्रभ-धूमप्रभ-तमःप्रभ-महातमःप्रभभेदेन नारकाणां सप्तविधत्वकथनपूर्व्वकं तेषां देहपरिमाणस्थानादिकथनं। अद्भुतनरकस्थानवर्णनं। तच्च तच्च जीवानां वेदनादिववर्णनञ्च। अथ तिर्य्यग्जीवनिरूपणं। तच्च जलस्थलनभश्चरादि-भेदकथनपूर्व्वकं अतिसूक्ष्मदृष्ट्या तेषामवान्तरजातिप्रकृत्यादिनिरूपणं। भाविमहाप्रलये जीवा-नां गतिनिरूपणं। अथ आर्य्यानार्य्यभेदेन मनुष्याणां द्वैविध्यनिरूपणं। तच्च मगध-राजगृह-चम्पापुर-वङ्ग कलिङ्ग-सिन्धुदेशादयः पञ्चविंशतिः आर्य्यदेशा इति निरूपणं। अनार्य्यदेशादि कथनञ्च। अथ भवनपति-व्यन्तरदेव-ज्योतिःस्थ-विमानस्थभेदेन देवानां चतुर्व्विधत्वनिरूपणं। एषामवान्तरभेदादिनिरूपणं। देवायुःपरिभाणादिकथनञ्च। अथ जीवानां गत्यादिकथनं। पापपुण्यफलकथनञ्च। मनुष्याणां भोजपेयादिविधिकथनं। मनुष्याणां शरीरतत्त्वकथनं। पञ्च-मे सर्गे,—जीवरूपं द्रव्यं विचार-धर्म्माधर्म्म-नभः-काल-पुद्गलरूपपञ्चविधा अजीवद्रव्यकथनञ्च। धर्म्मास्तिकायादिनिरूपणं। पुद्गलादिस्वरूपकथनं। तच्च स्कन्धसंघातादिभेदनिरूपणं। का-लादिपरिमाणतद्भेदादिलक्षणकथनं। षष्ठे सर्गे,—पुण्यपापविवरणकीर्त्तनं। तच्च पुण्येन शुभा-गतिर्भवतीतिनिरूपणं। पुण्यप्रकृतिकथनं। तपःप्रभावकथनं। पापप्रकृतिकथनं। तद्वान्तर-भेदकथनं। मोहनीयावरणीयादिकथनं। सप्तमे सर्गे,—आस्रवनिरूपणं। मनोवाक्यकायभे-देन त्रिविधयोगकथनं। अथ काथिकी-आधिकरणिकी-प्राद्वेषिकी-पारितापनिकीप्रभृतिपञ्चविंश-तिविधाशुभहेतुक्रियानिरूपणं। अथ संवरस्वरूपादिकथनं। तच्च ज्ञानदर्शनचारित्ररूपरत्नत्रय-निरूपणं। परीषहादिनिरूपणं। गृहस्थादीनां स्नानभोजनादिकालनिरूपणं। वसत्यादिनि-रूपणञ्च। अष्टमे सर्गे,—निर्ज्जरास्वरूपादिनिरूपणं। तच्च रसत्याग-अनशन-वृत्तिसंक्षेपादिरूप-द्वादशविधकायक्लेशनिरूपणं। प्रायश्चित्तादिकथनं। बन्धनिरूपणं। मिथ्याज्ञानादिनिरूपणं। नवमे सर्गे,—मोक्षोपायकथनं। तत्स्वरूपादिकथनं। योगविधानं। सिद्धिकथनं। संयमा-

कालस्वभाव-नियति-पूर्व्वकर्म्म-पुरुषकारविवरणकथनं। तच्च विशेषेण कालमाहात्म्यकथनं। स्वभाववर्णनं। एकादशे सर्गे,—जीवादिविषये केषाञ्चित् विप्रतिपत्तिकथनपूर्व्वकं तत्समाधानकथनं।

No. 2742. आचारकौमुदी। Substance, country-made paper, 14 × 4 inches. Folia, 102. Lines, 8 on a page. Extent, 2,424 ślokas. Character, Nágara. Date, Sm. 1782. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect.

Áchára-kaumudí. A Vaishṇavite treatise on good conduct and adoration of Vishṇu. By Rájáráma Bhaṭṭa.

Beginning. प्रणम्य परमात्मानं सच्चिदानन्दविग्रहं।

राजारामः सतां प्रीत्यै कारोत्याचारकौमुदीं॥

अथ सर्व्वस्यैव हि धर्म्मस्याचारमूलतया सप्रपञ्चोऽयं निरूप्यते। तथाहि,—आचारप्रभवो धर्म्मो धर्म्मस्य प्रभुरच्युत इति। इत्यादि।

End. तेन च सर्व्वथा भगवानेव उपास्यः, अन्यान्यदेवतास्तु तत्परिकरत्वेन उपास्या इति।

Colophon. इति मीमांसकश्रीभट्टसोमेश्वरसूनुभट्टराजारामकृताचारकौमुदी समाप्ता। संवत् १७८२।

विषयः। सर्व्वस्यैव हि धर्म्मस्य सदाचारमूलत्वनिरूपणं। आचारलक्षणादिकथनं। धर्म्मलक्षणादिकथनं। वेदादिप्रामाण्यनिरूपणं। विधिविवेचनं। तद्भेदादिनिरूपणं। सात्त्विकराजसादिभेदेन आचारभेदकथनं। अधिकारिभेदेन तद्व्यवस्थानिरूपणं। वैष्णवाचारनिरूपणं। प्रातःस्नानादिविधिकथनं। पुष्पतुलसीचयनादिविधिकथनं। प्रातःसन्ध्यादिविधिकथनं। भगवद्गृहमार्জ্জनादिविधिकथनं। तिलकविधिकथनं। गोपीचन्दनादिना तिलककरणे फलाधिक्यकथनं। तुलसीमालाधारणविधिकथनं। वैष्णवैस्तु सर्व्वथा माला धारणीयेति कथनं। भगवत्पूजाविधिकथनं। तत्र भगवद्विग्रहनिरूपणं। गोपालमूर्त्त्यादिपूजनमाहात्म्यकथनं। पूजाप्रयोगकथनं। नैवेद्यादिनिरूपणं। स्तोत्रादिकथनं। जपविधिकथनं। नाममाहात्म्यकीर्त्तनं। तुलसीमाहात्म्यकथनं। आरात्रिकविधिकथनं। परिक्रमविधिकथनं। हरिवासरमाहात्म्यादिकथनं। उपवासादिविधिकथनं। विशेषतो जन्माष्टम्यादिव्रतविधिकथनं। नामापराधनिरूपणं। भगवद्भक्तिनिरूपणं। तत्स्वरूपादिनिरूपणं। भक्तिरेव तत्प्राप्त्युपाय इति निर्णयः। वैष्णवैस्तु भगवान् नन्दनन्दन एव उपास्यः, अन्यान्यदेवताः तत्पूजाङ्गत्वेन अर्च्चनीया इति निरूपणं।

No. 2743. सङ्ग्रहणीप्रकरणम् । Substance, country-made paper, 10 × 4 inches. Folia, 40. Lines, 6 on a page. Extent, 614 ślokas. Character, Nágara. Date, ? Plece of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new Prose. Incorrect. Mágadhí.

Saṅgrahaṇí-prakaraṇa. On Jain geography of the universe, the different regions it comprises, and the character of their inhabitants. The part devoted to the geography of India is of course the fullest. By Chandra Súri. (Cf. *ante*, p. 179.)

Beginning. नमिउ अरिहन्ताइ विहिभवणोगाहणायपत्तेयं ।
सुरनारयाण वुत्थं नरतिरियाणं विणाभवणं ॥
उववायचरण विरहं सखं दुगसमयं समागमणे ।
दसवाससहस्साइं भवणवइणं जहण्णठिइ ॥ इत्यादि ।

End. मलहारहेमसूरीण सीसलेसेण सूरिणा रइयं ।
संघयणरयणमेयं नंदउजा वीरजिणतित्थं ॥

Colophon. इति संग्रहणीप्रकरणं समाप्तं ॥

विषयः । सुर-नर-तिर्यक्-नारकाणां जीवननिरूपणं । तेषां भवनादिरूपस्थाननिरूपणं । भवनपतीनामुत्कृष्टजीवनकथनं । भवनवासिदेवदेवीनां जघन्योत्कृष्टोभयरूपजीवनकथनं । एवं व्यन्तरलोकवासिदेवादीनां जीवनकथनं । चन्द्रादिग्रहनक्षत्रतारकरूपदेवादीनां जघन्यादिजीवनकथनं । वैमानिकदेवीनामुत्कृष्टजीवनकथनं । सौधर्मादिषु उत्कृष्टस्थितिकथनं । वैमानिकदेवानां जघन्यस्थितिकथनं । एवं असुरेन्द्राणां प्रधानमहिषीणां संख्यादिकथनं । सौधर्मादिप्रतराणां (गृहभूमिकाराणां) संख्याकथनं । शेषदेवलोकवासिनां स्थितिकथनं । अथ असुर-नाग-सुपर्ण-विद्युदादिरूपभवपतीनां नामकथनं । दक्षिणोत्तरदिग्विभागेन भवनसंख्याकथनं । दशविधासुरनिकायानां चिह्नकथनं । असुराणां वर्णादिकथनं । अथ भवनपतीन्द्राणां स्थित्यादिकथनं । अथ व्यन्तरलोकस्य नगरपरिमाणतन्नामादिकथनं । तत्र पिशाचीनां चर्यादिकथनं । अथ व्यन्तरलोकस्य नगरपरिमाणतन्नामादिकथनं । तत्र पिशाचीनां वर्णकथनं । अथ चन्द्रादिविमानकथनं । तत्र तद्वस्थानविभागकथनञ्च । अथ मनुष्यलोके चलस्थिरभेदेन द्विविधज्योतिश्चक्रस्थितिनिरूपणं । चन्द्रादिविमानसंस्थानकथनं । तेषां परिमाणकथनं । अथ मेरोः प्रादक्षिण्येन भ्रमतां चन्द्रादीनां गतितारतम्यकथनं । चन्द्रादीनां परिवारसंख्याकथनं । राहुनिरूपणं । अथ जम्बूद्वीपस्थताराविमानानामन्तरालादिनिरूपणं । मनुष्यक्षेत्रान्तर्वर्तिनां चन्द्रार्काणां प्रतिदिनमपरापरमण्डलेषु परिभ्रमणतोऽनवस्थितान्तरत्वाच्च मनुक्षेत्रादहिः घटाकारावस्थितानां तेषामन्तरालप्रमाणकथनं । जम्बूद्वीपे द्वौ चन्द्रौ द्वौ सूर्यावितिं च कथनं । अथ चन्द्रात् चन्द्रस्य सूर्यात् सूर्यस्य च

परस्परमन्तरनिरूपणं। एवमन्यान्यद्वीपेषु समुद्रेषु च चन्द्रादिसंख्याकथनं। द्वीपोदधीनां स्वरूपकथनं। तेषां नामकथनञ्च। तच जम्बूप्रेाची-पुष्करादयः सर्व्वे एव द्वीपाः प्रत्येकं एकैकेन समुद्रेण वेष्टिता इति कथनं। प्रतिद्वीपं प्रतिसमुद्रञ्च चन्द्रादिगतिकथनं। मनुष्यक्षेत्रे चन्द्रादीनां पङ्क्तिक्रमेण भ्रमणकथनं। तच मण्डलादिनिरूपणं। द्वीपोदधिषु ग्रहनक्षत्रतारकाणां संख्याज्ञानोपायकथनं। चन्द्रादिविमानस्वरूपकथनं। कल्पभेदेन चन्द्रादीनां विमानवत्तादिभेदनिरूपणं। चतुर्दशरज्वात्मकस्य लोकस्य विभागकथनं। सुरनरादीनां गतिविवेचनं। देवादीनामुपभोगादिकथनं। देवादीनां वर्णविभागादिकथनं। अथ एकस्मिन् मुहूर्त्ते अहोरात्रे च प्राणानां संख्याकथनं। आहारोच्छ्वासयोः कालमानकथनं। अनाहारमाहारभेदेन द्विविधजीवनिरूपणं। अथ नरकादिनिरूपणं। तच वेदनादिनिरूपणं। नारकादिगतिभ्य आगतानां सिद्ध्युपायकथनं। अथ तिर्य्यग्लोकनिरूपणं। जीवानां गतिनिरूपणं।

No. 2744. रूपसेनकुमारकथा। Substance, country-made paper, 11 × 4 inches. Folia, 52. Lines, 8 on a page. Extent, 1,256 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect. Sanskrit, interspersed with Mágadhí quotations.

Rúpasena-kumára-kathá. The religious duties of Jains illustrated by the story of Rúpasena, a prince of Rájagriha. By Jina Súri.

Beginning. श्रीमन्तं विदुरं शान्तं लक्ष्मीराज्यजयप्रदं।
वीरं नत्वाऽहतां पुण्यां कथां काश्चिल्लिखाम्यहं॥
आरोग्यभाग्याभ्युदयं प्रभुत्वं सत्त्वं शरीरे च जने महत्त्वं।
तत्तच्च चित्ते सदने च सम्यत्समश्नुते पुण्यवशेन पुंसां॥
भो भो भव्याः श्रीजिनागमवाणी श्रोतव्या। यतः,
सुचा जाणइ कल्लाणं सुचा जाणइ पावगं।
उभयं पि जाणइ सुचाजं छेयं तं समायरे। इत्यादि।

End. ये पालयन्ति नियमान् परिपूर्णान् व्रतिरूपसेन इव।
ते सुखलक्ष्मीभाजः पदे पदे सुर्ज्जनश्लाघ्याः॥
विशालराजसूरीशसुधाभूषणसद्गुरोः।
शिष्येण जिनसूरिणा सुदृता कथिता कथा॥

Colophon. इति रूपसेनकुमारकथा सम्पूर्णा॥

विषयः। जैनधर्म्मप्रशंसाकीर्त्तनं। अहिंसादिमाहात्म्यकीर्त्तनं। दानमाहात्म्यादिकथनं।

धर्मानुष्ठानस्य आवश्यकताकथनं। अथ प्रत्यहं गुरुवन्दन-धर्मोपदेशश्रवण-तद्वचनाराधनानां कर्तव्यताविधानं। धर्मस्यैव सुखहेतुत्वनिरूपणं। जैनधर्मसदृशोऽन्यः कोऽपि यथार्थो धर्मो नास्तीतिकथनमुखेन रूपसेननामकस्य राजगृहनगराधिपतिमन्मथाभिधाननरपतेः कुमारस्य विवरणकथनं। तत्र एकदा वर्षाकाले शीतलाभिधानायां तन्नगरोपकण्ठे विराजमानायां कस्याश्चित् सरिति विहरतस्तस्य नरपतेः मन्मथस्य पुरतः केवलं नरमस्तकयुगलं किमपि तद्वदनं भासमानं पश्यति भयेन तन्नीरराशिनः कस्यचित् जैनगुरोर्दीक्षाग्रहणकथनं। अथ तन्माहात्म्येन राज्ञः पुत्रद्वयलाभविवरणकथनं। तत्र ज्येष्ठकुमारस्य रूपसेनस्य विवेकविवरण-कथनं। तस्य विविधनगराटवीषु भ्रम्यमानस्य विविधाद्भुतपदार्थसन्दर्शनादिदृष्टान्तकीर्तनं। प्रसङ्गात् नीतितत्त्वनिरूपणञ्च। विशेषेण जैनमाहात्म्यकथनं।

No. 2745. अनुष्ठानविधिः, वा षड़ावश्यकवृत्तिः। Substance, country-made paper, 14 × 4 inches. Folia, 94. Lines, 9 on a page. Extent, 3,576 ślokas. Character, Nágara. Date, Sm. 1478. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose and verse. Incorrect.

Anusṭhána-vidhi alias **Shaḍávaśyaka-vṛitti.** The six essential duties of Jain householders. This includes the whole circle of domestic duties appropriate for Jains who do not betake to a monastic life. Anonymous.

Beginning, वन्दारुवृन्दारकवृन्दवन्द्यं प्रणम्य वीरं जितमारवीरं।
उपासकानामुपकारहेतोर्वैद्यान्यमनुष्ठानविधिं सुबोधं॥

इहैव तावत् श्रावकेणापि प्रत्यहं त्रीन् पञ्च सप्त वारान् दर्शनविशुद्ध्यर्थं चैत्यवन्दना विधेया॥ यदाह,—

साहुण सत्त वारा होइ अहोरत्त मज्झया रत्ति। गिहिणो पुण चिइ वंदण तिय पञ्च सत्तया वारा॥ तथा वन्दनकं चाष्टौ कारणान्याश्रित्य गुणवत्प्रतिपत्तये गुरूणां दातव्यं। इत्यादि।

End.
इत्येवमल्पमतिसत्त्वविबोधनाय
श्राद्धप्रतिक्रमणसूत्रविवृत्तिरेषा।
किञ्चिन्मया प्रकटिताच तु विस्तराद्या
ज्ञेया बहुश्रुततिलैर्वरचूर्णिनस्य॥

Colophon. इति श्रीषड़ावश्यकवृत्तिः सम्पूर्णा। ग्रन्थ ९७१०। सं०१४७८॥

विषयः। गृहस्थानां चैत्यवन्दनाद्यनुष्ठानप्रकारकथनं। तत्र प्रत्यहं श्रावकेण (गृहस्थेन)

क्रमेण त्रीन् पञ्च सप्त वारान् सत्त्वविशुद्ध्यर्थं चैत्यवन्दनं विधेयमितिनिरूपणं। गुरूपसदनस्या-वश्यकताकथनं। अर्हद्बिम्बनमस्कारविधिकथनं। तथाहि शक्रादिकृतां पूजां सिद्धिंगच्छ अर्हन्तीति अर्हन्तः। एवमन्यच। अथ अर्हद्बिम्बनमस्कारमाहात्म्यकीर्त्तनं। तत्र पुलिन्दमिथु-नस्य उपाख्यानकथनं। चण्डपिङ्गलस्य उपाख्यानकथनञ्च। अथ चैत्यवन्दनविधिकथनं। तत्त्रै-विध्यनिरूपणं। अस्यानुष्ठानेन च सम्यक् मिथ्यादुष्कृतकर्त्तुस्तत्क्षणादेव अशेषमपि कर्म्म क्षीय-ते—इति निरूपणं॥ अत्र मृगावत्या उपाख्यानकथनं। भगवन्त एव विवेकिभिः स्तोतव्या नान्ये इति निरूपणं। अत्र राजगृहमाश्रितस्य भगवतो वर्द्धमानस्य मेघाभिधानं कमपि श्रेणिककुमारं प्रत्युपदेशदानकथनं। इन्द्रकृतजिनस्तवकथनं। अथ सर्व्वत्र भगवद्वन्दनादौ श्रद्धाभक्त्यादियु-क्तेन भवितव्यमितिनिरूपणं। भावसमाधिगुणाविर्भावकथनमुखेन जिनदत्तस्य उपाख्यानकथनं। जाति-जरा-मरण-शोकप्रणाशनश्रुतधर्म्ममाहात्म्यकथनं। अत्र गङ्गाकूलनिवासिनां भ्रातॄणां दृष्टा-न्तकीर्त्तनं। अथ मुमुक्षूणां कौण्डिन्यादीनां तपस्विनां दृष्टान्तकथनं। अर्हद्गुणस्तवनमाहात्म्य-कथनमुखेन शीतलाचार्य्यस्य उपाख्यानकथनं। क्षुल्लकाचार्य्यकथाकीर्त्तनञ्च। गुरुशुश्रूषाविधि-कथनं। ज्ञानदर्शनचारित्रनिरूपणं। वन्दनादीनां कालनिरूपणप्रसङ्गेन पूर्व्वह्णकालादि-लक्षणकथनं। भोजनकालादिनिरूपणं। अत्र धर्म्मिलस्य उपाख्यानकथनं। अथ प्रतिक्रमणवि-धिकथनं। तत्र अनशन-मौन-इन्द्रियसंक्षेपण-रसत्याग-कायक्लेश-संलीनतारूपषड्विधबाह्यतपः-कथनं। तथा प्रायश्चित्त-ध्यान-वैयावृत्त्य-विनय-अधोत्सर्ग-स्वाध्यायरूपषड्विधाभ्यन्तरतपःकथ-नञ्च। अत्र महापरिग्रहनिष्टत्तनिवृत्तेः फलकथनमुखेन नाशिक्यनगरवासिनो वणिज उपा-ख्यानकथनं। सम्यग्दर्शनादिमाहात्म्यकथनं। तत्र नववर्म्मण उपाख्यानकथनं। यज्ञदेवस्य उपा-ख्यानकथनं। काञ्चनपुराधिपस्य उपाख्यानकथनं। प्राणातिपातव्रतानुव्रतादिविधिकथनं। अत्र विविधसंवादकथनं। मोक्षलाभहेतुकथनञ्च।

No. 2746. पुद्गलषट्त्रिंशिका। Substance, country-made paper, 10½ × 4 inches. Folia, 3. Lines, 8 on a page. Extent, 42 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Mágadhí.

Pudgala-shaṭtriñśiká. On the Jain theory of atoms. By Abhayadeva Súri.

Beginning. खित्तोगाहण दव्वे भावद्धाणाउ अप्पबहुअत्ते।

थोवा असंखगुणिआ तिन्नि विसेसा कहं नेया॥

खित्तामुत्तत्ताउ तेन समं बंधपत्तया भावाः।

वो पोग्गलाणथोवो खित्तो बद्धाणकालोउ॥ इत्यादि।

End. एवसि जहा संभव अथोवयणं करिह रासीणं ।
सवभावउय जाणिषु ते अणं ते जिणाभिहिवं ॥

Colophon. इति श्रीअभयदेवसूरिविरचिता पुद्गलषट्त्रिंशिका समाप्ता ।

विषयः । पुद्गलानां (परमाणुविशेषरूपाणां) अप्रदेशसप्रदेशभेदेन द्वैविध्यकथनपूर्व्वकं तेषां संघातभेदलक्षणादिकथनं । विच्छिन्नानां परमाणूनामेकपुद्गलस्कन्धतया परिणमनं संघातः तथा एकद्रव्यात् परमाणूनां विघटनं भेद इति निरूपणं । अथ क्षेत्रस्थानावगाहनस्थान-द्रव्यस्थान-भावस्थानभेदेन तेषां सप्रदेशाप्रदेशपरिणामकथनं । तच्च तच्च गुणपरिणामादि-निरूपणं । द्व्यणुकादिस्कन्धनिरूपणं । परमाणूनां बन्धननिरूपणं । असंख्येयत्वकथनञ्च ।

No. 2747. बालबोधिनी । Substance, country-made paper, 10 × 4 inches. Folia, 10. Lines 6 on a page. Extent, 183 ślokas. Character, Nágara. Date, ? Place of doposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Sanskrit.

Bálabodhiní. A gloss on Kálidása's S'rutabodha, a primer on versification. By Hañsarája.

Beginning. श्रीभजननसमयादिनाथस्य पादा-
वसुरसुरमनुष्यैर्भूरिवन्द्यैर्हि नत्वा ।
ललितपदसुरम्यां श्रुतबोधस्य टीकां
मुनिरहमिह कुर्व्वे हंसराजो विचित्रां ॥
सुगुरुवचनदीपेर्दर्शितं तत्स्वरूपं
मम हृदयगृहं तेऽनुग्रहाद्यत्नदेव ।
श्रमहमभिधास्ये बालबोधिप्रसन्नं
निजपठननिमित्तं बालबोधाय चैव ॥

छन्दसां लक्षणमिति । अहं कविः कालिदासः तत् श्रुतबोधं श्रुतबोधनामधेयं अविस्तरं विस्तारातिरिक्तं कथयिष्यामि । इत्यादि ।

End. कविना अतः परं ग्रन्थः प्रोक्तः । इति ।
पूज्यः श्रीनानकाख्यो निखिलगुणगणैर्युक्त आत्मीयगच्छे
स्वामी श्रीमूलनाद्यो विहरति भुवने साम्प्रतं तत्त्ववेत्ता ।
तच्छिष्याखि हंसः पठनगुरुवचनस्थापनाचारबुद्धि-
र्टीका तेनाभिरामा जगति विरचितावोधबोधस्य वृद्धौ ॥

Colophon. इति श्रीकविकालिदासप्रणीतश्रुतबोधटीका बालबोधिनी समाप्ता।

विषयः। कालिदासप्रणीतश्रुतबोधाख्यच्छन्दोग्रन्थस्य व्याख्यानम्।

No. 2748. तत्त्वदीपनम्। Substance, country-made paper, 16 × 4 inches. Folia, 22. Lines, 6 on a page. Extent, 354 ślokas. Character, Bengali. Date, ? Place of deposit, Háñsapukura-grám, Post Kálná, Zillá Varddhamána, Hemachandra Chaṭṭopádhyáya. Appearance, new. Prose. Correct.

Tattvadípana. A treatise on the existence of the Deity, founded on the adual theory of the Vedántists and the eternity of the Vedas, and refutations of the doctrines of the other schools of Indian philosophy, including those of the Bauddhas. By Jagannátha Sarasvatí.

Beginning सर्व्ववेदान्तसिद्धान्तगोचरं तमगोचरम्।

गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहं।
कर्म्मादिकण्ठालङ्कारं सारं वेदान्तवारिधेः।
रचयत्यमलं ग्रन्थं तत्त्वदीपननामकं।

तत्रेश्वरे अनुमानमेव प्रमाणमिति तार्किकसमयः। तच्च जन्यं सकर्त्तृकं कार्य्यत्वात् घटादिवदित्याकारकं। न च वेदस्यापि ईश्वरे प्रमाणत्वसम्भवेन कथमनुमानमेवेति। इत्यादि।

End. जिताहारो जितक्रोधो जगन्नाथसरस्वती।
तेनायं रचितो ग्रन्थस्तत्त्वदीपनसंज्ञकः॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यहरिहरसरस्वतीप्रियशिष्यश्रीजगन्नाथसरस्वतीविरचितं तत्त्वदीपनं समाप्तं।

विषयः। ईश्वरतत्त्वनिरूपणं। तत्र ईश्वरे प्रमाणकथनं। तत्र नैयायिकादिमतोपपादनपुरःसरं तत्खण्डनं। सांख्यमतखण्डनं। पातञ्जलमतखण्डनं। बौद्धमतखण्डनं। शैवमतखण्डनं। वैष्णवमतखण्डनं। वेदस्य स्वतः प्रामाण्यनिरूपणं। विधिनिषेधार्थवादादिविवेचनं। पूर्व्वमीमांसामतखण्डनं। प्रपञ्चस्य मिथ्यात्वकथनं। व्यवहारिकप्रमाणकथनं। तत्र प्रत्यक्षानुमानोपमानार्थापत्तिरूपप्रमाणनिरूपणं। अपवर्गनिरूपणं। मुमुक्षुलक्षणादिकथनं। जीवन्मुक्तलक्षणादिकथनञ्च।

No. 2749. संक्रान्तिकौमुदी। Substance, palm-leaf, 12 × 1½ inches. Folia, 15. Lines, 4 on a page. Extent, 217 ślokas. Character, Bengali. Date, Sk. 1540. Place of deposit, Háñsapura-grám, Post Kálná, Zillá

Varddhamána, Dvárkánátha Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct.

Saṅkránti-kaumudí. An enquiry into the true nature of *Saṅkránti* or the passage of the sun from one Zodiacal sign to another, and the religious duties appropriate on such an occasion. By Siddhánta-vágísa Bhaṭṭáchárya.

Beginning. गोविन्दचरणद्वन्द्वं नत्वा ध्यात्वा गुरोः पदं ।
संक्रान्तिकौमुदी यत्नाद्वागीशेन वितन्यते ॥

तत्र ज्योतिषे । अयनं विषुवे द्वे च चतस्रः षड़शीतयः । चतस्रो विष्णुपद्यश्च संक्रान्त्यो द्वादश स्मृताः । इत्यादि ।

End. काव्यकैरवपूर्णेन्दोस्सर्वकंपङ्कजभास्वतः ।
वागीशस्य क्षतिः प्रीतिं करोतु क्षतिनां सदा ॥

Colophon. इति महामहोपाध्यायजगद्गुरुश्रीसिद्धान्तवागीशभट्टाचार्य्यविरचिता संक्रान्तिकौमुदी समाप्ता । शाके १५४० ॥

विषयः । संक्रान्तिलक्षणतद्भेदादिनिरूपणं । संक्रान्तिविशेषे पुण्यकालादिविवेचनं । तत्र तत्र कृत्यविशेषनिरूपणञ्च ।

No. 2750. दानबृहस्पतिस्मृतिः । Substance, palm-leaf, 12 × 2 inches. Folia, 6. Lines, 5 on a page. Extent, 47 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rámanátha Tarkaratna. Appearance, decayed. Verse. Incorrect.

Dána-vṛihaspati-smṛiti. On religious benefactions and the rules for their consecration. By Vṛihaspati.

Beginning. बृहस्पतिमतं पुण्यं प्रवक्ष्यामि विशेषतः ।
यच्छ्रुत्वा तु नरो राजन् सर्व्वपापैः प्रमुच्यते ॥
दृष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणं ।
भगवान् ज्ञानिनां श्रेष्ठं पर्य्यपृच्छद्बृहस्पतिं ॥
भगवन् केन दानेन सर्व्वतः सुखमेधते ।
यद्दत्तमहार्थञ्च तन्मे ब्रूहि पितामह ॥
एवमिन्द्रेण पृष्टोऽसौ देवदेवपुरोहितः । इत्यादि ।

End. एतेषु चैव यद्दत्तं दानं विप्रेषु शक्तितः ।
कुलान्युद्धरते पुंसां दश पूर्व्वान् दशापरान् ॥

Colophon. इति दानबृहस्पतिस्मृतिः समाप्ता ।

विषयः । दानविधिकथनं । तत्र तत्र भूमिसुवर्णादिदाने पात्रादिविशेषे च फलविशेषकथनं ।

No. 2751. व्याख्यामृतम् । Substance, palm-leaf, 14 × 2 inches. Folia, 168, Lines, 6 on a page. Extent, 5,511 ślokas. Character, Bengali. Date, ? Place of deposit, Háñspura-grám, Post Kálná, Zillá Vardhamána, Hemachandra Chaṭṭopádhyáya. Appearance, old. Prose. Incorrect.

Vyákhyámṛita. A commentary on the well-known Amarakosha. By S'ríkara Áchárya. The codex is incomplete. It begins with the chapter on Vegetables.

Beginning. वनमरण्यसामान्ये । षट्टा गन्तारो वयः पक्षिणोऽस्यां । छदिकारादिति ङिषि षट्वी । अर्य्यते विपिनत्वेन स्वामिभिरित्यरण्यं । इत्यादि ।

End. तस्य प्रमाणं इति लुकि । तालप्रमाणे तालः । तालं इन्तमस्य तालहन्तकं । शेषलक्षणे कप् ।

Colophon. इति भट्टामट्टोपाध्यायश्रीश्रीकराचार्य्यविरचिते व्याख्यामृते मनुष्यवर्गविवरणं ।

विषयः । अमरकोषस्य वनौषधिवर्गादारभ्य मनुष्यवर्गान्तं व्याख्यानम् ।

No. 2752. बृहद्व्यासस्मृतिः । Substance, palm-leaf, 10 × 2 inches. Folia, 16. Lines, 5 on a page. Extent, 205 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rámanátha Tarkaratna. Appearance, old. Prose. Correct.

Vṛihadvyása-smṛiti. An amplified recension of the Institutes of Vyása. It comprises three chapters, of which the first treats of the duties of Vedic students; the second of the duties of women, of wives, and of duty to husbands; and the third of the daily duties of householders.

Beginning. वाराणस्यां सुखासीनं वेदव्यासं तपोनिधिं ।
पप्रच्छुर्मुनयोऽभ्येत्य धर्म्मान् वर्णव्यवस्थितान् ॥
स पृष्टः स्मृतिमान् व्यासः स्मृतिं वेदार्थगर्भितां ।

जयाचार्य प्रसन्नात्मा मुनयः श्रूयतामिति ।
यच्च स्वभावतोऽरण्ये कृष्णसारो मृगः सदा ।
दृश्यते तच्च वेदोक्तो धर्म्मो भवितुमर्हति ॥
श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते ।
तत्र श्रौतं प्रमाणं स्यात् तयोर्द्वैधे स्मृतिर्वरा ॥ इत्यादि ।

End. ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेद्धितमात्मनः ।
शक्तितो मतिमान् नित्यं दानमेतत् समाचरेत् ॥

Colophon. इति श्रीवेदव्यासोपदिष्टायां स्मृतौ गृहस्थाह्निको नाम तृतीयोऽध्यायः । गृहदीपिकास्मृतिः समाप्ता ।

विषयः । प्रथमाध्याये ब्रह्मचर्य्यविधितद्भेदादिनिरूपणं । द्वितीयाध्याये,—स्त्रीणां कृत्यनिरूपणं । दाम्पत्यधर्म्मकथनं । पतिव्रताधर्म्मकथनञ्च । तृतीयाध्याये,—गृहस्थस्य याज्ञिककृत्यनिरूपणं ।

No. 2753. व्याख्योदाहृतिः, वा संज्ञातन्त्रप्रकाशिका । Substance, country-made paper, 16 × 4 inches. Folia, 68. Lines, 7 on a page. Extent, 1,645 ślokas. Character, Bengali. Date? Place of deposit, Brahmaśásana, Zillá Nadíyá, Akshayachandra Ghoshála. Appearance, fresh. Prose. Correct.

Sanjná-tantra-prakásiká ALIAS **Vyákhyodáhriti.** A gloss on the chapter on terminology in Nílakaṇṭha's digest of astrology entitled *Tájika*. By Viśvanátha Daivajṇa, son of Divákara Daivajṇa. *Vyákhyodáhṛita* or "explanations and illustrations" appears to be the comprehensive name of the entire commentary on the *Tájika*, but different parts of it having been separately published each has obtained a distinctive subordinate name.

Beginning. चण्डीकुण्डलमाकलय्य कुतुकाद्दोर्दण्डभण्डायगं
क्षत्वा ताण्डवडम्बरे पशुपतेः खेलन् खलूक्षुङ्खलं ।
षण्डांशोरिव मण्डलं तदपरं सन्दर्शयन्नम्बरे
हेरम्बो जगदम्बिकां विहसयन्नः खेयसे गर्ज्जतां ॥
दिवाकरो नाम बभूव विद्वान् दिवाकराभो गणिवेषु मन्ये ।
सकल्पितैर्येन विहृद्दृन्दैर्बद्धं जगद्गर्णितविश्वरूपं ॥
तस्यात्मजा-पद्म समा बभूवुः पद्मेन्द्रकल्पा गणितागमेषु ।
पद्मानना वादिगजेन्द्रभेदे पद्माग्निकल्पा द्विजकर्म्मणा च ॥

अजनिष्ट कृष्णनामा ज्येष्ठस्तेषां कनिष्ठानां ।
विद्यानवद्यवाचां वेत्ता जगतः सदाचारी ॥

तस्माज्जातः कनिष्ठो विबुधबुधगणश्रेठतां प्राप्य जाग्रज्ज्योतिःशास्त्रेण शश्वत्प्रकटितविभवा यस्य शिष्यप्रशिष्याः ।

विष्णुर्ज्योतिर्विदूर्व्वीपतिविदितगुणो भूमिदर्व्वीकरेन्द्रो ग्रन्थव्याख्यानखर्व्वीकृतविबुधगुरु-र्गैर्व्वेचा गर्व्वभाजां ॥

— — — — — — — ।

तस्यानुजः सम्प्रति विश्वनाथो विष्णुप्रसादाद्गुणमाचजिष्णुः ।
सर्व्वज्ञदैवज्ञविलासविज्ञो ऋषिंदकः साधितसर्व्वविद्यः ॥
गोदातीरस्थगोस्वाभिधपुरवसतिः पार्थदेशैकभूषा
संज्ञातन्त्रस्य टीकां यदधदभिनवां गद्यपद्यानवद्यां ।
शश्वद्विश्वोपकृत्यै विशदतरतया दैवविद्विश्वनाथो
ग्रन्थोग्रग्रन्थिभेदां ग्रहगणितविदामग्रगण्योऽग्रगर्व्वः ॥

निर्व्विघ्नग्रन्थसमाप्त्यर्थं मङ्गलमाचरन् चिकीर्षितं प्रतिजानीते प्रणम्येति ।

End. पुनः कथम्भूतं विद्वच्चित्तप्रीतिकरं पण्डितशिष्यस्य प्रीतिदं ॥

Colophon. इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचितायां व्याख्योदाहृतौ संज्ञातन्त्रं समाप्तं ।

व्यकारि विश्वनाथेन संज्ञातन्त्रप्रकाशिका ।
टीका टीकाकृतिं कुर्य्यात् सज्जालज्जानुबन्धनं ॥

इति संज्ञातन्त्रप्रकाशिका समाप्ता ।

विषयः । नीलकण्ठकृततालिकाभिधानफलितज्योतिर्निबन्धस्य संज्ञातन्त्रप्रकरणस्य व्याख्यानम् ।

No. 2754. व्याख्योदाहृतेः वर्षतन्त्रप्रकाशिकाभिधानखण्डं । Substance, country-made paper, 16 × 4 inches. Folia, 58. Lines, 6—7 on a page. Extent, 1,365 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmasásana, Zillá Nadíyá, Akshayachandra Ghoshála. Appearance, fresh. Prose. Correct.

Vyákhyodáhṛiti. This codex contains the second part of the commentary on the Tájika; it treats of the astrology of the year. Its specific name is *Varsha-tantra-prakás'iká*. The first part has been noticed under the next preceding No.

Beginning. यत्पादपद्मं सुरसिद्धदैत्या अभीष्टसिद्ध्यै प्रणमन्ति नित्यं ।
तं विघ्नराजं मनसा स्मरामि भक्तप्रियं नागमुखं गणेशम् ॥
गोदावरीतटे भाति गोलग्रामोऽतिसुन्दरः ।
तत्रावसन् पूर्व्वजामे सिद्धान्ताम्बुजभानवः ॥
अनेकविद्याकुशलैर्द्विजेन्द्रैः संसेवितो भूमितले प्रसिद्धः ।
दिवाकरो वेदविदां वरिष्ठो वेदान्तशास्त्राभिरुचिर्बभूव ॥
तस्मात्मजाः पञ्च गुणैरुपेता जाता अमीषां प्रथमस्तु कृष्णः ।
दैवज्ञवर्य्यः सकलागमज्ञः विश्वेशपादाम्बरतो नितान्तं ॥
— — — — — तत्र ग्रन्थारम्भे निर्व्विघ्नसमाप्त्यर्थं कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति स्वेति ॥

End. मूलचिक्कोणस्थलग्नस्थे सति पिङ्गगेहे भोजनं । अन्यदासमाप्ति स्पष्टं ।

Colophon. इति श्रीदिवाकरदैवज्ञात्मजश्रीविश्वनाथदैवज्ञविरचितायां व्याख्योदाहृतौ वर्षतन्त्रप्रकाशिका समाप्ता ।

विषयः । नीलकण्ठकृतताजिकाभिधानफलितज्योतिर्ग्रन्थस्य वर्षतन्त्रप्रकरणस्य व्याख्यानम् ।

No. 2755. नीलकण्ठस्तोत्रम् । Substance, palm-leaf, 12 × 2 inches. Folia, 12. Lines, 5 on a page. Extent, 165 ślokas. Character, Bengali. Date, ? Place of deposit, Háñspura-grám, Post Kálná, Zillá Burdwan, Hemachandra Chaṭṭopádhyáya. Appearance, old. Verse. Correct.

Nílakaṇṭha-stotra. That part of the story of the churning of the ocean in which S'iva swallows the poison churned up. It concludes with a hymn in praise of S'iva. It appears very like an extract from a Puráṇa.

Beginning. व्यास उवाच ।
कथं समुत्थितं घोरं विषं सूर्य्यायुतप्रभं ।
कथं पीतं भगवता शङ्करेणामितौजसा ॥
कथञ्च देवदेवस्य कण्ठे कुन्देन्दुसंप्रभे ।
नीलो वर्णः समुत्पन्न एतदिच्छामि वेदितुं ॥
सनत्कुमार उवाच ।
प्रवृत्ते ज्योतिषां चक्रे मध्यं प्राप्ते दिवाकरे ।
देवता नियमात्मानः सर्व्वे तिष्ठन्ति तां कलां ॥

नियमाच्च समाप्यन्ते तस्मिन् काले दिवौकसां ।
तेषां मध्यगतो वायुः प्राणिनां जीवितोऽरः ॥
नमस्ते नीलकण्ठाय इत्युवाच सदागतिः ।
तच्छ्रुत्वा भावितात्मानो मुनयः संस्थितव्रताः ।
बालखिल्या इतिख्याताः पतङ्गसहचारिणः ॥ इत्यादि ।

End. यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान् पादमन्ततः ।
अक्षय्यमनुपानं वै पितृभ्यश्चोपतिष्ठते ॥
मनसा चिन्तितं यच्च यच्च वाचाप्युदाहृतं ।
सर्व्वं सम्पद्यते तस्य स्तवस्यास्यानुकीर्त्तनात् ॥
श्रुत्वैतत् परमं गुह्यं येऽपि स्युः पापयोनयः ।
स्त्रियः शूद्राश्च ये चेह तेऽपि यान्ति परां गतिं ॥

Colophon. इति नीलकण्ठस्तोत्रं सम्पूर्णं ॥

विषयः । समुद्रमन्थनकाले नीलकण्ठस्याविर्भावदक्षात्मकथनपूर्व्वकं तत्स्तोत्रपाठेन गुणमाहात्म्यादिकथनं ।

No. 2756. पदार्थादर्शः । Substance, country-made paper, 17 × 5 inches. Folia, 88. Lines, 8 on a page. Extent, 2,522 ślokas. Character, Bengali. Date, ? Place of deposit, Háñspura-grám, Post Kálná, Zillá Burdwan, Hemachandra Chaṭṭopádhyáya. Appearance, old. Prose. Incorrect.

Padárthádarśa. A gloss on Kavindra Áchárya's poem entitled *Kavichandrodaya*. By S'ivánandanátha *alias* Kás'ínátha.

Beginning. नमामि कामेश्वरपादपङ्कजं
करोमि कामेश्वरपूजनं सदा ।
वदामि कामेश्वरनाम निर्म्मलं
स्मरामि कामेश्वरतत्त्वमव्ययम् ॥
अनन्ताख्यं गुरुं नौमि करित्वप्रतिभाकरं ।
श्रीखण्डचन्द्रजलधरं स्फुरत्कीर्त्तिकरं परं ॥
अनाद्यायाखिलाद्याय साक्षिणे गतसाक्षिणे ।
नीरूपाय सरूपाय दक्षिणामूर्त्तये नमः ॥

वाराणसीमहं वन्दे सच्चिदानन्दरूपिणीं ।
माहरूपेण सततं सत्सारेऽस्मिन्निष्टदां ॥
कविचन्द्रोदये काव्ये गुरूणामुपदेशतः ।
पदार्थादर्शटीकेयं काशीनाथेन तन्यते ॥

तत्र भवान् कविचन्द्राभिधानो महाकविः स्वकृतकोषकाव्यप्रारम्भे निजेष्टदेवतां नमस्करोति पुण्डरीकाक्षेति । इत्यादि ।

End. श्रीमच्चिपुरसुन्दर्य्याः प्रीत्यर्थं लिखिता मया ।
कृता टीका गुरुप्रीत्यै प्रीयतां जगदीश्वरः ॥

Colophon. इति श्रीमच्छ्रुतिस्मृतिमतप्रमाणपारावारीणभट्टोपाह्वजयरामभट्टात्मजवाराणसीगर्भसम्भवकाशीनाथाह्वश्रिवानन्दनाथविरचितायां पदार्थादर्शाभिधानायां कविचन्द्रोदयटीकायां कविचन्द्राचार्य्यप्रशंसा । समाप्तोऽयं ग्रन्थः ।

विषयः । कविन्द्राचार्य्यकृतकविचन्द्रोदयाभिधानकोषकाव्यस्य व्याख्यानम् ।

No 2757. तर्कानुभाषा । Substance, country-made paper, 17 × 4½ inches. Folia, 68. Lines, 6 on a page. Extent, 1,198 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇapura, Zillá Nadiyá. Rájívalochana Gaṅgopádhyáya. Appearance, old. Prose. Incorrect.

Tarkánubhásha. A gloss on Kes'ava Mis'ra's treatise on the terminology of the Nyáya entitled *Tarkabhásha*. By Govardhana. The text has been noticed under No. 1110, (*ante*, III, p. 72) and a different commentary on it under No. 2483, (*ante* VII, p. 240).

Beginning. यत्तर्कभाषामनुभाषते स्म गोवर्द्धनस्तर्ककथासुधीरः ।
तेनानवद्येन सुधांशुगौरी कीर्त्तिर्गुरूणामस्तताधिकास्तु ॥
विजयश्रीतनूजन्मा गोवर्द्धन इति श्रुतः ।
तर्कानुभाषां तनुते विविच्य गुरुनिर्म्मितिम् ॥
श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा ।
तनोति तर्कानधिगत्य सर्व्वान् श्रीपद्मनाभाद्विदुषो विनोदान् ॥

शिष्यप्रवृत्तये स्वभिधेयं प्रतिजानीते बालोपीति । मया एषा संक्षिप्ता युक्त्यङ्किततर्कभाषा प्रकाश्यते । तर्काः षोड़शपदार्थाः । इत्यादि ।

End. शक्तिग्रहणाहितसंस्कारतया तस्यां दशायां तज्जन्यस्मरणं वेति ।

Colophon. (इतःपरं खण्डितत्वात् परिसमाप्तिवाक्याभावः ।)

विषयः । केशवमिश्रकृततर्कभाषाया व्याख्यानम् ।

No. 2758. रत्नमाला। Substance, country-made paper, 14 × 3½ inches. Folia, 17. Lines, 7 on a page. Extent, 430 ślokas. Character, Bengali. Date, ? Place of deposit, Hañsapura-grám, Post Kálná, Zillá Burdwan, Hemachandra Chaṭṭopádhyáya. Appearance, old. Prose. Incorrect.

Ratnamálá. A gloss on S'ilhana Mis'ra's S'ánti-s'ataka. Anonymous.

Beginning. अलिकुलमण्डितगण्डं प्रत्यूहव्यूहतिमिरमार्त्तण्डम्।
सिन्दूरारुणशुण्डं देवं वेतण्डतुण्डमवलम्बे॥
सत्सम्प्रदायप्रथनाय तिष्ठे शिष्यैश्चतुर्भिः सह शोऽवतीर्णः।
उक्तो हृदत्यङ्गमतन्त्रराजे श्रीशङ्कराचार्य्यगुरुं तमीड़े॥

इह यद्यपि स्वर्गापवर्गसाधनतया विविधदेवताराधनक्रियाः श्रूयन्ते तथापि तत्त्वज्ञानसाधनत्वेन परवैराग्यमेव परं श्रेयःसाधनमिति मनसि कृत्वा परमकारुणिकः श्रीशिङ्कनाचार्य्यः शान्तिशतकनामानं ग्रन्थं प्रारिप्सुः शिष्टाचारपरिपालनाय मङ्गलमाचरति। नमस्याम इति।

End. अनेन तत्त्वज्ञानसाधनत्वेन तदेवाश्रयणीयमिति सूचितमिति।

Colophon. इति शान्तिशतकरत्नमालाटीकायां चतुर्थः परिच्छेदः। समाप्तोऽयं ग्रन्थः।

विषयः। शिङ्कणमिश्रकृतशान्तिशतकस्य व्याख्यानम्।

No. 2759. समयनिर्णयः। Substance, palm-leaf 18 × 2 inches. Folia, 81. Lines, 4 on a page. Extent, 1,194 ślokas. Character, Bengali. Date, Sk. 1602. Place of deposit, Brahmaśásana, Zillá Nadíyá, Paṇḍit Kálíprasanna Vidyáratna. Appearance, decayed. Prose and verse. Correct.

Samaya-nirṇaya. On times meet for religious rites and ceremonies. By Ananta Bhaṭṭa.

Beginning. शिवां शिवं गणेशञ्च प्रणम्य परया मुदा।
निर्णयः क्रियते सुद्भ समयेऽनन्तशर्म्मणा॥

तत्र निर्णयस्यावद्यप्रतिपन्नानां परस्परविरोधपरीहार इति। विप्रतिपत्तिश्च बहुधा। इत्यादि।

End. श्रुत्वा माहात्म्यमीशस्य संसारं तरतेऽञ्जसेति स्कान्दोक्तेरिति।

Colophon. इति श्रीमदनन्तभट्टकृतौ समयनिर्णयः समाप्तः। समाप्तोऽयं ग्रन्थः। शकाब्दाः १६०१।

विषयः। निर्णयलक्षणकथनं। विप्रतिपत्तिभेदकथनपूर्व्वकं प्रत्येकं तत्स्वरूपनिरूपणं। कालस्य भगवत्स्वरूपत्वकथनं। महाकालादिलक्षणकथनं। लवक्षणमुहूर्त्तादिलक्षणं। चन्द्रकलाक्रियैव काल इतिमतकथनं। तिथिस्वरूपकथनं। मासनिरूपणं। तत्र मुख्यगौणनाक्षत्रसौरादिभेदकथनं। कार्य्यविशेषे मासविशेषनियमनं। मलमासादिलक्षणकथनं। तत्र तत्र कर्त्तव्यकर्म्मविधानञ्च। कालशुद्धिविवेककथनं। विवाहकालादिनिरूपणं। द्विरागमनकालादिकथनं। गर्भाधानकालादिविधानं। पुंसवनसीमन्तोन्नयनजातकर्म्मनामकरणनिष्क्रमणान्नप्राशनकर्णवेधचूड़ोपनयनकालनिरूपणं। विद्यारम्भकालकथनं। अनध्यायादिनिरूपणं। समावर्त्तनादिकालनिरूपणं। क्षत्रियवाणिज्यशूद्रारम्भप्रवेशकालादिनिरूपणं। आद्यकालादिनिरूपणं। दर्शेतृसर्गकालनिरूपणं। सपिण्डीकरणकालनिरूपणं। पुराणादिश्रवणकालनिरूपणं। पुराणश्रवणमाहात्म्यकीर्त्तनञ्च।

No. 2760. आचारप्रदीपः। Substance, palm-leaf, 14 × 2 inches. Folia, 102. Lines, 4 on a page. Extent, 1,670 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmaśásana, Zillá Nadíyá, Paṇdit Kálíprasanna Vidyáratna. Appearance, decayed. Prose and verse. Incorrect.

Áchára-pradípa. A digest of the Smṛiti rules for the duties included under the term Áchára. By Kes'ava Bhaṭṭa. He is the author of several Smṛiti works which bear the generic title of *Pradípa*.

Beginning. नन्दसूनुं नमस्कृत्य बालानां बोधसिद्धये।
आलोच्य धर्म्मशास्त्राणि सदाचारो निरूप्यते॥

तत्राचारप्रशंसायां महाभारते।
आचारप्रभवो धर्म्मो धर्म्मस्य प्रभुरच्युतः॥

इत्यनेनाचारस्य सर्व्वधर्म्ममूलतया अभ्यर्हितत्वादादौ तन्निर्णयः प्रस्तूयते। इत्यादि।

End. ते यान्ति परमं पदमिति परम्परया मोक्षजनकत्वमिति। इति।

Colophon. इति महामहोपाध्यायभट्टश्रीकेशवविरचिताचारप्रदीपः परिपूर्णः। समाप्तोऽयं ग्रन्थः।

विषयः। तत्रादौ सदाचारप्रशंसाकीर्त्तनं। आचारस्य धर्म्ममूलत्वकथनं। धर्म्मलक्षणादिविवेचनं। विधिनिषेधपरिसंख्यादिविवेचनं। आचारहीनस्य निन्दादिकथनं। श्वनादुत्थानविधिकथनं। मूत्रपुरीषादुत्सर्गविधिः। शौचविधिः। प्रातःस्नानविधिः। तत्कालनिरूपणं। संकल्पविवेचनं। प्रातःसन्ध्याविधिः। गोग्रासदानविधिः। पूजाविधिः। तत्र पुष्पादिविवेचनं।

नैवेद्यादिनिरूपणं। हरिहरदुर्गादिपूजाविधिः। जपविधिः। तिलकविधिः। मध्याह्नस्नानविधिः। तर्पणविधिः। वैश्वदेवविधिः। नित्यहोमविधिः। नित्यश्राद्धविधिः। आतिथ्यविधिः। भोजनविधिः। भक्ष्याभक्ष्यविधिः। पेयापेयविधिः। मत्स्यमांसादिभोजनविधिविवेचनं। भक्ष्याभक्ष्यनिरूपणं। सायंसन्ध्याविधिः। शयनविधिः। दारोपगमनविधिः। आचारात् मोक्षप्राप्तिकथनञ्च।

No. 2761. प्रायश्चित्तप्रदीपः। Substance, palm-leaf, 14 × 2 inches. Folia, 122. Lines, 4 on a page. Extent, 1,769 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmaśásana, Zillá Nadiyá, Páṇḍit Káliprasanna Vidyáratna. Appearance, old. Prose and verse. Correct.

Práyaśchitta-pradípa. A digest of the Smṛiti rules for performing expiatory rites. By Kes'ava Bhaṭṭa.

Beginning. जगदीशं हरिं नत्वा बालानां बोधहेतवे।
आलोच्य धर्म्मशास्त्राणि प्रायश्चित्तं विविच्यते॥

तत्र प्रायश्चित्तस्वरूपं। प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चयसंयुक्तं प्रायश्चित्तं प्रचक्षते। इति हारीतोक्तेः—इत्यादि।

End. अनेन च अनुष्ठातुः प्रत्यवायाधिक्यं भवतीति। इति।

Colophon. इति महामहोपाध्यायभट्टश्रीकेशवकृतः प्रायश्चित्तप्रदीपः परिपूर्णः। समाप्तोऽयं ग्रन्थः।

विषयः। प्रायश्चित्तस्वरूपनिरूपणं। तत्तत्प्रसङ्गविवेचनं। प्रायश्चित्तानुष्ठाननिरूपणं। पापनिष्क्रमणादिकथनं। पापोद्देशकथनं। अतिपातकमहापातकानुपातकादिनिरूपणं। ब्रह्महत्याप्रायश्चित्तकथनं। सुरापानप्रायश्चित्तकथनं। सुवर्णस्तेयप्रायश्चित्तं। गुर्व्वङ्गनागमनप्रायश्चित्तं। गुर्व्वङ्गनानिरूपणं। पतितसंसर्गप्रायश्चित्तं। संसर्गप्रकारनिरूपणं। पतितोत्पन्नप्रायश्चित्तं। अनुपातकप्रायश्चित्तं। उपपातकप्रायश्चित्तं। गोवधप्रायश्चित्तं। तत्र रोधादिनिमित्तभेदनिरूपणं। क्षत्रियादिवधप्रायश्चित्तं। स्त्रीवधप्रायश्चित्तं। गर्भनाशनादिप्रायश्चित्तं। गजाश्वादिवधप्रायश्चित्तं। मार्জ্জारादिवधप्रायश्चित्तं। पक्षिवधप्रायश्चित्तं। वृक्षादिच्छेदनप्रायश्चित्तं। अभक्ष्यभक्षणप्रायश्चित्तं। भक्ष्याभक्ष्यनिरूपणं। वृथामांसादिभक्षणप्रायश्चित्तं। हंसादिभक्षणप्रायश्चित्तं। लशुनादिभक्षणप्रायश्चित्तं। सूतकान्नादिभक्षणप्रायश्चित्तं। अपेयपानादिप्रायश्चित्तं। उच्छिष्टभोजनादिप्रायश्चित्तं। शवदूषितादिजलपानप्रायश्चित्तं। अपेयक्षीरपानप्रायश्चित्तं। रजतधान्यगुड़ादिस्तेयप्रायश्चित्तं। खैरिणीगमनादिप्रायश्चित्तं। रजस्वलादिगमनप्रायश्चित्तं। पर्व्वसु स्त्रीगमनादिप्रायश्चित्तं। अन्त्यजस्त्रीगमनादिप्रायश्चित्तं। तिर्य्यग्योनिगमनादिप्रायश्चित्तं। व्रात्यप्रायश्चित्तं। परिवेदनादिप्राय-

श्चित्तं । अनाश्रमिलप्रायश्चित्तं । शूद्रयाजनप्रायश्चित्तं । असत्प्रतिग्रहप्रायश्चित्तं । अविक्रेयविक्रयादिप्रायश्चित्तं । निन्दितदेशादिगमनप्रायश्चित्तं । मिथ्याभाषणादिप्रायश्चित्तं । व्रतभङ्गप्रायश्चित्तं । जातिभ्रंशकरप्रायश्चित्तं । सङ्करीकरणादिप्रायश्चित्तं । प्रकीर्णकप्रायश्चित्तं । रहस्यप्रायश्चित्तं । प्राजापत्यादिव्रतविधानं । धेनुमूल्यनिरूपणं । प्रायश्चित्तोत्तरकर्म्मविधानञ्च ।

No. 2762. कृत्यप्रदीपः । Substance, palm-leaf, 13 × 2 inches. Folia, 89. Lines, 4 on a page. Extent, 1,593 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmaśásana, Zillá Nadíyá, Pandit Káliprasanna Vidyáratna. Appearance, decayed. Prose and verse. Incorrect.

Kṛitya-pradípa. A digest of the Smṛiti rules for the performance by householders of domestic and periodical rites and ceremonies. By Keśava Bhaṭṭa.

Beginning. प्रणम्य कमलाकान्तं श्यामसुन्दरविग्रहं ।
बालानां सुखबोधाय कृत्यदीपो विधीयते ॥
तत्रादौ वैशाखकृत्यमाह पद्मपुराणं । तुलामकरमेषेषु प्रातःस्नानं विधीयते । इत्यादि ।

End. अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चान्तु मे सुतं ॥
इति गन्धपुष्पाभ्यां संपूज्य ब्राह्मणान् भोजयित्वा दक्षिणां दद्यादिति । इति ।

Colophon. इति महामहोपाध्यायभट्टश्रीकेशवविरचितकृत्यप्रदीपः समाप्तः । समाप्तोऽयं ग्रन्थः ॥

विषयः । वैशाखस्नानविधिकथनं । तत्र प्रयोगकथनं । (एवं परत्र ।) अक्षयतृतीयाविधिकथनं । यवश्राद्धविधिकथनं । ज्येष्ठकृत्यकथनं । तत्र सावित्रीव्रतविधिकथनं । दशहराविधिकथनं । स्नानयत्राविधिकथनं । आषाढकृत्यकथनं । तत्र नवोदकश्राद्धविधिकथनं । रथयात्राविधिकथनं । चातुर्म्मास्यव्रतारम्भकथनं । हरिशयनविधिकथनं । श्रावणकृत्यनिरूपणं । तत्र मनसापूजाविधिकथनं । भाद्रकृत्यकथनं । तत्र जन्माष्टमीव्रतविधिकथनं । जयन्तीनिरूपणं । पारणकालादिकथनञ्च । पार्श्वपरिवर्त्तनकृत्यकथनं । चतुर्थ्यां चन्द्रदर्शनप्रायश्चित्तकथनं । अघोरचतुर्दशीविधिकथनं । कुक्कुटीव्रतविधिकथनं । दूर्व्वाष्टमीव्रतविधिकथनं । तालनवमीव्रतविधिकथनं । अनन्तव्रतविधिकथनं । अगस्त्यार्घ्यदानविधिकथनञ्च । आश्विनकृत्यनिरूपणं । तत्र अपरपक्षश्राद्धविधिकथनं । मघाश्राद्धविधिः । नवरात्रपूजाविधिकथनं । कोजागरकृत्यनिरूपणं । कार्त्तिककृत्यनिरूपणं । तत्र प्रातःस्नानविधिकथनं । दीपदानविधिकथनं । भूतचतुर्दशीविधिकथनं । दीपान्विताकृत्यनिरूपणं । सुखरात्रिपूजाविधिकथनं । द्यूतप्रतिपद्विधिकथनं ।

स्नानदिनीयाविधिकथनं। विष्णुस्नानविधिकथनं। मार्गशीर्षकृत्यनिरूपणं। नवान्ननिरूपणं। अष्टकाविधिकथनं। पौषकृत्यनिरूपणं। तच्च पूपाष्टकादिविधिकथनं। माघकृत्यनिरूपणं। प्रातःस्नानविधिकथनं। रटन्तीकिधिकथनं। यमतर्पणविधिकथनं। श्रीपञ्चमीविधिकथनं। माघसप्तमीविधिकथनं। विधानसप्तमीविधानकथनं। आरोग्यसप्तमीविधानकथनं। भीष्माष्टमीविधानकथनं। फाल्गुणकृत्यनिरूपणं। शिवरात्रिविधिकथनं। गोविन्दद्वादशीविधिकथनं। दोलयात्राविधिकथनं। चैत्रकृत्यनिरूपणं। तच्च षष्ठाकर्णपूजाविधिकथनं। वारुणीनिरूपणं। अशोकाष्टमीविधिकथनं। श्रीरामनवमीविधिकथनं। मदनचयोदशीविधिकथनं। मदनचतुर्दशीविधिकथनं। जन्मतिथिकृत्यनिरूपणं। विद्यारम्भादिकथनं। यज्ञप्रवेशादिविधिकथनं। सूतिकाषष्ठीपूजाविधानञ्च।

No. 2763. शुद्धिप्रदीपः, वा शुद्धिदीपिका। Substance, palm-leaf, 13½ × 2¼ inches. Folia, 84. Lines, 4 on a page. Extent, 722 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmaśásana, Zillá Nadíyá, Pandit Kálíprasanna Vidyáratna. Appearance, decayed. Prose and verse. Correct.

Suddhi-pradípa. A digest of the Smṛiti rules for mourning and purifications. By Kes'ava Bhaṭṭa.

Contents:—Purification defined. Concremation. Impurity of the person defined. Sapiṇḍa defined. Conjunction of mourning. Impurity resulting from following a corpse, &c. Funeral ceremony. Collection of bones after cremation. Advantages of dying near the Ganges, &c. Mourning for infants, &c. Female impurities. Rules of purification. Persons fit to apply the fire-brand to a funeral pile. Symbolical cremation. Mourning for persons destroyed by accident. Ditto for suicides. Ceremonies to be observed for a suicide before performing his śráddha, &c. Persons fit to perform śráddhas. Advantages of sons in this connexion. Praise of gold. Purification of articles of offering. Observances and ceremonies fit at the time of death.

Beginning. नवीननीरदश्यामं कामदं काममोचनं।

प्रणम्य जानकीकान्तं क्रियते शुद्धिदीपिका॥

तच्च। शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पञ्चदशाहेन मासेनैकेन पादजः। इत्यादि वचनपर्य्यालोचनया वेदबोधित + + + + + + कर्म्मानर्हत्वमित्यादि।

End. ततश्च मुमूर्षुणापि तदशौचमध्ये दानादिकं कर्त्तव्यमिति। इति।

Colophon. इति महामहोपाध्यायभट्टश्रीकेशवविरचितशुद्धिप्रदीपः परिपूर्णः। समाप्तोऽयं ग्रन्थः।

विषयः। तत्रादौ शुद्धिरूपकथनं। सहमरणानुमरणादिविवेचनं। अशौचनिरूपणं। सपिण्डनिरूपणं। अशौचसङ्करकथनं। श्ववानुगमनाशौचादिकथनं। अन्त्येष्टिविधिकथनं। अस्थिसञ्चयविधिकथनं। गङ्गादिमरणफलकथनं। बालाद्यशौचकथनं। स्त्र्यशौचकथनं। शोकविधिकथनं। दाहाधिकारिनिरूपणं। पर्णनरदाहविधिकथनं। आम्रसर्पादिहतानामशौचविध्यादिकथनं। आत्मघाते अशौचाभावकथनं। तत्र नारायणबलिविधानपूर्व्वकं तत्श्राद्धादिकर्त्तव्यतानिरूपणं। श्राद्धाधिकारिनिरूपणं। पुत्रप्रशंसा। स्वर्णप्रशंसा। द्रव्यादिशुद्धिनिरूपणं। मुमूर्षुकृत्यनिरूपणञ्च।

No. 2764. शुद्धिकौमुदी। Substance, country-made paper, 16 × 4 inches. Folia, 48. Lines, 6 on a page. Extent, 936 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmaśásana, Zillá Nadiyá, Pandit Kálíprasanna Vidyáratna. Appearance, new. Prose and verse. Incorrect.

Suddhi-kaumudí. A treatise on mourning and purifications. By Mahes'vara.

The contents are closely similar to those of the work noticed above.

Beginning. ब्रह्मानन्दमयीं नत्वा श्रीमहेश्वरशर्म्मणा।
क्रियते सुखबोधाय रम्येयं शुद्धिकौमुदी॥
अथ सहमरणं तच्चाङ्गिराः।
हृते भर्त्तरि या नारी समारोहेद्धुताशनम्।
सारुन्धतीसमाचारा स्वर्गलोके महीयते॥ इत्यादि।

End. सर्व्वथा समानोदकतानिवृत्तेः। स्नानमात्रमिति स्नात्वा शुद्धान्ति गोत्रजा इत्युक्तेरिति।

Colophon. इति श्रीमहेश्वरकृता शुद्धिकौमुदी समाप्ता।

विषयः। सहानुगमनविधिकथनं। अशौचविधिकथनं। अशौचसङ्करकथनं। सपिण्डतादिनिरूपणं। सपिण्डाद्यशौचनिरूपणं। गर्भस्रावाद्यशौचनिरूपणं। स्त्र्यशौचनिरूपणं। बालाद्यशौचनिरूपणं। विदेशस्थाशौचनिरूपणं। मृत्युविशेषाशौचनिरूपणं। सद्यःशौचविधिकथनं। श्ववानुगमनाद्यशौचनिरूपणं। अन्त्येष्टिविधिकथनं। मुमूर्षुकृत्यनिरूपणं। अस्थिसञ्चयनादिविधिकथनं। पर्णनरदाहविधिकथनं। उदकादिदानविधिकथनं। शोकापनोदनादिविधिकथनं। पिण्डोदकादिदानविधिकथनं। दशोत्सर्गविधानकथनं। प्रेतक्रियाधिकारिनिरूपणं। पुत्रप्रशंसाकथनं। द्रव्यशुद्धिकथनञ्च।

No. 2765. प्रतिष्ठानिर्णयः । Substance, country-made paper, 18 × 4 inches. Folia, 42. Lines, 5 on a page. Extent, 630 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmaśásana, Zillá Nadíyá, Paṇḍit Kálíprasanna Vidyáratna. Appearance, old. Prose and verse. Correct.

Pratiṣṭhá-nirṇaya. A manual of rituals for consecrations of various kinds. By Gaṅgádhara.

Beginning. नमस्कृत्य गणेशानं जगतामेकसाक्षिणम् ।
गङ्गाधरबुधश्चक्रे प्रतिष्ठानिर्णयं महत् ॥
समाहृत्यान्यतन्त्राणि विविच्य च पुनः पुनः ।
सिद्धान्तरत्नं सङ्कृत्य निर्म्मितोऽयं यथाविधि ॥

तत्र प्रतिष्ठाकालमाह, स्कान्दे – इत्यादि ।

End. त्रनन्तं वेदपारगे,—इत्यभिधानात् तत्र तत्र फलाधिक्यमिति ।

Colophon. इति श्रीगङ्गाधरविरचितः प्रतिष्ठानिर्णयः समाप्तः ।

विषयः । प्रतिष्ठाकालादिकथनं । आचार्य्यलक्षणं । प्रासादानां सूचपातादिविधिः । भूमिपरीक्षाविधिकथनं । भूमिशुद्धिविधिः । शुल्वरीत्या दिङ्निर्णयकथनं । वास्तुपूजाविधिकथनं । भूमिखननविधिः । शिलान्यासविधिः । प्रासादारम्भविधिः । तत्र त्रधिवासविधिः । प्रयोगकथनञ्च । सर्व्वदेवप्रतिष्ठाविधिकथनं । कलसारोपणविधिकथनं । वापीकूपतड़ागादिप्रतिष्ठाकालादिकथनं । मण्डपकरणविधिः । कुण्डलक्षणं । वेदिकालक्षणं । मण्डपादौ देवतास्थापनविधिकथनं । द्वारतोरणादिविधिकथनं । खिड़खिकादिविधिकथनं । महास्नानविधिः । चतुर्थीकर्म्मविधिः । ध्वजारोपणविधिकथनं । जीर्णोद्धारविधिकथनं । त्रारामादिप्रतिष्ठाविधिकथनं । दानविधिकथनं । दानमाहात्म्यकीर्त्तनञ्च । (त्रत्र सर्व्वत्र प्रयोगोऽस्तीति ज्ञेयम् ।)

No. 2766. व्यवस्थादर्पणः । Substance, country-made paper, 17 × 5½ inches Folia, 89. Lines, 7 on a page. Extent, 2,405 ślokas. Character, Bengali. Date, Sk. 1703. Place of deposit, Bráhmaṇapura, Zillá Nadíyá, Rájívalochana Gaṅgopádhyáya. Appearance, decayed. Prose and verse. Correct.

Vyavasthá-darpaṇa. *Responsa prudentum* regarding various questions of Smṛiti rules, rites and observances. By Ánanda Śarmá, son of Ráma Śarmá.

Beginning. श्रीरामं पितरं नत्वा श्रीमदानन्दशर्म्मणा ।
क्रियते बालबोधाय व्यवस्थादर्पणः शुभः ॥

End. तच्च तिथिस्वरूपमाह सूर्य्यसिद्धान्तः। अर्कादिनिःसृतः प्राचीं यद्यात्यहरहः शशी। भागैर्द्वादशभिस्तद्वत्तिथिस्यान्नमसं दिनं। इत्यादि।

अत एव तच्च तच्च स्वयमूह्यं सुधीभिरेतत् प्रमाणन्तु स्मृत्युक्ते श्रुत्यदर्पणे द्रष्टव्यमिति।

Colophon. इति श्रीश्रीरामशर्म्मसूनुश्रीमदानन्दशर्म्मविरचितो व्यवस्थादर्पणः समाप्तः। शकाब्दाः १७०३।

विषयः। तिथिस्वरूपकथनं। मासादिलक्षणतद्भेदकथनं। मलमासादिविवेककथनं। सामान्यतिथिव्यवस्थाकथनं। युग्मादितिथिव्यवस्थाकथनं। सर्व्वासु तिथिषु कृत्यकथनं। विशेषेण जन्माष्टमीव्यवस्थादिकथनं। युगाद्यादिनिरूपणं। मन्वन्तरादिनिरूपणं। संक्रान्तिनिरूपणं। अम्बुवाचीनिरूपणं। नवान्ननिरूपणं। कार्त्तिकपूजानिरूपणं। विवाहादिसंस्कारनिरूपणं। अष्टविधविवाहलक्षणं। कन्यादानविधिनिरूपणादिकं। मुमूर्षुकृत्यकथनं। सहमरणानुमरणादिविधिकथनं। अशौचव्यवस्थाकथनं। अशौचान्तद्वितीयदिनकृत्यनिरूपणं। पर्णनरदाहविधिकथनं। दशोत्सर्गविधिकथनं। षोडशश्राद्धविधानं। सपिण्डनादिविधिकथनं। पार्व्वणश्राद्धादिव्यवस्थाकथनं। तीर्थश्राद्धादिविधिकथनं। आमश्राद्धविधिकथनं। अष्टकाश्राद्धादिनिरूपणं। महागुरुनिपाते कर्त्तव्यकर्म्मकथनं। पिण्डदानाधिकारिनिरूपणं। दायविभागप्रकारकथनं। दायानधिकारिनिरूपणं। क्लीवादिलक्षणकथनं। प्रायश्चित्तविधिकथनं। तच्च महापातकानुपातकोपपातकादिषु प्रत्येकं व्यवस्थाकथनं। गोमूत्रादिनिरूपणं। अद्भुतकथनं। अद्भुतशान्तिकथनञ्च।

No. 2767. साधनचन्द्रिका। Substance, country-made paper, 16 × 4½ inches. Folia, 38. Lines, 7 on a page. Extent, 1,525 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇapura, Zillá Nadíyá, Rájívalochana Gaṅgopádhyáya. Appearance, new. Prose and verse. Incorrect.

Sádhana-chandriká. A summary of the duties, rites, fasts and observances of Vaishṇavas. By Keśavendra Svámí.

Beginning. ज्ञानातीतं हरिं नत्वा तस्य भक्तिप्रसिद्धये।
रच्यते केशवेन्द्रेण हरिसाधनचन्द्रिका॥

अथ भक्तिस्वरूपं। सा परानुरक्तिरीश्वरे। अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतं। आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमेति। इत्यादि॥

End. अपि च भगवद्भक्तस्यापि कृपया तल्लभ्यते नान्योपायान्तरेणेति।

Colophon. इति श्रीमत्केशवेन्द्रस्वामिनिर्म्मिता साधनचन्द्रिका समाप्ता।

विषयः। भक्तिस्वरूपकथनं। भगवद्भक्तस्य परमपुरुषार्थत्वनिरूपणं। दीक्षाग्रहणावश्यकता। गुरुलक्षणादिकथनं। अवलिप्तादिगुरुपरित्यागविधिकथनं। शिष्यलक्षणादिकथनं। मन्त्रोद्धार-

कथनं। दीक्षास्वरूपनत्कालादिकथनं। गुरुसेवनविधिकथनं। मन्त्रदानमाहात्म्यादिकथनं। ऊर्द्धपुण्ड्रतिलकादिविधिकथनं। शङ्खचक्रादिचिह्नधारणावश्यकताकथनं। तुलसीमाल्यधारणावश्यकताकीर्त्तनं। श्रीविष्णार्चनमाहात्म्यकीर्त्तनं। शालग्रामशिलार्चनमाहात्म्यकथनं। शालग्रामादिलक्षणकथनं। वैष्णवादिलक्षणकथनं। श्रीमूर्त्तिसेवाप्रकारकथनं। भक्त्याभक्तिनिरूपणं। तुलसीपूजादिकथनं। विहिताविहितपुष्पनिरूपणं। श्रीमद्भागवतमाहात्म्यकीर्त्तनं। भगवत्कथाश्रवणादिमाहात्म्यकथनं। चतुःषष्ट्युपचारेण भगवत्पूजाविधिकथनं। शरणागतिलक्षणं। एकादशीव्रतनित्यताकथनं। उपवासविधिकथनं। तदशक्तौ अनुकल्पविधिकथनं। शुद्धापूर्णादिषु उपवासव्यवस्थाकथनं। द्वादशीकृत्यविधानं। महाद्वादशीनिरूपणं। वसन्तपञ्चमीकृत्यनिरूपणं। शिवरात्रिव्रतविधिकथनं। दोलोत्सवविधिकथनं। हरिसंक्रान्तिद्वादशीविधिकथनं। शयनमहोत्सवविधिकथनं। जन्माष्टमीविधिनिरूपणं। श्रवणद्वादशीविधिकथनं। कार्त्तिकव्रतादिनिरूपणं। तत्र स्नानविधिकथनं। गोवर्द्धनपूजाविधिकथनं। भगवन्नामजपादिविधिकथनं। विष्णोरपराधाः। भगवद्भक्तमाहात्म्यकीर्त्तनञ्च।

No. 2768. समयप्रकाशः। Substance, country-made paper, 18 × 5 inches. Folia, 113. Lines, 6 on a page. Extent, 2,610 ślokas. Character, Bengali. Date, Sk. 1682. Place of deposit, Bráhmaṇapura, Zillá Nadíyá, Rájívalochana Gaṅgopádhyáya. Appearance, old. Prose and verse. Incorrect.

Samaya-prakáśa. On times meet for the performance of religious rites and ceremonies. By Bhaṭṭa Rámachandra Yajva.

Beginning. शिवाशिवपदं नत्वा रामचन्द्रेण यज्वना।
समयप्रकाशनामायं निबन्धोऽयं निबध्यते॥

अथ नित्यखण्डभेदेन कालस्य द्वैविध्येन प्रथमतो नित्यकालमाह,—अनादिरेष भगवान्कालोऽनन्तोऽजरोऽमरः। इत्यादि॥

End. इह लोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत्। इतिखरसात् मरणकालेऽपि तत्सम्बन्धे पुण्यातिशय इति शं।

Colophon. इति भट्टश्रीरामचन्द्रयज्वविरचितसमयप्रकाशः परिसमाप्तः।

विषयः। नित्यखण्डभेदेन कालस्य द्वैविध्यकथनं। सामान्यतः पर्व्वतिथिनिरूपणं। सम्पूर्णाखण्डादितिथिव्यवस्थाकथनं। मासनिरूपणं। अयननिरूपणम्। संवत्सरनिरूपणं। मलमासादिनिरूपणं। विधिविशेषे कृत्यविशेषनिरूपणं। विशेषेण जन्माष्टमीनिरूपणं। एकादश्युपवासनिरूपणं। हरिशयनादिनिरूपणं। नवव्रतादिनिरूपणं। चातुर्मास्यविधिकथनं। शिवरात्रिव्रतनिरूपणं। एकभक्तादिव्रतनिर्णयः। उपाकर्म्मनिरूपणं। नानातिथिसाध्यव्रतनिर्णयः। नवरात्र-

विधिनिर्णयः। कुमारीपूजाविधिः। होलिकोत्सवनिरूपणं। दृष्टिविषये पर्व्वनिरूपणं। प्रकृतिनिरूपणं। विकृतिनिरूपणं। श्राद्धकालनिरूपणं। अपरपक्षश्राद्धनिरूपणं। सपिण्डीकरणादिकालनिरूपणं। प्रेतश्राद्धेषु निषिद्धकालनिरूपणं। अमावस्यानिर्णयः। संक्रान्तिनिर्णयः। ग्रहणकालनिर्णयः। नक्तचोपवासनिर्णयः। आधानकालादिनिर्णयः। दीक्षाकालनिर्णयः। प्रहारम्भकालनिर्णयः। देवप्रतिष्ठाकालादिनिर्णयः। वापीकूपतड़ागादिप्रतिष्ठाकालनिरूपणं। गर्भाधानपुंसवनादिकालनिरूपणं। अभ्यङ्गकालादिनिरूपणं। स्नानादिकालनिरूपणं। गङ्गामाहात्म्यकीर्त्तनं।

No. 2769. वैष्णवसिद्धान्ततत्त्वं। Substance, country-made paper, 16 × 5 inches. Folia, 42. Lines, 6 on a page. Extent, 752 ślokas. Character, Bengali, Date, ? Place of deposit, Bráhmaṇapura, Zillá Nadíyá, Rájívalochana Gaṅgopádhyáya. Appearance, new. Prose and verse. Incorrect.

Vaishṇava-siddhánta-tattva. On the philosophy of Vaishṇava duties, and the supreme divinity of Krishṇa. Anonymous.

Beginning. नत्वा कृष्णपदद्वन्द्वमरविन्दं भवच्छिदं।
तत्त्वं वैष्णवसिद्धान्ते क्रियते परमादरात्॥
श्रीमुकुन्दपदद्वन्द्वं कन्दमानन्दसन्ततेः।
तनोतु मयि कारुण्यं स्वमात्रैकगतैः सकृत्॥

तत्र। ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः। अनादिरादिर्गोविन्दः सर्व्वकारणकारणम्। इत्यादि।

End. अत एव भक्तेरेव सर्व्वत्र प्राधान्यश्रवणात् सात्वतैः सैव सेवनीयेति शम्।

Colophon. इति श्रीमद्वैष्णवसिद्धान्ततत्त्वं समाप्तम्।

विषयः। भगवान् नन्दनन्दन एव परब्रह्मपदवाच्य इतिनिरूपणं। भक्तिलक्षणं। प्रेमलक्षणं। भावलक्षणं। रागलक्षणं। अनुरागलक्षणं। पूर्व्वरागलक्षणं। समर्थाया रतेर्वैलक्षण्यलक्षणं। निसर्गस्वरूपप्रकाशनं। समञ्जसारतिस्वरूपादिकथनं। समर्थारतिस्वरूपकथनं। कामानुगास्वरूपकथनं। साधकरूपतटस्थरूपभेदकथनं। भगवल्लीलानिरूपणं। रागमार्गस्य शुद्धतानिरूपणं। साधनचतुष्टयनिरूपणं। अवकरभेदनिरूपणं। भगवल्लीलाया नित्यत्वकथनं। श्रीकृष्णस्य सर्व्वोत्कर्षकथनं। भक्तलक्षणादिकथनं। भक्तिमाहात्म्यकीर्त्तनञ्च।

No. 2770. सेतुः। Substance, palm-leaf, 16 × 2 inches. Folia, 158. Lines, 5 on a page. Extent, 4,337 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇapura, Zillá Nadíyá, Rájívalochana Gaṅgopádhyáya. Appearance, old. Prose and verse. Correct.

Setu. A commentary on the Addhyátma-rámáyaṇa section of the Brahmáṇḍa Puráṇa. By Ráma Varmá, son of Himmat Varmá.

Beginning. विसेनवंशजलधौ पूर्णः शीतकरोऽपरः।
पूजाह्लादकरो विष्णुभूषणः कौस्तुभोऽपरः॥
नाम्ना हिम्मतिवर्म्माऽभूद्वैर्य्येण हिमवानिव।
रूपेण जितकन्दर्पः क्षमायां क्षमया समः॥
— — — — — — — —।
तस्माज्जातो रामदत्तश्चन्द्राच्चन्द्र इवापरः।
मित्राणाञ्च रिपूणाञ्च मानदः प्रथितः प्रभुः।
— — — — — — —।
तेन श्रीरामभक्तेन सर्व्वविद्याप्रजानता।
— — — — — — —।
भट्टनागेशशिष्येण बध्यते रामवर्म्मणा।
प्रणम्य जानकीजानिं रामं कामातिसुन्दरं।
चापबाणधरं देवं मायामानुषविग्रहं॥
सेतुः परोपकृतयेऽध्यात्मरामायणाम्बुधौ।
सुश्लोकमणिभिः श्लक्ष्णैः प्रीयतां तेन राघवः॥

अथ श्रीमता वाल्मीकिना लोकोद्धाराय कृते रामचरित्रवर्णने — — — — व्यवहरतो भगवतो लीलावतारस्य स्वरूपं गुप्तमेव। तदेतत्परमदयालुर्भगवान् साक्षाद्वेदव्यासो लोकानां स्फुटं बोधयितुं नारदब्रह्मसम्वादरूपेण ब्रह्माण्डपुराणे अध्यात्मरामायणाख्यां संहितां चक्रे।—इत्यादि।

End. श्रोतुः लेखयितुश्च अतिप्रसन्नः सन् सदा समीपे स्थितो भूत्वा प्रियमातनोत्यन्वयः।

Colophon. इति श्रीमत्सकलराजविपदुद्धारणसमर्थेत्यादिविरुदावलीविराजमानस्य हिम्मतिवर्म्मणः पुत्रस्य श्रीरामवर्म्मणः कृतौ अध्यात्मरामायणस्य सेतौ उत्तरकाण्डे नवमः सर्गः।

विषयः। ब्रह्माण्डपुरावीयाध्यात्मरामायणस्य व्याख्यानम्।

No. 2771. व्रतपञ्जी। Substance, country-made paper, 18 × 5 inches. Folia, 58. Lines, 6 on a page. Extent, 1,047 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇapura, Zilla Nadiyá, Rájivalochana Gaṅgopádhyáya. Appearance, decayed. Prose and verse. Correct.

Vrata-panjí. A calendar of optional fasts and observances. By Navarája, of the Droṇa family.

Beginning. द्रोणवंशसमुत्पन्नो देवसिंहतनूद्भवः ।
धर्म्मकर्म्मरतः श्रीमान् नवराजो विराजते ॥
श्रीमता नवराजेन सर्व्वपापप्रणाशनी ।
क्रियते व्रतपञ्जीयं कलौ गङ्गेव निर्म्मला ॥
तत्रादौ व्रतानुष्ठानं । देवलः ।
अभुक्त्वा प्रातराहारं स्नात्वा चैव समाहितः ।
सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥ इत्यादि ।

End. जानन्तु विष्णुदैवत्यं यदनुक्तं विशेषतः ।
इतिखरसात् सर्व्वत्रैवानुक्तदेवतायां विष्णुरेव देवतेति शम् ।

Colophon. इति द्रोणवंशसमुद्भवश्रीनवराजविरचिता व्रतपञ्जी समाप्ता ।

विषयः । व्रतानुष्ठानविधिकथनं । व्रतलक्षणादिकथनं । व्रतलोपे निन्दाकथनं । व्रतग्रहण-प्रतिष्ठादिकालनिरूपणं । व्रतिनो नियमादिकथनं । नित्यकाम्यादिव्रतभेदकथनं । उपवासविधि-कथनं । पारणविधिकथनं । अनुकल्पविधिकथनं । प्रतिनिधिनिरूपणं । तिथिविशेषे व्रतविशेष-विधिकथनं । प्रतिपदादिपञ्चदशतिथिषु प्रत्येकं व्रतविशेषकथनं । तत्र एकादशीजन्माष्टमीशिव-रात्रिव्रतेषु विशेषनिरूपणं । मासव्रतनिरूपणं । नक्षत्रव्रतनिरूपणं । योगव्रतनिरूपणं । वारव्रत-निरूपणं । संक्रान्तिव्रतनिरूपणं । ऋतुव्रतनिरूपणं । अयनव्रतनिरूपणं । वार्षिकादिव्रतनिरूपणं । द्रव्यदेवतानिरूपणञ्च ।

No. 2772. सम्बन्धगणपतिः । Substance, country-made paper, 18 × 4½ inches. Folia, 24. Lines, 5 on a page. Extent, 316 ślokas. Character, Bengali, Date, ? Place of deposit, Bráhmaṇapura, Zilla Nadíyá, Rájívalochana Gaṅgopádhyáya. Appearance, decayed. Prose and verse. Incorrect.

Sambandha-gaṇapati. On auspicious times for marriage. By Rávaṇa Gaṇapati, son of Hariśaṅkara Súri.

Beginning. श्रीमत्या कल्पवल्ल्येव हैमवत्या निरत्ययः ।
जयन्त्यालिङ्गितः कल्पद्रुमः सत्फलदः शिवः ॥
प्रणम्य पितरौ भक्त्या बालानां बोधहेतवे ।
तनोति परया युक्त्या सम्बन्धेषु विनिर्णयम् ॥
तत्र आश्वलायनः । उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूड़ोपनयगोदानविवाहाः इत्यादि ।

End. श्रीरामदासजनुषो हरिशङ्करस्य
श्रीरावणस्य तनयो विनयोपपन्नः ।
सम्बन्धपूर्व्वगणपत्यभिधं विधत्ते
ग्रन्थं बुधो गणपतिर्गणितागमज्ञः ॥

Colophon. इति श्रीमदग्निहोचिचातुर्मास्ययज्ञसमासादितसकलपुरुषार्थदेवयज्ञवर्य्यरावण-हरिशङ्करहरिस्नुरावणगणपतिकृतौ सम्बन्धगणपतिः परिपूर्णः ॥

विषयः । विवाहस्य शुभकालादिनिरूपणं। तच कालाशुद्धिविवेचनं। विवाहतिथिनिरूपणं। वारनियमादिकथनं। नक्षत्रनिरूपणं। वर्णकथनं। गणकथनं। राजयोटकादिकथनं। द्विर्द्वादशादिकथनं। षड्दष्टकादिकथनं। युतवेधयामित्रवेधादिकथनं। सप्तशलाकाकथनं। विवाहलग्नादिनिरूपणं। कन्यालक्षणादिकथनं। वरलक्षणादिकथनं। विवाहयोग्यकन्यानिरूपणं। सापिण्ड्यनिरूपणं। कन्यादानाधिकारिणः। ब्राह्मादिविवाहभेदकथनं। अनाश्रमस्थितिनिन्दाकीर्त्तनञ्च ।

No. 2773. प्रयोगदर्पणः । Substance, country-made paper, 18 × 4 inches. Folia, 102. Lines, 6 on a page. Extent, 1,856 ślokas. Character, Bengali. Date, ? Place of deposit, Brahmasásana, Zillá Nadíyá, Paṇḍit Kálíprasanna Vidyáratna. Appearance, decayed. Prose and verse. Correct.

Prayoga-darpaṇa. Rituals for the daily religious duties of householders. By Ramánátha Vidyáváchaspati.

Beginning. प्रणम्य परमात्मानं सच्चिदानन्दमव्ययम् ।
प्रयोगदर्पणं रम्यमाङ्किकेषु विरच्यते ॥

अथ सर्व्वत्र प्रायः प्रमाणकदम्बमाचगुम्फनतया प्रयोगतत्त्वजिज्ञासूनामुपकाराय मयाऽयमारभ्यते । तत्र प्रातःकृत्यमाह हेमाद्रिधृतस्कन्दपुराणीयं इत्यादि

End. अनेनैव प्रकारेण पञ्चायतनी पूजापि ज्ञेयेति शम् ।

Colophon. इति महोपाध्यायश्रीयुतरमानाथविद्यावाचस्पतिविरचितप्रयोगदर्पणः समाप्तः।

विषयः । प्रातःकृत्यप्रयोगकथनं । दन्तकाष्ठप्रयोगकथनं । प्रातःस्नानसन्ध्यादिविधिप्रयोगकथनं । वेदाभ्यासप्रयोगकथनं । कुशग्रहणादिप्रयोगकथनं । देवपूजासामान्यप्रयोगः । विष्णुपूजाप्रयोगः । शिवपूजाप्रयोगः । दुर्गापूजाप्रयोगः । एवं गणेशसूर्य्यादिपूजाप्रयोगकथनं। मध्याह्नसन्ध्याप्रयोगकथनं ॥ तर्पणप्रयोगकथनं । वैश्वदेवादिप्रयोगः । नित्यश्राद्धप्रयोगः । आतिथ्यप्रयोगः । भोजनप्रयोगः । आपोशानादिप्रयोगः । सायंसन्ध्याप्रयोगः । रात्रिकृत्यप्रयोगः । विविधदानप्रयोगः । पञ्चायतनपूजादिप्रयोगकथनञ्च ।

No. 2774. व्यवहारदर्पणम्। Substance, country-made paper, 16 × 5 inches. Folia, 61. Lines, 6 on a page. Extent, 1,112 ślokas. Character, Bengali. Date, Sk. 1648. Place of deposit, Háñsapukura-grám, Post Kálná, Zillá Varddhamána, Dvárakánátha Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Correct.

Vyavahára-darpaṇa. A digest of the Smṛiti laws regarding jurisprudence and judicature. By Rámakṛishṇa Bhaṭṭa.

Beginning. प्रणम्य परमात्मानं सच्चिदानन्दविग्रहं।
क्रियते रामकृष्णेन व्यवहारेषु दर्पणः॥
तत्र राजधर्म्ममाह मनुः।
राजधर्म्मान् प्रवक्ष्यामि यथा वृत्तो भवेन्नृपः
सम्भवश्च यथा तस्य सिद्धिश्च परमा मता॥
अराजके + लोकेऽस्मिन् सर्व्वतो विद्रुते भयात्। इत्यादि।

End. पूर्व्वोत्तरक्रियायुक्तं निर्णयाङ्कं तदा ह्यपः।
प्रदद्यात् जयिने लेख्यं जयपत्रं तदुच्यते॥

Colophon. इति वहस्पत्युक्तेरिति शम्।
इति महामहोपाध्यायभट्टश्रीरामकृष्णविरचितं व्यवहारदर्पणं परिपूर्णं।

विषयः। राजधर्म्मकथनं। राजकार्य्यनिरूपणं। सभासन्निरूपणं। सभ्यानांफलश्रुतिकथनं। तदुपदेशकथनं। धर्म्मशास्त्रार्थशास्त्रादिविरोधे मीमांसाकथनं। शिष्टाचारस्य प्रामाण्यकथनं। महाजनलक्षणं। व्यवहारस्वरूपनिरूपणं। व्यवहारकालनिरूपणं। व्यवहारस्य चतुश्चरणत्वकथनं। तत्र भाषापादकथनं। भाषापत्रलेखनविधिकथनं। प्रतिज्ञापत्रादिनियमकथनं। उत्तरपादनिरूपणं। विचारकारणकथनं। मिथ्योत्तरादिस्वरूपकथनं। प्रत्यवस्कन्दनविधिकथनं। उत्तरशङ्करविधिकथनं। प्राङ्न्यायोत्तरविधिकथनं। चीनवादिलक्षणं। उत्तराभासनिरूपणं। सन्धिनिरूपणं। साक्ष्यक्रियानिरूपणं। साक्षिलक्षणादिकथनं। साक्षिभेदलक्षणादिकथनं। साक्ष्यदानविधिकथनं। साक्ष्यानर्हनिरूपणं। स्वयमुक्तिनिरूपणं। स्मृत्यन्तरविवेचनम्। साक्षिद्वैधनिरूपणं। साक्ष्यदानफलादिकथनं। लिखितविधिकथनं। राजशासनविधिकथनं। लेखनविधिकथनं। सदोषलेख्यनिरूपणं। उपाधिनिरूपणं। सन्दिग्धलेख्यशुद्धिकथनं। लेख्यसत्त्वे दिव्यादिनिषेधकथनं। लेख्यकालनिरूपणं। भुक्तिनिरूपणं। जयपत्रविधिकथनञ्च।

No. 2775. गङ्गाभक्तितरङ्गिणी। Substance, country-made paper, 18 × 5 inches. Folia, 112. Lines, 6 on a page. Extent, 1,736 ślokas. Character, Bengali. Date, Sk. 1632. Place of deposit, Háñsapukura-grám, Post Kálná, Zillá, Varddhamána, Dvárakánátha Bhaṭṭáchárya. Appearance, old. Prose and verse. Correct.

Gaṅgá-bhakti-taraṅgiṇí. The religious merits of the Ganges; the sacred spots on its banks from its rise on the Himálayá to its confluence with the sea; religious rites and ceremonies to be observed at each of those spots; and the merits thereof. By Chaturbhuja Áchárya. This work is quite distinct from one of the same name noticed under No. 1867 (vol. V. p. 182), though treating of the same subject.

Beginning. नत्वा भगवतीं गङ्गां गङ्गाभक्तितरङ्गिणीं।
श्रीमच्चतुर्भुजाचार्य्यस्तनोति बुधतुष्टये ॥

तत्र यमः। यदा भक्तिश्च काम्यानां दृष्टिक्षेमकरे हि ते। इत्यनेन सर्व्वत्रैव कर्म्मणि भक्तिश्रद्धयोरावश्यकत्वमुक्तं। इत्यादि।

End. तावत्कालं वसेत् स्वर्गे यावदाभूतसंप्लवं। इत्युक्तेरिति।

Colophon. इति महोपाध्यायश्रीयुतचतुर्भुजाचार्य्यविरचिता गङ्गाभक्तितरङ्गिणी समाप्ता।

विषयः। सर्व्वस्मिन् कर्म्मणि भक्तिश्रद्धयोरावश्यकत्वकथनं। गङ्गामाहात्म्यकीर्त्तनं। गङ्गानामस्मरणकीर्त्तनादिमाहात्म्यकथनं। तीर्थयात्राविधिकथनं। यात्रापूर्व्वदिने केशवपनादिकर्त्तव्यताकथनं। श्राद्धविधानादिकथनं। गङ्गास्नानमाहात्म्यकथनं। दर्शनमाहात्म्यकथनं। स्पर्शननमस्कारादिमाहात्म्यकथनं। गङ्गागर्भनिरूपणं। अवगाहनादिविधिकथनं। गङ्गापूजाविधिकथनं। तत्र पूजाकालादिनिरूपणं। पुण्यकालस्नानविधिकथनं। तिथिविशेषे स्नानमाहात्म्यकथनं। युगाद्यास्नानविधिकथनं। विविधयोगदशहरादिस्नानविधिकथनं। संक्रान्तिग्रहणादौ स्नानविधिकथनं। तर्पणविधिकथनं। मृत्तिकाविधिकथनं। पार्थिवशिवपूजाविधिकथनं। गङ्गातीरे दानादिमाहात्म्यकीर्त्तनं। [redacted]कथनं। दशहरागङ्गापूजाविधिकथनं। गङ्गाजलपानमाहात्म्यकीर्त्तनं। गङ्गायां देह[redacted]र्त्तनं। गङ्गासागरमाहात्म्यकीर्त्तनं। प्रयागमाहात्म्यकीर्त्तनं। तत्र मुण्डनादिविधि[redacted]रद्वारमाहात्म्यकीर्त्तनञ्च।

No. 2776. मन्त्रवल्लरी। Substance, country-made paper, 19 × 6 inches. Folia, 208. Lines, 7 on a page. Extent. 4,347 ślokas. Character, Bengali, Date, ? Place of deposit, Háñsapukura-grám, Post Kálná, Zillá, Varddhamána, Dvárakánátha Bhaṭṭáchárya. Appearance, decayed. Prose. Incorrect.

Mantra-vallarí. A commentary on the Mantra-mahodadhi of Mahidhara. By Gaṅgádhara, son of Sadáśiva Súri, and grandson of Vireśvara Bhaṭṭa Agnihotri. *cf.* Nos. 1256 (III, p. 246), 1713 and 1714 (IV, pp. 295, 296) for the text and other commentaries.

Beginning. नमस्कृत्य शिवं शान्तं पद्माकारं गुरोः पदं।
भवानीं विघ्ननाशञ्च दण्डपाणिञ्च भैरवं ॥

सदाशिवतनूजन्मा वत्सर्षिकुलसम्भवः ।
गङ्गाधर इति ख्यातो भगवद्भक्तकिङ्करः ॥
शास्त्रसारं समालोच्य बुधानां तोषहेतवे ।
सिद्धान्तोक्तिपलाशाढ्यां मीमांसाकुसुमाञ्चितां ॥
अपवर्गफलां रम्यां भगवत्पादलम्पटां ।
उक्तियुक्तिविशेषेण कुर्व्वेऽहं मन्त्रवल्लरीं ॥

अथ साधकानां हितचिकीर्षुर्भगवान् महीधराचार्य्यः निर्व्यूढप्रारिप्सितपरिसमाप्तये शिष्टाचारपरिपालनाय च ग्रन्थारम्भे समुचितेष्टदेवतां नमस्करोति ।

प्रणम्य लक्ष्मीन्दुहरिं महागणपतिं गुरुं ।
तन्त्राण्यनेकान्यालोक्य वच्मि मन्त्रमहोदधिं ॥ इत्यादि ।

End. अनेन गोपालसुन्दर्य्याः पूजनेन ब्रह्मसायुज्यमपि लभ्यत इति सूचितं ।

चित्तालवालसम्भूता विवेकोदकसेचनैः ।
सतां तुष्टैव सदा भूया ममेयं मन्त्रवल्लरी ॥

Colophon. इति श्रीमन्महायुकरोपनामकवीरेश्वरभट्टाग्निहोत्रिसूरिसूनुसदाशिवभट्टात्मजभगवद्भक्तकिङ्करगङ्गाधरविरचितायां मन्त्रवल्लर्य्यां मन्त्रमहोदधिटीकायां द्वाविंशस्तरङ्गः । समाप्तश्चायं ग्रन्थः ।

विषयः । महीधरकृतमन्त्रमहोदधिनामकमन्त्रशास्त्रस्य व्याख्यानम् ।

No. 2777. सुबोधिनी । Substance, country-made paper. 18 × 5 inches. Folia, 202. Lines, 7 on a page. Extent, 4,202 ślok[illegible]acter, Bengali. Date, ? Place of deposit, Háñsapukura-grám[illegible]lná, Zillá, Varddhamána, Dvárakánátha Bhaṭṭáchárya. Appearance, old. [illegible]ese. Incorrect.

Subodhiní. A commentary on the Bhaṭṭi-kávya. By Rámachandra Váchaspati. *cf.* Nos. 1636 and 1637, vol. IV, p. 209.

Beginning. पातु नो चण्डिकाचण्डकोदण्डखण्डनिःखना ।
दुरितौघतमस्काण्डखण्डनैकान्तपण्डिता ॥
नमामि यामिनीकान्तकान्तभालस्थलं विभुं ।
विभूतिभूषिताङ्गञ्च व्योमकेशं सदाशिवं ॥
व्याख्यानानि च शास्त्रज्ञैः कृतानि बहुशो यदि ।
तथापि क्रियते भट्टौ टीका सुबोधनी मया ॥

अथ तत्र-भगवान् महाकविर्भट्टिनामा कश्चिद्ब्राह्मणः महाकाव्यगुम्फनव्याजेन सर्व्वेषां व्याकरणप्रक्रियाणामुदाहरणानि दिदर्शयिषुः वस्तुनिर्देशपूर्व्वकं ग्रन्थारम्भं प्रतिजानीते । अभू-

दिति। दशरथ इत्युदाहृतः दशरथेतिनाम्ना नितरां ख्यातिमापन्नः नृपः अभूत् आसीत्। यद्यपि परोक्षे लिट्। इति सूत्रेण लिटा भवितव्यमित्यादि।

End. अनेन च श्रीधरसेनवृषभपतेर्लब्धप्रसादेन कविना तत्पुर्य्यां वल्लभ्यामेव काव्यमिदं विरचितमिति सूचितं।

Colophon. इति श्रीरामचन्द्रवाचस्पतिविरचितायां सुबोधिन्यां भट्टिटीकायां द्वाविंशतितमः सर्गः। समाप्तोऽयं ग्रन्थः।

विषय.। भट्टिकाव्यस्य व्याख्यानम्।

No. 2778. सुबोधिनी। Substance, country-made paper, 14 × 4½ inches. Folia, 19. Lines, 6 on a page. Extent, 413 ślokas. Character, Bengali. Date, ? Place of deposit, Bráhmaṇapura, Zillá, Nadíyá, Rájívalochana Gaṅgopádhyáya. Appearance, new. Prose. Incorrect.

Subodhiní. A commentary on the *Rámagitá* section of the Adhyátma-rámáyaṇa. By Apyájí Bhaṭṭa. *cf.* No. 555 of Vol. II, p. 20.

Beginning. यतो जातं जगत् सर्व्वं येन जीवन्ति जन्तवः।
विशन्ति यच्च तन्नित्यं ज्योतिर्मेयं नमामि तम्॥
अप्पाजीभट्टमेधावी वसन् वीरपुराभिधे।
भोलानन्देन गुरुणा प्रेरितस्तस्य वै मुदे॥
विदधाति रामगीतायास्तनोति च विबोधिनीं।
मुदे विद्वच्चकोराणां चन्द्रिकां सुविबोधिनीं॥
श्रीमद्भादेव उवाच।

ततो जगन्मङ्गलेति। अथ सकरुणो भगवान् मद्भादेवः रामलक्ष्मणसंवादव्याजेन परतत्त्वमुपदेष्टुमाह, तत इति। जगतां स्थावरजङ्गमात्मकानां यानि मङ्गलानि विविधदुःखनिवृत्तिपूर्व्वकमभ्युदयाः। इत्यादि।

End. वेदान्तैरुपनिषद्वाक्यैर्वेद्यं चरणं जगज्जन्मादिविलक्षणं कर्म्म यस्येति।
अतनोद्रामगीतोपनिषद्बोधसुबोधिनीं॥
अप्पाजीभट्टः प्रीयतां ज्ञानानन्दोऽनया गुरुः।

Colophon. इति श्रीरामगीताटीकायामप्पाजीभट्टविरचितायां सुबोधिन्यां पञ्चमप्रकरणम्।

विषयः। अध्यात्मरामायणान्तर्गतरामगीताया व्याख्यानम्।

No 2779. उपासकदशकविवरणं। Substance, country-made paper, 11 × 4½ inches. Folia, 30. Lines, 12 on a page. Extent, 810 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Upásaka-daśaka-vivaraṇa. A commentary on the Jain work called Upásakadśa. Anonymous.

Beginning. श्रीवर्द्धमानमानम्य व्याख्या काचिद्विधीयते।
उपाशकदशादीनां प्रायो ग्रन्थान्तरेक्षिता॥
तत्रोपासकदशाः। सप्तमभङ्गमिह — — — — चायमभिधानार्थः उपासकादीनां श्रमणोपासकानां सम्बन्धिनोऽनुष्ठानस्य प्रतिपादिका। इत्यादि।

End. व्याख्यानमुपयुक्तेन निरूप्यावसेयमिति।
सर्व्वस्यापि स्वकीयं वचनमभिहितं प्रायसः स्याज्जनस्य
ये तु स्वस्यापि सर्व्वग्रहविक्षिप्तरुचिः स्यात् कथं तत् परेषां।
चित्तोल्लासात् कुतश्चित् तदपि निगदितं किञ्चिदेवं मयैवं
दुक्तं यच्चाच तस्य ग्रहममलधियः कुर्व्वतां प्रीतये मे॥ (१)॥
समाप्तमुपासकदशकविवरणम्।

विषयः। उपासकदशकाभिधानजैनधर्म्मप्रकरणस्य व्याख्यानम्।

No. 2780. गुणमाला, व्याख्यासहिता। Substance, country-made paper, 12 × 6 inches. Folia, 72. Lines, 11 on a page. Extent, 2,210 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit and Prákṛit.

Guṇamálá. Detailed descriptions of the characteristics of Jinas, Siddhas, Śrávakas and other orders of the Jain sect. Anonymous.

Beginning. प्रत्यक्षीकृत्य शुक्लाविव शुचिरुचिरं मौक्तिकं येन लोके
मध्ये लोकं समस्तैर्वसुभिरुपचितो दर्शितस्वारहद्भ्यः।
नित्ये भव्याध्वनीनावलिरहतपदं येन वाङ्माचतेऽपि
स श्रीसिद्धार्थसूनुस्त्रिजगदधिपतिर्मानसं मे पुनातु॥
स सिद्धार्थसूनुः सिद्धार्थराजपुत्रः त्रिजगदधिपतिः त्रिभुवननायकः मे मम मानसं चित्तं पुनातु पवित्रीकरोतु। इत्यादि।

End. परेषामिङ्गितैः चेष्टाभिश्च तन्मनोगतभावान् जानानीति।

Colophon. इति गुणमाला समाप्ता।

विषयः। तच्च जिनानां प्रातिहार्याष्टकयुक्तत्वेन चतुर्विधमूलातिशयभूषितत्वेन च द्वादशगुणा इति निरूपणं। किञ्च अशोकवृक्षः, सुरपुष्पवृष्टिः, दिव्यध्वनिः, चामरं, आसनं, भामण्डलं, दुन्दुभिः, आतपत्रञ्चेति प्रातिहार्याणि। अथ मूलातिशया-ज्ञानातिशयः, पूजातिशयः, वागतिशयः, अपायापगमातिशयाश्चेति। तच्च तावद्भगवन्तो मातुर्भगता अपि ज्ञानत्रययुक्ता नियमतो भवन्ति। अथ गार्हस्थ्यानन्तरं प्रव्रज्याग्रहणे मनःपर्य्यायज्ञानमपि नियमत उत्पद्यते। तदनन्तरं जिनपदप्राप्तौ केवलज्ञानमुत्पद्यते। तच्च सञ्जाते केवलज्ञाने पूर्व्वोक्तानि चत्वार्य्यपि ज्ञानानि विनीयन्ते। केवलज्ञानञ्च परमात्मनः स्वरूपमेव, तच्च लोकालोकप्रकाशकमितिज्ञानातिशयत्वेन व्यपदिष्टं अथ पूजातिशयः। स च एवं,—भगवतो हि शरीरं निरामयं सर्व्वसुरासुरनरेभ्योऽपि उत्कृष्टतमं गन्धाधस्तात् नाभिं यावत् अष्टाधिकसहस्रलक्षणोपेतं स्वेदमलरहितं भवति। उच्छ्वासनिःश्वासाभ्याञ्च सुगन्धिरनुभूयते। आहारविहारविसर्गाश्च लौकैरदृश्या एव। अतः भगवतः सर्व्वपूज्यत्वेन पूजातिशयः। अथ वागतिशयः, तच्च पञ्चत्रिंशद्गुणविशेषा भवन्ति। क्रमेण यथा,—(१), जिनानां वाणी अर्द्धमागधी भाषा मय्यपि संस्कारोपेता, अत एव प्रथमतः संस्कारवत्त्वमेव गुणः। (२), उदात्तस्वरयुक्तत्वं। (३), ग्राम्यताहीनत्वं। (४), गम्भीरत्वं। (५), प्रतिशब्दोपेतत्वं। (६), दक्षिणत्वं सरलता। (७), उपनीतरागत्वं (८), परिपुष्टार्थत्वं। (९), अव्याहतपौर्व्वापर्य्यत्वं (पूर्व्वापरवाक्याविरोधः)। (१०), शिष्टत्वं। (११), असन्दिग्धत्वं। (१२), अपाकृतान्योत्तरत्वं। (१३), हृदयग्राहित्वं। (१४), प्रस्तावौचित्यं। (१५), तत्त्वानुरूपत्वं (विवक्षितवस्त्वनुसारिता)। (१६), अप्रकीर्णप्रसृतत्वं (सम्बन्धाधिकारपरिमितता)। (१७), अन्योन्यपरिगृहीतत्वं (पदानां वाक्यानाञ्च परस्परं सापेक्षता)। (१८), अभिजातत्वं (तत्त्वं यथा विवक्षितं तथैव कथनशीलता)। (१९), अतिस्निग्धमधुरत्वं। (२०), अपरमर्म्मवेधित्वं (परमर्म्माद्यनुद्घाटनशीलता)। (२१), अर्थधर्म्माभ्यासानपेतत्वं। (२२), उदारत्वं। (२३), अस्वश्लाघान्यनिन्दता (परनिन्दया आत्मोत्कर्षेण च विहीनत्वं। (२४), अपगतस्नाद्यत्वं। (२५), अपनीतदोषत्वं (कारककालवचनादिव्यत्ययरूपवचनदोषापेतता)। (२६), चित्रकृत्त्वं (श्रोतृषु स्वविषयाद्भुतविस्मयकारिता)। (२७), अद्भुतत्वं। (२८), अनतिविलम्बित्वं। (२९), विभ्रमादिवियुक्तता। (३०), अनेकजातिवैचित्र्य (सुरासुरनरतिर्य्यग्भाषानुयायिता। (३१), आहितविशेषत्वं। (३२), साकारत्वं (विविक्तपदवाक्यता)। (३३), सत्त्वप्रधानत्वं (ओजस्विता)। (३४), अपरखेदत्वं (अप्रयासिता)। (३५), प्रमेयता चेति। अथ अपायागमातिशयः,—भगवतामुपदेशदानकाले परस्परं विरोधिनामपि सुरासुरनरतिर्य्यग्गतानां सङ्कीर्णतायाशातेन उपद्रवनाश इति ज्ञेयः। अथ अन्यच निर्दिष्टानां धर्म्मचक्रचलनधर्म्मध्वजचलनादिरूपचतुस्त्रिंशद्विधानामतिशयानामत्रैवान्तर्भाव इति निरूपणं।

अथ सिद्धानां परमात्मपदगतानाम् अष्टविधगुणयुक्तत्वकथनं। ते च गुणा, यथा,—अनन्तज्ञानत्वं, अनन्तदर्शनत्वं, अव्याबाधनत्वं सम्यक्त्वं, अव्ययत्वं, अरूपित्वं, अगुरुलघुत्वं, अनन्तवी-

ष्यलक्षेति। नच तीर्थङ्करा अपि सर्व्वदा सिद्धस्वरूपमालम्ब्यैव तिष्ठन्ति। तेन प्रव्रज्यावसरे नमः सिद्धेभ्य इति पठ्यते। किञ्च मालकापाठेऽपि ॐनमः सिद्धमिति। सिद्धानां हि स्वावगाहनया स्वसत्तया च सर्व्वेषां भिन्नत्वेऽपि स्वरूपेणैक्यं तेन सिद्धमित्येकवचनं। अनेनैवाभ्रायेन लोके एक एव परमेश्वर इति व्यपदेशः। अथ सर्व्वोऽप्यात्मा निश्चयनयतः परमेश्वर एव। सङ्ग्रहनयेन स च एक एव। अपि च सोऽयं मायाव्यपदेशेन व्यवहारमाश्रित्य गत्यागतिरूपं संसारं करोति। अत एव शब्दनयेन परमेश्वरो जगत्सृष्टिकर्त्तेति व्यपदिश्यते। अत्र हि मिथ्यादृशां मोहादनुभूयसी भ्रान्तिरस्ति, सम्यग्दृष्टीनान्तु विवेकेन न कोऽप्यस्मिन् विषये सन्देह इति निरूपणं।

अथ आचार्य्याणां षट्त्रिंशल्लक्षणगुणयुक्तत्वकथनं। ते च गुणाः क्रमेण यथा,—(१) आर्य्यदेशोत्पन्नत्वं (गुणमालाया विवरणम्।) (१), आर्य्यकुलोत्पन्नत्वं। (२), शुद्धजातित्वं। (३), रूपवत्त्वं। (४), दृढ़संहननत्वं (बलवत्त्वं। (५) धैर्य्यवत्त्वं। (६), अनाशंसित्वं। (७), अविकत्थनत्वं। (८), अमायित्वं। (९), स्थिरपरिवा(पा)टीकत्वं। ( ) (१०), गृहीतवाक्यत्वं। (११) जितपरिषत्त्वं। (१२), जितनिद्रत्वं। (१३), मध्यस्थत्वं। (१४), देशज्ञत्वं। (१५), कालज्ञत्वं। (१६), भावज्ञत्वं। (१७), आसन्नलब्धप्रतिभत्वं। (१८), नानाविधदेशभाषाज्ञत्वं। (१९). पञ्चविधाचारयुक्तत्वं। (मति-श्रुत-अवधि-मनःपर्य्याय-केवलाभिधेषु—पञ्चसु ज्ञानेषु निष्णातत्वं)। (२०), दर्शनाचारयुक्तत्वं (सम्यग्दर्शनतत्त्वेषु प्रतीतत्वं)। (२१), चारित्राचारयुक्तत्वं। (२२), तपआचारयुक्तत्वं। (२३), वीर्य्याचारयुक्तत्वं। (वीर्य्यं मनोबलादि)। (२४). सूत्रार्थाभिज्ञत्वं। (२५), आहरणनिपुणत्वं (आहरणं दृष्टान्तः, स च चतुर्व्विधः। यथा, अपायः, उपायः, स्थापनाकर्म्मा, प्रत्युत्पन्नविनाशी चेति। तत्र अपायोऽपि चतुर्व्विधः। यथा,—द्रव्यापायः, क्षेत्रापायः, कालापायः भावापायश्चेति)। (२७), हेतुनिपुणत्वं। (२८). उपनयनिपुणत्वं। (२९), नयनिपुणत्वं (नयाश्च सप्तविधाः क्रमेण यथा,—नैगमः, संग्रहः, व्यवहारः, ऋजुसूत्रं, शब्दः, समभिरूढ़ः, एवम्भूतश्चेति)। (३०), ग्रहणाकुशलत्वं (ग्रहणा च परहितोपदेशदाने शक्तिः)। (३१) स्वसमयज्ञत्वं। (३२), परसमयज्ञत्वं (समयः सिद्धान्तः)। (३३), गाम्भीर्य्यं। (३४), दीप्तिमत्त्वं। (३५), शिवत्वं (उपद्रवविनाशकत्वं)। (३६), सौम्यदर्शनत्वञ्चेति। अपि च आचारसम्पदादयो गुणाश्चैव अन्तर्भवन्ति।

एवमुपाध्यायानां श्रुतज्ञानादिपञ्चविंशतिविधगुणकथनं। तथा साधूनामपि प्राणातिपातविरमणादिसप्तविंशतिगुणकथनं। अपि च श्रद्धालूनां श्रावकाणां सन्तोषादिरूपैकविंशतिविधगुणकथनमिति।

No. 2781. गुणकरण्डगुणावली चउपइ। Substance, country-made paper, 11 × 4 inches. Folia, 32. Lines, 8 on a page. Extent, 634 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Hindi.

Guṇakaraṇḍa-guṇávalí, Chaupayi. A Hindi poem in praise of Jaina merits. Anonymous.

Beginning. इहासंपतिसुखदायक सरसप्रणमुं श्रीजिनपास ।
तीर्थं करते वीरा+अविरलपूरण आस ॥
वसे सरखतीवीणउं वाणी अरथवरदाय ।
कहिसुं पुण्यउपरिकथासांभलता सुखथाय ॥ इत्यादि ।

End. निरमलगुणभरियावऊग्यानमुनिवरश्रीवधमानजी ।
शिष्यतेह नो + + ष दीपेसुग्यानधरै सदा गुणध्यानजी ॥
गुणगिरुवाराजे इमगावै प + + नवनिधपावैजी ।
अविरलवुधत्यां घटमै आवै थिरसंपतजसयावैजी ॥

Colophon. इति गुणकरण्डगुणावलीचउपइ समाप्ता ।

विषयः । पुण्यमेव इहामुत्रपरमसुखसाधनमितिकथनप्रसङ्गेन गुणकरण्डगुणावलीविवरणकथनं ।

No. 2782. रात्रिभोजन, चउपइ। Substance, country-made paper, 11 × 4 inches. Folia, 24. Lines, 8 on a page. Extent, 470 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect.

No. 2809. नैम्ब्यव्रतसिद्धान्तज्योत्स्ना । Substance, country-made paper, 11 × 5 inches. Folia, 70. Lines, 7 on a page. Extent, 1,242 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharaganja, Baḍa Akhaḍá, Post Nasípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose and verse. Correct.

Naimbavrata-siddhánta-jyotsná. The fasts and festivals appropriate for Vaishṇavas as enjoined by Nimbárka. By Dhaniráma.

Beginning. श्रीमतीं गौरवर्णाङ्गीं श्यामां श्यामल्लतामिकां ।
श्यामाङ्गभूषणं वन्दे कृष्णं नैम्बसुखाश्रयं ॥
नमस्कृत्य जगद्वन्द्यं निम्बादित्यं जगद्गुरुं ।
पूर्व्वसिद्धान्तवाक्येन वर्षकृत्यं प्रतन्यते ॥

इह खलु प्रचण्डोद्दण्डकालोत्प्रेक्षणनष्टव + विविधमनोरथानां श्रीतोष्णादिद्वन्द्वप्रचुरबऊलतरश्रमजनिर्भृति + + द्वेजितचेतसां श्रीमन्निम्बार्कसम्प्रदायस्थो दुम्बर + + दिक्षतार्थपद्धकादिनिबन्धानां बऊलतरत्वात् तल्लेखनविचारविधिपरमालसानां सुवैष्णवानां हिताय निर्णीतसिद्धान्तवाक्येन वर्षकृत्यं विशदयति । इत्यादि ।

End. कृष्णक्रीड़ान्वितां लीलां यः करोति त्वपोत्तम ।
स याति परमास्थानं स्थानं ब्रह्मानुमोदकः ॥
सुधियः क्षम्यतां सन्तो मम धाष्ट कृपालवः ।
सङ्ग्रहः स्वप्रबोधार्थं कृतो नानाविधैश्चतः ॥

Colophon. इति श्रीमत्परमवैष्णवाचार्य्यश्रीमन्निम्बादित्यमतानुयायिश्रीमत्तुलाश्रमीभिधाविदितचरणचिन्नकेन धनीरामेण कृतायां नैम्बव्रतसिद्धान्तज्योत्स्नायां द्वादशमासव्रतोत्सवविशेषविधिर्नाम द्वितीयोल्लासः सम्पूर्णः ।

विषयः । १प्रथमे उल्लासे,—वैष्णवलक्षणं । वैष्णवैस्तु सदाचारोक्तविधिना व्रताद्यनुष्ठानकर्त्तव्यमिति सदाचारनिरूपणं । व्रतानुष्ठानविधिर्हि द्विविधः । पूर्व्वविद्धाचरणरूपः उत्तरविद्धाचरणरूपश्च । तत्र सर्व्वैः वैष्णवैः पूर्व्वस्याज्यः उत्तरो ग्राह्य इति निरूपणं । एकादशीव्रतविधिनिर्णयः । तत्र स्पर्श-सङ्ग-श्रुत्यवेधभेदेन दशमीवेधस्य चतुर्विधत्वनिरूपणं । हरिवासरलक्षणं । उन्मीलन्याद्यष्टविधमहाद्वादशीनिरूपणं । उपवासदिने भगवत्प्रसादभोजनादिनिषेधकीर्त्तनं । एकादशीदिने श्राद्धादिनिषेधकथनं । हविष्यान्ननिरूपणं । दशमीकृत्यकथनं । एकादशीकृत्यनिरूपणं । उपवासस्वरूपादिकथनं । द्वादशीकृत्यनिरूपणं ।

२ये उल्लासे,— कार्त्तिकमासकृत्यनिरूपणं । तत्र दीपदानादिविधिः । परान्नादिवर्জ্জनावश्यकताकथनं । शौचविध्यादिकथनं । स्नानादिविधिकथनं । कृष्णचतुर्दश्यां सन्ध्याकाले धर्मराजाय दीपदानविधिकथनं । कृष्णचतुर्दशीकृत्यनिरूपणं । अमावस्याकृत्यनिरूपणं । निम्बार्कानुयायिनां विशेषकृत्यकथनं । उत्थानद्वादशीकृत्यं । तत्रमुद्धाधारणविधिः । मार्गशीर्षकृत्यनिरूपणं । तत्र मदोत्सवविधिकथनं । पौषकृत्यनिरूपणं । माघकृत्यनिरूपणं । तत्र स्नानविधिकीर्त्तनं । तिलद्वादशीकथनं । अर्कोदययोगकथनं । भीष्मतर्पणं । वसन्तरागेण सङ्गीतालापविधिः । फाल्गुनमासकृत्यनिरूपणं । तत्र शिवरात्रिव्रतविधिः । दोलोत्सवविधिः । चैत्रकृत्यनिरूपणं । तत्र कृष्णप्रतिपद्यपि दोलोत्सवविधिकथनं । वारुणीविधिः । रामनवमी । पुष्यदोलो-

त्सवविधिः। वैशाखकृत्यं। शुक्लाष्टतीयायां परशुरामावतरणविधिः। चन्दनोत्सवविधिः। चतुर्दश्यां नृसिंहावतरणविधिः। ज्येष्ठकृत्यं। दशहराविधिः। स्नानयात्राविधिः। आषाढ़कृत्यं। रथयात्राविधिः। शयनोत्सवविधिः। पौर्णमास्यां गुरुपूजाविधिः। श्रावणकृत्यकथनं। तच्च दोलोत्सवविधिः। पवित्रारोपणविधिः। भाद्रकृत्यं। जन्माष्टमीविधिः। राधाष्टमीकृत्यं। कटिदानविधानं। वामनोत्सवविधिः। अनन्तोत्सवविधिः। आश्विनकृत्यनिरूपणं। अपरपक्षश्राद्धविधिः। शुक्लसप्तम्यां सरस्वतीस्थापनविधिकीर्त्तनं। विजयादशमीकृत्यं। पूर्णिमायां रासोत्सवविधानकीर्त्तनञ्च।

No. 2810. भरद्वाजसंहिताटीका। Substance, country-made paper, 10 × 4 inches. Folia, 68. Lines, 12 on a page. Extent, 3,025 ślokas. Character, Nágara. Date, Sm. 1833. Place of deposit, Jápharaganja, Baḍa Akhaḍá, Post Nasípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, old. Prose. Correct.

Bharadvája-sañhitá-ṭíká. A commentary on the Bharadvája Sañhitá. The name of the author is not given. It is a treatise on emancipation through Yoga observances.

Beginning. रङ्गेश्वरं नमस्कृत्य मुनिं सुदर्शनं तथा।
रामानुजं वेङ्कटञ्च श्रीनिवासं समाश्रये॥

अथ तत्र भगवान् भरद्वाजो महामुनिः संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीवनेच्छया सकलवेदान्तेषु प्रतिपन्नं न्यासाख्यं योगं सकलधर्मोपदेशानन्तरं उपनिषत्कल्पेन संहिताग्रेषेण उपादिशत्। तच्च सम्यगुपसन्नानां शिष्याणां महर्षीणाञ्च प्रश्नकालप्रतीक्षाणां तादृशोपायश्रवणकौतूहलवतां प्रश्नश्लोकोऽयं।

श्रुत्वा तु सकलान् धर्मान् सिद्धिमेषाञ्च शाश्वतीं।
भूय एव मुनिश्रेष्ठमिदमूचुर्महर्षयः॥

इत्याद्याः श्लोकाः। धर्मशब्दः अलौकिकश्रेयःसाधनपरः॥ इत्यादि।

End. इत्थं सन्ताऽनुभूयेमामनुरूपामिहात्मनः।
परञ्च चानुमोदन्ते परमेण विपश्चिता॥

Colophon. इति श्रीभरद्वाजसंहितायाः टीकायां चतुर्थोऽध्यायः। संवत् १८३३।

विषयः। भरद्वाजसंहिताया व्याख्यानं।

No. 2811. दीपिकाप्रकाशः । Substance, country-made yellow paper, 9 × 3¼ inches. Folia, 240. Lines, 8 on a page. Extent, 4,660 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharaganja, Bada Akhadá, Post Nasípur, Zillá Murshidábad, Gopáladása Mahanta. Appearance, new. Prose. Correct.

Dípiká-prakáśa. A gloss on a commentary called *Dípiká* on the Vaiśeshika treatise called *Tarka Saṅgraha*. By Ráya Narasiñha Paṇḍita. Hall's Contributions, pp. 68, 69.

Beginning. वन्दे रामानुजमुनिं वन्दारुजनकल्पकं ।
अनन्तसरसीतीरदिव्यनित्यकुटुम्बिनं ॥
ध्यात्वा श्रीमाद्यपादाब्जे दीपिकायाः प्रकाशिकां ।
श्रीरायनरसिंहेन पण्डितेन विकीर्ष्यते ॥

तत्र प्रारिप्सितग्रन्थविरामविरोधिविघ्नव्यूहविध्वंसनविचक्षणां विश्वनाथादिविनतिं शिष्यशिक्षार्थमादौ निबध्य शिष्यावधानाय प्रारिप्सितं प्रतिजानीते विश्वेश्वरमित्यादिना । विश्वस्य प्रपञ्चस्य ईश्वरं सृष्ट्यादिकर्त्तारमित्यर्थः । एतेन ईश्वरे अनुमानप्रमाणं सूचितं । तथाहि कार्यं कृतिजन्यं कार्य्यत्वात् । घटवदित्यादि ।

End. तद्घटितरजतत्वाभाववद्भिन्नेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वरूपाप्रमात्व-विषयकत्वस्य सुतरामसम्भवादिति दिक् ।

Colophon. इति श्रीरायनरसिंहपण्डितविरचिते दीपिकाप्रकाशे शब्दपरिच्छेदः समाप्तः ।

विषयः । तर्कसङ्ग्रहाभिधानवैशेषिकप्रकरणग्रन्थस्य दीपिकानाम्नी या टीका, तस्या व्याख्यानं ॥

No. 2812. विरोधपरिहारः । Substance, country-made paper, 10 × 4 inches. Folia, 100. Lines, 7 on a page. Extent, 1,418 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharaganja, Bada Akhadá, Post Nasípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose. Correct.

Virodha-parihára. Reconciliations of the different Vaishṇava theories regarding emancipation. By Vardáchárya.

Beginning. श्रीमद्वेङ्कटनाथार्य्यनन्दनान् नन्दयाम्यहं ।
शेषशायिपदाम्भोजशेषत्वज्ञाननिर्मलान् ॥

आविष्कृतः श्रुतिगणैरविरोधहत्या
काले कदा विरचयन् रजनीं दिवापि।
भक्तं भुजङ्गमविहङ्गमभूपतिभ्यां
पादाम्बुजं दिशतु पाण्डवसारथिर्मे॥

अहं खलु — — वरदाचार्यः श्रीमद्वेदान्ताचार्यैरस्मत्तातपादैरगल्यभाषया प्रणीतमध्यात्मविद्विरवधार्य्यं रहस्यत्रयसारार्थं विरोधपरिहारं — — — संस्कृतभाषया सम्यगनुकथयामि। तथा हि मुमुक्षूणामवश्यं ज्ञातव्येष्वर्थेषु प्रतीयमानानां विरोधानामप्रशमने—"ज्ञानेनहीनः पशुभिः समान" इत्यवद्या भवेदित्यादि।

End. मुक्तिं शिष्यकरस्थयामि मुरभिद्भक्तिं व्यवस्थापये तद्भक्तेषु च कारयामि नियतां भक्तिं समस्तं जनं। राजन्यानपि रञ्जयामि समये रामानुजार्य्योक्तिभिः सार्व्वारीनपि मोहयामि विजयी धिक्चकरीमिचिन्तां॥

Colophon. इति विरोधपरिहारः समाप्तः।

विषयः। ननु अनादिकालानुवृत्तसंसारदुःखसहितान् जीवान् सर्व्वज्ञत्वादिगुणसद्भावेऽपि अनुद्धरन् कथमीश्वरः सर्व्वरक्षक इति चेन्न द्विविधं खलु भगवतः सर्व्वज्ञत्वं। सर्व्वविषयसत्त्वादिसंरक्षणरूपमेकं नित्यं निरपेक्षं संसारिविषयेऽपि अनिष्टनिवारणादिरूपमपरन्तु कादाचित्कं किञ्चिद्व्याजसापेक्षं। अतः सर्व्वत्रैवज्ञविषयानिष्टवारणादिरूपरक्षणयोग्यत्वस्य अनादिसिद्धत्वात् भगवतः सर्व्वरक्षकत्वमुपपन्नमिति निरूपणं। ततःसिद्धसर्व्वैश्वर्य्यविशिष्टत्वमेव ईश्वरस्य सर्व्वोत्कर्षनिदानमितिप्रमाणतर्काभ्यां निर्गुणवादखण्डनं। मुक्तावस्थायामपि जीवानामीश्वरपारतन्त्र्यमितिनिरूपणं। भगवद्दासत्वस्वरूपनिरूपणं। जीवेश्वरयोरुभयोरपि विभुत्वमणुत्वञ्च प्रमाणेषु दृश्यते तच कथं जीवस्यैवाणुत्वं ईश्वरस्य विभुत्वमितिनियम उपपद्यते-इत्यवसमाधानकथनं। जीवविभूत्ववादादिनिरसनं। एकजीववादनिरसनञ्च। स्वतन्त्रः कारुणिक ईश्वरः स्वगुणेनावतारदशायामाश्रितार्थं स्वयमज्ञानदुःखादिकं सर्व्वस्य उत्पाद्य परार्थमेवानुभवतीतितद्भिन्नयमाचमेवेतिनिरूपणं। जीवस्य ज्ञानस्वरूपत्वे ज्ञातृत्ववादानामौपचारिकत्वमेव स्यात्। न खलु धर्मभूतस्य ज्ञानस्वरूपस्य ज्ञातृत्वमुपपद्यते इति शङ्कानिरसनं। विवेकिनामपि विहितपरित्यागे निषिद्धानुष्ठाने च भगवत्प्रयुक्तकाणत्वखञ्जत्वाद्यल्पतरदण्डोपलम्भाच्च राजाज्ञानुपालकराजपुत्रन्यायेन यावच्छरीरपातं भगवदाज्ञानुपालनं कर्त्तव्यमेवेति प्रतिपादनं। यस्य हि यत् कर्म्म येनैव प्रकारेण भगवता विधीयते तस्य तु तत् कर्म्म तेनैव प्रकारेण अनुष्ठेयमिति भगवल्लक्षणाचार्य्यसिद्धान्तवेदिनां तत्सम्प्रदायषण्टापथसार्थवाहकानां प्राचामाचार्य्यानां निष्कण्टको नीतिपथः। अत एव हि लोकेऽपि भागवतोत्तमैर्वर्णाश्रम-गोचरप्रवरनियमेनैव सर्व्वाण्यपि कर्म्माणि विभज्यैवानुष्ठेयानीतिनिरूपणं। ज्ञानस्वरूपतया ज्ञानगुणकतया च प्रमाणप्रसिद्धस्यापि जीवस्य ज्ञानोत्पत्तिविनाश्ययोः प्रत्यक्षसिद्धत्वात् ज्ञाननित्यत्ववादो न घटते—इत्यच

समाधानकीर्त्तनं। स्वस्वरूपाविर्भावपूर्व्वकपरमात्मप्राप्तिरूपपरिपूर्णभगवदनुभवरसपरिवाहरूप-भगवत्कैङ्कर्य्यप्राप्तिरेव साक्षान्मोक्ष इति निरूपणं। कैङ्कर्य्यस्वरूपादिविवेचनं। भगवतो भक्ता-धीनत्वनिरूपणं। नारायणशब्दनिर्व्वचनं। भगवतः सर्व्वव्यापकत्वनिरूपणं। इदानीन्तनलीला-रसस्य पूर्व्वमविद्यमानत्वाद् भगवतोऽनवाप्तकामत्वमितिशङ्कानिरसनं। भगवदनुग्रहनिग्रह-योः स्वरूपादिविवेचनं। पूर्व्वपूर्व्वकर्म्मानुरोधेन भगवत्प्रेरित एव जीवः सर्व्वत्र पापेषु पुण्येषु च प्रवर्त्तते न तु स्वयमेवेतिनिरूपणं। शास्त्रेषु भक्तिप्रपत्त्योः साधारणेन मोक्षोपायतया विधाने सत्यपि अनुष्ठानदशायामात्मन्निक्वैषम्यप्रदर्शनपूर्व्वकं तयोः स्वरूपादिविवेचनं। मुक्तानामव-स्थादिनिरूपणं। सायुज्यमेव साक्षान्मोक्षः, सालोक्यादौ तु तद्वचनमौपचारिकमितिनिरूपणं। मूलमन्त्रशरणागतिमन्त्रयोः विरोधभञ्जनं। भक्तियोगादिनिरूपणं।

No. 2813. गहनार्थप्रकाशिका। Substance, country-made paper, 12 × 3½ inches. Folia, 142. Lines, 10 on a page. Extent, 5,286 ślokas. Character, Maithilí. Date, Sk. 1770. Place of deposit, Jápharaganja, Bada Akhadá, Post Nasípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose. Correct.

Gahanártha-prakáśiká. A gloss on the Súrya-siddhánta, a treatise on astronomy. By Viśvanátha Dáivajña, son of Divákara Daivajña.

Beginning. यदर्च्चनाद् + + महेश्वरोऽपि कार्य्येषु धत्ते विभुतां प्रभावात्।
तं विघ्नविच्छेदकरं गणेशं सिन्दूरवर्णं सततं नमामि॥
स्वात्मानुरागविभवेन समस्तलोक-
मारञ्जयन् बुधगणस्पृहणीयमूर्त्तिः।
सद्वृत्तादिरमणीयगुणाभिरामो
रामो बभूव गणकावलिभालरत्नं।
अभ्यासेन सदैव जैमिनिगिरां वाचा महत्यागतो
व्याख्यानेन च भट्टतामभिलषामाचार्य्यतामावहन्।
भट्टाचार्य्य इति प्रगीतमहिमा दैवज्ञचूड़ामणे-
रामादाविरबभूव + + सदृशः सोमः समुद्रादिव॥
— — — — — — — ।
तस्यानुजः सकलशास्त्रसरोजसूर्य्यः
कन्दर्पकेष्टिकमनीयशरीरकान्तिः।

आसीद्सीमगुणदुग्धसमुद्रतुल्यः
श्रीकेशवः श्रुतिविलोचनलोचनश्रीः ॥
तस्यानुजो गणितशास्त्रविचारचित्तः
श्रीविश्वनाथचरणाम्बुजदत्तचित्तः ।
नत्वा परापरगुरूनथ विश्वनाथः
सूर्य्योक्तभावमधुना विषदीकरोति ॥
अमलगणकविद्योद्दामसद्ग्रन्थकर्त्ता
द्विजकुलतिलकोऽयं विश्वनाथाभिधानः ॥
रचयति बृ + + सूर्य्यसिद्धान्तटीकां
विशदगणितभावोद्दाहृति + + नार्थां ॥ इत्यादि ।

End. बीजसाधनमिदमतीन्द्रियज्ञानसाधनवता श्रीसूर्य्येण भूतानुकम्पार्थमुक्तं सूर्य्यभिन्नेनैव केनचिदाधुनिकेन हृतं तदित्यपि केचिदाहुः ॥

Colophon. इति श्रीदिवाकरभट्टदैवज्ञात्मजश्रीविश्वनाथदैवज्ञविरचिते सूर्य्यसिद्धान्तसोदाहरणव्याख्याने गूढनार्थप्रकाशिकायां बीजसाधनाध्यायः समाप्तश्चायं ग्रन्थः ॥

विषयः । सूर्य्यसिद्धान्तस्य व्याख्यानं ।

No 2814. वाग्भट्टालङ्कारटीका । Substance, country-made paper, 12 × 4 inches. Folia, 46. Lines, 10 on a page. Extent, 1,118 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharganj Baḍa Ákhaḍá, Post Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose. Incorrect.

Vágbhaṭṭálaṅkára-ṭíká. A commentary on a treatise on rhetoric attributed to Vágbhaṭṭa. By Ádinátha.

Beginning. श्रीमते रामानुजाय नमः ।

श्रीमान् श्रीआदिनाथः श्रियमिह दिशतु श्रेयसीं भूयसीं वो
विभ्राणः सौरभेयं हृदयमवतु वः शङ्करः शङ्कराभः ।
सेव्यो भूतैर्विभूत्या परिकलिततनुर्वर्णनीयो ह्यहीनै-
र्विभ्रद्+सुवर्णं तुहिनगिरिरिणो भाति यः कामजेता ॥
स्वभावविभवावासं प्रतिभादानदक्षिणं ।
स्मरामि शिरसा++ गुरुपादरजःकणं ॥
बालानामवबोधाय स्वस्यार्थस्मरणाय च ।

वाग्भट्टालङ्कृतेः कुर्व्वे व्याख्यां संक्षेपयुक्तितः ॥

अथ शास्त्रस्य अविघ्नेन समाप्त्यर्थं श्रीवाग्भट्टदेवो विशिष्टेष्टदेवतानमस्कारमाह श्रिय-मित्यादि ।

End. पुरुषपक्षे आचारेण परीतं तैस्तैः शास्त्रलोकसिद्धैर्नयैरसैः गुरुङ्गरादिभि-स्तन्मयतां तद्रूपतां प्राप्तं गतं कल्पान्तरकालस्थायि जायते । इति ।

Colophon. इति श्रीव्याद्रिनाथसुता वाग्भट्टालङ्कारटीका समाप्ता ।

विषयः । वाग्भट्टालङ्कारस्य व्याख्यानं ।

No. 2815. मन्त्रदेवप्रकाशिका । Substance, country-made paper, 12 × 4 inches. Folia, 106. Lines, 13 on a page. Extent, 4,116 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharganj, Baḍa Akhaḍá, Post Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose and verse. Incorrect.

Mantradeva-prakáśiká. The origin, meaning and purport of víja mantras, and their use in the worship of S'ákta and S'aiva divinities. The work contains also a great many rituals and details of S'ákta religious duty; the whole drawn from the Tantras. By Vishṇudeva. It is dedicated to one Koṭís'vara.

Beginning. ओङ्कारात्माचरा + भुवनपश्चिव + + दक्षिणामूर्त्तिचिन्ता
रत्नचैत्यम्बकोद्य + + ष्ठन + महागाणपत्यादिरूपिन् ।
आ + णै द्वादशार्णप्रिय स्वहरितनो श्रीवराहाख्य चक्रिन्
कृष्णात्म + म विष्णो विविधगुण महाशक्तिभाखन्नमस्ते ॥
अनन्त नारायण राम योगिन् ब्रह्म प्रभो ज्ञानघनाद्य विष्णो ।
अनन्तयोगीश्वर भानुकृष्णरामादयानन्द गुरो नमस्ते ॥
— — — — — — — —।
अथ प्रपञ्चसारादिमन्त्रशास्त्रानुसारतः ।
गुरूपदिष्टमन्त्राणां देवतादि प्रकाश्यते ॥
मननात् त्राणधर्म्माणो गुप्तार्थभाजो वा मन्त्राः । तदुक्तं ।
गुप्तोपदेशान्मन्त्रोऽपि मननात् त्रायतेऽथ वा इत्यादि ।

End. एवं देवतातत्त्वरूपं ब्रह्म सत्यज्ञानानन्दाद्वयलक्षणमात्मरूपमेवेति तदैक्यमेव देवतातत्त्वमिति सिद्धं ।

श्रीमत्प्रपञ्चसारादिशास्त्रसङ्गृहविग्रहः ।

क्षतिर्विजयते सैषा मन्त्रदेवप्रकाशिका ॥
परमाराध्यपौत्रस्य लक्ष्मीशङ्करिजन्मनः ।
कृतिः श्रीविष्णुदेवस्य श्रीमत्कोटीश्वरेऽर्पिता ॥

Colophon. इति श्रीमन्त्रदेवप्रकाशिकायां द्वाविंशः पटलः । श्रीरस्तु ।

विषयः । १प्रथमे मन्त्रस्वरूपनिरूपणं । मन्त्रशब्देन ब्रह्मविद्योच्यते इति निरूपणं । देवतास्वरूपकीर्त्तनं । सगुणादिब्रह्मस्वरूपकथनं । ब्रह्मविद्याङ्गभूतानां साकारपरमन्त्राणां विरोधपरिहारः । ब्रह्मविद्योपदेशप्रकारकथनं । २ये पटले साकारब्रह्मविद्यात्मकमन्त्रप्राधान्येन दीक्षाक्रमकीर्त्तनं । तत्र मासनक्षत्ररशिप्रभृतिनिरूपणादिकं । भूतकूटपरीक्षाविधिः । सिद्धसाध्यादिपरीक्षाविधिः । वैदिकमन्त्रे सिद्धादिपरीक्षा नास्तीति निरूपणं । मन्त्राणां सौम्यादिपरीक्षणं । ३—५ पटले,—दीक्षादौ माङ्गल्यजनकाङ्कुरार्पणविधानकीर्त्तनं । दीक्षादौ मण्डपकरणार्थं वास्तुबलिप्रकारकथनं । मण्डलोल्लेखनप्रकारकथनं । दीक्षाभिषेकविधिकथनं । षष्टिंशत्कलानिरूपणं । पुरश्चरणाद्यनुष्ठानप्रकारकीर्त्तनं । भूतशुद्धिप्रकारकथनं । अन्यविधभूतशुद्धिकथनं । न्यासप्रकारकीर्त्तनं । ६—९ पटले,—जपादिप्रकारकीर्त्तनं । मालानिरूपणं । अन्यप्रकारेण पुरश्चरणविधिकथनं । मुद्रानिरूपणं । देवपूजाप्रकारकथनं । होमविधिकथनं । भुवनेश्वरीमन्त्रोपासनविधिकथनं । पूजाप्रयोगकथनं । प्रणवमाहात्म्यनिरूपणं । १०,११ पटले,—माहात्म्यशब्दब्रह्मापन्न नाम प्रपञ्चोपादानकारणं परं ब्रह्मैव मायया भुवनेश्वरीप्रकृतिरूपेण प्रपञ्चाकारेण विवर्त्तमानमिति तन्मन्त्रसाधनकीर्त्तनं । चक्रलेखायाः शक्तेः पार्व्वत्याः स्वदेहार्द्धनारीरूपमायाशबलितब्रह्मात्मकशिवसान्निध्याय ईक्षितत्वात् शक्तिमन्त्रोऽपि स्वप्रकाश्यदेवतादारेण शिवमन्त्रसन्निधिमपेक्षते—इति शैवमन्त्रन्यासपूजादिप्रकारकीर्त्तनं । शैवकल्पोक्तयन्त्रकथनं । १२—१४ पटले,—सर्व्वज्ञानप्रदक्षिणामूर्त्तिमन्त्राराधनप्रकारकथनं । उमामहेश्वरमन्त्रकथनं । अनुष्टुपच्चाम्बकाराधनप्रकारकीर्त्तनं । नीलकण्ठाष्टाक्षरमन्त्रविधिकीर्त्तनं । महानीलकण्ठमन्त्रविधिः । चिन्मन्त्रविधिः । मरुद्रूपञ्चाक्षरमन्त्रविधिः । आपदुद्धारबटुकभैरवमन्त्रविधिः । स्वामिकार्त्तिकमन्त्रविधिः । चण्डेश्वरमन्त्रविधिः । श्यामयापिमन्त्रविधिः । १५—१७ पटले,—शिवावतारगणपत्यमन्त्रविधिः । तत्र तर्पणविधिकीर्त्तनं । हेरम्बमन्त्रविधिः । पञ्चाक्षरगणपतिमन्त्रविधिः । क्षिप्रप्रसादनमन्त्रकथनं । हरिद्रागणपतिमन्त्रः । लक्ष्मीविनायकमन्त्रः । गणपत्यादिनानारूपधरस्य शिवस्य हरिहरादिनिदर्शनेन विष्णुरूपैक्यात् शिवविष्णोस्तादात्म्यमस्तीति सार्द्धं शिवमन्त्रैरर्थवाचकत्वेन लक्ष्मसङ्गतिकानां वैष्णवमन्त्राणामनुष्ठानप्रकारकथनं । १८—२१ पटले,—नृसिंहमन्त्रविधानं । सर्व्वारिष्टविनाशनज्वालानृसिंहमन्त्रः । दशावतारनृसिंहमन्त्रः । अभयनृसिंहमन्त्रः । वराहमन्त्रकथनं । हयग्रीवमन्त्रकथनं । सुदर्शनमन्त्रकथनं । गोपालमन्त्रकथनं । सन्तानगोपालमन्त्रकथनं । श्रीकृष्णमन्त्रकथनं । वामनमन्त्रकथनं । यज्ञेश्वरवामनमन्त्रकथनं । भोगवामनमन्त्रकथनं । श्रीराममन्त्रकथनं । श्रीकराष्टाक्षरमन्त्रकथनं ।

पुरुषोत्तममन्त्रकथनं। हृषीकेशमन्त्रकथनं। २३—२५, पटले,—लक्ष्मीमन्त्रकथनं। महालक्ष्मी-मन्त्रकथनं। कमलवनवासिनीमन्त्रकथनं। धरणीमन्त्रकथनं। सिद्धमहालक्ष्मीमन्त्रकथनं। ज्ञानशक्त्यात्मकवागीश्वर्यादिमन्त्राराधनकथनं। वाचस्पतिसरस्वतीमन्त्रकथनं। पारिजातसरस्वतीमन्त्रकथनं। त्रिपुरामन्त्रकथनं। कामबीजमन्त्रकथनं। काममालामन्त्रकथनं। त्वरितामन्त्रकथनं। गौरीमन्त्रकथनं। राजमुखीमन्त्रकथनं। अश्वारूढामन्त्रकथनं। अन्नपूर्णामन्त्रकथनं। २६—३१, पटले,—भगवत्क्रियाशक्तिरूपदुर्गामन्त्रकथनं। नवदुर्गामन्त्रकथनं। प्रह्लिनीदुर्गामन्त्रकथनं। दुर्गाहृदयमन्त्रकथनं। सूर्य्यमन्त्रकथनं। ग्रहपूजाहोमविधिकीर्त्तनं। चन्द्रमन्त्रकथनं। एवमङ्गारकादिमन्त्रकथनं। अग्निमन्त्रकथनं। तुरगाग्निविद्यामन्त्रकथनं। लवणमन्त्रकथनं। सर्व्वदेवतात्मनः सर्व्वशक्तेः सर्व्वावभासकतेजोमयस्य परमात्मनः सर्व्वात्मत्वद्योतनार्थं सर्व्वात्मप्रतिपादकगायत्रीमन्त्रोपासनाप्रकारकीर्त्तनं। गायत्रीजपविधिकथनं। निबन्धेऽस्मिन् सर्व्वत्रैव सर्व्वषां मन्त्राणामृषिच्छन्दोदेवतादिकथनपूर्व्वकं पूजाविधिकीर्त्तनमिति ज्ञेयं। तथा सर्व्वेषां मन्त्राणां परब्रह्मैव देवता। हरिहरादयस्तु तद्विभूतिरूपतया न मुख्यत्वेन व्यपदिश्यन्ते।

No. 2816. अष्टश्लोकीव्याख्यानं। Substance, country-made paper, 10 × 4 inches. Folia, 14. Lines, 11 on a page. Extent, 33 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharganj, Baḍa Akhaḍá, Post Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose. Correct.

Ashṭaślokí-vyákhyán'a. A commentary on a hymn by Parásara Bhaṭṭa in praise of Rámánuja. By Vaishṇavadása.

Beginning. श्रीपराशरभट्टाचार्य्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥
वन्देऽहं घटिकाद्रीशं श्रीनिधिं करुणानिधिं।
वाधूलकुलदैवं तं सतामनघधिं निधिं॥
प्रणम्य देशिकान् सर्व्वान् अष्टश्लोक्या यथाश्रुतं।
अर्थो वैष्णवदासेन बालबोधाय वर्ण्यते॥

अथ परमकारुणिको भगवान् पराशरभट्टाचार्य्यः सकलचेतनोज्जीवनाय—इत्यादि।

End. इत्थं बालप्रबोधाय अष्टश्लोक्या यथाश्रुतं।
वर्णितोऽर्थो महात्मानः क्षन्तुमर्हथ साहसं॥

Colophon. इति श्रीमदष्टश्लोक्या व्याख्यानं। समाप्तं।

विषयः। पराशरभट्टाचार्य्यकृतरामानुजस्तोत्राष्टकस्य व्याख्यानं।

No. 2817. वेदान्तसारम्। Substance, country-made paper, 10 × 4 inches. Folia, 171. Lines, 9 on a page. Extent, 3,825 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharganj, Baḍa Akhaḍá, Post Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose. Incorrect.

Vedántasára. A commentary on the Vishṇu-sahasra-náma section of the Mahábhárata. The object of the author is to explain the text in accordance with the Vedánta doctrine as expounded by Rámánuja. By Parás'ara Bhaṭṭáchárya.

Beginning. वन्दे गोविन्दतातं मुनिमथ मन+ल्लक्षणाढ्यं महान्तं।
ध्यायेयं यामुनाचार्य्यं मम हृदि तनये राममेवमि++।
पद्माक्षं प्रेक्षिणीयप्रथममपि मुनिं नाथमीडे ग्रहारिं
स्तौमि प्रेक्षेयलक्ष्मीं शरणमशरणः श्रीधरं संश्रयेऽहं॥
— — — — — — — —।
जातो लक्ष्मणमिश्रसंश्रयधनाच्छ्रीवत्सचिह्नादृषे-
र्भूयो भट्टपराशरेतिगणितः श्रीरङ्गभर्त्ता स्वयं।
श्रीश्रीरङ्गपतिप्रसादलभया श्रीरङ्गनाथाह्वयः
श्रीरङ्गेश्वरकारितो विदधुते नाम्नां सहस्रं हरेः॥
— — — — — — — —।

इह खलु निखिलोऽपि चेतयमानः प्रमाणतः प्रमेयं परिच्छिन्दंस्तच्चेत् प्रमेयमनुकूलं तदुपादेयं, यथा सकुचन्दनवनिताकनकादिकं—इत्यादि।

End. न ते यान्ति पराभवमिति आपूरयन्ति श्रम्।

Colophon. इति श्रीपराशरभट्टाचार्य्यरचितं सहस्रनामभाष्यं वेदान्तसारं समाप्तं।

विषयः। महाभारतीयशान्तिपर्व्वान्तर्गतविष्णुसहस्रनामस्तोत्रस्य रामानुजमतानुसारेण व्याख्यानं।

No. 2818. श्रीपतिपद्धतिः। Substance, country-made paper, 10 × 3 inches. Folia, 12. Lines, 4—5 on a page. Extent, 142 ślokas. Character, Maithili. Date, Sk. 1723. Place of deposit, Jápharganj, Baḍa Akhaḍá, Post, Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Verse. Correct.

S'rípati-paddhati. A treatise on horoscopy. By S'rípati. A commentary on this work has been noticed under No. 2416, Vol. VII, p. 175.

Beginning. नत्वा तां गुरुदेवतां त्रिसमयज्ञानोद्भवेः कारणं
नत्वादाम्बुरुहप्रसादविकसद्बोधो बुधः श्रीपतिः ।
शिष्यप्रार्थनया विचार्य्य सकलान् होरागमार्थान्मुद्ध-
वैच्मे जातकजन्मपद्धतिमहं होराविदां प्रीतये ॥
ज्ञेयोऽत्र प्रथमं हि जन्मसमयज्ञायादियन्त्रैः स्फुटं
तत्कालप्रभवा विलग्नसहिताः कार्य्यास्ततश्च ग्रहाः ।
सिद्धान्तोक्तपरिस्फुटोपकरणैस्ते चासकृत् कर्म्मणा
भावाः खेटबलानि च ततस्तेषां विचिन्त्यानि षट् ॥ इत्यादि ।

End. कष्टकादिपरिभावनानया प्रोक्तया सकलभावजातया ।
जातकोदितफलस्य निर्णयः प्रत्ययो भवति धीमतां सदा ॥

Colophon. इति श्रीपतिपद्धतौ प्रकीर्णाध्यायोऽष्टमः । शकाब्दाः १७२७ ।

विषयः । जातकनिरूपणं । तत्र लग्नकथनं । भावसाधनकीर्त्तनं । ग्रहाणां दृष्ट्यानयनप्रकारकथनं । बलाबलनिरूपणं । शुभाशुभनिरूपणं । आयुर्दैर्घ्यनिरूपणं । अरिष्टभङ्गकथनं । अन्तर्दैशानिरूपणं । अष्टवर्गादिफलकीर्त्तनं । राजयोगादिफलकथनं ।

No. 2819. भरद्वाजसंहिता । Substance, country-made paper, 10 × 4 inches. Folia, 60. Lines, 4 on a page. Extent, 649 ślokas. Character, Nágara. Date, Sm. 1833. Place of deposit, Jápharganj, Bada Akhadá, Post, Nasípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, old. Verse. Correct.

Bharadvája-sañhitá. A treatise on faith and secret worship with abundant details for the observance of the faithful. By Bharadvája. The work is evidently a fragment, probably a part of a Tantra.

Beginning. श्रुत्वा तु सकलान् धर्म्मान् सिद्धिमेषाञ्च शाश्वतीं ।
भूय एव मुनिश्रेष्ठमिदमूचुर्महर्षयः ॥
केनोपायेन भगवन् इह सर्वेऽपि जन्तवः ।
प्राप्नुयुः परमां सिद्धिं सद्योविगतकल्मषाः ॥
तेषां तद्वचनं श्रुत्वा भरद्वाजो महामनाः ।
सस्मार परमं गुह्यं पुनश्चेदमभाषत ॥ इत्यादि ।

End. इत्थं किलात्मनोऽन्यासां जातौ इत्याख्यपादपः।
असौ फलमयः सेव्यस्तन्न चोत्पद्यते विना॥
सुस्वत्वात्दुरापत्वान्महत्वाद्गौरवादपि।
मयायं परमो धर्म्मः प्रोक्तः स्थित्यै पुनः पुनः।

Colophon. इति भरद्वाजसंहितायां चतुर्थोऽध्यायः। लेखकपाठकयोः शुभं भूयात्। संवत् १८२२।

विषयः। १प्रथमेऽध्याये,—न्यासाख्ययोगनिरूपणं। तच्च तस्य प्रपत्तिरितिसंज्ञान्तरकथनं। अनन्तज्ञानशक्त्यादिकल्याणगुणसागरस्य परस्य ब्रह्मणो लक्ष्मीशस्य आत्मसमर्पणमेव प्रसादनोपाय इति निरूपणं। अत्र सर्वेषां वर्णानामधिकारकथनं। प्रपत्तिस्वरूपकीर्त्तनं। कायिकवाचनिकमानसिकभेदात्स्यात्त्रिविधकथनं। पुनरस्याः सात्त्विकादिभेदेन त्रिविधत्वनिरूपणं। गुरुलक्षणं। आचार्य्यलक्षणं। दीक्षाविधिककनं। प्रपत्त्यङ्गनिरूपणं। दास्यमेव प्रपन्नैराख्यमितिनिरूपणञ्च।

२येऽध्याये,—प्रपत्तिवद्भक्तिरपि भगवति कर्त्तव्येतिनिरूपणं। भक्तिस्वरूपकथनं। अस्याः षड्ङ्गनिरूपणं। अनुकूलताकार्पण्यादीनां लक्षणं। वैराग्यज्ञानभक्तिप्रीत्यादीनां लक्षणं। भक्त्यधिकारिनिरूपणं। भगवत्सेवनादिविधिकीर्त्तनं। प्रपन्नकृत्यनिरूपणं। ज्ञानयोगक्रियाचर्य्यादिषु फलकथनं। दृष्ट्यधिकारकथनं। वैष्णवशास्त्रनिरूपणं। भक्त्यधिकारकथनं। शङ्खचक्रादिचिह्नाधिकारकथनं। तप्तमुद्राधारणविधिकथनं। ऊर्द्ध्वपुण्ड्रादिविधिकथनं। कण्ठिबन्धनकौपीनादिविधिकथनं। सत्सेवाधिकारादिनिरूपणं। तत्प्रक्रियाकथनञ्च। गुर्वभिगमादिप्रकारकथनं।

३येऽध्याये,—भगवत्प्रीतिहेतुत्वेन स्वधर्म्माचरणप्रपन्नस्य भगवद्प्रीतिहेतुतया प्रतिषिद्धानां वर्ज्जनीयत्वनिरूपणं। प्रपन्नस्य देवतान्तरस्पर्शादिनिषेधात् कर्म्मसमृद्ध्यर्थमपि देवतान्तरस्तवननमस्कारादिवर्ज्जनविधानं। अन्यान्यप्रतिषिद्धवर्ज्जनकीर्त्तनं। तामसशास्त्रादिकथनं। दृष्टिविरुद्धाधिकारकथनं। भक्तिविरुद्धवर्ज्जननिरूपणं। प्रपन्नेन विष्ण्वर्चारहिते ग्रामे न भोक्तव्यमितिनिरूपणादिकं। चिह्नविरुद्धाधिकारकथनं। सेवाविरुद्धपरिहारकथनं। प्रपन्नस्य भगवत्प्राप्तिकथनञ्च।

४र्थेऽध्याये,—वैष्णवलक्षणादिकथनं। शुद्धमिश्रभेदेन द्विविधैकान्तिकभक्तानिरूपणं। ब्रह्मरुद्रादीनां जीवत्वकथनं। विष्णुविभूतित्वकथनञ्च। अवैष्णवेन सह प्रपन्नस्य सम्भाषणादिकरणनिषेधः। चक्रधारणादिकालनिरूपणं। भागवतज्ञानस्वरूपकीर्त्तनं। विष्णुदासादिकैङ्कर्य्यनिरूपणं। भवगत्स्वरूपकीर्त्तनं। पञ्चसंस्कारनिरूपणं। सद्दृष्टान्तनिरूपणं। प्रपन्नदृष्टान्तनिरूपणं। कर्म्मयोगनिरूपणं। ज्ञानयोगनिरूपणं। भक्तियोगनिरूपणं। चातुराश्रमधर्म्मनिरूपणं। महापातकदृष्टिनिरूपणं। अपचारनिरूपणं। भक्तिमयीदृष्टान्तनिरूपणञ्च।

No. 2820. तत्त्वकौमुदीव्याख्या । Substance, country-made paper, 10 × 4 inches. Folia, 40. Lines, 8 on a page. Extent, 688 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharganj, Baḍa Ákhaḍá, Post, Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, new. Prose. Generally correct.

Tattva-kaumudí-vyákhyá. A gloss on Váchaspati Miśra's *Tattva-kaumadí*—a treatise on the Nyáya. By Bhárati Yati, pupil of Bodhárańyapati.

Beginning. यत्प्रसादादजं नित्यमात्मानमशरीरिणं ।

विजजी (?) तान् गुरून् भक्त्या नमामि करुणाकरान् ॥

सांख्यसप्ततिं व्याचिख्यासुराचार्यवाचस्पतिमिश्रः प्रारिप्सितग्रन्थस्य निर्व्यूढपरिसमाप्ति-प्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च प्रधानस्य पुंसो भोगापवर्गार्थं प्रवृत्तिलक्षणशास्त्रता-त्पर्यं कथयन् प्रकृतिं पुरुषांश्च नमस्यति अजामेकामिति ॥ इत्यादि ।

End. क्व च वाचस्पतेः सूक्तिः क्व च मन्दस्य मे मतिः ।

क्व चापि सन्मतं तत्त्वमिति शोध्यं मनीषिभिः ॥

Colophon. इति श्रीबोधारण्यपतिशिष्यश्रीभारतीनामकयतिकृता तत्त्वकौमुदीव्या-ख्या समाप्ता ।

विषयः । वाचस्पतिमिश्रकृततत्त्वकौमुद्या व्याख्यानं ।

No. 2821. सुबोधिनी । Substance, country-made paper, 10 × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 132 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharganj, Baḍa Ákhaḍá, Post, Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, new. Prose. Generally correct.

Subodhiní. A gloss on the Rákshasa, Kávya a poem by Vararuchi Kavindra. (See *ante*, No. 782, Vol. II, p. 186). By Kavirája.

Beginning. कश्चिदनिर्दिष्टो नामा पुरुषः वनितां प्रति हेमां प्रत्यक्षां गां वाचं वभाषे अब्रवीदित्यर्थः । किं कुर्वन् सन् वनं काननं विचरन् भ्रमन् । इत्यादि ।

End. किं विशिष्टया देव्या रुचिरया शोभनया इत्यर्थः ।

Colophon. इति श्रीकविराजविरचिता राक्षसकाव्यस्य सुबोधिनी समाप्ता ।

विषयः । राक्षसकाव्यस्य व्याख्यानं ।

No. 2822. दानपारिजातः। Substance, country-made paper, 12 × 4 inches. Folia, 211. Lines, 10 on a page? Extent, 4,989 ślokas. Character, Nágara. Date, Sk. 1522? Place of deposit, Jápharaganja, Baḍa Akhaḍá, Post Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, old. Prose and verse. Correct.

Dánapárijáta. A digest of the Smṛiti rules regarding religious gifts, and the rituals to be observed when consecrating them. By Kshemendra, No. 2262, (VII, 19) is a work of this description and bears the same name, but it is by a different author.

Beginning. जयतु सुरासुरपरिवृढमधुकरपरिलिह्यमानपदकमलः।
करुणापरीतचेता जगदधिनेता रामचन्द्रः॥
तत्र दानस्वरूपमाह देवलः।
अर्थानामुद्दिते पात्रे श्रद्धया प्रतिपादनं।
दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य कथ्यतां॥ इत्यादि।

End. दानेन च तथा तासां कुलान्यपि समुद्धरेत्।
उदक्यास्मृतिकादोषो नैव तत्र गृहे भवेत्॥

Colophon. इति महामहोपाध्यायश्रीक्षेमेन्द्रकृतौ दानपारिजातः समाप्तः। शकाब्दाः १५२१।

विषयः। दानस्वरूपविवेचनं। दानप्रशंसादिकथनं। दानाधिकारादिनिरूपणं। देयादेयनिरूपणं। देशकालादिनिरूपणं। दानविधिकीर्त्तनं। द्रव्यदेवतानिरूपणं। दानप्रतिग्रहविधिकीर्त्तनं। परिभाषाकथनं। सामान्यतः प्रतिमालक्षणं। विष्णुप्रतिमादिलक्षणं। मानपरिभाषाकीर्त्तनं। मण्डपनिर्म्माणविधिकीर्त्तनं। कुण्डनिर्म्माणविधिकथनं। योनिकुण्डविधिकथनं। अर्द्धचन्द्राभकुण्डनिर्म्माणविधिः। त्रिकोणकुण्डविधिः। पद्माकारकुण्डविधिः। षोड़शारचक्रविधिकथनं। लोकालोकरूपाणि। पुण्याहवाचनविधिः। संकल्पादिविधिकथनं। वास्तुपूजाविधिः। अधिवासनविधिः। द्वारपूजाविधिः। कलशस्थापनादिविधानं। मण्डलदेवतास्थापनादिविधिः। ग्रहस्थापनविधिः। होममन्त्रादिकथनं। जपसूक्तकथनं। क्रमेण ऋक्सामवेदादीनां मन्त्रकथनं। अभिषेकविधिः। षोड़शमहादानकथनं। तत्र तुलापुरुषदानप्रयोगः। रोगविशेषे लोहकांस्यादितुलापुरुषदानविधिः। हिरण्यगर्भदानविधिः। ब्रह्माण्डदानविधिः। कल्पतरुदानविधिः। गोसहस्रदानविधिः। हिरण्यकामधेनुदानविधिः। हिरण्याश्वदानविधिः। हिरण्याश्वरथदानविधिः। कन्यादानविधिः। कपिलादानविधिः। महाकपिलादानविधिः। घृतधेनुविधिः। जलधेनुविधिः। क्षीरधेनुविधिः। दधिधेनुविधिः। मधुधेनुविधिः। रसधेनुविधिः।

शर्करावेनुविधिः । कार्पासधेनुविधिः । लवणधेनुविधिः । सुवर्णधेनुदानविधिः । वन्यात्मनाश्रकसुवर्णधेनुदानविधिः । हेमशृङ्गीदानविधिः । उभयतोमुखीदानविधिः । वैतरणीदानविधिः । महिषीदानविधिः । मेषदानविधिः । हेमहस्तिरथदानविधिः । पञ्चलाङ्गलदानविधिः । धरादानविधिः । विश्वचक्रदानविधिः । कल्पलतादानविधिः । सप्तसागरदानविधिः । रत्नधेनुदानविधिः । महाभूतघटदानविधिः । स्वर्णदानविधिः । तिलदानविधिः । तिलकरकदानविधिः । गजदानविधिः । दासीदानविधिः । रथदानविधिः । मही दानविधिः । गृहदानविधिः । वास्तुशान्तिविधिः । शैलदानविधिः । गन्धमादनदानविधिः । लवणाचलदानविधिः । गुडपर्व्वतदानविधिः । तिलाचलदानविधिः । कार्पासाचलदानविधिः । घृताचलदानविधिः । रौप्याचलदानविधिः । शर्कराचलदानविधिः । शिखरदानविधिः । भद्रनिधिदानविधिः । आनन्दनिदानविधिः । चिन्मूर्त्तिदानविधिः । द्वादशादित्यदानविधिः । लोकपालाष्टकदानविधिः । नवग्रहदानविधिः । आत्मप्रतिमादानविधिः । धनदमूर्त्तिदानविधिः । शालग्रामदानविधिः । कालपुरुषदानविधिः । कालचक्रदानविधिः । यमदानविधिः । शय्यावस्त्रपाचस्थालीपुस्तकछत्रताम्बूलरत्नप्रपादीनां दानविधिः । धर्म्मघटदानविधिः । वनदानविधिः । अभयदानविधिः । गोपरिचर्य्याविधिः । अत्र सर्व्वत्र प्रयोगकथनं ।

No. 2823. क्षमाषोडशीव्याख्या | Substance, country-made paper, 12 × 5 inches. Folia, 11. Lines, 7 on a page. Extent, 2,156 ślokas. Character, Nágara. Date, ? Place of deposit, Jápharaganja, Baḍa Ákhaḍá, Post Naśípur, Zillá Murshidábád, Gopáladása Mahanta. Appearance, fresh. Prose. Correct.

Kshamáshoḍaśí-vyákhyá. A gloss on a prayer in sixteen stanzas by Vedáchárya to Jina. By Varadá Áchárya.

Beginning. श्रीपराशरभट्टार्य्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
वन्दे गुरुं दयाधीशं वात्स्यं वरगुणाकरं ।
यत्सूक्तिरेवतिराजोक्तिकेकिन्याः कालकालिका ॥
श्रुतप्रकाशिकाचार्य्यसुतेन रचिता स्तुतिः ।
श्रीरङ्गेशमालम्ब्य गम्भीरार्था विविच्यते ॥

आदौ मङ्गलमाचरति श्रीरङ्गेशेति । इत्यादि ।

End. देहिनां सर्व्वपापापनुत्यै सर्व्वपापापनोदनाय समस्तदुरितापनोदनाय चक्रे विरचितवान् ।

Colophon. इति श्रीमद्वात्स्यवरदाचार्य्यकृता चमाषोड़शीव्याख्या समाप्ता ।

विषयः । वेदाचार्य्यकृतचमाषोड़शीस्तोत्रस्य व्याख्यानं ।

No. 2824 अभिज्ञानशकुन्तलाविवृतिः । Substance, country-made paper, 13 × 4 inches. Folia, 122. Lines, 10 on a page. Extent, 4,538 ślokas. Character, Bengali. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámachánd. Appearance, old. Prose. Incorrect.

Abhijṇána-śakuntalá-vivṛiti. A gloss on S'akuntalá, the well-known drama of Kálidása. By Rámabhadra Mahámahopádhyáya.

Beginning. व्रजशिशुवृन्दवयस्यं सततमुपास्यं विरिञ्चादैः ।

तेजस्समालनीलं किमपि मधुरमधुरं नमस्यामि ॥

क्व कालिदासकविता क्वाहं मन्दमतिर्वटुः ।

निर्म्मितौ-मधुचक्रस्य न पतङ्गः प्रभुर्भवेत् ॥

कविनां कालिदासस्य मते (?) पीयूषवाहिनीं ।

रसिकाः श्रुतिमाचेण माद्यन्ति कथमन्यथा ॥

अथ कविकुलचूड़ामणिर्भगवान् कालिदासः अभिज्ञानशकुन्तलाभिधानं दृश्यकाव्यं चिकीर्षुः आशीर्न्नमस्क्रियावस्तुनिर्द्देशो वापि तन्मुखमितिस्मरणात् काव्यादौ आशीः प्रस्तोति । या सृष्टिरिति । इत्यादि ।

End. नीललोहितो महादेवः समापि पुनर्भवं पुनर्ज्जन्मग्रहणं क्षपयतु आत्मवत् निराकरोतु । इति शं । इति सप्तमोऽङ्कः ।

Colophon. इति श्रीमहामहोपाध्यायरामभद्रकृता अभिज्ञानशकुन्तलाविवृतिः समाप्ता ।

विषयः । कालिदासकृताभिज्ञानशकुन्तलाभिधाननाटकस्य व्याख्यानं ।

No. 2825. ज्योतिर्भास्करः । Substance, country-made paper, 12 × 3½ inches. Folia, 67. Lines, 7 on a page. Extent, 1,323 ślokas. Character, Bengali Date, Sk. 1686. Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámacháñd. Appearance, old. Prose and verse. Correct.

Jyotirbháskara. A digest of judicial astrology. By Chakrapáṇi Mahámahopádhyáya.

Beginning. नत्वा गिरिजया सार्द्धं गिरिशं जगतां गुरुं ।

ज्योतिर्भास्करसंज्ञोऽसौ क्रियते चक्रपाणिना ॥

अथ राश्यादिनिर्णयः । मेषवृश्चिमिथुनककंटसिंहाः कन्या तुलाथ वृश्चिकभं। धनुरथ मकरः कुम्भो मीन इति च राशयः कथिताः । इत्यादि ।

End. स्वप्ने पश्यति चात्मानं रक्ताम्बरविभूषणं ।
मल्लिनाम्बरधारित्वमभ्यङ्क्तौरनग्नता ॥
उत्सवाचरणं पातो दोलारोहस्य निन्दितः ॥

Colophon. इति श्रीमहामहोपाध्यायश्रीचक्रपाणिकृतौ ज्योतिर्भास्करः समाप्तः ।

विषयः । राश्यादिनिर्णयः । राशीनां पर्य्यायकथनं । राशीनां क्रूरसौम्यादिविवेचनं । द्विपदचतुष्पदराशिकथनं । ग्राम्यारण्यजलराशिकथनं । वारस्वरूपकथनं । कालवेला । वारवेला । तिथिनिर्णयः । अवमत्र्यहस्पर्शादिनिरूपणं । करणानि । नक्षत्रगणनिर्णयः । अधोमुखादिनक्षत्रनिरूपणं । नक्षत्रमुहूर्त्तनिर्णयः । योगनिर्णयः । दिक्पतिकथनं । लग्नमाननिर्णयः । होरादृक्काणदृक्काणादिनिरूपणं । नवांशचिंशांशादिनिरूपणं । मूलत्रिकोणादिकथनं । केन्द्रादिकथनं । उपचयसंज्ञा । द्वादशभावकथनं । ग्रहाणां शुभाशुभादिफलकथनं । दृष्टिकथनञ्च । ग्रहशुद्धिनिरूपणं । नक्षत्रादिशुद्धिः । अष्टवर्गकथनं । जन्मनादिविवेचनं । अस्तादियोगनिर्णयः । संक्रान्तिनिरूपणं । दृहस्पतिसञ्चारादिफलकथनं । ग्रनिराहुचक्रादिकथनं । कालाशुद्धिनिरूपणं । ग्रहणनिरूपणं । भूकम्पादिफलकथनं । विवाहनिरूपणं । गर्भाधानादिसंस्कारकथनं । क्षौरविधिः । परीक्षाकथनं । नववस्त्रादिपरिधानादिकथनं । पुष्करिण्यारम्भः । नौकागठनादिकथनं । बीजवपनादिकं । देवतागठनादिकं । गृहप्रवेशादिकथनं । क्षणदानादिकथनं । स्वप्नादौ शुभाशुभादिफलनिरूपणञ्च ।

No. 2826. वेदान्तसिद्धान्तप्रदीपः । Substance, country-made paper, 14 × 4 inches. Folia, 112. Lines, 6 on a page. Extent, 2,864 ślokas. Character, Nágara, Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Ráncháñd. Appearance, old. Prose. Correct.

Vedánta-síddhánta-prodípa. A summary of the Vedánta doctrine. By Niyamánunda. Hall's Contributions.

Beginning. अखण्डं सच्चिदानन्दं सृष्टिस्थित्यन्तकारणं ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

अथ आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्येति श्रवणादिविधिरुपलभ्यते । श्रोतव्य इत्यत्र प्रत्ययार्थस्य नियोगस्य प्रकृत्यर्थो विचारो विषयः । विचारस्य वेदान्ता विषय इति मन्यते ज्ञातुं । तथाहि तद्विजिज्ञासस्व सोऽन्वेष्टव्यः स विजिज्ञासितव्य' इत्यादिश्रुतितः अस्तत्त्वकामेन अद्वैतात्मविचार एव वेदान्तवाक्यैः कर्त्तव्य इति ज्ञायते । इत्यादि ।

End. एवमर्थाद्ब्रह्मज्ञानाज्जीवगतानर्थनिवृत्तिपूर्व्वकं जीवब्रह्मैक्यरूपमद्वयतत्वं सिद्ध्यतीति।

Colophon. इति परमहंसपरिव्राजकाचार्य्यभगवत्पूज्यपादशिष्यश्रीनित्यानन्दविरचितो वेदान्तप्रदीपः समाप्तः। समाप्तश्चायं ग्रन्थः।

विषयः। ब्रह्मणः जगज्जन्मस्थितिलयकारणत्वरूपं लक्षणत्रयमिति तन्निरूपणं। परिणामविवर्त्तयोः स्वरूपकथनं। जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जीवाश्रयप्रपञ्चाकारेण विवर्त्तमानतया उपादानमिति निरूपणं। ईश्वरलक्षणं। जीवलक्षणं। विश्वतैजसप्राज्ञादीनां लक्षणं। पारमार्थिक-व्यवहारिक-प्रातिभासिकभेदेन जीवस्य त्रैविध्यकथनं। ईश्वरस्य सर्व्वज्ञत्वसंस्थापनं। जीवस्य किञ्चिज्ज्ञत्वोपपादनं। आवरणविक्षेपशक्तिनिरूपणं। अध्यासादिस्वरूपविवेचनं। अद्वितीये ब्रह्मणि वेदान्तानां समन्वयकथनं। प्रपञ्चस्य मिथ्यात्वसंस्थापनं। कर्म्मणां चित्तशुद्धिद्वारा विद्योपयोगित्वकथनं। निर्गुणस्य ब्रह्मणः उपास्यत्वनिरूपणं। जीवन्मुक्तिनिरूपणं। अपवर्गकारणकथनमुखेन विविधवादकथनं। मुक्तस्य ब्रह्मभावापत्तिनिरूपणञ्च।

No. 2827. कृत्यचन्द्रिका। Substance, country-made paper, 13 × 4 inches. Folia, 120. Lines, 7 on a page. Extent, 3,019 ślokas. Character, Bengali. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámcháñd. Appearance, old. Prose and verse. Incorrect.

Kritya-chandriká. A calendar of the feasts and fasts enjoined in the Smritis, and including the rituals meet for such occasions. By Rudradhara Mahámahopádhyáya. This is distinct from the work noticed under No. 523 of Vol. II, p. 2.

Beginning. घनीभूतपरानन्दं प्रनम्य नन्दनन्दनं।
रुद्रधरेण क्रियते रम्येयं कृत्यचन्द्रिका॥

तत्रादौ विधिस्वरूपं निरूप्यते। अत्यन्तप्राप्तौ प्रापणं विधिः। तदुक्तं भट्टपादैः। विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते। इत्यादि।

End. अथ फाल्गुनामावास्या। तत्र लिङ्गपुराणे फाल्गुनतिथिप्रक्रमे विशेष उक्तः।

अमावास्यां तथः पूज्या रुद्रब्रह्मानलाख्या।
मांसौदनैः पूरिकाभिः पूतस्वात्मा सबान्धवः॥
अमावास्यां प्राप्य इति शेषः।

Colophon. इति महामहोपाध्यायश्रीरुद्रधरविरचिता कृत्यचन्द्रिका समाप्ता।

विषयः। विधिस्वरूपकथनादिकं। प्रतिपदादितिथिस्वरूपनिरूपणं। कालपरिमाणकथनं। मासादिमानकथनं। तिथिद्वैधनिरूपणं। एकभक्तव्रतनिरूपणं। नक्तव्रतविधिनिर्णयः। नक्षत्रव्रतनिर्णयः। अयाचितव्रतनिर्णयः। युग्मतिथिनिरूपणं। सामान्यतः प्रतिपन्निर्णयः। चैत्रप्रतिपत्माद्रप्रतिपत्कार्त्तिकशुक्लप्रतिपत्कृत्यनिरूपणं। तच मार्गपालीबन्धनविधिः। छष्टिकाकर्षणविधिः। बलिपूजनविधिः। द्वितीयानिर्णयः। भ्रातृद्वितीयाविधिः। तृतीयानिरूपणं। चैत्रशुक्लतृतीयां सौभाग्यशयनव्रतविधिः। अक्षयतृतीया। ज्येष्ठे रम्भातृतीयाविधिः। चतुर्थीनिर्णयः। चैत्रशुक्लचतुर्थीविधिः। वरदाचतुर्थीविधिः। नागचतुर्थीविधिः। गणेशचतुर्थीविधिः। पञ्चमीनिर्णयः। नागपञ्चमीविधिः। षष्ठीनिर्णयः। सप्तमीनिर्णयः। अष्टमीनिर्णयः। अशोकाष्टमीविधिः। जन्माष्टमीविधिः। ज्येष्ठाष्टमीविधिः। नवरात्रपूजाविधिः। कुमारीपूजाविधिः। कुण्डनिर्म्माणविधिः। बुधाष्टमीविधिः। नवमीनिर्णयः। श्रीरामनवमीविधिः। दशमीनिर्णयः। एकादशीनिर्णयः। तच उपवासस्वरूपकथनं। तच नित्यानित्यविवेचनं। हरिवासरसंज्ञाकथनं। उपवासप्रतिनिधिकथनं। स्त्रीणां व्रतविधिकीर्त्तनं। शुद्धविद्धयोः स्वरूपकथनादिकं। द्वादशीनिर्णयः। श्रवणद्वादशीविधिः। विष्णुशृङ्खलयोगकथनं। त्रयोदशीनिर्णयः। मदनत्रयोदशीविधिः। चतुर्दशीनिर्णयः। शिवरात्रिनिर्णयः। पूर्णिमानिर्णयः। उपाकर्म्मकालनिर्णयः। पवित्रारोपणविधिः। कोजागरलक्ष्म्यनिरूपणं। कार्त्तिकपूर्णिमायां काम्यदीपोत्सर्गविधिः। नीलदीपोत्सर्गविधिः। फाल्गुण्यां होलिकाविधिकथनं। योगविशेषकथनं। अर्द्धोदयादियोगकथनं। अमावास्यानिरूपणञ्च।

No. 2828. श्राद्धचन्द्रिका। Substance, country-made paper, 14 × 4½ inches. Folia, 112. Lines, 6 on a page. Extent, 2,372 ślokas. Character, Nágara. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámcháñd. Appearance, fresh. Prose and verse. Incorrect.

Śráddha-chandriká. A summary of the rules for the performance of S'ráddhas. By Rudradhara Mahámahopadhyáya. This is a companion volume to the work noticed under the next preceding No.

Beginning. गोविन्दं सच्चिदानन्दं जगदानन्दकन्दलं।
वन्दे वृन्दारकैर्वन्द्यं सानन्दं नन्दनन्दनं॥
चण्डेश्वरं गुरुं नत्वा मातरं पितरं तथा।
रुद्रधरेण क्रियते रम्येयं श्राद्धचन्द्रिका।

तच कल्पवत् श्राद्धपदवाच्यः।
सम्बन्धपदोपनीतान् पिण्डनुद्दिश्य द्रव्यत्यागः श्राद्धमिति वर्द्धमानः। इत्यादि।

End. पिण्डप्रतिपत्तिमाह मत्स्यपुराणं।
पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा।
तीर्थश्राद्धे सदा पिण्डान् क्षिपेत् तीर्थे विचक्षणः। इति।

Colophon. इति महामहोपाध्यायश्रीरुद्रधरकृता श्राद्धचन्द्रिका समाप्तिमागात्। समाप्तोऽयं ग्रन्थः।

विषयः। श्राद्धलक्षणादिनिरूपणं। श्राद्धकरणावश्यकतानिरूपणं। पार्व्वणस्य प्रतिमासकर्त्तव्यत्वविधानं। प्रतिपार्व्वणाशक्तस्य कर्त्तव्यत्वविधानं। सामान्यतः श्राद्धकालनिरूपणं। श्राद्धदेशनिरूपणं। श्राद्धदेवनिरूपणं। श्राद्धविधिकथनं। तच्च आसननिरूपणं। दर्भकथनं। अनुज्ञाकथनं। पिण्डपित्र्यज्ञातिदेशकथनं। कुशासनविधिः। आवाहनविधिः। अर्घ्यदानविधिः। गन्धादिदानविधिः। पुष्प-धूप-दीपाच्छादन-यज्ञोपवीतदानविधिः। पात्रक्षालनादिविधिः। श्राद्धपूर्व्वदिने निमन्त्रणविधिकथनं। ब्राह्मणलक्षणादिकथनं। अग्नौकरणविधिः। क्षतशेषदानविधिः। श्राद्धे विहितविहितविधानं। परिवेशनविधिः। अन्नोत्सर्गानन्तरकृत्यनिरूपणं। पिण्डदानविधिः। मलमासे सपिण्डीत्तरश्राद्धनिषेधः। जीवत्पितृकश्राद्धविधिः। मघाचयोदशीश्राद्धविधिः। तीर्थश्राद्धविधिः। नवोदकश्राद्धविधिः। नवान्नश्राद्धविधिः। अष्टकाश्राद्धविधिः। पौर्णमासीश्राद्धविधिः। अमावास्याश्राद्धकालादिनिरूपणं। एकोद्दिष्टश्राद्धविधिः। आभ्युदयिकश्राद्धविधिः। आद्यश्राद्धात् पूर्व्वकृत्यनिरूपणं। आद्यश्राद्धकालादिनिरूपणं। सपिण्डीकरणविधिः। साम्वत्सरिकश्राद्धविधानञ्च।

No. 2829. विवादचन्द्रिका। Substance, country-made paper, 14 × 4 inches. Folia, 235. Lines, 6 on a page. Extent, 4,826 ślokas. Character, Nágara. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámcháñd. Appearance, old. Prose and verse. Incorrect.

Viváda-chandriká. A digest of Smṛiti rules regarding jurisprudence and civil and criminal law. By Rudradhara Mahámahopadhyáya. This is another companion of the work noticed under No. 2827.

Beginning. कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारं।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि॥
मन्वादिशास्त्रमालोच्य ज्ञात्वा च विदुषां मतं।
कृता रुद्रधरेणेयं रम्या विवादचन्द्रिका॥
अथ ऋणादानं। तच्च दक्षस्मृतिः।
पदाङ्गसहितस्त्वेष विवादः परिकीर्त्तितः।
विवादकरणान्यत्र पदानि शृणु तानि तु॥ इत्यादि।

End. चातुर्व्वर्ण्यस्य या स्मृतिरसजात्यादिसम्भवा ।
तस्य धर्म्मः समुद्दिष्टा जातिः सा परिकीर्त्तिता ॥
असजातिरसवर्णं इत्यर्थः ।

Colophon. इति श्रीमहामहोपाध्यायश्रीरुद्रधरकृता विवादचन्द्रिका समाप्ता ।

विषयः । ऋणादानविवादपदनिरूपणं । अकृतदृद्धिनिरूपणं । परमदृद्धिनिरूपणं । दृद्धि निषेधः । आधिविधिकथनं । प्रतिभूविधिकथनं । उद्ग्रहणविधिकथनं । निक्षेपविधिः । अस्वामिविक्रयविधिः । सयम्भूसमुत्थानविधिः । दत्ताप्रदानिकविधिः । अभ्युपेत्य शुश्रूषाविधिः । दास्यमोक्षविधिः । वेतनस्यानपक्रियाविधिः । पण्यस्त्रीविधिः । स्वामिपालविवादनिरूपणं । संविद्व्यतिक्रमविधिः । विक्रीयासम्प्रदानविधिः । क्रीत्वानुशयविधिः । सीमाविवादनिरूपणं । सेतुविधिः । क्षेत्राक्षेत्रविधिः । शस्यरक्षादिविधिः । अदण्ड्यनिरूपणं । वाक्पारुष्यविधिः । दण्डपारुष्यविधिः । स्तेयादिविधिः । प्रकाशतस्करातस्कराद्यन्वेषणविधिः । तद्दितदेशविधिः । साहसदण्डविधानं । घातकान्वेषणविधिः । सङ्ग्रहणविधिः । अभिगमदण्डविधानं । कन्यादूषणविधिः । वन्ध्यादिगमनविधिः । स्त्रीपुंधर्म्मविधिः । स्त्रीरक्षाविधिः । प्रोषितभर्त्तृकाधर्म्मः । मृतभर्त्तृकाधर्म्मः । नियोगविधिः । परपूर्व्वाविधिः । दायभागविवेचनं । तत्र जीवत्पितृक-विभागः । अनेकप्रमीतमातृकपितृकविभागः । विभागानधिकारिणः । अविभाज्यनिरूपणं । स्त्रीधनलक्ष्यं । स्त्रीधनविभागः । अप्रजस्त्रीधनविभागः । अवरुद्धधनविभागः । नानावर्णविभागः । विभक्तजविभागः । क्षेत्रज-पौनर्भव-कानीन-गूढोत्पन्न-सहोढ दत्तक-क्रीत स्वयमुपागत-अपविद्ध-क्षत्रिम-शूद्रापुत्रादिविभागादिककथनं । पुत्रत्वविवेचनं । पुत्रातिदेशनिरूपणं । निन्दितपुत्रकथनं । अपुत्रधनविभागः । संसृष्टधनविभागः । विभागनिर्णयः । विभक्तकृत्यनिरूपणं । द्यूतसमाह्वयविधिः । क्रियाभेदविधिः । प्रकीर्णकविधिकथनं । शुल्कदिविधिः । दण्डप्रणयनविधिः । दण्डोत्कर्षापकर्षादिविधिः । ब्राह्मणपरिहारविधिः । नगरपरिहार-विधिः । दण्डसंज्ञाविधिः । मानसंज्ञाविधिः । नैगमादिसंज्ञाविधानकीर्त्तनञ्च ।

No. 2830. प्रायश्चित्तविवेकः । Substance, country-made paper, 13 × 4 inches. Folia, 76. Lines, 6 on a page. Extent, 1,596 ślokas. Character, Bengali. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámcháńd. Appearance, fresh. Prose and verse. Correct.

Práyaśchitta-viveka. A summary of the Smṛiti rules regarding expiations. By S'ríkara A'chárya. This is distinct from the work noticed under No. 415, Vol. I, p. 236.

Beginning. प्रणम्य कामदं रामं सच्चिदानन्दविग्रहं ।
प्रायश्चित्तविवेकोऽयं श्रीनाथेन वितन्यते ॥

तत्रादौ प्रायश्चित्तस्वरूपं विविच्यते। हारीतः प्रयतत्वाद्दोषचितमशुभं नाशयतीति प्रायश्चित्तं। इत्यादि।

End. सम्वर्त्तः। विष्णुचभक्षणे विप्रः प्राजापत्यं समाचरेत्। एतद्बलात्कारविषयं इति शूलपाणिः। वस्तुतस्तु बलात्कारे अज्ञानादाधिक्यं ज्ञेयमिति।

Colophon. इति महामहोपाध्यायश्रीकराचार्य्यसूनुश्रीनाथाचार्य्यविरचितः प्रायश्चित्तविवेकः समाप्तः।

विषयः। प्रायश्चित्तस्वरूपकथनं। महापातकादिनिरूपणं। गुरुप्रायश्चित्ते लघुपापनाशकथनं। विजातीयप्रायश्चित्तादुविजातीयपापनाशकथनं। तत्प्रसङ्गनिरूपणं। चान्द्रायणादौ भोजनपरिसंख्याकथनं। प्रायश्चित्तोपदेशविधिकथनं। प्रायश्चित्तपूर्व्वाङ्गकृत्यं। बाल्यादिभेदात् प्रायश्चित्तविधिकथनं। धेनुमूल्यव्यवस्थाकथनं। ब्रह्महत्यादिप्रायश्चित्तकथनं। ज्ञानकृतादिनिरूपणं। अतिपातकोपपातकप्रायश्चित्तविधिकथनं। विप्रादिस्वामिगोवधप्रायश्चित्तं। एकाहायनादिगोवधप्रायश्चित्तं। रोधादिनिमित्तकगोवधप्रायश्चित्तं। गोवधापवादकथनं। रजस्वलास्पर्शप्रायश्चित्तं। अन्त्यजस्त्रीगमनभोजनप्रायश्चित्तं। चण्डालान्नभोजनप्रायश्चित्तं। उच्छिष्टस्य चण्डालादिस्पर्शप्रायश्चित्तं। गोमांसादिभक्षणप्रायश्चित्तं। यज्ञोपवीतच्छेदनादिप्रायश्चित्तं। क्रोधादुभार्य्यायां माद्यत्यादिवदतः प्रायश्चित्तं। अभक्ष्यभक्षणप्रायश्चित्तं। रेतोमूत्रपुरीषभक्षणप्रायश्चित्तकथनञ्च।

No. 2831. शुद्धिविवेकः। Substance, country-made paper, 13 × 4 inches. Folia, 128. Lines, 5 on a page. Extent, 1,960 ślokas. Character, Bengali. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámachánd. Appearance, fresh. Prose and verse. Correct.

Śuddhi-viveka. A digest of the Smṛiti rules regarding purification. By Śrínátha A'chárya, son of Śríkara A'chárya. This is distinct from Nos. 949 and 1736, noticed in Vols. II, 338 and V, 25, respectively.

Beginning. प्रणम्य सच्चिदानन्दं वागीशं जगतां प्रभुं।
श्रीरामं कमलाकान्तं परमात्मानमीश्वरं।
श्रीकराचार्य्यपुत्रेण श्रीनाथेन सतां मुदे।
विवेकः शुद्धिविषये क्रियते परमादरात्॥

तत्रादौ शुचितत्कालजीवी कर्म्म कुर्य्यादितिश्रुत्या शुद्धिरहितस्य कर्म्मण्यनधिकारावगमात् प्रथमतः अशौचं निरूप्यते। इत्यादि।

End. दक्षिणहस्तेन अस्थिसञ्चयमादाय दक्षिणां दिशं पश्यन् ओं नमोऽस्तु धर्म्मराजायेति जलं प्रविश्य स मे प्रीतो भवत्वित्युच्चार्य्य प्रक्षिपेत् । इति

Colophon. इति श्रीमहामहोपाध्यायश्रीकराचार्य्यसूनुश्रीनाथाचार्य्यविरचितः शुद्धिविवेकः समाप्तः । समाप्तश्चायं ग्रन्थः ।

विषयः । अशौचपदार्थविवेचनं । अशौचसङ्करनिरूपणं । गर्भस्रावाशौचं । स्त्र्यशौचं । बालाद्यशौचं । सगुणाद्यशौचं । विदेशस्थाशौचं । सपिण्डाद्यशौचं । मृत्युविशेषाशौचं । सद्यःशौचं । श्वानुगमनाद्यशौचं । सहानुगमनविधिकीर्त्तनं । मुमूर्षुकृत्यनिरूपणं । पर्णनरदाहविधिः । ब्रह्मशुद्धिनिरूपणं । उदकादिदानविधिः । शोकापनोदनं । अशौचान्तद्वितीयदिनकृत्यनिरूपणं । प्रेतक्रियाधिकारिणः । दानविधिः । दशोत्तरगविवेचनं । चन्दनधेनुविधिः । सापिण्ड्यादिनिरूपणं । अन्त्येष्टिविधिः । अस्थिप्रक्षेपविधिकीर्त्तनञ्च ।

No. 2832. नृसिंहचम्पूः । Substance, country-made paper, 8 × 3 inches. Folia, 22. Lines, 8 on a page. Extent, 508 ślokas. Character, Nágara. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámachánd. Appearance, new. Prose and verse. Correct.

Nṛisiñha-champú. A poetico-prose romance founded on the story of Prahláda. By Kes'ava Bhaṭṭa, of the family of Laugákshi.

Beginning. कनकरुचिदुकूलः कुण्डलोल्लासिगण्डः
भ्रमितभुवनभारः कोऽपि लीलावतारः ।
त्रिभुवनसुखकारी शेषशायी मुकुन्दः
परिकलितरमाङ्गो मङ्गलं नस्तनोतु ॥
लीलोगाच्चिकुलारविन्दतरणिर्मध्यन्दिनाम्नाथवि-
न्मीमांसायुगतन्त्रतर्कचतुरः साहित्यरत्नाकरः ।
काव्यं श्रीहरेः करोति सुकृती गोदानटप्रश्नसत्-
पुण्यस्तम्भनिवासिकेशवसुतानन्नात्मजः केशवः ।
विष्णोर्नाभिसरोरुहे कमलभूः पाथोनिधौ माधवः
कैलासे सपरिग्रहस्त्रिनयनः पातालगः पन्नगः ।
कस्मिंश्चित्कालमर्मस्त चारुवसतिं स्लाघ्यामहो यद्वया-
द्वेषोपप्लवकल्पिरण्यकशिपुर्दैत्याधिराजोऽभवत् ॥ इत्यादि ।

End. काव्यं कर्त्तुमजानतापि सचिरा चम्पूरियं गुम्फिता
श्रीलक्ष्मीहरिप्रतापमहिमा शेषोऽयं समुज्जृम्भते ।

यत् स्रुते सलिलं निताम्बविमलं चन्द्रोपलं शीतलं
सोऽयं सान्द्रसुधामयस्य महिमा शीतद्युतेः केवलं ॥

Colophon. श्रीमल्लोगाक्षिकुलोत्पन्नभट्टकेशवविरचितं हरिहरचम्पूकाव्यं समाप्तं ।

विषयः । प्रथमस्तवके,—हिरण्यकशिपुतेजःप्रचयेन प्रतप्तानां सुमनसां ब्रह्मलोकगमनपूर्व्वकं सार्द्धं तेन विष्णुलोकगमनादिवर्णनं । प्रह्लादस्य जन्मादिवर्णनं ।

२ये स्तवके,—अथ कदाचित् चतुराधिपः दण्डनीतिप्रबोधाय प्रह्लादं भार्गवस्य निजकुलगुरोर्गेहे प्रेषयामास । तत्र अध्ययनारम्भसमये वन्दितमुकुन्दचरणारविन्दं प्रह्लादं प्रतिप्रकुपितो भार्गवः एवं प्राह, रे दुरात्मन् ! किं जल्पसि, तदिदानीमुपदिशामि सम्यगाकर्ण्य नोदीरय हरेरभिधामपीति । अथ हालाहलकल्पं जल्पनमेतदाकर्ण्य खिन्नहृदयः स गुरोः समीपे सनातनधर्म्मप्रतिष्ठां कथयामास । ३ये स्तवके,—प्रह्लादमुखात् हरिभक्तिमाहात्म्यं निशम्य 'विषमे पथि गन्तुं प्रवृत्तोऽयमिति' निश्चित्य दैत्याधिपः विविधमुपायमन्वतिष्ठत् यदा प्रह्लादं ततो निवर्त्तयितुं न प्रबभूव तदा शस्त्रादिना व्यापादयेदमिति दानवानादिदेश । अथ जलाग्निविषप्रयोगगह्वरपातनादितो भगवत्कृपया प्रह्लादस्य रक्षावर्णनं । तत्र तत्र प्रह्लादकृतस्तोत्रकौशलञ्च । ४र्थे—५मे च स्तवके नृसिंहरूपेण भगवदाविर्भाववर्णनं । तदर्शनेन भीतयोः हिरण्यकशिपुतत्पत्न्योश्चेष्टितादिवर्णनं । अथ दैत्याधिपं विदीर्णमाकर्ण्य प्रमुदितमनसः सर्व्वे सुमनसः तत्र समेत्य हरेः पुरतो गन्तुमशक्ताः सन्तष्टुवुः । तत्र देवगणकृतस्तोत्रकौशलं । हरेः क्रोधानलोपशान्तिमपश्यतां ब्रह्मादीनां केवलं गमनपौर्व्वापर्य्योपदेशरचनयैव अवकाशपरिकल्पनवर्णनं । पद्मायाः आगमनादिवर्णनं । प्रह्लादकृतभगवत्क्रोधशान्तिवर्णनं । देवान् प्रति प्रेत्यकं भगवत आप्यायनवर्णनं । प्रह्लादस्य राज्याभिषेकमहोत्सववर्णनञ्च ।

No 2833. वाग्भूषणकाव्यम् । Substance, country-made paper, 8 × 3 inches. Folia, 20. Lines, 4 on a page. Extent, 200 ślokas. Character, Nágara. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámacháñd. Appearance, fresh. Verse. Correct.

Vágbhúshaṇa-kávya. A poem giving illustrations of a variety of verbal poetical ornaments. By Rámachandra.

Beginning. विप्राधिपारिरिपुसूनुविरोधितातो
मिथात्मजारिजनकारिसुताङ्कसंस्थः ।
पार्थोपजाप्यजनकाग्रजनग्रजुष्क-
ज्येष्ठो ददातु कुचमध्यमुखः सुखं वः ॥ १ ॥

End. पाण्ड्य पण्डितमण्डिते मलजाप्रीतावपर्णीजलैः

पूते नीहतिसम्भवेन गुरुणा श्रीरामचन्द्रेण मे ।
इत्थं गूढपदं मतिप्रदमहो वाग्भूषणाख्यं कृतं
काव्यं व्याक्रियतेऽत्र येन विदुषा तं तं नमामो वयं ॥ १ ॥

Colophon. इति श्रीरामचन्द्रकृतं वाग्भूषणकाव्यं सम्पूर्णं ।

विषयः । प्रहेलिकाश्लेषादिमयैः श्लोकशतकैः देवानां स्तोचकीर्त्तनं ।

No. 2834. वाग्भूषणव्याख्या । Substance, country-made paper, 8 × 3 inches. Folia, 25. Lines, 6 on a page. Extent, 486 ślokas. Character, Nágara. Date, ? Place of deposit, Naśípur, Zillá Murshidábád, Rájá Rámachánd. Appearance, fresh. Prose. Correct.

Vágbhúshaṇa-vyákhyá. A commentary on the poem noticed under the next preceding No. By Rámachandra, the author of the poem.

Beginning. भवभयहरमेकं भानुकोटिप्रकाशं
करधृतशरचापं कालमेघावभासं ।
कनकरुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं
कमलविशदनेत्रं सानुजं राममीडे ॥
नत्वा गुरुं राममभीष्टदेवं
भक्तस्तयोः स्वेन कृतस्य तन्वीं ।
काव्यस्य वाग्भूषणसंज्ञकस्य
व्याख्यां करोति स्म स रामचन्द्रः ॥ विप्रेति ।

End. काव्यस्य वाग्भूषणसंज्ञकस्य
गूढ़ाक्षरस्य स्वकृतस्य चित्रां ।
व्याख्यां प्रचक्रे शतकस्य सूरि-
र्विद्वन्मुदे भार्गवरामचन्द्रः ॥

Colophon. इति श्रीरामचन्द्रकृता वाग्भूषणव्याख्या समाप्ता ।

विषयः । निजकृतवाग्भूषणकाव्यस्य व्याख्यानं ।

No. 2835. नायकरत्नम्, वा न्यायरत्नम् । Substance, palm-leaf, 15 × 1 inches. Folia, 105. Lines, 4 on a page. Extent, 1,890 ślokas. Character, Uriyá. Date, ? Place of deposit, Purí, Śaṅkara Áchárya's Maṭha. Appearance, decayed. Prose. Generally correct.

Náyaka-ratna ALIAS **Nyáya-ratna.** A commentary on Pártha-sárathi Miśra's *Nyáya-sútra-málá.* By Rámánuja A'chárya. The text has been noticed under Nos. 1557 and 1887, Vols. 1V, 134, and V, 203 respectively. This is probably the same with Mr. Hall's *Nyáya-ratna,* Contributions, p. 28.

Beginning. (प्रथमतः अष्टौ पत्राणि खण्डितानि ।)

अध्यापनविधिप्रयुक्तलेनैवाध्ययनानुष्ठानसिद्धेरनाकाङ्क्षितलेनाङ्गमपि तन्न स्वीकार्य्यमिति भावः । ननु यद्यर्थज्ञानं न प्रयोजनं स्यात् । इत्यादि ।

End. तस्य करणं निगमयति पार्थसारथिमिश्रेणेति ।

विच्छिन्नसर्व्वसन्देहा सर्व्वग्रन्थहितैषिणी ।
जानवेद्गुरुव्याख्या लोके विजयतेतरां ॥

Colophon. इति श्रीरामानुजाचार्य्यविरचिते न्यायरत्नमालाव्याख्याने नायकरत्ने नित्यकाम्यविवेकव्याख्यानं समाप्तं ।

विषयः । पार्थसारथिमिश्रकृतन्यायरत्नमालाभिधानमीमांसाप्रकरणस्य व्याख्यानम् ।

No. 2836. धर्म्ममीमांसापरिभाषा । Substance, palm-leaf, 18 × 1¼ inches. Folia, 11. Lines, 5 on a page. Extent, 203 ślokas. Character, Nágara. Date, ? Place of deposit, Purí, Rámadása Maṭha. Appearance, new. Prose. Generally correct.

Dharmamímáñsá-paribhásha. An epitome of the Mimáñsá Sútra of Jaimini. By Apyayí Díkshita, son of Rañgarája Adhvarívara, of the race of Bharadvája.

Beginning. अथ धर्म्ममीमांसाशास्त्रे द्वादशाध्याय्यामथातो धर्म्मजिज्ञासेति सूत्रे प्रमाणस्वरूपसाधनफलैः साभासैः धर्म्मस्य विचारं प्रतिज्ञाय तत्र प्रथमेऽध्याये प्रमाणं निरूपितं । इत्यादि ।

End. साचे ऽर्थतः, सोपकारः शास्त्रप्रसङ्गः इत्यादिरूपेण द्वादशे प्रसङ्गः सापवादो निरूपितः ॥

Colophon. इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमद्वेङ्कटविद्यार्य्यविरञ्जिदुपाजिरराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतिर्धर्म्ममीमांसापरिभाषा समाप्ता ।

विषयः । संक्षेपेण मीमांसासूत्रस्य द्वादशाध्यायविवरणकथनं । तत्र अधिकरणस्वरूपादिविवेचनं । अतिदेशस्वरूपादिविवेचनं । ऊहस्वरूपादिविवेचनं । क्वचित् प्रत्यक्षानात् प्राप्तपदार्थानां निष्टत्तिकथनं । सापि अनेकधा । अथाहि,—क्वचिदुपदिष्टपदार्थगतगुणनैर-

पेक्षविरोधानिष्टप्तिः । क्वचिदविरोधेऽपि नैरपेक्ष्यान्निष्टप्तिः । क्वचिन्नैरपेक्ष्याभावेऽपि नियमव-
श्यान्निष्टप्तिः । क्वचित् प्रतिषेधात् प्राक्षातपदार्थनिष्टप्तिश्चेति । तल्लक्षणनिरूपणं । तच्च त्रिविधं
फलतन्त्रं पदार्थतन्त्रं अनुष्ठानतन्त्रञ्चेति । प्रसङ्गनिरूपणं । स च अनुष्ठानप्रसङ्गः पदार्थप्रसङ्गः
शास्त्रार्थप्रसङ्गश्चेति त्रिधेतिनिरूपणञ्च ।

No. 2837. वाङ्मयविवेकः । Substance, palm-leaf, 16 × 1¼ inches. Folia, 103. Lines, 6 on a page. Extent, 3,321 ślokas. Character, Uriyá. Date, 38th year of the reign of king Mukunda. Place of deposit, Purí, Śaṅkara Áchárya's Maṭha. Appearance, new. Prose and verse. Incorrect.

Vánmaya-viveka. A treatise on versification. By Chintámaṇi Mis'ra.

Beginning. प्रणतशिरसो यत्पादाब्जे स्खलन्ति गिरः + +
रपि जड़धियो रिङ्गद्भक्तातरङ्गसुनिर्मलाः ।
रचितनुतयो वागीशाद्याः सदा यमुपासते
भवभयभिदे तस्मै नारायणाय नमो नमः ॥
— — — — — — —।
आसीदासिन्धुवेलावनितलविमलीकारिकीर्त्तीन्दुरश्मि-
र्भारद्वाजान्ववायाम्बुरुहवनरविर्विष्णुभक्त्येकतानः ।
विद्वद्वादीभसिंहः सुललितकविताकालिदासावतारः
श्रीसिद्धेश्वस्य सूनुर्जगति हरिहरो वाजपेयी चिताग्निः ॥
— — — — — — — —।
य उत्कलेशा + + दीक्षिताख्यः लब्धप्रसिद्धिर्विदुषामधीशः ।
सदातिथेयस्यृणीयकीर्त्तिराजन्मदूरीकृतनिन्द्यमार्गः ॥
नारायणपदाम्भोजचञ्चरीकारिताम्बरः ।
तस्य चिन्तामणिर्नाम सूनुः श्रीमा + कोऽजनि ॥
यः सम्बरारिचरितं जिगिरेबधञ्च
कादम्बरीरससुधामसभाप्रमोदं ।
अच्छावलीमपि च कंसवधञ्च कृत्य-
पुष्पाञ्जलिसमितिवर्णनमप्यकार्षीत् ॥
येन प्राक्तन्त्रि संक्षेपाद्भिधानसमुच्चयः ।
गद्यं कृपातरञ्चैव वासुदेवस्तवाश्रयं ।
— — — — — —।

वाङ्मयं नाम या काचिद्वर्णानां सन्ततिर्बुधैः ।
छन्दोऽपराभिधा नेह लोके सम्परिकीर्त्यते ॥ इत्यादि ।

End. कौशीयं (?) वराटीयां दीपिकां रत्नमालिकां ।
तथा महाकविज्ञतान् प्रयोगानभिगम्य च ॥
वीक्ष्य सम्यग्विचार्य्यैव तेषां ग्रन्थैः कृतो यतः ।
महाङ्मयविवेकोऽयमशङ्कं स्टब्धतां जनैः ॥
शरमुनिरसवेदमिते सम्प्राप्ते कलियुगस्याब्दे ।
चेचे श्रीपुरुषोत्तमनाम्नि ग्रन्थोऽयमाचरितः ॥
खलतैः परक्षितैश्च सलक्ष्यैरिह लक्षणैः ।
ग्रन्थाः शतद्वययुताः संख्याताखिलसद्वकाः ॥

Colophon. इति श्रीचिन्तामणिमिश्रविरचिते वाङ्मयविवेके गद्यपद्याभिधानाख्यः । पूर्णः षष्ठः परिच्छेदः ।

श्रीमन्मुकुन्दहपतेरटचिंशकेचके रामभिश्रेण ।
ज्यैष्ठे मासि दशम्यां वाङ्मयविवेको मयालेखि ॥

विषयः । छन्दोलक्षणादिनिरूपणम् ।

No. 2838. विष्णुभक्तिचन्द्रोदयः । Substance, palm-leaf, 18 × 1¼ inches. Folia, 175. Lines, 4 on a page. Extent, 2,697 ślokas. Character, Nágara, Date, ? Place of deposit, Purí Rámadása Maṭha. Appearance, fresh. Prose and verse. Incorrect.

Vishṇu-bhakti-chandrodaya. A treatise on devotion to Vishṇu, supplying rules for the observance of all the principal Vaishṇava fasts, festivals, and ceremonies, and describing in detail the duties of Vaishṇavas. By Nṛisiñháraṇya Muṇi.

Beginning. वन्देऽहं श्रीपदसिंधेयं पुण्यारण्यं गुरूत्तमं ।
श्रीरामभन्त्रराजञ्च वैष्णवाह्लादसिद्धये ॥
आविर्बभूव लोकेऽस्मिन् सङ्कल्पाह्लाददायकः ।
श्रीविष्णुभक्तिचन्द्रोऽयं विष्णुप्रेमाब्धिवर्द्धनः ॥
तस्य श्रुतेरेककलात्मकस्य कृपा + नेका + तमः प्रवन्धः ।
श्रेयिस्समेतीन्द्रिय + + ग्रन्था नालाकराधामगतौ कृतार्था ॥ इत्यादि ।

End. श्रीविष्णुभक्तिचन्द्रोदयः सतृषोड्शकलायुतः।
सेव्यतां सेव्यतां मत्स्वङ्गवङ्गक्लिन्नवर्द्धनः॥
— — — — — —।
ऋसिंहारणविख्यातो विष्णुधर्म्मप्रकाशकः।
विचार्य्य विष्णुशास्त्राणि चक्रे ग्रन्थं महामुनिः॥

Colophon. इति श्रीऋसिंहारणमुनिविरचिते श्रीविष्णुभक्तिमन्त्रोदये ग्रन्थे षोड्शकलाप्रकरणं। समाप्तोऽयं ग्रन्थः॥

विषयः। गुरुपत्तिविधिकथनं। शिष्यलक्षणकथनं। गुरुलक्षणकथनं। श्रीवैष्णवदीक्षाग्रहणस्य आवश्यकताकथनं। विष्णुमन्त्रमाहात्म्यकीर्त्तनं। मन्त्रसाधनप्रकारकथनं। तत्र ध्यानादिप्रकारनिरूपनं। पुरश्चरणविधिकथनं। मन्त्रसिद्धिलक्षणकथनं। वैष्णवानामाह्निककृत्यविधिकथनं। तत्र प्रातःकृत्यविधानकथनं। ब्रह्मध्यानविधिकथनं। जलपार्थिवभस्मादिसप्तविधस्नाननिरूपणं। अभिषेकविधिकथनं। प्राणायामविधिकथनं। अघमर्षोदयाग्ने स्रोत्रपाठादिविधिकथनं। शालग्रामशिलामाहात्म्यकथनं। तिलकधारणविधिकथनं। सर्व्वतोभद्रादिमण्डलविधिकथनं। विष्णुस्नानसम्मार्ज्जनादिविधिकथनं। विष्णुपादोदकमाहात्म्यकथनं। रक्तवस्त्रादिधारणप्रतिषेधपूर्व्वकं शुक्लवसनधारणविधिकथनं। ऊर्द्धपुण्ड्रधारणादिविधिकथनं। गोपीचन्दनादिमाहात्म्यकीर्त्तनं। तप्तशङ्खचक्रादिचिह्नधारणावश्यकताकथनं। तुलस्यादिमालाधारणविधिनिरूपणं। प्रथमतो गुरुपूजाविधिकथनं। शालग्रामशिलालक्षणादिनिरूपणं। विष्णोर्म्महास्नपनविधिकथनं। ततो घण्टावादनमाहात्म्यकथनं। तुलसीचन्दनादिदानमाहात्म्यकथनं। चामरादिव्यजनमाहात्म्यकथनं। केतक्यादिपुष्पदानमाहात्म्यकीर्त्तनं। आरात्रिकविधिकथनमुखेन धूपदीपादिदानविधिकथनं। विष्णुपादोदकमाहात्म्यादिकथनं। विशेषेण तुलसीमाहात्म्यकथनं। तुलसीपूजनविधिकथनं। वैष्णवलक्षणादिकथनं। श्रीमद्भागवतमाहात्म्यकथनं। विष्णुकथाश्रवणादिमाहात्म्यकथनं। भागवतधर्म्मनिरूपणं। प्रेमभक्तिलक्षणतच्चिह्नादिकीर्त्तनं। विष्णुभक्तिस्वरूपादिनिरूपणं। तत्र अविहित-विहितादिभेदेन तद्विभागकथनं। श्रवणकीर्त्तनादिलक्षणकथनं। तत्तन्माहात्म्यकथनञ्च। साधुसङ्गमाहात्म्यकथनं। अथ मध्याह्ने भगवत्पूजाविधिकथनं। भगवन्निवेदितवस्तुग्रहणकथनमुखेन दाननिवेदनयोः स्वरूपभेदनिरूपणं। भगवन्नैवेद्यमाहात्म्यकथनप्रसङ्गेन पित्रश्राद्धादौ तदानावश्यकताकथनं। सायाह्ने विष्णोराराधनविधिकथनं। विष्णोर्नाममाहात्म्यादिकीर्त्तनं। विष्णोः पुरतः नृत्यगीतादिकरणमाहात्म्यकथनं। चतुःषष्ट्युपचारेण विष्णोराराधनविधिकथनं। एकादशीमाहात्म्यादिकथनं। तद्व्रतोपवासादिविधिनिरूपणं। दशमीसंहतसवविधिनिरूपणं। अष्टमहाद्वादशीमाहात्म्यादिकीर्त्तनं। हरिवासरजागरणमाहात्म्यकथनं। पारणादिविधिकथनं। अथ दोलयात्राविधिकथनादिकं। एवं क्रमेण द्वादशमासीययात्राविधिकथनं। ऋतुविशेषे पुष्पविशेषदानविधिकथनं। जन्माष्ट-

भौमाहात्म्यादिकथनं । तच पूजाविधिकथनञ्च । श्रवणद्वादशीविधिकथनं । कार्त्तिकमासमाहात्म्यकथनं । प्रबोधन्येकादशीमाहात्म्यकथनं । अथ विशेषेण रथयात्राविधिकथनं । माघमाहात्म्यकथनं । तच परशुरामार्चनविधिकथनञ्च ।

No. 2839. रामरहस्यम्, सदाशिवसंहितोक्तम् । Substance, palm-leaf, 17 × 1¼ inches. Folia, 106. Lines, 4 on a page. Extent, 1,643 ślokas. Character. Nágara. Date, ? Place of deposit, Purí, S'rírámadása Maṭha. Appearance, new. Verse. Generally correct.

Ráma-rahasya. On devotion to Ráma as the Supreme Divinity. Anonymous. It professes to be an extract from the Sadáśiva Saṁhitá, and is quite distinct from the work of this name noticed under No. 2663 *ante*, p. 125.

Beginning. चक्षुःपादोरुरोभिश्च वाचया हृदयेन च ।
रामं स्मरामि भक्तानां भजमानं मनोरथान् ॥
वेत्तारं रामकामानां वक्तारं शृण्वतां सतां ।
लक्ष्मीवन्तं ससक्तजातं लक्षणमाश्रये ॥
रामरामरहस्यानि सङ्ग्राह्याणि प्रकुर्व्वते ।
तिरस्कुर्व्वत आमुक्तैर्युक्तोऽञ्जलिर्हनूमते (?) ॥
कैलासे मेरुसङ्काशे नानारत्नविचित्रिते ।
नानागुल्मलतास्तोमद्रुमराजिविराजिते ॥
सर्व्वदा सुखमासीनौ नानाख्यानककोविद+ ।
सर्व्वज्ञौ सर्व्वलोकेशौ पार्व्वतीपरमेश्वरौ ॥
रम्ये वसन्तसमये कामुकोत्सवबर्द्धने ।
कदाचित् कौतुकाविष्टौ चक्रतूरसवत्कथां ॥ इत्यादि ।

End. रामध्यानप्रभावेण रामनामानुकीर्त्तनैः ।
विमला पार्व्वती नाम लोकपूज्या हि वर्त्तते ॥
पार्व्वतीशिवरामाणां सीतायाश्च विशेषतः ।
प्रसादं लभते सद्यः श्रोता वक्ता च कारकः ॥

Colophon. इति श्रीसदाशिवसंहितायामुमामहेश्वरसंवादे श्रीरामरहस्ये विंशोऽध्यायः । समाप्तोऽयं ग्रन्थः ।

विषयः । शिवाशिवयोः संवादेन श्रीराममाहात्म्यकथनं । साधुसङ्गमाहात्म्यकथनं ।

विष्णुभक्तिप्रशंसाकीर्त्तनं। भगवद्दास्यमाहात्म्यकथनं। रामनाममाहात्म्यकथनं। वासुदेवसङ्कर्षण-प्रद्युम्नानिरुद्धरूपचतुर्व्यूहनिरूपणं। रामस्य परब्रह्मत्वकथनं। रामकृष्णजानकीकुण्डादिमाहात्म्यकथनं। गोमतीतीरे गोपगोपीभिः सार्द्धं श्रीरामस्य क्रीड़ादिवर्णनं। श्रीरामस्य लीलाध्यानप्रकारकथनं। सीतामाहात्म्यकथनं। अशोकवने सीतया सह रामस्य विलासवर्णनं। सीतारामयोर्विश्रम्भालापादिवर्णनं। नयोरनुरागेङ्गितादिवर्णनञ्च। सहखेण स्त्रीणां सार्द्धं रामस्य रासलीलावर्णनं। सीतायाः मानादिवर्णनं। सीतारामयोरुक्तिप्रत्युक्तिवर्णनव्याजेन सम्भोगवर्णनं। सीतायाः कन्दुकक्रीड़ावर्णनं। प्रमत्तानां सीतादीनां कलहवर्णनं। रामस्य ब्रह्मस्वरूपत्ववर्णनं। सत्त्वरजस्तमोगुणानां कार्य्यभेदकथनं। भगवल्लीलानुकरणमाहात्म्यकीर्त्तनं।

No. 2840. सुदर्शनशतकम्। Substance, foolscap-paper, 15 × 5 inches. Folia, 25. Lines, 4 on a page. Extent, 250 ślokas. Character, Nágara. Date, ? Place of deposit, Purí, Rághavadása Maṭha. Appearance, new. Verse. Generally correct.

Sudarśana-śataka. A century of verses in praise of the Sudarśanachakra of Vishṇu. By Kuranáráyaṇa.

Beginning सौदर्शन्यूज्जिहाना दिशि विदिशि तिरस्कृत्य सांविग्नमर्च्चि-
वौच्चावाच्चान्धकारच्चतजगदगदङ्कारभूम्ना स्वधाम्ना।
दोःखर्ज्जूदूरगर्ज्जद्दिवृधरिपुवधूकण्ठकैवल्यकल्पा
ज्वाला जाज्वल्यमाना वितरतु भवतां वीप्सयाभीप्सितानि ॥ १ ॥
प्रत्युद्यातं मयूखैर्नभसि दिनकृतः प्राग्नसेवं प्रभाभि-
र्भूमौ सौमेरवीभिर्दिवि परिवसितं दीप्तिभिर्दैवधाम्नाम्।
भूयस्यै भूतये यः स्फुरतु सकलदिग्भ्रान्तसान्द्रस्फुलिङ्गं
चाक्रं जाग्रत्प्रतापं त्रिभुवनविजयव्यग्रमुग्रं महस्तत् ॥ इत्यादि।

End. पद्यानां तत्त्वविद्याद्युमणिगि + + वौद्यङ्कसंख्याधराणाम्
अर्च्चिष्यङ्केषु नेत्र्यादिषु च परमतः पुंसि षड्विंशतिश्च।
सङ्ख्यैः सौदर्शनं यः पठति शतमिदं कूरनारायणेन
स्रोचं निर्विष्टभोगो भजति स परमां चक्रसायुज्यलक्ष्मीं ॥

Colophon. इति सुदर्शनशतकं समाप्तम् ॥

विषयः। स्रोचव्याजेन सुदर्शनचक्रस्य अरनाभिज्योतिरादिवर्णनं।

No. 2841. सुदर्शनशतकव्याख्यानम्। Substance, foolscap-paper, 15 × 5 inches. Folia, 50. Lines, 9 on a page. Extent, 1,630 ślokas. Character, Nágara, Date, Sm. 1932. Place of deposit, Purí, Rághavadása Maṭha. Appearance, new. Prose. Generally correct.

Sudarśanaśataka-vyákhyana. A commentary on the work noticed under the next preceding No. Anonymous.

Beginning. रङ्गेशविघ्ननिकरा+यस्य चकार चक्रेशनुतिं निहत्तये।
समाश्रयेऽहं वरपूरणीयं तं कूरनारायणनामिनं + ॥

वाङ्मेति। वाङ्मश्च अवाङ्मश्च तौ च तावन्यकारौ च। — — — वाङ्मेषु विषयेषु अभीष्येषु सक्चन्दनादिषु विषयेषु भोग्यताभ्रान्तिः॥ इत्यादि।

End. सौदर्शनं स्तोत्रं यः पठति स पुरुषः निर्विष्टभोगः, उपभुक्त इह लौकिकसुखः। तदनन्तरं परमां चक्रसायुज्यलक्ष्मीं प्राप्नोति।

Colophon. इति सुदर्शनशतकव्याख्यानं समाप्तं। संवत् १९३९।

विषयः। कूरनारायणकृतसुदर्शनशतकस्य व्याख्यानम्।

No. 2842. कालमाधवीयविवरणम्। Substance, country-made paper, 12 × 4 inches. Folia, 65. Lines, 11 on a page. Extent, 2,188 ślokas. Character, Nágara. Date, ? Place of deposit, Purí, Gopála Tírtha Maṭha. Appearance, new. Prose. Correct.

Kálamádhavíya-vivaraṇa. A gloss on the Kálamádhavíya, a treatise on time meet for sacrifices. By Tarkatilaka, younger brother of Mohana-madhusúdana.

Beginning. सिन्दूरप्रतिपूजितवदनः प्रत्यूहकन्दलीकदनः।
सनयस्त्रिनयननतनयः श्रियं सदा नः सदा दिशतु॥
माथुरविप्रः श्रीमान् सुदर्शनः स्वस्य बोधाय।
श्रीमाधवपदचिन्तां मोहनमिश्रोपदेशतः कुरुते॥
— — — — — — — —।
भक्षणीयमिदं तत्त्वं लक्षणीयं प्रविश्य च।
तक्षणीयं न तत्त्वज्ञै रक्षणीयं विचक्षणैः॥

वागीशाद्या इति। वागीशो ब्रह्मा तदाद्या देवा निखिलकार्य्याणामारम्भे यं प्रणम्य कृतकृत्याः सिद्धकार्य्याः। इत्यादि।

End. खमुनिरसेन्दुमितेऽब्दे माधवशुक्लद्वितीयायां ।
रचितं विवरणमेतन्मनीषिणा तर्कतिलकेन ॥
द्वारकादासपुत्रस्य द्वारकानाथसेविनः ।
दत्तवंशप्रसूतस्य कृतिः प्रचरताचिरं ॥

Colophon इति श्रीमोहनमधुसूदनानुजतर्कतिलकरचितं कालमाधवीयविवरणं सम्पूर्णं ।

विषयः । माधवाचार्य्यकृतकालनिर्णयस्य व्याख्यानम् ।

No. 2843. किरणावलीभास्करः । Substance, country-made paper, 12 × 3½ inches. Folia, 103. Lines, 12 on a page. Extent, 3,476 ślokas. Character, Nágara. Date, ? Place of deposit, Purí, Gopála Tírtha Maṭha. Appearance, old. Prose. Generally correct.

Kiraṇávalí-bháskara. A gloss on Udayana Áchárya's Nyáya-kiraṇávalí, which is a commentary on Prasastapáda Áchárya's work on the Mímáñsá aphorisms. By Padmanátha Miśra, son of Balabhadra, a younger brother of Viśvanátha. The text has been noticed under No. 1968, vol. V, p. 289 and another commentary under No. 1080, Vol. III, p. 50.

Beginning. उपदिष्टा गुरुचरणैरस्पृष्टा वर्द्धमानेन ।
किरणावल्यामर्थाख्यन्यक्षे पद्मनाथेन ॥
विलसद्वर्द्धमानापि तिरोहितदिवाकरा ।
सकलार्थप्रकाशाय न क्षमा किरणावली ॥
बलभद्रमुखाम्भोजवचनादुद्यताक्षात् ।
उदितो भास्करस्तस्मादादरेण निषेव्यताम् ॥

विघ्नध्वंसकामनया कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति । विद्येति । विद्येव या सन्ध्या तस्या उदयोद्रेकाद्विद्येव या रजनी—इत्यादि ।

End. भाष्यस्येति शब्दात्पर्य्यमाह । इतीति ॥
यत्तर्कदुस्तरतरार्णवकर्णधारो
वेदान्तवर्त्मनिरताध्वगसार्थवाहः ।
श्रीपद्मनाथरचितेन दिवाकरेण
तुष्टोऽमुनास्तु स कृती बलभद्रमिश्रः ॥

Colophon. इति श्रीवल्लभद्रात्मजविजयश्रीगर्भसम्भवविश्वनाथानुजसकलशास्त्रारविन्दप्रद्योतनभट्टाचार्य्यमिश्रश्रीपद्मनाथकृतः किरणावल्लीभास्करः सम्पूर्णः ।

विषयः । उदयनाचार्य्यकृतन्यायकिरणावल्या व्याख्यानम् ।

No. 2844. ब्रह्मरामायणम् । Substance, palm-leaf, 17 × 1¼ inches. Folia, 34. Lines, 4 on a page. Extent, 507 ślokas. Character, Nágara. Date, ? Place of deposit, Purí, Srírámadása Maṭha. Appearance, new. Verse. Incorrect.

Brahma-rámáyaṇa. A poem descriptive of the Rása festival celebrated by Ráma. The MS. is incomplete, and the author's name is not apparent. It is perhaps an extract from one of the Upapuráṇas.

Beginning. भूषण्ड उवाच ।

गरुडेनाथ संपृष्टो भूषण्डः प्राह कौतुकात् ।
शृणुतां तार्क्ष्य काकुत्स्थरासकेलिमहोत्सवः ॥
व्यासनारदयोर्यच्च संवादः समजायते ।
रासकेलिर्न वा कस्य प्रमोदायाभिजायते ॥
सीताभर्तुर्भगवतो विलासः कस्य गोचरः ।
योगेनापि न यल्लेशं प्रभुर्ज्ञातुं पितामहः ॥ इत्यादि ।

End. रासोत्सवं ये शृण्वन्ति पुण्यं राघवसीतयोः ।
ते परां भक्तिमासाद्य यान्ति पार्षदतां हरेः ॥

Colophon. इति श्रीब्रह्मरामायणे रासक्रीड़ायां पूर्णकन्यागणमनोरथो नाम सप्तदशोऽध्यायः ।

विषयः । श्रीरामचन्द्रस्य रासक्रीड़ावर्णनं । तच भूषण्डेन सह गरुड़स्य संवादेन रामस्यावतारप्रयोजनकथादिकीर्त्तनं । सीतया सह रामचन्द्रस्य विवाहोत्सववर्णनं । तच मार्गशीर्षपञ्चम्यां तद्विवाहः समजायतेति कथनं । कार्त्तिकपूर्णिमायां रामस्य रासलीलाकथनं तद्वर्णनञ्च । वैजयन्त्यादिलक्षणकथनं । रासस्थलीवर्णनं । कामिनीनां रामप्रमोदनवर्णनं । तच्चिषष्टिरमणीनां श्रेष्ठत्वकथनं । तासां सङ्गीतादिकरणवर्णनञ्च ।

No. 2845. प्रबोधसुधाकरः । Substance, country-made paper, 12 × 5 inches. Folia, 12. Lines, 10 on a page. Extent, 390 ślokas. Character, Nágara. Date, ? Place of deposit, Purí, Gopála Tírtha Maṭha. Appearance, old. Verse. Incorrect.

Prabodha-sudhákara. A metrical disquisition on the non-dual theory of the Vedánta and the supreme divinity of Kṛishṇa. By S'aṅkara Áchárya, disciple of Govinda. Hall's Contributions, p. 103.

Beginning. नित्यानन्दैकरसं सच्चिन्मात्रं स्वयं ज्योतिः ।
पुरुषोत्तममजनीमं वन्दे श्रीयादवाधीशं ॥
यं वर्णयितुं साक्षात् श्रुतिरपि मूकेव मौनमावहति ।
सोऽस्माकंमनुजानां किं वाचां गोचरो भवति ॥
यद्यप्येवं विदितं तथापि परिभाषितो भवेदेव ।
अध्यात्मशास्त्रसारहरिचिन्तनकौतुकेनाभ्यासैः ॥ इत्यादि ।

End. यद्यपि गगनं शून्यं तथापि जलदाभ्रतांशुरूपेण ।
चातकचकोरनाम्नोर्दृढ़भावात्पूरयत्याशाम् ॥
तद्भजतां पुंसां दृग्वाङ्मनसामगोचरो हरिः ।
कृपया फलयत्यकस्मात् सत्यानन्दाह्वते विपुलम् ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्गोविन्दभगवत्पादपूज्यश्रीमच्छङ्करार्य्यविरचितः प्रबोधसुधाकरः समाप्तः ॥

विषयः । आत्मानात्मविवेककथनं । विषयनिन्दाकीर्त्तनं । मनसो निन्दाकीर्त्तनं । तयोर्निग्रहोपायकीर्त्तनं । मायासिद्धिकथनं । लिङ्गदेहादिनिरूपणं । अद्वैतसिद्धिकथनं । भक्तिनिरूपणं । श्रीकृष्णभक्तिमाहात्म्यकथनं । श्रीकृष्णस्य परात्मस्वरूपत्वकथनं । सगुणनिर्गुणयोर्ब्रह्मणोरैक्यनिरूपणञ्च ।

No. 2846. पदभावार्थचन्द्रिका । Substance, country-made paper, 16 × 5 inches. Folia, 73. Lines, 10 on a page. Extent, 2,745 ślokas. Character, Nágara. Date, ? Place of deposit, Purí, Rághavadása Maṭha. Appearance, fresh. Prose. Incorrect.

Padabhávártha-chandriká. A commentary on the Gíta-govinda of Jayadeva. By S'ríkánta Miśra. Other commentaries have been noticed under Nos. 928, 929, 1317, and 1397 in the preceding volumes.

Beginning. समस्तगोपसुन्दरीविलासरासमण्डितः ।
करोतु भावुकं मधौ मनोज्ञमानहा हरिः ॥
गीतगोविन्दटीकेयं पदभावार्थचन्द्रिका ।
महदाज्ञाक्षतारम्भा साहसेति वितन्यते ॥

नोदाहरन्ति विशदाः सुरतानीकसागरम्।

इति श्रीपरमानन्दरतिवर्णनमीर्य्यते॥

अथैतत् काव्यस्य द्वादशसर्गीयस्य निर्व्विघ्नसमाप्त्यर्थं परमाभीष्टदेवताराधामाधवस्य रमणलक्षणं मङ्गलमादावाचरति। मेघैरित्यादिना। राधामाधवयो रहःकेलयः एकान्तक्रीड़ा-जयन्ति सर्व्वोत्कर्षेण वर्त्तन्ते। इत्यादि।

End. एतत्काव्यविवेचनं प्रणयिनां यत्संश्रयेन्मूलनात्
पुण्यं यच्च हरिस्मृतेः प्रतिपदव्याख्यासु मे सञ्चितं।
तेन प्रीतमनास्तनोतु सततं श्रेयो मम श्रीपतिः
श्रश्वन्मङ्गलमातनोत्वपि सतां सङ्गायतां शृण्वतां।

Colophon. इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां पदभावार्थचन्द्रिकायां द्वादशः सर्गः।

विषयः। जयदेवकृतगीतगोविन्दस्य व्याख्यानम्।

No. 2847. वाक्यवृत्तिप्रकाशिका। Substance, palm-leaf, 16 × 1¼ inches. Folia, 22. Lines, 4 on a page. Extent, 467 ślokas. Character, Bengali. Date, ? Place of deposit, Purí, Śaṅkara Áchárya's Maṭha. Appearance, new. Prose. Correct.

Vákyavritti-prakáśiká. A commentary on the *Vákyavritti* of Śaṅkara Áchárya. Other commentaries have been noticed under Nos. 178, 1324 and 1445.

Beginning. श्रुतिस्मृतिपुराणानामालयं करुणालयं।
नमामि भगवत्पादशङ्करं लोकशङ्करं॥
ब्रह्माहमेतन्मयि भाति विश्वं
श्रीमाध्यप्राज्ञगुरोः प्रसादात्।
अनर्थविश्वेश्वरपण्डिताख्यः
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यं॥

परमकृपानिधिः श्रीमच्छङ्कराचार्य्यस्तापत्रयार्कसन्तप्तानाम् अपरिमितजननादिसंसाराध्व श्रमपरिखेदितानामात्मज्ञानशिशिरमधुरजलाकाङ्क्षिणां विदूरशरीरकमीमांसाजलाधार-गमनासमर्थानां वाक्यवृत्त्यभिधानोपदेशप्रकरणप्रपापरिकल्पनेनाप्तः शीतलतां विगतक्लेशतां च आपादयन्— — — — — — नमस्कुरुते। सर्गस्थितिप्रलयहेतुमित्यादिना।

End. सर्व्वगतत्वेन जीवस्य तत्प्राप्तेरयुक्तत्वात्। प्राप्तिर्नाम तद्भावोपपत्तिरिति ज्ञापयन्नाह कैवल्यमिति।

Colophon. इति श्रीमद्दाशोगिमाधवप्राज्ञगुरुप्रसादासादितापरिमितज्ञानानन्दविश्वेश्वरपण्डितविरचिता वाक्यवृत्तिप्रकाशिका समाप्ता।

विषयः। शङ्कराचार्य्यविरचितवाक्यवृत्तिनामकवेदान्तप्रकरणस्य व्याख्यानम्।

No. 2848. उपदेशसाहस्रीटीका, (मूलसहिता।) Substance, country-made paper, 13 × 2½ inches. Folia. 168. Lines, 7 on a page. Extent, 2,884 ślokas. Character, Bengali. Date, ? Place of deposit, Purí, S'aṅkara Áchárya's Maṭha. Appearance, decayed. Prose. Correct.

Upadeśa-sáhasrí-ṭíká. A commentary on the *Upadeśa-sáhasríka* of S'aṅkara Áchárya. By Ánandajñána, disciple of S'uddhánanda. The text and other commentaries have been noticed under Nos. 1474 and 1475.

Beginning. प्रणम्य ह्रणं प्रणतार्त्तिहारिणं
गुरुनपि स्वान् परमात्मरूपिणः।
मया सहस्रीविवृतिर्विधीयते
कृतापि मन्दोपकृतिप्रसिद्धये॥

सकलोपनिषदर्थसारसंग्राहिकामुपदेशसाहस्रीं गद्यपद्यात्मिकां प्रारभमाणो भगवान् भाष्यकारश्चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचरगमनाभ्यां — — — — — अस्य शारीरकप्रकरणस्य तदीयमेवानुबन्धजातं सूचयति। चैतन्यमिति। इत्यादि।

End. अभ्यासो ग्रन्थस्य गद्यपद्यात्मनः समाप्तार्थः।
उपदेशसहस्रीयं गद्यपद्यमयी मया।
व्याख्या व्याख्याताप्यन्यैर्मन्दानुग्रहसिद्धये॥
व्याक्रिया सत्क्रिया सेयं कुर्व्वती शर्म्म निर्म्मलं।
कृतिनां कृतविद्यानामाश्रिता पुरुषोत्तमं॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानकृतोपदेशसाहस्रीटीका समाप्ता।

विषयः। शङ्कराचार्य्यकृतोपदेशसाहस्र्याः गद्यपद्यात्मिकायाः व्याख्यानम्।

No. 2849. षट्पदीमञ्जरी। Substance, country-made paper, 12 × 3 inches. Folia, 13. Lines, 12 on a page. Extent, 536 ślokas. Character, Bengali. Date, Sk. 1646. Place of deposit, Puri, S'aṅkara Áchárya's Maṭha. Appearance, old. Prose. Incorrect.

Shaṭpadí-manjarí. A commentary on a poem in six stanzas by S'aṅkara Áchárya. By S'aṅkaránanda Tírtha, disciple of S'ivanáráyaṇánanda Tírtha.

Beginning. निजेष्टसम्प्रदानकं + + कल्पभूरुहाकृतिं।
दुरन्तविघ्नवारिदप्रभञ्जनं निरञ्जनं॥
मदीयचित्तसारसप्रबाधभास्करं परं।
रसालमूलवासिनं भजामि विघ्ननायकं॥
— — — — — — —।

अथ सच्चिदानन्दात्मकमद्वितीयं ब्रह्मैव विमलसत्त्वप्रधानमायोपाधिकं सदीश्वरभावमुपाजगाम। जीवेशभावभासेन करोतीति श्रुतेः। स च मायाप्रतिबिम्बित ईश्वर इति संक्षेपशतप्रकटार्थकारविद्यारण्यमतानुसारिणः। इत्यादि।

End. भगवद्भक्तिगन्धाद्यैः कृतुमैर्वाङ्मयैः कृता।
षट्पदीमञ्जरी सम्यक् योजिता कृष्णपादयोः॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीशिवनारायणानन्दतीर्थगुरुचरणसेवकश्रीशङ्करानन्दतीर्थविरचिता षट्पदीमञ्जरी सम्पूर्णा। शकाब्दाः १६४६।

विषयः। शङ्कराचार्य्यकृतषट्पद्यभिधानसन्दर्भस्य व्याख्यानम्।

No. 2850. प्रत्यक्षालोकटिप्पनी। Substance, country-made paper, 15 × 2 inches. Folia, 121. Lines, 6 on a page. Extent, 4,338 ślokas. Character, Bengali. Date, Sk. 1523. Place of deposit, Puri, S'aṅkara Áchárya's Maṭha. Appearance, old. Prose. Correct.

Pratyakshálokа-ṭippaní. Notes on Jayadeva Miśra's *Pratyakshálokа* which is on its turn a gloss on the Pratyaksha section of Gaṅgeśa's *Chaturvarga-chintámaṇi*. By Haridása Nyáyálaṅkára Bhaṭṭáchárya. *Cf. ante*, V, 299.

Beginning. वक्ष्यणीत्यादि। अत्र अधिकरणभेदे प्रतिबिम्बभेदस्य आदर्शभेदादौ लोकसिद्धत्वात्। शास्त्रेऽपि बौद्धाधिकारादौ द्विचन्द्रभ्रमवच्च तथैवोपपादितत्वादयमर्थः। इत्यादि।

End. तथा च यथार्थलभौत्सर्गिकमित्यर्थः। तत्र + + खि स्मृत्यभिप्रायेणाह-तदाङ्गरिति॥

Colophon. इति महामहोपाध्यायश्रीहरिदासभट्टाचार्य्यकृता प्रत्यक्षालोकटिप्पनी समाप्ता।

शाके चिद्युग्मविश्विखचणदाधिनाथे
मासे + + सुरधुनीसविधे चतुर्थ्यां।
श्रीसार्व्वभौमपुषि (?) प्रणयेनलब्ध-
कन्दर्परायपदवीक इदं लिलेख॥

विषयः। जयदेवमिश्रकृतप्रत्यक्षालोकस्य व्याख्यानम्।

No. 2851. अनुमानालोकव्याख्या। Substance, country-made paper, 15 × 2 inches. Folia, 133. Lines, 6 on a page. Extent, 4,738 ślokas. Character, Bengali. Date, Sk. 1522. Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, very old. Prose. Correct.

Anumánáloka-vyákhyá. Notes on Jayadeva Miśra's gloss on the first book of Gaṅgeśa's Chintámaṇi. By Haridás Nyáyálaṅkára Bhaṭṭachárya.

Beginning. गौर्य्या इति—

अनुमानेति। तत्त्वचिन्तामणेर्ग्रन्थस्यानुमानपरिच्छेदे तद्रूपैकखण्डे षष्ठ्यर्थे सप्तमी। प्रत्यक्षानन्तरं प्रत्यक्षोद्देशानन्तरं तल्लक्षणानन्तरं प्रत्यक्षनिरूपणानन्तरं। अनुमानलक्षणं अनुमाननिरूपणं। इत्यादि।

End. एतस्यैवानन्दस्यान्यानि भूतानि इत्यादि श्रुतेः।
तत्त्वज्ञाने च प्रारब्धातिरिक्तसकलकर्म्मनाश इत्याशयः॥

Colophon. इति महामहोपाध्यायश्रीहरिदासन्यायालङ्कारभट्टाचार्य्यविरचितानुमानालोकव्याख्या समाप्ता। शुभमस्तु १५२१।

विषयः। जयदेवमिश्रकृतानुमानखण्डालोकस्य व्याख्यानम्।

No. 2852. शब्दमण्यालोकटिप्पनी। Substance, country-made paper 15 × 2 inches. Folia, 62. Lines, 6 on a page. Extent, 2,278 ślokas. Character, Bengali. Date, Sk. 1521. Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, old. Prose. Incorrect.

Śabdamaṇyáloka-ṭippaṇí. Notes on Jayadeva Miśra's gloss on the third book of Gaṅgeśa's Chintámaṇi. By Haridása Nyáyálaṅkára Bhaṭṭáchárya. *Cf. ante*, V, 299.

Beginning. यत्तस्मिन्निति। + + + क्रियाविशेषणं। अथ शब्दस्यानन्तर्य्यवचनत्वेन आनन्तर्य्यवचनार्थशब्देन स्रूच्यत इत्यन्वयः। तच्च चानन्तर्य्ये स्रट्प्रत्ययान्तत्वेन इत्यादि।

End. स्रस्य च गतिः। समाधानं + त्तिद्येनेत्यादि। अ + वदिति। अ + तिर्त्रक्षण इत्यादौ उपसत्या प्रतिरूपकेण समास इति भावः। सति प्रमाणभेद इति पाठः।

Colophon. इति महामहोपाध्यायश्रीहरिदासन्यायालङ्कारभट्टाचार्य्यकृता शब्दमणालोकटिप्पनी समाप्ता। शकाब्दाः। १५२१।

विषयः। जयदेवमिश्रकृतशब्दमणालोकस्य व्याख्यानम्।

No. 2853. न्यायकणिका। Substance, country-made paper, 14 × 4 inches. Folia, 268. Lines, 10 on a page. Extent, 3,853 ślokas. Character, Nágara. Date, ? Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, old. Prose. Generally correct.

Nyáya-kaṇiká. A gloss on the Mímáṅsá treatise entitled *Vidhi-viveka*. By Váchaspati Miśra.

Beginning. साधने पुरुषार्थस्य सङ्किरन्ते त्रयीविदः।
बोधं विधौ समायत्तमतः स प्रविविच्यते॥

स खलु शब्दभेदो वा लिङादिः। तद्व्यापारा + तिशयो वा प्रवृत्तिहेतुरुपेयते। अर्थभेदो वा। यद्भिधानाच्छब्दोऽपि तथा व्यवदेश्यः। इत्यादि।

End. तथापि किमायातं विधावित्यत आह। साधनत्वं चास्य विधिरित्युक्तं।

Colophon. इत्याचार्य्यवाचस्पतिमिश्रविरचिता न्यायकणिका समाप्ता।

विषयः। विधिविवेकाभिधानमीमांसाप्रकरणस्य व्याख्यानम्।

No. 2854. अद्वैतमकरन्दटीका। Substance, country-made paper, 9 × 4 inches. Folia, 41. Lines, 8 on a page. Extent, 368 ślokas. Character, Bengali. Date, Sk. 1551. Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, old. Prose. Generally correct.

Advaita-makaranda-ṭiká. A gloss on the *Advaita-makaranda*, a Vedánta treatise on non-duality by Lakshmídhara. By Sárvabhauma Bháṭṭáchárya.

Beginning. देवो निजाज्ञानवशेन साक्षी
जीवो मनःस्पन्दितमीश्वरस्य ।
जगन्ति जीवानपि वीक्षते यः
स्वस्थः स्वयं ज्योतिरहं स एकः ॥
श्रीवासुदेवविदुषा गौड़ाचार्य्येण यत्नतः ।
अद्वैतमकरन्दस्य क्रियते परिशोधनं ॥

गुरुदेवतानमस्कारस्य फलमाह ग्रन्थारम्भ इति । यद्यपि नमस्कार एव मङ्गलं तथापि तज्ज्ञानो धर्म्मोऽत्र मङ्गलपदेनोक्तः । इत्यादि ।

End. अहं प्रत्यगात्मा सच्चः प्रकाश इति ॥
श्रीवन्द्यान्वयकैरवाह्लतरुचो वेदान्तविद्यामयाद्-
भट्टाचार्य्यविशारदान्नरहरेर्यं प्राप भागीरथी ।
गौड़ाचार्य्यवरेण तेन रचिता लक्ष्मीधरोक्तेरियं
शुद्धिः काचन वासुदेवकृतिना विद्वज्जनप्रीतये ॥
अद्वैतसारमकरन्दविशुद्धिरेषा
दोषान् विधूय विहिता बडवादि + + ।
श्रीनीलशैलवसतेर्मुनिमानसाब्ज-
भृङ्गस्य सादरमकारि मयोपकारः ॥
कर्णाटेश्वरकृष्णरायनृपतेर्गैर्व्वाग्निर्व्वापके
अत्र न्यग्रभरोऽभवद्गजपतिः श्रीरुद्रभूमीपतिः ।
तस्य ब्रह्मविचारचारुमनसः श्रीकूर्म्मविद्याधर-
स्यानन्दो मकरन्दशुद्धिविधिना सान्द्रो मया मन्दतः ॥

Colophon. इति श्रीमद्गौड़ाचार्य्यसार्व्वभौमभट्टाचार्य्यविरचिता अद्वैतमकरन्दटीका समाप्ता । शकाब्दाः । १५५१ ।

विषयः । लक्ष्मीधरकृताद्वैतमकरन्दाभिधेयवेदान्तप्रकरणस्य व्याख्यानम् ।

No. 2855. गोविन्दाष्टकव्याख्यानम् । Substance, palm-leaf, 17 × 1¼ inches. Folia, 11. Lines, 4 on a page. Extent, 236 ślokas. Character, Bengali. Date, ? Place of deposit, Puri, Śaṅkara Áchárya's Matha. Appearance, new. Prose. Correct.

Govindáshṭaka-vyákhyána. A commentary on Śaṅkara A'chárya's hymn in praise of Govinda. Anonymous.

Beginning. श्रीमत्पूर्णात्मलक्ष्मणस्य पदपङ्केरुहद्वयं ।

प्रणम्य क्रियते टीका गोविन्दाष्टकगामिनी ॥

इह सकललोकचित्तावतारो भगवान् महाविष्णुः भूवनितयाभ्यर्थितोऽच भूभारपरिजिहीर्षया यदुकुले किलावतीर्णः सनकादिमुनिजनैरनुदिनमनुगीयमानसुचरितो भगवान् नन्दगोपवेश्मनि विजहार । तमेव विहारं अष्टभिः श्लोकैः — — — — — — अभिष्टौति सत्यमिति ।

End. सम्यक् निरुपद्रवः सन् आप्नोति । मङ्क्ता यान्ति मामपीति भगवद्वचनात् ।

Colophon. इति गोविन्दाष्टकव्याख्यानं समाप्तं ।

विषयः । शङ्कराचार्य्यकृतगोविन्दाष्टकस्य व्याख्या ।

No. 2856. यतिधर्म्मसमुच्चयम् । Substance, country-made paper, 11 × 4 inches. Folia, 128. Lines, 10 on a page. Extent, 2,380 ślokas. Character, Nágara. Date, Sm. 1668. Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, old. Prose and verse. Generally correct.

Yatidharma-samuchchaya. This work has already been noticed under No. 1756 (*ante*, V, 75). Here is given a fuller abstract of its contents.

Beginning. प्रणम्य विष्णुमात्मानं सच्चिदानन्दमद्वितं ।

+ + + + + विश्वेशं मायया धृतविग्रहं ॥

विश्वेश्वरसरस्वत्या क्रियते वेदमानतः ।

यतेः परमहंसस्य धर्म्माणामेष सङ्ग्रहः ॥

तच्च सन्न्यासाश्रमकालनिर्णयः जाबालश्रुत्या विहितः । ब्रह्मचर्य्यं समाप्य गृही भवेत् । गृही भूत्वा वनी भवेत् । वनी भूत्वा प्रव्रजेदिति । इत्यादि ।

End. न रक्तमुल्बणं वासो न नीलञ्च प्रशस्यते ।

मलाक्तञ्च दशाहीनं वर्ज्जयेदम्बरं यतिः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकविश्वेश्वरसरस्वतीसंग्रथिते यतिधर्म्मसमुच्चये निष्टत्तधर्म्मानुष्ठानाचारः सम्पूर्णः । संवत् १६६८ ।

विषयः । सन्न्यासाश्रमप्रवेशकालनिरूपणं । तदधिकारिनिरूपणं । सन्न्यासलक्षणकथनं । सन्न्यासविधिकथनं । तच्च तप्तकृच्छ्रादिव्रतस्वरूपादिकथनं । दैव-आर्ष-भूत-पित्र-भ्रात्राद्यष्टविधश्राद्धविधिकथनं । तच्च आत्मनः श्राद्धविधिकथनञ्च । तर्पणादिकथनं । होमविधिकथनं । शिखायज्ञोपवीतयोरपि होमविधिकथनं । दण्डग्रहणविधिकथनं । एकदण्डित्रिदण्डिभेदनिरू-

पणं। भिक्षुधर्म्मनिरूपणं। यतिधर्म्ममाहात्म्यकीर्त्तनं सन्न्यासमाहात्म्यकथनं। वल्कादिधारण-विधिनिरूपणमुखेन यतीनां कौपीनयुगलं कन्था दण्डश्चेति चत्वार्य्येव प्रसाधनानि नान्यदिति-निरूपणं। क्वचित् चौमाजिनादिधारणविधिकथनं। भक्ष्याभक्ष्यनिरूपणं। अहिंसासत्यास्तेया-दिरूपदशविधव्रतानुष्ठानावश्यकतानिरूपणं। परमहंसलक्षणकथनं। भिक्षोरपि ब्रह्मचर्य्यानु-ष्ठानविधिकथनं। यतीनां स्वधर्म्मनिरूपणं। परिव्राजकशब्दनिर्व्वचनकथनं। श्रवणमननिदि-ध्यासनविधिकथनं। तच्च योगानुष्ठानप्रकारकथनञ्च। अथ यतीनां स्नानोपवासव्रताद्यनुष्ठान-विधिकथनं। शौचादिविधिकथनं। दन्तधावनादिविधिकथनं। भिक्षूणां त्रिसन्ध्यस्नानानुष्ठा-नविधिः। तत्कर्त्तव्यताकथनं। कमण्डलुप्रक्षालनादिविधिकथनं। कौपीनप्रक्षालणादिविधिक-थनं। आचमनादिविधिकथनं। तर्पणविधिकथनं। भिक्षाटनजपध्यानस्नानशौचसुरार्च्चन-रूपषट्कर्म्मानुष्ठानावश्यकताकथनं। भोजनविधिकथनं। अक्षमालादिविधिकथनं। यतीना-मनेध्यादिस्पर्शजनितप्रत्यवायपरीहारविधिकथनं। स्वाध्यायविधिकथनं। यतीनां वासस्था-नादिनिरूपणं। चातुर्मास्यविधिकथनं। यतीनां क्षौरविधिकथनं। प्रतिग्रहविधिकथनं। प्रायश्चित्तविधिकथनं। यतीनाञ्च प्रतिषिद्धानि। तच्च ताम्बूलादिवर्জ্জनावश्यकताकथनं। अवीरादितः प्रतिग्रहादिनिषेधकथनं। तच्च अवीरादिलक्षणकथनं। अथ कुटीचक-बहूदक-हंस-परमहंसभेदेन भिक्षूणां चतुर्व्विधत्वकथनं। भिक्षुकपरिचर्य्यामाहात्म्यकथनं। भिक्षुकाणाम-न्त्येष्टिविधिकथनं। तच्च पुत्रादीनां कर्त्तव्यतादिनिरूपणं। तच्च सूतकैकोद्दिष्टादिनिषेधकथनं। एकादशाहे पार्व्वणकर्त्तव्यताकथनं। एवं संवत्सरेऽपि कर्त्तव्यमितिकथनं। तच्च च शिष्याणां कर्त्तव्यतानिरूपणं। कुटीचकस्य मरणे दाहविधिकथनं। यतीनां भोज्यान्नस्य विशेषेण परिग्रु-द्धादिनिरूपणं। यतीनां सामान्यतः कर्त्तव्यानि। तत्त्वज्ञानोपायकथनं। महावाक्यविचारवि-धिकथनं। जीवन्मुक्तलक्षणादिकथनञ्च।

No. 2857. वैयाकरणजीवातुः, वा चाङ्गसूत्रम्, (ठीकासहितः।) Substance, palm-leaf, 15 × 1 inches. Folia, 35. Lines, 4—5—6 on a page. Extent, 690 ślokas. Character, Nágara. Date, ? Place of deposit, Puri, Rághavadása Maṭha. Appearance, new. Text, verse. Commentary, prose. Incorrect.

Vaiyákaraṇa-jíbátu ALIAS **Cháṅga-sútra.** An essay on the philosophy of grammar, on the nature and powers of words and the nature and characteristics of grammatical aphorisms. Anonymous.

Beginning. टीकायाः,—

गणेश्वरं नमस्कृत्य बालविज्ञानसिद्धये।
क्रियते चाङ्गसूत्राणां व्याख्या सत्यबोधिनी॥

प्रणम्येति। चाङ्गनामा अहं परमात्मानं प्रणम्य नमस्कृत्य एवं वक्ष्यमानं वैयाकरणानां जीवातुं जीवनौषधं करोमि।

मूलस्य,—

प्रणम्य परमात्मानं सुगतं द्वैतखण्डितं।
वैयाकरणजीवातुं चाङ्गरेतं करोम्यहम्॥
संज्ञा च परिभाषा च विधिर्नियम एव च।
प्रतिषेधोऽधिकारश्च षड्विधं सूचलक्षणं॥
गोयुथोऽथ नदीस्रोतो मण्डूकप्लुतसंज्ञकः॥
सिंहावलोकनामा स्यादधिकारश्चतुर्विधः। इत्यादि।

End. मूलस्य,—

वा स्युः सेनासुराशालानिशाच्छाया इमाः पुनः।
उपज्ञोपक्रमौ नित्यं तदा लिङ्ग प्रकाशने॥
राचाल्लौ पुंसि विज्ञेयावहो सुदिनपुण्यतः।
पथोऽव्ययात् परो ह्लीवे न स्त्रीवेति प्रदर्शनं॥

इति वैयाकरणजीवातौ चाङ्गसूत्रे समासोद्देशः।

टीकायाः,—

सुदिनपुण्यतस्तु सुदिनाहं पुण्याहं अपथं। कापथः। पथि चेति कादेशः। विपथं विपथः।

Colophon. इति वैयाकरणजीवातौ चाङ्गसूत्रे समासोद्देशः।

विषयः। संज्ञापरिभाषादिरूपषड्विधसूचलक्षणकथनं। गोयूथनद्यादिस्रोतोरूपादिचतुर्विधाधिकारनिरूपणं। उक्तार्थलिङ्गार्थादिस्वरूपकथनं। वाचकादौ संख्यापुरुषलिङ्गादिविवेचनं। धातोरर्थविशेषे द्विकर्मत्वनिरूपणं। उपसर्गयोगात् धातोरर्थान्तरग्रहणनिरूपणं। आगमस्वरूपादिकथनं। वालुलकानां (?) चातुर्विध्यनिरूपणं। परस्मैपदादिस्वरूपनिरूपणं। वर्त्तमानादिकालस्वरूपनिरूपणं। निष्ठाप्रत्ययादिस्वरूपकथनं। भावादिवाच्यस्वरूपकथनं। षट्कारकस्वरूपकथनं। समासे लिङ्गान्तरप्राप्तिनिरूपणादिकञ्च।

No. 2858. सावित्रीपञ्जरः। Substance, country-made paper, 12 × 4 inches. Folia, 6. Lines, 11 on a page. Extent, 135 ślokas. Character, Nágara. Date, ? Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, fresh. Verse. Incorrect.

Sávitrí-panjara. Rules for the adoration of the Divinity through the Gáyatrí verse. It is an extract from the Vaśishṭha-saṅhitá.

Beginning. भगवन्तं देवदेवं ब्रह्माणं परमेष्ठिनं ।
विधातारं विश्वसृजं पद्मयोनिं प्रजापतिं ॥
शुद्धस्फटिकसङ्काशं महेन्द्रशिखरोपमं ।
विद्युत्पिङ्गजटाजूटतडित्करकमण्डलुः ॥ इत्यादि ।

End. किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः ।
यं यं कामयमभिध्यायंस्तं तमाप्नोति नित्यशः ॥

Colophon. इति श्रीवसिष्ठसंहितायां सावित्रीपञ्जरविभागो+नाम षष्ठोऽध्यायः ।

विषयः । गायत्रीमाहात्म्यकीर्त्तनव्याजेन तन्न्यासध्यानादिनिरूपणं ।

No. 2859. छान्दोग्योपनिषद्वृत्तिः । Substance, country-made paper, 13 × 3 inches. Folia, 140. Lines, 6 on a page. Extent, 2,354 ślokas. Character, Bengali Date, ? Place of deposit, Purí, Śaṅkara Áchárya's Maṭha. Appearance, old. Prose. Incorrect.

Chhándogyopanishad-vṛitti. A gloss on the Chhándogya Upanishad of the Sáma Veda. By Bhagavadbhávaka.

Beginning. अचिन्त्यशक्तिमीश्वरं जगत्पतिं परायणं ।
मनोवचोमलापहं नमामि नित्यमच्युतं ॥

अथ छान्दोग्योपनिषत्पदार्थविवरणं संक्षेपेणोच्यते । ओं नमो भववते वासुदेवाय । ओमित्येतदक्षरमित्यादि । यद्यप्यन्यचोपासनालम्बनमक्षरमुद्गीथाक्षरालम्बनं परमित्यादौ तथाप्याह शब्दस्वरूपं वक्ष्यमाणगुणविशिष्टमुपास्यं । इत्यादि ।

End. गृहस्थविषयत्वात् न आश्रमान्तरापादनं । स खल्वेवं वर्त्तयन् यावदायुषं न स पुनरावर्त्तत इति ।

Colophon. इति भगवद्भावककृतायां छान्दोग्योपनिषद्वृत्तौ अष्टमोऽध्यायः ।

विषयः । छान्दोग्योपनिषदो व्याख्यानं ।

No. 2860. कल्पकल्पतरुः, (मोक्षकाण्डम् ।) Substance, country-made paper, 10 × 2½ inches. Folia, 117. Lines, 7 on a page. Extent, 2,457 ślokas. Character, Bengali. Date, ? Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, decayed. Prose and verse. Correct.

Kṛitya-kalpataru. An elaborate digest of the Smṛiti rules on duty. Under No. 2147, (VI, 28) has been noticed that section of the work which refers to time meet for religious observances. The MS. under notice contains the section devoted to salvation—Moksha-kánḍa. The author's name is Lakshmidhara Bhaṭṭa.

Beginning. (प्रथमपत्रं विलुप्तात्तरप्रायम् ।)

यज्ञेन देवानाप्नोति वैराजं तपसा + + ।
सन्न्यासाद्ब्रह्मणः स्थानं वैराग्यात् प्रकृतौ लयं ॥
ज्ञानात् कैवल्यमाप्नोति पञ्चैता गतयः स्मृताः ।
तत्र वैराजं स्थूलमहाभूतशरीरभोक्तृ + + यच्छिन्नपरमात्मस्वरूपं विराट् । इत्यादि ।

End. तथा सर्व्वभूतात्मभूतस्य सम्यग्भूता + पश्यत ।
देवा + मार्गं मुह्यन्ति उपक्रम्य पदैः + + ॥
यथा गतिर्न दृश्येत तथैवास्य महात्मनः ॥

Colophon. इति महाराजाधिराजश्रीमद्गोविन्ददेवमहासान्धिविग्रहिकेण श्रीलक्ष्मीधरात्मजेन भट्टश्रीलक्ष्मीधरेण विरचिते कृत्यकल्पतरौ मोक्षकाण्डं समाप्तं ।

विषयः । तत्र मोक्षस्वरूपकथनं । तदधिकारिनिरूपणं । वानप्रस्थाश्रमविधिकथनं । पञ्चमानकाः अपचमानकाश्चेति वानप्रस्था द्विविधाः । अथ पचमानकाः पञ्चविधाः सर्व्वारण्यका, वैतुषिकाः, कन्दमूलभक्षाः, शाकभक्षाश्चेति । एवं क्रमेण सर्व्वेषां अवान्तरभेदनिरूपणं । वानप्रस्थधर्म्मकथनं । अथ यत्याश्रमनिरूपणं । तत्र सन्न्यासविधिकथनं । यतिधर्म्मकथनं । वैराग्यस्वरूपादिकथनं । संसारस्य अनित्यतादिनिरूपणं । विषयस्वरूपादिकथनं । अर्थपुत्रदारादिनिन्दनं । सर्गैकामनादिनिन्दनं । कामक्रोधादिवर्জ্জनं । इन्द्रियजयविधिकथनं । अथ चतुर्व्विंशतितत्त्वकथनं । तत्र सृष्टिप्रक्रियाकथनञ्च । शरीरचिन्तनं । देहशरीरविवेकः । तत्र जीवब्रह्मात्मभावकथनं । ज्ञानकर्म्मयोगनिरूपणं । तत्त्वज्ञानहेतुकथनं । अथ योगविधिकथनं । तत्र योगाङ्गादिनिरूपणं । आचारादिनियमकथनं । मुक्तलक्षणकथनं । ध्येयस्वरूपकथनं । योगविभूत्यादिनिरूपणं । स्थितप्रज्ञचरितकीर्त्तनं । योगभ्रष्टस्य गतिकथनं । उत्क्रान्त्यादिनिरूपणं । अर्चिरादिमार्गनिरूपणञ्च ।

No. 2861, न्यायसिद्धान्तमाला । Substance, country-made paper, 12 × 3 inches. Folia, 203. Lines, 7 on a page. Extent, 4,418 ślokas. Character, Nágara. Date, Sm. 1750. Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, decayed. Prose. Incorrect.

Nyáyasiddhánta-málá. A commentary on a portion of the Gautama Sútra on the Nyáya doctrine. By Jayaráma Nyáyapañchánana Bhaṭṭáchárya.

Beginning. ॐनमो जगदुत्पत्तिस्थितिसंहारकारिणे ।
गुणचयसङ्घाय निर्गुणाय चिदात्मने ॥
प्रणयचपलगोपीमण्डलीलासिशीलं ।
शिशुगणकरतालीकल्पितानल्पलीलं ।
पदभरचलदुर्व्वीक्षिप्तनक्षत्रनीकं
व्रजभुवि नटरूपं चित्स्वरूपं प्रपद्ये ॥
विधान्नैः सुचिरं भवाध्वनि समासेव्यं बुधैरादरा-
दुत्पन्नानकदम्बसिद्धसुभगास्वत्यन्तिरच्छायकं ।
दुख + + रादिकुम्भिनिवहान् निर्द्धूय युक्त्यङ्कुशै-
र्न्यायारण्यमवारणं वितनुते श्रीन्यायपञ्चाननः ॥
सद्युक्तिमुक्ताफलकैर्मुनिसूत्रेषु गुम्फिता ।
न्यायसिद्धान्तमालेयं हृदि धीरैर्निधीयतां ॥
— — — — — — — ।
धीरश्रीजयरामेण रामेणेव महोदधेः ।
न्यायसिन्धोः परं पारं गन्तुमध्वा निबध्यते ॥

आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयीत्यादिश्रुतेः । इत्यादि ।

End. शब्दत्वमेवान्यथा प्रमाणत्वमेवेति सिद्धं चत्वारि प्रमाणानीति स्थितं ।
शब्दार्थनिर्णयो नाम गुरोरपि स + + ठः ।
किञ्चित् श्रीजयरामोक्तं सुधीभिरभिधीयतां ॥

Colophon. इति महामहोपाध्यायश्रीजयरामन्यायपञ्चाननभट्टाचार्य्यकृतायां न्यायसिद्धान्तमालायां प्रमाणलक्षणप्रकरणम् । संवत् १७५० ।

विषयः । प्रमाणलक्षणाङ्गं गोतमसूत्रस्य व्याख्यानम् ।

No. 2862. तत्त्वविवेकः । Substance, country-made paper. 11 × 4 inches. Folia, 150. Lines, 10 on a page. Extent, 3,504 ślokas. Character, Bengali. Date, ? Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, old. Prose. Correct.

Tattva-viveka. A dissertation on the non-dual theory of the Vedánta and salvation by its means. By Nṛisiṁhášrama Muni, disciple of Jagannáthášrama. *Cf.* Hall's "Contributions," p. 155.

Beginning. विश्वस्य योनिं विश्वेशं विज्ञानानन्दविग्रहं ।
नरकेशरिणं वन्दे प्रत्यक्षं पुरुषोत्तमम् ॥
साक्षात्कृतब्रह्मभासा प्रहसन्मुखपङ्कजं ।
महीयांसमहं वन्दे गरीयांसं जगत्पतिं ॥
गुरुणा करुणापूर्व्वमुपदिष्टादयात्मनः ।
कुर्व्वे तत्त्वविवेकं तं वीक्षतां + + केशरी ॥

इह खलु कथित् कुतश्चिद् भाग्योदयान्निर्व्यलीकं नित्यादिभिराराधिताराध्यपादभगवदनुग्रहादतिविमलमानसः स्वयमेवेत्थं जगत्तत्त्वमालोचयति । इत्यादि ।

End. क्वाहं महीयसा शास्त्रं वात्सल्यं क्व गुरोरिदम् ।
अपि चाण्डालकलभे काम्यते खलु भास्करः ॥

Colophon. इति श्रीमद्वेदान्तसाराभिज्ञश्रीमज्जगन्नाथाश्रमपूज्यपादशिष्यश्रीहरिसिंहाश्रममुनिविरचिते तत्त्वविवेके द्वितीयपरिच्छेदः ।

विषयः । नित्यादिकर्म्मणां पापनिवर्त्तकत्वेन ब्रह्मज्ञानोपकारकत्वात् तदनुष्ठानावश्यकतानिरूपणं । ब्रह्मजिज्ञासाकर्त्तव्येत्यत्र जिज्ञासापदार्थविवेचनं । साधनचतुष्टयसम्पन्न एव तत्राधिकारी सच परमहंस एवेतिनिरूपणञ्च । अध्यासस्वरूपादिविवेचनं । असद्वादनिरसनं । अहङ्कारात्मनोर्भिन्नत्वप्रतिपादनं । दृत्यवच्छिन्नचैतन्यादिस्वरूपविवेचनं । स्वप्नजागरणस्वरूपादिकथनं । आत्मसद्भावे प्रमाणनिरूपणं । आत्मनः स्वगोचरप्रकाशत्वकथनं । तत्स्वरूपकथनञ्च । नानाजीववादकथनं । एकजीववादनिरूपणं । द्वैतोपासनया नाविद्यानिवृत्तिरपि तु अद्वैतोपासनेनेति विवेचनं । ब्रह्मज्ञानस्वरूपकथनं । अज्ञानस्वरूपादिकथनञ्च । अथ निरस्तसमस्तकर्त्तव्यानर्थनिरतिप्रयानन्दात्मकं चैतन्यं त्वम्पदलक्ष्यमिति त्वम्पदार्थनिरूपणं । ब्रह्मणि प्रमाणचिन्तनं । वेदप्रामाण्यकथनं । विधिस्वरूपादिविवेचनं । ब्रह्मणः सच्चिदानन्दरूपत्वनिरूपणं । ब्रह्मजीवयोरभेदकथनं । जीवस्य औपाधिकत्वनिरूपणं । अद्वैतवाद एव सर्व्वदोषरहित इति निर्णयः । मोक्षस्वरूपादिनिरूपणं । तत्र जीवस्य अद्वैतब्रह्मसाक्षात्काराद्भेदभ्रमनिवृत्त्या सच्चिदानन्दब्रह्मावाप्तिरितिकथनञ्च ।

No. 2863. महावाक्यसिद्धान्तः । Substance, country-made paper, 11 × [illegible]. Folia, 3. Lines, 12 on a page. Extent, 90 ślokas. Character, [illegible]e, fresh. Prose and verse. Incorrect. Date, ? Place of deposit, Puri, Śaṅkara Áchárya's Maṭha.

Mahávákya-siddhánta. On the true meaning of the maxim "thou art that,"—a Vedánta disquisition. By S'aṅkara A'chárya.

Beginning. अथ महावाक्यार्थप्रबोधप्रकारं व्याख्यास्यामः । ॐतत्त्वमसीति महावाक्यमिति शिष्यं प्रतिज्ञापयेत् ।

End. नाहं देहो न मे देहः केवलोऽहं सनातनः ।
ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ॥
एकमेवाद्वितीयं ब्रह्म नेह नास्ति न किञ्चन इति श्रूयते ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितमहावाक्यसिद्धान्तः सम्पूर्णः ।

विषयः । तत्त्वमस्यादिमहावाक्यस्य व्याख्यानम् ।

No. 2864. तत्त्वबोधिनी । Substance, country-made paper, 12 × 4½ inches. Folia, 229. Lines, 16 on a page Extent, 18,240 ślokas. Character, Nágara. Date, ? Place of deposit, Puri, S'aṅkara Áchárya's Maṭha. Appearance, fresh. Prose. Incorrect.

Tattvabodhiní. A commentary on Sarvajñátma Munis'vara's abridgment of the Vedánta aphorisms. By Nṛisñás'rama, disciple of Jagannáthás'rama. *Cf.* Hall's "Contributions," p. 91.

Beginning. (प्रथमतस्त्रीणि पद्यानि खण्डितानि ।)

पदस्य च तदभावादिषदयोरैक्यानुपपत्तेरित्याशङ्क्य प्रत्यगभिन्नं परमपदं विशिनष्टि स्वविक्रियेति । कर्तृत्वादिविक्रियाशून्यमित्यर्थः । प्रत्यगभिन्नब्रह्मस्वरूपचैतन्यं हि—इत्यादि ।

End. श्रीमज्जगन्नाथगुरोरनुग्रहः
प्रविश्य मायोज्झितदृक्(?) कर्म्मणि ।
अतोग्रहग्रस्तमनुष्यवन्मम +
प्रवृत्तिरेषेति वृथाः श्रमश्चयं ॥ (?) ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमश्रीचरणप्राप्तविद्यानिखिलविद्वज्जनमनोहरश्रीमद्भुसिंहाश्रमश्रीचरणविरचितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधिनीसमाख्यायां फलाध्यायचतुर्थोऽध्यायः समाप्तः ॥

विषयः । सर्व्वज्ञात्ममुनीश्वरकृतसंक्षेपशारीरकाभिधानप्रकरणस्य व्याख्यानम् ।

No. 2865. संसारतरणिः । Substance, country-made paper, 12 × 4 inches. Folia, 300. Lines, 6—7 on a page. Extent, 6,557 ślokas. Character, Nágara. Date, Sm. 1581. Place of deposit, Puri, S'aṅkara Áchárya's Maṭha. Appearance, old. Prose. Incorrect. Corrupt.

Saṅsára-ṭaraṇí. A commentary on the Nirváṇa section of the Yogavás'iṣṭha Rámáyaṇa. Author's name not made out.

Beginning. स्वाविद्याकल्पितद्वैतं नरसिंहाभिधं महः ।

वेदान्तवेद्यं वन्देऽहं परमानन्दविग्रहं ॥

सर्व्वमुत्तम + + प्रसादवो

जीवजात + + + मुनिर्जगौ ।

तस्य वेदगदितस्य वर्ण्यते

किं महत्त्वमखिलात्मनो गुरोः ॥

— — — — — — — — ।

अथ सत्यज्ञानानन्दाद्वितीयः परमात्मा भगवान् नारायणः — — — — प्राणिनामभ्युदयनिःश्रेयसार्थमुपायोपेयतया स्थितं कर्म्मज्ञानलक्षणं वेदार्थं मरीच्यादिभ्यः सनकादिभ्यश्च उपदिदेश । — — — — — — — — तस्य वसिष्ठरामसंवादं दिव्यज्ञानसम्पन्नो भगवान् वाल्मीकिः द्वाविंशत्सहस्रैः श्लोकैर्निबबन्ध । इत्यादि ।

End. असंवेदनं तूष्णीम्भाव इति । यच्च नैष्कर्म्मं प्रस्तुतं तन्न्याय उपसंहार इति सर्व्वं समञ्जसं ।

Colophon. इति संसारतरणिनाम्नि वासिष्ठविवरणे निर्व्वाणप्रकरणयोगसप्तभूमिकोपाख्यानं चिचत्वारिंशत्तमः सर्गः । शुभमस्तु । संवत् १५८१ ।

विषयः । योगवासिष्ठरामायणीयनिर्व्वाणप्रकरणस्य व्याख्यानम् ।

No. 2866. श्यामातापन्युपनिषत् । Substance, country-made paper, 9 × 3½ inches. Folia, 3. Lines, 8 on a page. Extent, 42 ślokas. Character, Nágara, Date, ? Place of deposit, Puri. S'aṅkara Áchárya's Maṭha. Appearance. fresh. Prose. Incorrect.

S'yámátápanyupanishat. An Upanishad inculcating the divinity of S'yámá, a form of Durgá. The work is devoted to the Víja-[illegible]tra [illegible] the goddess. Anonymous.

[illegible]ing. ओं अथ हैनं ब्रह्मरन्ध्रे ब्रह्मरूपिणीमाप्नोति शुभगां चिगुणितां मुक्तां [illegible]न्दिरां चिन्दुमेलनरूपां समष्टिरूपिणीं । इत्यादि ।

End. स चावयोर्मिथश्चभूतो भवति इत्याह भगवान् शिवः । निर्व्विकल्पेन मनसा यः सर्व्वम् ।

Colophon. इति श्यामातापणी उपनिषत् ।

विषयः । श्यामाया बीजजपतन्माहात्म्यादिकथनं ।

No. 2867. सिद्धान्तसङ्ग्रहविवृतिः । Substance, country-made paper, 13 × 2½ inches. Folia, 41. Lines, 8 on a page. Extent, 922 ślokas. Character, Bengali. Date, ? Place of deposit, Puri, Śaṅkara Áchárya's Maṭha. Appearance, old. Prose and verse. Incorrect.

Siddhánta-saṅgraha-vivṛiti. A commentary on Bhojarája's treatise entitled *Śiddhánta-saṅgraha*, which treats of the supreme divinity of S'iva. By Somes'vara.

Beginning. सोमं सोमेश्वरं नत्वा सोमसोमार्द्धधारिणं ।

सोमेश्वरेण विवृतो भोजसिद्धान्तसङ्ग्रहः ॥

अथ शब्दब्रह्मणस्तात्पर्य्यमविद्वांसो न परं ब्रह्माधिगच्छेयुः । तदस्य कृत्र तात्पर्य्यमित्यपेक्षायां परमकारुणिको भोजराजो निजशक्तिसिद्धपरमेश्वरत्व + भावे सत्तासमानाख्यब्रह्मणि परकोटौ शिवस्वरूपे सर्व्वेषां पुराणानां मुख्यतस्तात्पर्य्यप्रदर्शनमुखेन तदुपदिशति, शिवरूपेति । मङ्गलपूर्व्वकं पुराणार्थं संगृह्णाति । सच्चिदानन्दमयः परमात्मा शिवः । इत्यादि ।

End. एवञ्च सर्व्वदा सर्व्वत्र सर्व्वेषां + + रूपः शिव एव सर्व्वात्मना उपास्यः । तस्यैव च ईश्वरत्व + देवादिरूपोपाधिकनिरूपितानि तान्यपि सर्व्वैस्तथैव उपास्यानि + इति सिद्धं ।

Colophon. इति त्रैविध्य(द्य)सचेतोपाध्यायसप्तविंशतिशाखाध्यायिसर्व्वाङ्गोपाङ्गपारगप्रतिसत्तसोमयाजिसोमेश्वरविरचिता भोजराजकृतसिद्धान्तसङ्ग्रहविवृतिः परिपूर्णा ॥

विषयः । भोजराजपुराणसिद्धान्तसङ्ग्रहाभिधानसन्दर्भस्य व्याख्यानम् ।

No. 2868. प्रायश्चित्तमनोहरः । Substance, palm-leaf, 15 × 1¼ inches. Folia, 67. Lines, 4 on a page. Extent, 1,273 ślokas. Character, Nágara. Date, ? Place of deposit, Puri, Rághavadása Maṭha. Appearance, new. Prose and verse. Generally correct.

Práyaschittva-manohara. An elaborate digest of rules on expiations. By Murári Mis'ra, son of Kṛishṇa Mis'

Beginning. श्रीमन्मुरारिमिश्रेण क्षणमिश्रस्य सूनुना ।
क्रियते व्यवहारार्थं प्रायश्चित्तमनोहरः ॥

तच्च प्रायश्चित्तं नाम भविष्यदुःखोत्पादकाधर्म्मैविनाशकक्रियाविशेषः । तच्च प्रायश्चित्तातिशये गुरुत्वादादौ महापातकित्वं निरूप्यते । इत्यादि ।

End. यावद्गङ्गाम्बि ++ प्रपतति तपनः शम्भुरम्भोजसंस्थो
यावद् + + + + + + चन्द्र इन्द्रोऽप्युपेन्द्र ।
गोपीनाथप्रसादादिरचितरुचिरः क्षणमिश्रेण तावद्-
ग्रन्थोऽयं कण्ठदेशे विलुठतु सुतिनां हारवत् सज्जनानां ॥

Colophon. इति प्रायश्चित्तमनोहरः समाप्तः ।

विषयः । प्रायश्चित्तलक्षणं । ब्राह्मणनिरूपणं । ब्रह्महत्यादिमहापातकनिरूपणं । कामकृतादिपापलक्षणकथनं । घातकलक्षणादिकथनं । चौर्य्यादिलक्षणकथनं । अर्थशास्त्रधर्म्मशास्त्रयोर्विरोधे समन्वयकथनं । प्रायश्चित्तापवादकथनं । ब्रह्मवधप्रायश्चित्तकथनं । एवं सुरापानादिप्रायश्चित्तकथनं । गोवधप्रायश्चित्तादिकथनं । प्रायश्चित्तप्रशंसाकीर्त्तनं । अनाश्रमिप्रायश्चित्तकथनं । सन्ध्यातिक्रमप्रायश्चित्तकथनं । अभ्यात्मादनप्रायश्चित्तकथनं । पञ्चयज्ञाननुष्ठानप्रायश्चित्तकथनं । असत्प्रतिग्रहप्रायश्चित्तकथनं । अपेयादिपानप्रायश्चित्तकथनं । क्षतनैलाभ्यङ्गस्य मूत्रोच्चारादिप्रायश्चित्तकथनं । देवतानिन्दाप्रायश्चित्तकथनं । व्रात्यप्रायश्चित्तकथनं । गोगमनमुखमैथुनादिप्रायश्चित्तकथनं । अस्पृश्यस्पर्शनादिप्रायश्चित्तकथनं । स्वादिदंशनप्रायश्चित्तकथनं । अग्नौ पादप्रतापनादिप्रायश्चित्तकथनं । व्रणे क्षम्युत्पत्तिप्रायश्चित्तकथनं । पतितप्रायश्चित्तकथनं । ब्राह्मणस्य शूद्रश्वानुगमनादिप्रायश्चित्तकथनं । अभक्ष्यभक्षणादिप्रायश्चित्तकथनं । तच्च लशुनादिभक्षण-प्रायश्चित्तनिरूपणञ्च । वटादिपत्रभोजनप्रायश्चित्तकथनं । एकादश्यादिव्रतभङ्गप्रायश्चित्तकथनं । शूद्रपौरहित्यप्रायश्चित्तकथनं । आर्द्रे भोजनप्रायश्चित्तकथनं । अगम्यागमनादिप्रायश्चित्तकथनं । क्षत्रियादिवधप्रायश्चित्तकथनं । वृक्षादिच्छेदनप्रायश्चित्तकथनं । अविक्रेयविक्रयप्रायश्चित्तकथनं । ब्रह्मचर्य्यात् स्खलनप्रायश्चित्तकथनं । कूटसाक्ष्यप्रायश्चित्तकथनं । दुर्भरणप्रायश्चित्तकथनं । व्रतगर्भसंस्करणकर्त्तुः प्रायश्चित्तकथनं । जातिभ्रंशकरप्रायश्चित्तकथनं । देवतापराधप्रायश्चित्तकथनं । नीलवस्त्रादिधारणप्रायश्चित्तकथनं । प्रायश्चित्ते प्रतिनिधिविवेचनं । स्त्रीणां प्रायश्चित्ते विशेषकथनं । द्रव्यशुद्धिनिरूपणं । भूमिशुद्ध्यादिनिरूपणं । समीचाविवाहप्रायश्चित्तकथनं । गृहदाह प्रायश्चित्तकथनञ्च ।

No. 2869. प्रमाणरत्नमालानिबन्धः । Substance, country-made paper, 14 × 3 inches. Folia, 160. Lines, 10 on a page. Extent, 5,184 ślokas. [illegible] Bengali, Date, ? Place of deposit, Puri, Śaṅkara Áchárya's [illegible] nce, decayed. Prose. Correct.

Pramáṇa-ratnamálá-nibandha. A commentary on Ánanda-bodha's *Pramáṇa-málá,* a treatise on the Vedánta doctrine of evidence. By Anubhútisvarúpa Yati. *Cf.* Hall's "Contributions," p. 159.

Beginning. भूतानां यान्निभूतिस्थितिहृतिभजनं स्याद्यतो भूतयोने-
